॥ श्रीः ॥



श्रीरङ्ग दिव्यदम्पतिभ्यो नमः
श्रीरङ्गनाथ दिव्यमणिपादुकाभ्यां नमः
श्रीमते पादुकासेवकरामानुजमहादेशिकाय नमः
श्रीमते गोपालार्यमहादेशिकाय नमः
श्रीमद्भिः निगमान्तदेशिकापरावतारभूतैः
श्री गोपालार्यमहादेशिकैरनुगृहीतं

आह्निकम्

श्रीमत्परमहंसेत्यादि श्री चिन्नाण्डवन् इति प्रथितैः
श्रीमत्पादुकासेवकरामानुज महादेशिकैरनुगृहीतया


आह्निकार्थप्रकाशिका

व्याख्यया समेतम्
श्रीमद्भिः शुण्डपाळयं रामभद्राचार्यैः विरचितः

आह्निकशेषः च

प्रकाशकः
श्रीरङ्गम् श्रीमदाण्डवन् आश्रमः
2005

॥ श्रीः ॥



श्रीरङ्ग दिव्यदम्पतिभ्यो नमः

श्रीरङ्गनाथ दिव्यमणिपादुकाभ्यां नमः

श्रीमते पादुकासेवकरामानुजमहादेशिकाय नमः

श्रीमते गोपालार्यमहादेशिकाय नमः

श्रीमद्भिः निगमान्तदेशिकापरावतारभूतैः

श्री गोपालार्यमहादेशिकैरनुगृहीतं

आह्निकम्

श्रीमत्परमहंसेत्यादि श्री चिन्नाण्डवन् इति प्रथितैः

श्रीमत्पादुकासेवकरामानुज महादेशिकैरनुगृहीतया

आह्निकार्थ प्रकाशिका

व्याख्यया समेतम्

श्रीमद्भिः शुण्डपाळयं रामभद्राचार्यैः विरचितः

आह्निकशेषः च

सम्पादकः

शो. नरसिह्मराघवाचार्यः

श्रीकार्यम्, श्रीमदाण्डवन् आश्रमः

प्रकाशकः

श्रीरङ्गम् श्रीमदाण्डवन् आश्रमः

2005

First Edition : 1927 Granthaksharam


Second Edition : 2005 Sanskrit

Publisher : **Srimath Andavan Asramam**


Available at : **Srirangam Srimath Andavan Asramam**
31, Desikachari Road,
Alwarpet, Mylapore,
Chennai - 600 004
Phone : 044—2499 3658

Price : **Rs. 250/-**

Lasertypeset & Printed at :
V.K.N. Enterprises,
8/1, Dr. Rangachari Road, Mylapore, Chennai-4 Ph: 24950775



ஸ்ரீரங்கநாதர் - ஸ்ரீரங்கம்



ராயம்பேட்டையில் நம் ஆச்ரமத்தில்
தம் திருமாளிகையில் ஸ்ரீமத் திருக்குடந்தை தேசிகன்
ஸ்ரீ கோபாலார்ய மஹாதேசிகன் - அவதாரம் : புரட்டாசி பூராடம்
(ஸ்ரீமுஷ்ணம் ஸ்ரீமத் ஆண்டவனின் ப்ரதிஷ்டை)



॥ श्रीः ॥



ஸ்ரீமத் ஆண்டவன் - (ஸ்ரீமுஷ்ணம்)

॥ श्रीः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः

॥ संपादकीया विज्ञप्तिः ॥

अवश्यानुष्ठेयत्वेन निगमनिर्णीतानि नित्यादीनि कर्माणि कुर्वन्नेव जिजीविषेन्नर इति शासनम्। श्रुतिस्मृति सूक्तिबाहुल्येन वैविध्येन च निर्णये दुष्करे आचार्याभिमतिप्रमाण प्राबल्यादिपर्यालोडने समीचीनं आह्निकमन्वगृह्णन् तिरुकुडन्दै देशिक इति प्रथिताः श्रीमद्वेदान्तदेशिकापरावतारभूताः श्रीमन्तः गोपालार्यमहादेशिकाः।

तत्रापि वितर्काविधूननार्थं श्रीमत्परमहंसेत्यादि श्रीमच्चिन्नाण्डवन् इति विख्यातैः श्रीमद्भिः श्री पादुकासेवकरामानुजमहादेशिकैः आह्निकार्थप्रकाशिकाभिधा व्याख्या व्यरचि।

सूक्ष्माचारसंजिघृक्षया श्रीमत्पेरियाण्डवन् स्वामिचरणानां अन्तेवासिभिः शुण्डपाळयम् श्रीरामभद्राचार्यैः विरचितः **आह्निकशेषश्च** अस्मिन्नेव ग्रन्थसंग्रहे प्रकाश्यते।

अद्यत्वे अलभ्यानां अत्युत्तमानां प्राचां ग्रन्थानां पुनर्मुद्रणेन महान्तं लोकोपकारं निर्वर्तयद्भिः अस्मदाचार्य सार्वभौमैः श्रीमत्परमहंसेत्यादि श्रीमदाण्डवन् (श्रीमुष्णं) स्वामिचरणैः आज्ञप्ता वयं ग्रन्थत्रितयमिदं पञ्चकालपरायणानां आचार निष्ठानां महते उपकाराय कल्पेतेति विश्वसिमः।


इत्थं आचार्य चरणरेणुः

चेन्नै
27.9.2005

शे.नरसिह्मराघवः

श्रीकार्यम्, संपादकश्च।

॥ श्रीः ॥



श्रीमते वेदान्तरामानुज महादेशिकाय नमः ।
श्रीमते पादुकासेवकरामानुज महादेशिकाय नमः ।
श्रीमते श्रीनिवासमहादेशिकाय नमः । श्रीमते गोपालार्यमहादेशिकाय नमः ।
श्रीमते निगमान्तमहादेशिकाय नमः । श्रीरङ्गनाथदिव्यमणिपादुकाभ्यां नमः ।
तरङ्गमुखनन्दिनीहेमाब्जनायिकासमेत श्री देवनाथ परब्रह्मणे नमः

आह्निकं मूलम्

अखिलभुवनरक्षासाधनायावतीर्णे
कुमतिकलिविलासध्वान्ततिग्मांशुजाले ।
निरवधिकरुणाब्धौ वेदचूडागुरौ मे
भवतु परमभक्तिः * श्रीनिधौ वेङ्कटेशे ॥

आह्निकार्थप्रकाशिकाप्रारम्भः

श्री श्रीवासमुनीन्द्ररूपमनघं कल्याणदिव्योदधिं
जन्मोच्छेदकजन्मदायिनमघस्तोमापहं शेषिणम् ।
नित्यं सुस्थितबन्धुताविलसितं नित्यानृशंस्याश्रयम्
दिव्यज्ञानदमात्मसाम्यजननं श्रीरङ्गिणं संश्रये ॥ १

---

* सर्वतन्त्रस्वतन्त्रे इति पाठान्तरम्

गोपालदेशिकेन्द्रं सेवे यत्सूक्तिशर्करासङ्गात् ।
श्रीनिगममौलिदेशिकसूक्तिपयो भवति सुमनसांभोग्यम् ॥
जयत्याश्रितसन्त्रासनिवारणकृतोदयः ।
सर्वतन्त्रस्वतन्त्र श्रीनिगमान्तगुरूत्तमः ॥ ३
श्री पाञ्चरात्ररक्षानिर्णीता या प्रपन्नदिनचर्या ।
तत्क्रमसङ्ग्रहरूपश्श्रीमद्गोपालदेशिकेन्द्रकृतः ॥ ४
आह्निकसंज्ञनिबन्धश्श्रीपतितद्भक्तनित्यहृद्यो यः ।
तदुपरि केचिदमर्षाद्दोषानापाततोऽवदन् कांश्चित् ॥ ५
तद्दोषनिरसनार्थं तदाह्निकार्थप्रकाशिका टीका ।
श्रीनिगमान्तगुरूत्तमनिबन्धनार्थानुसारिणी क्रियते ॥ ६

इह खलु श्रीनिगमान्तदेशिकावतार इति प्रसिद्धः श्रीगोपालार्य महादेशिकः श्रीनिगमान्त देशिककृत प्रपन्न कर्तव्य भगवत्परिचर्या-प्रकाशक श्री पाञ्चरात्ररक्षायाः प्रमाणन्यायोपन्यासविचारबहुलतया पण्डितानामपि दुरधिगमतां पश्यतां तदर्थतत्त्वाध्यवसायपूर्वकानुष्ठान सौकर्याय चिकीर्षितस्य श्री पाञ्चरात्ररक्षोक्त प्रपन्नकर्तव्य भगवत्परिचर्याक्रम सङ्ग्रहरूपस्य ग्रन्थस्याविघ्नपरिसमाप्ति प्रचय गमनार्थं समाचरितं श्री निगमान्त देशिकभक्तिप्रार्थनात्मकं मङ्गलं शिष्यशिक्षायै स्वकृतसङ्कीर्तनेन तेषां महिष्ठमङ्गलार्थं च ग्रन्थतो-निबध्नाति अखिलेति-वेङ्कटेशे परमभक्तिर्मे भवत्विति सम्बन्धः । भवत्वित्यनेनाशीरूपं, लोकोत्तरगुणविशिष्ट वेङ्कटेशावताराचार्य-सङ्कीर्तनेन "जयति सकल विद्यावाहिनीजन्मशैलः" "जयत्याश्रित-सन्त्रासध्वान्त विध्वंसनोदयः" "सा जयति सरस्वती देवी" इति ।

श्री सर्वार्थसिद्धि, रघुवीरगद्य, वासव दत्तामङ्गल श्लोकवत् वस्तुनिर्देशरूपं च मङ्गलं सूचितम् । "पाराशर्यवचस्सुधे"त्यत्र "स्तुत्यात्मक गुरूपासनरूप मङ्गलाचारश्चार्थतः क्रियत" इति

श्रुतप्रकाशिकायामुक्तम् । भजनौपयिक गुणविशेषानाह–अखिलेत्यादिना। भुवनशब्दः क्षेत्रज्ञपरः 'त्रिभुवनं सम्प्रत्यनन्तोदयं' इति चतुश्लोकीस्थ त्रिभुवन शब्दवत्, अखिलशब्दः ब्राह्मणादि-सर्वजातीयकात्स्न्र्यपरः, भगवद्वाचकाकारोपक्रमत्वसिद्धये निखिले-त्युनुक्तिः - अकारस्य भगवद्वाचित्वं श्री तत्वटीका श्रुतप्रकाशिकादौ प्रदर्शितं तेषां रक्षा अनिष्टनिवृत्तिपूर्वकेष्टप्रापणपर्यन्तो व्यापारः तत्साधनाय तत्सिद्धये अवतीर्णे स्वसङ्कल्पकृतविग्रहवति भक्तेः त्रैवर्णिकप्राज्ञशक्त विलम्बक्षमाधिकारिकत्वेन तदनधिकारिणां सर्वजातीय मुमुक्षूणामपेक्षितसमये सर्वानिष्ट निवृत्तिपूर्वक परिपूर्ण-ब्रह्मानुभव कैङ्कर्यप्रयोजकप्रपत्तिविद्याङ्गाङ्ग्याद्दिप्रपन्नकर्तव्य कैङ्कर्यादि निर्णयोपदेश बहुप्रबन्धनिर्माण तत्स्थापनाद्यर्थ मवतीर्ण इति यावत्॥

यथा श्रियःपतिः साधुपरित्राणार्थमवतरति तथाऽऽचार्यो-पीत्यवतीर्णपदेन व्यज्यते।

ननु प्रपत्तेः स्वतन्त्रतया मोक्षसाधनत्वं प्रपन्नाचारादिकं च बहूपपाद्याक्षिप्तं, तत्प्रमाणजातमप्यन्यथा व्याख्यातं तत्कथं स्वतन्त्रप्रपत्तिमूलक परमपुरुषार्थलाभादिकमित्यत्राह–कुमतीति । कुमतयः सम्यक् ज्ञानहेतुभगवद्भक्त्यादिविरहिततयाऽनादिपाप-वासनादूषिताशेषशेमुषीकतया च कुत्सितबुद्धयः तेषां कलिविलासः सम्यङ्न्यायप्रमाणापेत कुयुक्त्युपन्यासः तस्य ध्वान्तत्वरूपणेन सम्यक्प्रकाशविरोधित्वं द्योत्यते । तत्र तिग्मांशुजाले अन्धकार-समकुमति कुयुक्त्युपन्यासनिश्शेषनिरासक प्रपत्त्यङ्गाङ्गिप्रपन्न धर्मादिप्रमाणन्यायविचारात्मक श्रीरहस्यत्रयसार निक्षेपरक्षा श्रीपाञ्च-रात्ररक्षा सच्चरित्ररक्षादिबहुग्रन्थरूपतीक्ष्णकिरणवतीति यावत् अनेन कुमत्युपन्यासनां अभासता ज्ञानपूर्वकसम्यङ्न्यायनिरूपणाधीन-

प्रपत्त्यादिशास्त्रार्थसम्यङ्निर्णयसम्भवात् प्रपत्तिहेतुकपरमपुरुषार्थ-लाभः अत्रत्यकैङ्कर्यादिकं च सर्वसुलभमिति फलितम्। एतादृशक्षेत्र-ज्ञोपकारे हेतुमाह–निरवधीति । प्रसिद्धसमुद्रापेक्षया विशेषपरः निरवधिशब्दः, अनेन करुणाया अपारत्वं अक्षयत्वं तापहरत्वं वीचीतरङ्ग समलोकोत्तरबहुग्रन्थनिर्माणहेतुत्वं च व्यज्यते । एतादृशमहिम्नि प्रसिद्धं प्रमाणमाह – वेदचूडेति । प्रतिपक्षनिरसन-सिद्धान्तस्थापनसन्तुष्ट श्रीरङ्गनाथदत्तं ''स्वकमिति हरिदत्तं तेन देवेन दत्तां वेदान्ताचार्यसंज्ञां'' इति स्वेनैवोक्तं वेदान्ताचार्यत्वमेवोक्त महिमनिर्णायकमिति भावः । प्रबन्धनिर्माणौपयिकसार्वज्ञमाह–श्रीनिधाविति। ''ऋचस्सामानि यजूंषि'' 'सा हि श्री'रिति श्रुतिप्रतिपन्न ऋगादिशब्दोपलक्षित सकलवेद तदुपबृह्मणादिसर्वविद्या निधावित्यर्थः। अनेन सर्वतन्त्र स्वतन्त्रत्वं व्यज्यते, वेङ्कटेश इति श्रीनाम, तेन श्रीनिवासावतार रूपत्वं विवक्षितं, कचित् सर्वतन्त्र स्वतन्त्रे इति पाठः, तदर्थबोधक श्रीनिधि पदयुक्तः असाधारण नामधेय वेङ्कटेशपदसहितः पाठ एव युक्तः। परमभक्तिरिति। भक्तिः–स्नेहपूर्वक-मनुध्यानं, 'स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयत' इति वचनात्, तत्र पारम्यं अविच्छिन्न स्मृतिसन्ततिप्रत्यक्ष समानाकार प्रीतिरूपत्वं, सा च ''यस्य देवे पराभक्तिः यथा देवे तथा गुरौ'' इति श्रुति प्रसिद्धा मे प्रतिबन्धकपापरहितस्य मम, शान्तपित्तस्य हि क्षीरस्वादुताबुद्धिः भवत्विति तादृश भक्तिप्रीताचार्य पादप्रसादेनोपदिष्टशास्त्रार्थसम्यक् ज्ञानप्रकाशः ग्रन्थकरणौपयिक समीचीन प्रतिभालाभः ग्रन्थसमाप्तिप्रचयगमनादिकं च सिध्यतीति हृदयम्। ''आचार्यस्य प्रसादेन मम सर्वमभीप्सितम्। प्राप्नुयामिति विश्वासः यस्यास्ति स सुखी भवेत्'' इत्यादिकमिह भाव्यम्। श्रीभाष्ये भगवद्भक्ति प्रार्थनवत्

अत्र्यन्ववायकलशोदधिपूर्णचन्द्रं
श्रीकृष्णदेशिकपितृव्यदयैकपात्रम्।
श्रीवत्सगोत्रवरदार्यविवृद्धबोधं
श्रीकृष्ण देशिकमहं शरणं प्रपद्ये ।। २

अत्राचार्यपादभक्तिप्रार्थनेनाचार्यस्य भगवदवतारत्वं द्योतितम् । श्रीभाष्यमङ्गल श्लोकवदत्र 'न' गणारम्भात् "आयुः पूर्ति निदानत्वादविघ्नायैव कल्पते" इति श्री तत्वटीकोक्तरीत्याऽध्येतॄणां चिरायुः प्रदत्वं सिद्धम्। तदुक्तं – छन्दोविद्भिः "मो भूमिस्त्रिगुरुश्शुभं वितनुते" इत्यारभ्य 'न स्वश्चिरायुस्त्रिलः" इति। अत्राचार्यपादभक्ति-प्रार्थनेन तद्ग्रन्थ यथावस्थितार्थज्ञानं तद्भक्तस्यैव नान्यस्येत्यवगमात् आचार्यपादग्रन्थार्थसङ्ग्रहरूपस्य प्रकृताह्निकस्य सर्वथा तदभिप्रायानु-सारित्वं देशिकपादभक्ति प्रार्थना विरहिताह्निकान्तराणामतथात्वं च सद्भिरनुसन्धेयम्।। १ ।।

(व्याः-) अथ स्वस्य श्री निगमान्तदेशिकभक्तिमूलतद्ग्रन्थार्थ-सङ्ग्रहणशक्तेः स्वाचार्यानुग्रहोपदेशमूलत्वात् मङ्गलभूयस्त्वार्थं स्वाचार्य शरणवरणरूपं मङ्गलं निबध्नाति–अत्र्यन्ववायेति ।। श्रीस्तोत्र-भाष्ये "उक्तं च गुरोरपि प्राप्य प्रापकभावेन संश्रयणीयत्वं सात्वत तन्त्र" इत्यादिना "उपायोपेयभावेन तमेव शरणं व्रजेत्" इत्यन्तेनानुगृहीतं गुरुविषयशरणवरणमिह क्रियते । "देवताया गुरोश्चापि मन्त्रस्यापि प्रकीर्तनात्। ऐहिकामुष्मिकी सिद्धिर्द्विजस्यास्ते न संशयः" इति तत्र त्यवचनानुसारेण स्वाचार्यस्तुत्यात्मक मङ्गलमप्यत्राभिप्रेतम् । अन्वयस्यात्रिसम्बन्धकथनेन श्री रामायणादौ "ब्राह्मणं न हन्यात्'

वेदान्तलक्ष्मणमुनिं मम देशिकेन्द्रं
वेदान्तरङ्गवचसं जगदेकभाग्यम्।
वेदान्तदेशिकगिरामपि(धि)जीवनोक्तिं
वेदान्तयुग्मविहृतिं शरणं प्रपद्ये ।। ३

'आत्रेयं न हन्यात्' इत्यादौ च महाभागवतातिमहिमप्रसिद्धमहर्षि-सम्बन्धरूपोत्कर्षस्सूचितः । अनुगृहीतं मीमांसापादुकाविवरणे । ''वन्देयात्रेयरामानुजगुरुं'' इत्यत्र परमभागवतात्रिकुलसम्भवेन विष्णुभक्तकुलधौरेयत्व'मिति तस्य कलशोदधित्वरूपणेन भगवदाचार्यभक्तिज्ञानादि विशुद्धयतीन्द्रमाहानसिकाद्याचार्यमुखेना-मृतप्रदत्वं तापहरत्वं च व्यज्यते । तत् पूर्णचन्द्रं स्वगुणेन तदन्वयवतामतिशयाह्लादरूपाभिवृद्धिकरम्। तथाविधगुणवत्त्वे हेतुमाह – श्रीकृष्णदेशिकेति । श्रीवत्सवंशवरदेति च । सदाचार्यकृत सदुपदेश तदनुग्रहाधीनं तादृशगुणवत्त्वमिति भावः । श्रीकृष्णदेशिकं 'नास्याब्रह्मवित्कुले भवति' इत्युक्त स्वब्रह्मवित्त्वनिदान ब्रह्मज्ञानयुक्तं स्वतोनुग्रहशीलं स्वसत्तायोग्यतापादकसंस्कारमन्त्राद्युपदेशकृतं पितृव्यचरणं अन्धकारनिवर्तकम्। अहं तथाविधाचार्यपुत्रत्व तत्समाश्रयणौपयिकसुकृतशाली । शरणं प्रपद्ये । निरपेक्षरक्षकत्वेनाध्यवस्यामि । स्वग्रन्थनिर्विघ्नपरिसमाप्ति प्रचयगमनौपयिक सामग्री विरहरूपमा-किञ्चन्यमुत्तमपुरुषविवक्षितम् । उक्ताकिञ्चन्ययुक्तः तथा विधस्समाप्त्याद्युत्पादनभरमाचार्ये समर्पयामीति फलितम् । एतदनु-बन्धिपदार्थप्रमाणादिकं श्रीद्वयाधिकारादावनुसन्धेयम्।। २।।

(व्या :-) अथ स्वस्य श्रीभाष्य श्री रहस्यत्रयसारादि संप्रदाय-ग्रन्थोपदेशानुग्रहादिभिः श्रीनिगमान्तदेशिक ग्रन्थार्थ सङ्ग्रह करणानु-

गुण बुद्धिशक्त्याद्युत्पादनेन परमोपकारिणं श्री देशिकावतारस्य स्वस्य श्रीसङ्कल्पसूर्योदयानुसंहित प्रश्नोत्तर निर्वहणार्थं श्रीभाष्यकारावतारस्य साक्षात्स्वामित्वेन तदैतिह्यवित्प्रशंसितस्य स्वश्रेष्ठतमाचार्यस्य शरण-वरणं मङ्गलभूयस्त्वार्थमाचरन् निबध्नाति–वेदान्तलक्ष्मणमुनिमिति । वक्ष्यमाणगुणापेक्षया श्री देशिकचरण भाष्यकारनामघटितनाम्नोति भोग्यत्वव्यञ्जनाय प्रथमं समाख्यानिर्देशः, मम प्रतिबन्धकपाप-रहितस्य तादृशाचार्य सम्बन्धेहेतु महत्तरभाग्यशालिनो मम देशिकेन्द्रं श्री कृष्णदेशिक श्री पादुकासेवक रामानुज महादेशिकयोः स्वाचार्यत्वेऽपि "साक्षान्मुक्तेरुपायान् यो विद्याभेदानुपादिशत्" इत्याचार्यपादोक्ताव्यवहित मोक्षोपाय निर्वर्तकत्वादिभिर्देशिकश्रेष्ठं, सकल श्रेयस्साधन तत्वहित पुरुषार्थावबोधिवेदतत्वार्थोपदेशप्रकारमाह –वेदान्तरङ्गवचसमिति । "यद्वै किञ्च मनु रवदत्" "क्रीडार्थमपि यद्ब्रूयुः" சொல்லுமவுடு சுருதியாம்" इत्युक्त प्रक्रिययाऽऽचार्य-यादृच्छिकवचनमपि श्रुत्यन्तरङ्गमिति सूचनाय वचश्शब्दः, तथा विधाचार्योपदेशलब्धज्ञानमूलकः प्रकृतस्वग्रन्थः श्रुत्याद्यत्यन्तानुगुण इति भावः । तथाविधवचोवत्वे हेतुमाह – जगदिति । तत्वहितादि यथावत्प्रकाशन पूर्वक पूर्वाचार्यसम्प्रदायप्रवर्तनप्रबन्धनिर्माणाश्रितदुरित निवारणापवर्गहेतुविद्यानिष्पादनादिना सुजनासदृश भाग्यातिशयमिव मूर्तिमन्तमित्यर्थः। प्रकृतग्रन्थनिर्माणोपयोगि श्री देशिकनिबन्धनार्थ यथावस्थितज्ञानसम्पादकत्वमाह - वेदान्तेति । श्री वेदान्तदेशिक-ग्रन्थानां स्वतः सुभाषितत्वेऽपि कैश्चिदपार्थकल्पनेन विपरीतार्थता-भ्रमविषयाणां यथावस्थित निस्संशयार्थप्रकाशकप्रबन्धादि-दिव्यसूक्तियुतमित्यर्थः । वेदान्तदेशिकगिरामधिजीवनोक्तिमिति पाठेऽप्यय-मेवार्थो बोध्यः । आचार्यगुणपौष्कल्यज्ञापनाय मुख्य

श्रीपाञ्चरात्ररक्षोक्तः
प्रपन्नानां महात्मनाम्।
भगवत्परिचर्यायाः
क्रमस्सङ्गृह्यतेऽधुना॥ ४

मुख्यगुणमाह– वेदान्तयुग्मेति। "श्रोत्रियं ब्रह्मनिष्ठं" "अनघं श्रोत्रियं ब्रह्मनिष्ठं" इत्युपनिषदाचार्य श्रीसूक्तिसिद्धप्रयोजनान्तरवैमुख्य-श्रुतवेदान्तत्वादिकमिहाभिप्रेतम् । विहृतिशब्देन वेदान्तद्वयप्रवचन तद्विषयग्रन्थनिर्माणादावत्यन्तरुचिः आयासाभावश्च व्यज्यते । शरणं प्रपद्ये इति । पूर्ववदर्थः । एतादृश महादेशिकोपदेशानुग्रह विशेषलब्ध विशुद्धज्ञान तदनुग्रहादिमत्तया स्वस्य प्रकृतग्रन्थनिर्माणे निश्शङ्कप्रवृत्तिरिति हृदयम्॥

(व्या :-) ननु पूर्वकालिकानेकाह्निकग्रन्थसत्त्वादयमपूर्वाह्निक-ग्रन्थः किमर्थ इत्यत्र तेषां श्रीपाञ्चरात्ररक्षाद्याचार्य निबन्धनाननुसार-विरोधादि दोषग्रस्तत्वेन तदनादरेण प्रकृताह्निकनिर्माणं सार्थकमभिप्रयन् विषयप्रयोजनादि सूचनपूर्वकं चिकीर्षितं प्रतिजानीते– श्री पाञ्चात्रेति। प्रपत्त्यधिकाराङ्गाङ्गत्याद्यनुष्ठानादिकं यथाचाऽऽर्यपाद-बहुनिबन्धनविशोधितप्रकारेणानुष्ठीयते तता प्रपन्नानुष्ठेय दिनचर्या प्रकारोपि तन्निबन्धनानुसारेणैवानुष्ठेय इति भावः । आचार्यपादप्रशिष्यघटिकाशतवरददेशिकशिष्य शठकोपमहादेशिकैरा-चार्यपादानुगृहीतप्रपन्नदिनचर्याक्रम एव परिगृहीतः। सहस्रनामभाष्ये – "युधिष्ठिरश्शान्तनवं पुनरेवाभ्यभाषत" इत्येतद्व्याख्याने "पुनः प्रश्नश्च भीष्मेणात्मनीनतया स्वीकृतं मतं ज्ञातुं "को धर्मस्सर्वधर्माणां" इत्यनन्तरोक्तेः तच्च सदाचारप्रावण्यात्, सन्तोष्याचार्यनिष्ठा-

मन्विष्य तद्रुचिपरिगृहीतमित्येव तत्त्वं हितं च रोचयन्ते न तु प्रामाणिकत्वमात्रेण'' ॥ इत्याचार्य परिगृहीतस्यैव ग्राह्यत्वोक्तेः । अतः श्री शठकोप महादेशिकाद्यभिमतमेव प्रकृताह्निककरणमिति बोध्यम्। श्री पाञ्चरात्ररक्षोक्तः तत्रैव प्रपन्नकर्तव्यभगवत्परिचर्यायाः क्रमः प्रमाणोपपत्तिभ्यां निर्णीतः । केवलधर्मशास्त्रतन्निबन्धनादिकं न तादृशमिति भावः । महात्मनां अनन्यप्रयोजनत्वानन्यदेवताकत्वरूपपारमैकान्त्यव्यवसितधियां, प्रपन्नानां भगवत्परिचर्यायाः क्रमः, पाञ्चकालिकविधया अहोरात्रकृत्यरूपभगवत्कैङ्कर्य तदवान्तरभेदक्रमः एकैक कैङ्कर्यारम्भप्रभृति तदवसानतदुत्तरकैङ्कर्योपक्रमावसनादितत्तदनुष्ठानक्रमः, अधुना, देशिकपादस्वाचार्यविषयमङ्गलनिबन्धनान्तरं, सङ्गृह्यते, संक्षेपेण कथ्यते, मयेत्यध्याहार्यम् । भगवत्परिचर्याक्रमो विषयः । तत् ज्ञानपूर्वककैङ्कर्यानुष्ठानं प्रयोजनम् । सम्बन्धश्च प्रतिपाद्यप्रतिपादक भावः । प्रपन्नोऽधिकारीत्यनुबन्धिचतुष्टयं प्रेक्षावत्प्रवृत्त्यङ्गं सूचितम् । दक्षस्मृत्यादिषु कालाष्टकादिविभागेन दिनचर्योपदेशोऽपि वैष्णवानां पञ्चकालविधयैव दिनचर्यानुष्ठानस्य दक्षाद्युक्तकालाविरोधस्य च श्री पाञ्चरात्ररक्षायामनुगृहीतत्वात् पाञ्चकालिकप्रक्रिययैव दिनचर्याक्रमस्सङ्गृह्यत इति हृदयम् । ननु पाञ्चकालिकधर्मः भगवच्छास्त्रविहितचक्राब्जमण्डलदीक्षासंस्कृताधिकारिविषयः ''अनेन विधिना यस्तु दीक्षितश्चक्रमण्डले'' इत्यदिना ''सूरिस्सुहृद्भागवतः सात्वतः पञ्चकालवित्'' इत्यन्तेन पाद्मवचनेन ''चक्राब्जमण्डले शुद्धे सर्वाभीष्टफलप्रदे । यस्माद्भगवता साक्षात् मया दीक्षाविधिः कृतः'' इत्यादिना ''तस्मात्तु भगवद्वंश्याः पञ्चकालपरायणाः'' इत्यन्तेन

वामनसंहितावचनेन च तस्यैव पाञ्चकालिकत्वोपदेशादिति चेन्न । उक्तदीक्षावत इव पञ्चसंस्कारदीक्षावतामपि पाञ्चकालिकधर्मस्य भगवच्छास्त्रादिसिद्धत्वात् । खगप्रश्नसंहितायां ''दीक्षितः पञ्चसंस्कारैः पञ्चकाल परायणः । आत्मार्थं वा परार्थं वा नित्यं हरिमुपासते'' पराशरसंहितायां ''दीक्षितः पञ्चसंस्कारैरर्थपञ्चक तत्ववित् । पञ्चकालपरो यस्तु वैष्णवो मन्त्र वित्तमः ॥ पौरुषेण विधानेन श्रीमदष्टाक्षरेण वा । मन्त्रद्वयेन वा कुर्यात् त्रिकालं पूजनं हरेः । शेषशेषित्वसम्बन्धज्ञानभक्ति समन्वितः । आत्मार्थं वा परार्थं वा न च देवलको भवेत् ॥'' एवं, भारद्वाजपरिशिष्टप्रथमाध्याये ''अष्टमात् षोडशाब्दाद्वा कुर्याच्चक्रादिभूषणम् । प्रतप्तैरङ्कनं पश्चात् सदा वा भूषणं स्त्रियाः । शिष्य पुत्रकलत्राणां भृत्यानां च गवामपि । कुर्यादचेतनानां च वैष्णवं नाम लक्ष्म च । आमाह्यतप्ततनवस्तप्ताङ्गा हरिलाञ्छनैः । श्रितास्सभोगतां प्राप्य भुञ्जते परमात्मना'' इत्यादिना तापोर्ध्वपुण्ड्रधारणं प्रतिपाद्य ''क्रमात्तभगवन्मन्त्रः कल्पविच्छुद्ध-मानसः । धृतोर्ध्वपुण्ड्रश्चक्रादिलाञ्छितो हरिमर्चयेत्'' इति तापाव-लम्बनेन भगवदर्चनं विहितम् । एवं वासिष्ठसंहिताशाण्डिल्य स्मृतिवृद्धहारीतस्मृत्यादिषु पञ्चसंस्काररूपदीक्षावलम्बनेन पाञ्च-कालिकविधिर्द्रष्टव्यः । श्री सच्चरित्रक्षाप्रथमाधिकारे – श्रुतिस्मृति-पाञ्चरेत्रेतिहासपुराण वचनैरुक्तार्थस्स्थापितः । यद्यपि ''परार्थयजनं कुर्युर्विप्रा मुख्यानुकल्पयोः । नैवाधिकारिणो गौणा दीक्षासंस्कार-वर्जिताः । अन्यैः कृता तु या पूजा दीक्षासंस्कारवर्जितैः । परार्थे निष्फला ज्ञेया सर्वदोषयुता भवेत्'' इत्यादिभिः पाद्मवामनसंहितादि-वचनैश्चक्राब्जादिदीक्षाविरहिणां परार्थ यजनं निषिद्धम् । तथापि

खगप्रश्नपराशरसंहितादिवचनैः पञ्चसंस्कारवतामपि परार्थयजनस्य विहितत्वात् उदाहृतनिषेधवचसां नहिनिन्दान्यायेन चक्रादिदीक्षायुक्त प्राशस्त्यपरत्वमङ्गीकार्यम् । लोकेऽपि तथाऽनुष्ठानं दृश्यते । आलये परार्थयजनं गृहे स्वार्थयजनमिति वामनसंहितात्रयस्त्रिंशाध्याये विस्तरेण प्रदर्शितम् । अतः प्रपन्नानां पाञ्चकालिकधर्मो निराबाध इति । ननु भट्टोजिकृततत्वकौस्तुभे, पञ्चरात्रप्रामाण्यं तप्तचक्रादिधारणं च निराकृतम् । तद्विषयप्रमाणानां वेदानधिकृतशूद्रादिविषयत्वं स्थापितम्। तत्कथं त्रैवर्णिकानां पञ्चरात्रविहितपञ्चसंस्कारपाञ्च-कालिकधर्मपरिग्रह इति चेत्, अतिमन्दमेतत्, पञ्चरात्रप्रामाण्यस्य महाभारतादिप्रमाणोपपत्तिभिः श्रीमदागमप्रामाण्य श्रीभाष्य श्रुतप्रकाशिकाश्रीरङ्गराजस्तवाधिकरणसारावली श्रीपाञ्चरात्ररक्षा-परमतभङ्गन्यायपरिशुद्धिपरिकरविजयादिषु परपक्षप्रतिक्षेपपूर्वकं स्थापितत्वात्। पञ्चरात्रा-प्रामाण्यात्त्यैवर्णिक विषयत्वबोधकवचनानां तामसपुराणस्थानां श्रुतिस्मृतिपञ्चरात्रेतिहाससात्विकपुराण वचनै-र्भूयोभिर्भगवत्परत्रैवर्णिकपञ्चसंस्कार पाञ्चकालिकधर्मस्थापनेना-प्रमाण्यं स्वीकार्यम्। ''अग्नौ प्रतप्य विधिवत् धारयेद्भक्तिसंयुतः'' इति श्रीसच्चरित्र-रक्षोदाहृतसनत्कुमार संहितावचनेन विधिपूर्वकचक्रादि-धारणं विहितमिति निषेधवचसामविधिपूर्वाग्नितप्तचक्रादिधारणपरत्वं स्वीकार्यम्। वैकुण्ठदीक्षितीयेऽपि तथोक्तम्। शङ्करभाष्ये पञ्चरात्राधि-करणे ''यदपि तस्य भगवतोभिगमनादिलक्षणमाराधनमजस्रमनन्य-चित्ततयाऽभिप्रेयते तदपि न प्रतिषिध्यते। श्रुतिस्मृत्योरीश्वरप्रणिधानस्य प्रसिद्धत्वादित्यभिगमनादिरूपभगवद्भजनमङ्गीकृत्य जीवोत्पत्त्याद्यंशे पञ्चरात्राप्रामाण्यमुक्तं अभिगमनाद्यङ्गीकारे तदङ्गसुदर्शनादिधारण-

मप्यङ्गी-कृतमेव। भट्टोजिनाऽपि मध्वभाष्य दूषणप्रवृत्तेन तत्वकौस्तुभे उपक्रमे ''शाङ्करादपि भाष्याब्धेस्तत्वकौस्तुभमुद्धरे'' इति शङ्कर-भाष्यानुसारं प्रतिज्ञातवता भाष्याभिमताभिगमनादितदङ्गसुदर्शनादि-धारण निन्दनरूपाचार्याभिमतविपरीत भाषणजनितपापभीतेन प्रथमपरिच्छेदान्ते अहृदयवचसामिति न्यायेन परं पिशाचभाषया पिशाचं बोधयितुं दिङ्मात्रं दर्शितं, न तु वास्तवाभिप्रायेणेति, क्षन्तव्यमिदं साहसिकत्वं गुणग्राहिभिस्सूरिभिरिति पञ्चरात्रप्रामाण्य-सुदर्शनादिधारणनिन्दारूपं स्ववाक्यं साहसकृतमवास्तवं चेति स्पष्टमभिहितम् । द्वितीयपरिच्छेदे मध्वभाष्यदूषणान्येव विस्तरेण प्रपञ्चितानि । परमतभङ्गे ''இதுக்கு एकदेशविरोधं சொல்லுகிற अद्वैतिகளும் अभिगमनादयः क्रियन्तां नाम என்று अनुज्ञै பண்ணினார்கள்.'' इत्यनुगृहीतम्। अत एव पञ्चरात्राधिकरणे मध्यस्थेन कल्पतरुकारेण ''पञ्चरात्रस्य पुराणेषु बुद्धादिदर्शनवत् व्यामोहनार्थ-मीश्वरप्रणिहितत्वा श्रवणात्'' इत्युक्तम् । अतः श्रीपाञ्चरात्रविहित-पञ्चसंस्कारपाञ्चकालिकधर्मानुष्ठानादिकं प्रपन्नत्रैवर्णिकानां निराबाध-मिति । वैखानसैरपि पञ्चसंस्कारः कार्यः - श्रीसच्चरित्ररक्षायां - श्रुतिस्मृतीतिहासपुराण पञ्चरात्रैस्सुदर्नादिधारणस्थापनावसारे - ''ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैश्च कृतलक्षणैः । अर्चनीयश्च सेव्यश्च नित्य युक्तैः स्वकर्मसु ॥ सात्वतं विधिमास्थाय गीतस्सङ्कर्षणेन यः'' इति भारतवचनमुदाहृत्य कृतलक्षणशब्दस्यकृतचक्रादिचिह्नपरत्वमेव नार्थान्तरपरत्वमिति सोपपत्तिकमनुगृहीतम् । तदेव वचनं श्री पाञ्चरात्ररक्षायामुदाहृत्य ब्राह्मणसामान्यान्तःपाति वैखानसैरपि चक्रादिधारणपूर्वकभगवच्छास्त्रविहिताराधनं कार्यमिति निर्णीतम् ।

अत्यन्तानुष्ठापकतया वैखानसपरिगृहीते अर्चनानवनीते ''पञ्चसंस्कारसंपन्ना वैखानसविधानतः । आकारत्रयसम्पन्ना अर्चेयुर्मन्दिरे हरिं'' इति वचनेन तेषां पञ्चसंस्कारवत्त्वं प्रतिपादितम् । मध्यस्थमाधवीयवैद्यनाथीयादि धर्मशास्त्रनिबन्धनेष्वेकादशीनिर्णये वैखानसाद्यागमोक्तदीक्षायुक्तो हि वैष्णवः ॥ परमापदमापन्नो हर्षे वा समुपस्थिते ॥ नैकादशीं त्यजेद्यस्तु यस्य दीक्षा तु वैष्णवी ॥ इति वचनमुदाहृत्य वैष्णवैकादशीव्यवस्था कृता तत्र दीक्षाशब्दः पञ्चसंस्काररूपदीक्षापरः । श्री न्यायपरिशुद्धौ श्री पाञ्चरात्रवैखानसयोर्भगवच्छास्त्रैककण्ठत्वं विखनस्सूत्रतदनुसारिभार्गवादिचतुष्कप्रामाण्यं स्थापयद्भिर्वैखानसा ब्राह्मण्य निकृष्टजातित्वादि निराकरणपूर्वकं सर्वोत्कृष्टब्राह्मण्यं स्थापितम् । ''वर्णाश्रमधर्माणामनुकलं नारायणपरत्वप्रतिपादनादेरपि सत्वमूलत्वेन प्रामाण्यैकहेतुत्वादिति'' श्री न्यायपरिशुद्ध्यनुगृहीतप्रकारेण नारायणपारम्यतदाराधनवर्णाश्रमधर्मविधिवादिना विखनसा तदनुसारि भृग्वत्र्यादिभिस्तदनुसार्यधिकारग्रन्थकारैश्च श्रुतिभगवच्छास्त्रस्मृतिपुराणविहिततापादिसंस्कारे अनङ्गीकारः केनापि वक्तुं न शक्यते। बहोः कालादारभ्याद्यापि परनिर्बन्धमन्तरा वैखानसेषु पञ्चसंस्काराचरणं तत्र तत्र दृश्यते। यदत्र वैखानसभूषणे भगवच्छास्त्रविद्वेषिणा श्रीनिवासदीक्षितेन पूर्वोक्तवैखानसशास्त्रनिबन्धनाद्यनुदाहृतान्यदृष्टमूलकानि पञ्चरात्रवचनतया कानिचिद्वचनानि चोदाहृत्य पुंसवनसीमन्तोन्नयनसमय एव चक्रादिलेखनयुक्तक्षीरप्रदानेन वैखानसानां चक्रादिधारणसिद्धिरित्युक्तं न तप्तचक्रादि धार्यमिति, तत्पामरप्रतारणमात्रं तथा प्रमाणाभावात्, वैखानसभूषणग्रन्थमूलकमेवेदानीं वैखानसानां केषांचित् सुदर्शनाद्य-

धारणं, अतस्तद्ग्रन्थ आग्रहमूलकः अविश्वसनीय इति बोध्यम् । श्री पाञ्चरात्ररक्षापरमतभङ्गादिषु वैखानसे पञ्चरात्रनिन्दावचनवत् पञ्चरात्रे वैखानसनिन्दावचनानि सन्तीति तेषां नहिनिन्दान्यायेन स्वशास्त्रस्तुतिपरत्त्व मेव न निन्दापरत्वमित्यनुग्रहीतम् । वैखानस-प्रशंसावचनसत्वे तत्प्रस्तावः कृतस्स्यात् । चतुर्णामाश्रमाणां तापसंस्कारे अधिकारः "स्वाग्नौ कुर्यात् ब्रह्मचारी तप्तचक्रादिधारणम् । पञ्चरात्रोक्तविधिना मन्त्ररूपं विधानतः ॥ स्वाग्नौ कुर्याद्गृही तद्वत् वानप्रस्थस्तथैव च । कुर्याद्देवालयाग्नौ च सन्यासी होममार्गतः" इति पराशरसंहिता चतुर्थाध्यायवचनसिद्धः सन्यासिनो देवालयाग्नौ होमविधानं ग्रामान्ते देवगृहे शून्यागारे इति यतिधर्मसमुच्चय-स्थवसिष्ठवचनावगतदेवालयावास दशाभिप्रायेण देवालयभिन्नदेशवासे तदन्याग्नितप्तसुदर्शनादिधारणानुष्ठानदर्शनात् होमश्च शिष्यगृहस्थेन कार्यः होळकाधिकरणन्यायानुगुणाविगीतशिष्टाचारात्पूर्वाचार्य-सम्प्रदायाच्च । "यद्यप्येते श्रुतिस्मृत्यादयो न सन्दृश्येरन् तथाऽपि नेदमानुष्ठानं हेयम् । होलकाधिकरणन्यायात् । सर्वदेशवर्तिनोप्याचाराः सम्प्रतिपन्न श्रुत्याद्यविरुद्धाः सर्वेषामुपादेया इति निरणैषुः ।" "अयं खल्वनधीतवेदानामश्रुतमीमांसानामालापः अविगीतशिष्टाचारस्यैव मूलप्रमाणकल्पकत्वात् । तत एव चोदनालक्षणत्वसिद्धिः" इति श्री सच्चरित्ररक्षातत्त्वटीका श्री सूक्त्यनुग्रहीतन्यायेन शिष्टाचारपूर्वाचार्य-सम्प्रदायानुसाराच्च । एतेन यतेः धातुपरिग्रहनिषेधात् तापसंस्कारे अनधिकार इति मन्दमत्युक्तं परास्तम् । उत्सर्गापवादन्यायेन सामान्यनिषेधस्य विशेषशास्त्रविहितताप संस्कारव्यतिरिक्त-विषयत्वात् । सन्यासिनश्शिष्यपरिग्रहनिषेधोपि "शुश्रूषालाभपूजार्थं

यशोऽर्थं वा परिग्रहः । शिष्याणां न तु कारुण्यात् स ज्ञेयश्शिष्य-सङ्ग्रहः'' ॥ इति यति धर्मसमुच्चयवचनेन करुणामूलक शिष्य-सङ्ग्रहव्यरिक्तिविषय इत्यवसीयते नच सोऽपि तुर्याश्रमप्रदानमात्रविषय इति वाच्यम् । तथा विशेषानुपलम्भेन तस्य वचनस्य सर्वविषयशिष्ट सङ्ग्रहपरत्वावसायात् । ''अतश्शिष्टानुष्ठानबलादेव स्तुतिपरत्व-मध्यवस्यामः'' ''अनुष्ठानतस्तद्व्यवस्थापनात् अद्यापि सद्यश्शौचं व्रतादिषु शिष्टैरनुष्ठीयते'' इति श्रीपाञ्चरात्ररक्षाप्रथम-तृतीयाधिकारानुगृहीत न्यायेन करुणामूलशिष्यसङ्ग्रहमन्त्र वेदान्तार्थाद्युपदेशविषयपरत्वस्य स्वीकार्यत्वात् । अत एव यति धर्मसमुच्चयादिषु ''ब्रह्मनिष्ठे मृते पुत्रः खनेच्छिष्योथवा गृही'' इत्यादिभिर्वचनैश्शिष्यगृहस्थस्य यतिसंस्कारविधानमुपपन्नं न चोदाहृतवचनस्थसन्यासिपदमालयकर्माधिकृत पाञ्चरात्रिकयति-विषयमित्यतस्तद्भिन्नयतेर्न तापाधिकार इति वाच्यम् । सन्यासीति सामान्योक्तेः स्मर्यते च ''केशवार्चागृहे यस्य न तिष्ठति महीपते । तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि तत्'' इति ''तत्र पक्वमन्नमपक्वं वा केशवार्चारूपनित्यधर्मरहिते गृहे न प्रतिग्राह्यं उभयत्रान्नशब्दप्रयोगात् अन्यथा पक्वान्नमिति विशेषण प्रयोगानुपपत्ते''रिति श्रीपाञ्च-रात्ररक्षानुगृहीतन्यायेन विशेषविवक्षया यतयः पाञ्चरात्रिका इति जयाख्यसंहिताविंशपटलवचने पाञ्चरात्रिकत्वरूपविशेषणोपादानेनात्र सर्वसन्यासिविषयत्वावसायात् पाञ्चरात्रकियतिप्रकरणाद्यभावाच्च । अतः यतेस्तापाधिकारो निराबाधः । अत्र चतुर्वेदशतक्रतु सुधानिधिकार, पाञ्चरात्ररक्षाहृदयकृद्रङ्गनाथस्वामी, वात्स्य-वेदान्ताचार्याः, तत्तत्कृताह्निकहेयोपादेय कथनावसरे क्रमेण, एक, इतर, अन्य, पर, अपर, शब्दैर्व्यवह्रियन्ते । श्री पाञ्चरात्ररक्षा-

वाक्योदाहरणे ऊर्ध्वपुण्ड्रभगवन्निवेदित प्राशनादिविषये श्री सच्चरित्ररक्षावाक्योदाहरणे च कर्तव्ये तदुक्तमिति प्रयुज्यते । तदुक्तं ''अथोपक्रम्यते नित्यकर्तव्यक्रमसञ्चयः: । नाथयामुन पूर्णादि-सम्प्रदायसरित्पथे ॥ अत्र यदुक्तं भगवद्यामुनाचार्यैश्श्रीमद्गीतार्थ सङ्ग्रहे ज्ञानी तु परमैकान्ती परायत्तात्मजीवनः । तत्संश्लेषवियोगैक-सुखदुःखस्तदेकधीः ॥ भगवद्ध्यानयोगोक्तिवन्दनस्तुति कीर्तनैः । लब्धात्मा तद्गतप्राणमनोबुद्धीन्द्रियक्रियः ॥ निजकर्मादि भक्त्यन्तं कुर्यात्प्रीत्यैव कारितः । उपायतां परित्यज्य न्यस्येद्देवे तु तामभीः ॥ इति इदं तावदाप्रभातादानिशान्तमनुष्ठीयमानेषु सर्वेषु कर्मसु न विस्मर्तव्यं समयाचारनियमाध्याय श्री वैष्णवधर्मशास्त्रादिकथितं परमैकान्तिनां विशेषकर्तव्यं च सर्वं यथावदधिगन्तव्यम् । सर्वेषु च कर्मारम्भेषु भगवच्छास्त्राद्युक्तस्तत्तन्मन्त्रः भगवानेवेत्यादिकं भाष्यकारनित्योक्तं च वाक्यं पठितव्यम् । अन्ते च स्वनियाम्येत्यादिक्रमेण समन्त्रकं भगवति समर्पणीयं'' इति श्री गीतार्थसङ्ग्रहरक्षायामुदाहृत श्री यामुनेय श्लोकास्सम्यग्व्याख्याताः – श्री चरमश्लोकाधिकारे ''स्वतन्त्र-प्रपत्तिनिष्ठன் திறத்தில் இச் ஶ்லோகங்களை யோஜிக்கும் போது இவனை ज्ञानुज्ञैகளாலே பண்ணும் கைங்கர்யம் எல்லாம் भक्तियोगादिகளின் கட்டளை குலையாதிருந்தாலும் स्वामिसन्तोष மொழிய வேறொரு स्वर्गमोक्षादि प्रयोजनனத்துக்கு उपायமாக அனுஷ்டிக்கிறானல்லாமையாலே இவனுக்கு अनन्योपायனதையும் अनन्यप्रयोजनனதையும் குலையாதிருக்கிறபடியையும் अकिञ्चनனான நான் இவனுக்கு ईश्वरன் தானே उपायान्तरस्थाனத்திலே நின்று फलं கொடுக்கிறபடியையும் சொல்லுகையிலே தாத்பர்யம்.'' इत्यनुग्रहीतत्वात्, परमैकान्तिभिः प्रपन्नैः

फलसङ्गकर्तृत्वोपायत्वत्यागपूर्वकस्वयम्प्रयोजन स्ववर्णाश्रमादिधर्म-सचिवाभिगमनोपादानेज्यास्वाध्याय योगरूपभगवत्सेवनं कार्यमिति श्री यामुनेय श्री सूक्त्यर्थः। एतदर्थचिन्तनं सर्वकर्मसु कार्यमिति यावत्। समयाचारनियमाध्यायः श्री सात्वतैकविंशतिपरिच्छेदः श्री निक्षेपचिन्तामणावुदाहृतः, संहितान्तरस्थास्समयप्रतिपादका-ध्यायाश्च, श्री वैष्णवधर्मशास्त्रं आश्वमेधिके श्रीकृष्णकथित श्री वैष्णवधर्मोपदेशरूपं, आदिपदेन शाण्डिल्यहारीतादिस्मृतिसङ्ग्रहः, तद्विहितपरमैकान्ति विशेषकर्तव्यमनन्यदेवताक स्वयंप्रयोजनत्वादि-विशिष्टं कर्म सर्वं यथावदधिगन्तव्यं - सर्वेषु च कर्मारम्भेषु भगवच्छास्त्राद्युक्तस्तत्तन्मन्त्रः भगवच्छास्त्रोक्तबलमन्त्रश्च कर्मारम्भे पठितव्यः "कर्मारम्भेण मन्त्रेण तत्तत्कर्म समाचरे" दित्याचार्य-पादानुगृहीतमिह भाव्यम्। आदिपदार्थश्शाण्डिल्यस्मृतिः। तत्र "प्रणवाद्येन मन्त्रेण कर्मारम्भे पुनर्जपेत्" इत्युक्तं श्री गीताभाष्ये। "वैदिकस्य कर्मणस्सामान्यलक्षणं प्रणवान्वयः, तत्र मोक्षाभ्युदय-साधनयोर्भेदः तत्सच्छब्देन निर्देश्यत्वेन" इति, अन्यत्र "हरिरोमिति निर्दिश्य यत्कर्म क्रियते बुधैः। अधीयते वा राजर्षे तद्धि वीर्योत्तरं भवेत्। इति हरिशब्दनिर्देशश्च विहितः एतत्सर्वमादौ निर्देश्यम्। अथ "निश्चयं शृणु मे तत्र त्यागे भरतसत्तम" इत्यादि भगवद्गीतानुसारेण श्रीभाष्यकारोक्त सात्विकत्यागवाक्यं क्रियारम्भे पठितव्यमित्याह भगवानेवेति। श्री नित्योक्तमेव सात्विकत्यागवाक्यं श्री गीताभाष्य गीतार्थसङ्ग्रह रक्षोक्त वाक्यानुसारेण तत्तत्कर्मानुसारेण तत्तत्र्मानु-गुणोपयुक्तं पठितव्यमिति भावः। श्री गीताभाष्यस्थ-सात्विक त्यागवाक्यं श्री तात्पर्यचन्द्रिकायामेवं विवृतं "स्वकीयेनात्मना कर्त्रेति। स्वशेषभूतेन जीवेन प्रयोज्यकर्त्रेत्यर्थः।

स्वकीयैश्चोपकरणैरिति । यदासौ जीवः परशेषभूतः तदा तस्य स्वशेषतया प्रागभिमतं हविरादिकमपि परशेषभूतमिति कैमुतिकन्याय-सिद्धमिति भावः । स्वाराधनैकप्रयोजनायेति । शेषस्य शेषिण्यति-शयाधानमेव प्रयोजनमिति भावः - आह च वेदार्थसङ्ग्रहे "परगतातिशयाधानेच्छया उपादेयत्वमेव यस्य स्वरूपं स शेषः परश्शेषी" इति । स्वकीयेनेत्यादौ प्रमाणसूचनाय सर्वशेषीत्याद्युक्तं - स्वयमेवेति आराध्यभूत एवाराधनं कारयतीति भावः । एवकारेण प्रवर्तकान्तरं च व्युदस्तम् । कायतीति । सर्वेश्वरस्सन् स्वेष्टं सर्वं स्वयमेव कर्तुं शक्तोऽपि स्वशेषभूतजीवानां शास्त्रवश्यत्व तत्फलभोक्तृत्वादि सिद्ध्यर्थं तान् कतॄन् कारयतीति भावः । इति । नित्यग्रन्थस्थ सात्विकत्यागवाक्यस्य परिजनपरिच्छदान्वितभगवदौपचारिकादि भोग विषयतयान्यत्रासम्भवात् । क्रियान्ते नित्यान्तस्थसात्विक-त्यागवाक्य पठनपूर्वकं भगवति समर्पणप्रकारमाह । अन्तेचेति । अत्राप्यूहविशेषो बोध्यः । अत्र मन्त्रविशेषानुक्तेः कृतं चेत्यादिना भगवान् प्रीयतां वासुदेव इति प्रीणनमन्त्रान्तेन समर्पणीयमिति बोध्यम् । श्री लक्ष्मीतन्त्रे षट्त्रिंशेऽध्याये "पश्चात्स्वनाम निर्दिश्य प्रीतिं पश्चात्समाचरेत् । प्रीयतां भगवान्पश्चाद्वासुदेव स्स्वतः परम् ॥ ओमों प्रीयतां भगवान् वासुदेव इति ब्रुवन्" इति पारमेश्वरे त्रयोदशाध्याये "अनेनोत्सवयोगेन योगपूजादिकेन च । निर्वर्तितेन भगवन् त्वं मम प्रीयतामिति । वचनतः प्रीणनमन्त्रेण कर्मसमर्पणं विहितं - "देवपादौ स्वहस्ताभ्यां गृहीत्वा शिरसा नमन् । प्रीणयेद्दत्तभोगेन प्रीयतां भगवानिति" इति वङ्कि वंशेश्वरवाक्येनापि तथैवावगतम् । श्रीपाञ्चरात्ररक्षायां "ब्राह्ममुहूर्तादिप्राप्तौ यत्कर्तव्यं तत्तावत् तच्छिष्य

प्रशिष्यग्रन्थतन्मूलभूत संहिताद्यनुसारेण सङ्गृह्यते'' इति श्रीसूक्त्या श्रीभाष्यकाराव्यवहित शिष्यवङ्गिवंशेश्वररोक्तप्रीणनमन्त्रान्तेन स्वनियाम्येत्यादि श्रीभाष्यकारवाक्येन समर्पणमेवाचार्यपादाभिमतमिति ज्ञायते । सहस्रनामभाष्ये ''युधिष्ठिरश्शान्तनवं पुनरेवाभ्यभाषते''त्येतद्व्याख्याने ''सन्तोह्याचार्यनिष्ठामन्विष्य तद्रुचि परिगृहीतमित्येव तत्वं हितं च रोचयन्ते न तु प्रामाणिकत्वमात्रेण'' इत्युक्तत्वेन पूर्वाचार्योपदेशानुष्ठानपारम्पर्य सिद्धं प्रीणनमन्त्रान्त वाक्यकरणकं तत्तत्कर्मसमर्पणं युक्तिमिति हृदयम् । मूले उपदेशानुष्ठानपारम्पर्यानुसारेण योगाभिगमनोपादानेज्या स्वाध्यायान्तेषु तथैवोक्तेः । एतेन समन्त्रकमिति मूलमन्त्रोऽभिप्रेत इत्यन्योक्त पक्षः प्रमाणसम्प्रदायाननुगुण इत्युपेक्ष्यः । तदुदाहृतमूलमन्त्रयोजनविधायि वचनानां पाञ्चरात्रिक विषयित्वमेव न तु तद्भिन्नत्रयीनिष्ठ प्रपन्नविषयत्वमिति प्रमाणसम्प्रदायप्रदर्शनपूर्वकं सत्पथरक्षायां नित्यनैमित्तिकविचारे सम्यक्स्थापितमस्माभिः । सर्वत्र शास्त्रीय कर्मारम्भे स्वाचार्यप्रभृति भगवत्पर्यन्तगुररुपङ्क्ति भजनं कार्यं - तदुक्तं ''सर्वत्र च शास्त्रीय कर्मारम्भे स्वाचार्य प्रभृति भगवत्पर्यन्तगुरुपङ्क्ति प्रपदनं निश्रेयसाय भवति'' इति । न च भगवत्प्रभृति स्वाचार्यपर्यन्तं तत्क्रमेण गुरुपङ्क्ति भजनं कार्यं ''लक्ष्मीनाथसमारम्भां'' कमप्याद्यं गुरुं वन्दे'' इत्यादौ तथा दर्शनादाचाराच्चेति वाच्यं - उक्ततृतीयाधिकारे ''गुरून् प्रपद्य प्रथमं तद्गुरूंश्च ततो हरिं'' ''गुरुं देवं नमस्कृत्य'' इत्यादिप्रमाणप्रदर्शनपूर्वकं शास्त्रीयसर्वकर्मारम्भे भगवत्पर्यन्तगुरुपङ्क्तिप्रपदनं निश्रेयसाय भवतीत्युक्त्वा ''उक्तं च रहस्याम्नाय ब्राह्मणे स चाचार्यवंशो ज्ञेयो भवति, आचार्याणामसावसावित्या भगवत्तः'' इति

श्रुतेरुदाहृतोपबृह्मणैकार्थ्य समर्थनात्। तत्र प्रपद्य प्रथमं तत इति श्रुत्यैव क्रम प्रतीतेः । श्री गुरुपरम्परासार, निक्षेपरक्षयोः "முமுக்ஷுவுக்காசார்ய வம்ஶம் பகவானளவுஞ் செல்ல வனுஸந்திக்க வேணுமென்றோதப்பட்டது" "आरभ्य स्वगुरोरा च भगवत्तो यथा गमम्। तदाचार्यस्य वंशस्या सावसाविति चिन्तनम्" ॥ इत्युदाहृत श्रुत्यर्थविवरणात् । वाक्यश्लोकगुरुपरम्पराक्रमस्यैव "अस्मद्गुरुपरमगुरून्" "என்னுயிர் தந்தளித்தவரைச் சரணம் புக்கு" इत्याचार्यपाद श्रीसूक्त्यङ्गीकृतत्वाच्च । "लक्ष्मीनाथसमारम्भां" इत्यत्र यथा प्रमाणं वन्दे इत्येवार्थो वाच्यः न तु प्रमाणमुल्लङ्घ्चेति - "कमप्याद्यं गुरु" मित्यत्र न गुरुपङ्क्ति भजन क्रमविवक्षा, श्रीभाष्यकार एव भजनविश्रान्तेः। तच्छिष्य प्रभृति स्वाचार्यपर्यन्तगुरुभजनानुक्तेः "अत्रोपजीव्यप्रबन्धनिर्माण क्रमानुसारेण पराशरपराङ्कुशनमस्कारक्रमः" इति श्रीस्तोत्रभाष्योक्त न्यायेन "प्रवक्ता छन्दसां वक्ता" इति सर्वोत्कृष्टप्रमाणप्रवचननिर्माणरूपमहोपकारमुक्त्वा "आचार्योपसत्तेरपि भगवत्कटाक्ष हेतुत्वावगमात्" इत्यादि श्रुतप्रकाशिकोक्त प्रकारेणाचार्यप्राप्तेः भगवत्कटाक्षहेतुत्वज्ञापनाय "सहधर्मचरी"मित्यादीन् "प्रमाणं लक्ष्मणमुनि" रित्यन्तान् गुरून् भजन् श्लोकांश्चकार । किं च कमप्याद्यमित्यादेः भगवत्प्रभृति गुरुवन्दनक्रमपरत्वं न सम्भवति । पाठक्रमापेक्षया श्रौतक्रमबलीयस्त्वस्य मीमांसान्यायसिद्धत्वेन, प्रदर्शितोपबृह्मण श्रौतक्रमापेक्षया दुर्बलत्वात् - न च भगवन्तमारभ्य स्वाचार्यपर्यन्तं गुरुपरम्परानुसन्धानक्रमोप्याचार्यपादसम्मतः தானிப்படிப் பெற்ற रहस्यत्रयसारार्थமான........"महाधनத்தை முன்னில் அதிகாரத்தில்

சொன்னபடியே उचित स्थानमமறிந்து ஸமர்ப்பிக்கும் போது कथयामि यथा पूर्वं दक्षाद्यैर्मुनिपुङ्गवैः । पृष्टः प्रोवाच भगवानब्जयोनिः पितामहः ॥ तैश्चोक्तं पुरुकुत्साय भूभुजे नर्मदातटे । सारस्वताय तेनापि मम सारस्वतेन च'' ॥ என்று श्री पराशरब्रह्मर्षि मैत्रेय भगवाஞுக்கு அருளிச் செய்தாற் போலே गुरुपरम्परैயை प्रकाशिப்பித்துக் கொண்டு தன் कृतज्ञதையும் அர்த்தத்தின் சீர்மையுந் தோற்றவுபதேஶிக்க வேணும்'' इति शिष्यकृत्याधिकारेऽनु गृहीतत्वादिति वाच्यं - तत्र गुरुपरम्परानुसन्धानक्रमस्या विवक्षि-तत्वात् । उक्तवाक्यं सारास्वादिन्यामेवं व्याख्यातं 'இப்படி असूयाग्रस्तர் கையிலே காட்டிக் கொடாதே ரக்ஷித்துக் கொள்ளவுமென்று சொன்னது கூடுமோ? அப்போது सम्प्रदायोच्छित्ति प्रसङ्गியாதோ पूर्वाधिकारोक्तरीत्या सच्छिष्यன் லப்தனாகில் उपदेशिக்க வேண்டுகையாலே सम्प्रदायोच्छित्ति இல்லையென்றிலப் போது शिष्यனுக்கிவர் ஏடு பார்த்துச் சொல்லுகிறுனே வென்றும் வேரில்லாக் கொத்தானே வென்றும் अतिशङ्के प्रसङ्गியாதோ ? स्वाचार्यप्रदर्शनपूर्वक முபதேशिकக்க வேண்டுமென்னில் प्राचार्यனுக்கு अमूलமாக வந்துதோ வென்று अतिशङ्के வாராதோ வென்ன அருளிச் செய்கிறுர். தான் இப்படி பெற்ற रहस्य'' इति सारदीपिकायां ''இனி रहस्यसम्प्रदायप्रवर्तनरूपமான शिष्यकृत्यத்தின் प्रकारம் காட்டுகிறுர். தானிப்படிப் பெற்றவித्यादि'' । सारप्रकाशिकायामप्येवमुक्तम् । श्रीभाष्यमहासिद्धान्त तच्छ्रुत-प्रकाशिकयोः श्री विष्णुपुराण प्रथमाध्याये मैत्रेयप्रश्नानां सङ्क्षेपेण प्रतिवचनं विष्णोस्सकाशादिति श्लोकेनोक्तमित्यभिधाय, द्वितीयाध्याये

विशेषेण पुराणार्थं वक्तुं पुराणप्रतिपाद्यनमस्कारकथनादिकं कृतमित्यनुगृहीतम् । श्री विष्णुचित्त कृतपुराणरत्नव्याख्याने द्वितीयाध्यायोपक्रमे तदेवं संक्षेपत उक्तानां प्रतिवचनानां विवरण-तयाऽवतार्यमाणस्य पुराणरत्नस्यारम्भमविकारायेत्यादिभिर्नवभिः श्श्लोकैः पुराणप्रतिपाद्यस्वाभिमतदेवतानमस्कारपूर्वकं प्रतिजानीते । तत्र कारणत्वाभिधानतः प्रसक्तं विकारित्वं निरस्यत्यविकारायेति। अथ श्रोतॄणामदरार्थं स्वस्याप्ततमगुरुपारम्पर्यक्रममाह कथयामीति द्वाभ्यां उदाहृतपूर्वाचार्य श्रीसूक्तितद्व्याख्यापरामर्शे आचार्योपदिश्यमानार्थे शिष्यस्या साम्प्रदायिकत्वशङ्कापरिहारपूर्वकादरसिध्यर्थं "कथयामि यथा पूर्वं" इत्यादि विष्णुपुराणवाक्यप्रवृत्तिरित्यवगम्यते । सङ्ग्रहपुराणार्थोपदेशपुराणप्रतिपाद्य देवतानमस्कारानन्तरं विस्तृतोप-देशसमये आप्ततमगुरुपारम्पर्यज्ञानाय "दक्षाद्यै"रिति वाक्यप्रवृत्तेः । बृहदारण्यक षष्ठाष्टमाध्यायान्तयोः बृह्मस्वरूपोपासनपुरुषार्थोप-देशानन्तरं "अथ वंशः पौति माहिष्यः" इत्यादिना गुरुपरम्परोप-देशाच्च उपदेशस्य मध्येऽवसाने वा सम्प्रदायक्रमोपदेशः कर्तुं शक्यत इत्यवगम्यते । अत एव सारास्वादिन्यामुदाहृत शिष्यकृत्याधिकार व्याख्यावसरे रहस्यारम्भकर्तव्य शास्त्रीयगुरुपरम्परानुसन्धान क्रमः गुरुपरम्परासारोक्त एव ग्राह्यः, अमूलकत्व शङ्कानिरासपूर्वकसदाचार-सम्प्रदायक्रमः शिष्यकृत्याधिकारवाक्योक्त इत्यनुगृहीतं । अतः पूर्वोक्तस्वाचार्यादि भगवत्पर्यन्तगुरुपरम्परानुसन्धानक्रमो निराबाध एव। श्री गुरुपरम्परासारगुरुव्यख्याने विस्तरोऽनुसन्धेयः - आचार्यपादप्रशिष्यवात्स्यवरददेशिकशिष्यशठकोप महादेशिका-नामाचार्य पादनिर्णीत गुरुभजनक्रम एवाभिमत इत्यवश्यमङ्गीकार्यं ।

मू :-ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां परित्यज्य,

अतः श्री देशिकसम्प्रदायस्थैस्तदुक्तगुरुपरम्परानुसन्धानक्रम एवादरणीयः, नान्यः - "सम्प्रतिपन्नशास्त्रविरुद्धமான सम्प्रदायமும் भ्रमविप्रलम्भ सम्भावனை உண்டாகையாலே बाह्य तुल्यமாகையாலே अविश्वसनीयं" इति श्री सम्प्रदायपरिशुद्धि वाक्यात्, "शास्त्रविरुद्धाचारो नाचार:" इति सुधीविलोचनरत्नाकराद्युक्तं । अतः अस्मदुक्तक्रमेणैव गुरुपङ्क्त्यनुसन्धानं युक्तमिति । सर्वकर्मस्वाचार्यपादप्रदर्शित दक्षशौनकवचनविहितनारायणहरिस्मणमपि कर्तव्यमित्यलम्।

अथ रात्रि चरमयामप्रभृति परदिन रात्रियामत्रयपर्यन्तकालेषु पञ्चधा विभक्तेषु कर्तव्यकर्माणि विवक्षुः ब्राह्म मुहूर्तप्रबोधादिकमाह ब्राह्मे मुहूर्त इत्यादिना। ब्राह्मो मुहूर्तः "रात्रेस्तु पश्चिमो यामो मुहूर्तो ब्राह्मसंज्ञितः ।" इति रत्नाकरस्थवचनावगतः । तत्र निद्रा त्याज्या । "ब्राह्मेमुहूर्ते उत्थाय धर्ममर्थं च चिन्तयेत्। यामद्वयं शयानस्तु" "ब्राह्मे मुहूर्ते संप्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः। ब्राह्मे मुहूर्ते सत्वस्थो हरिर्हरिरिति ब्रुवन् ।" इत्याचार्यपादोक्तेः तत्र निद्रात्यागः अजीर्णदशाव्यतिरिक्तकालविषयः । तदुक्तं "तत्तत्पुरुष शक्त्यनुसारेणैव हि नित्यनैमित्तिककाम्यविषयाणां सर्वेषां शास्त्राणां प्रवृत्तिः। अत एव हि धर्मसाधनेषु प्रधानतमं शरीरं रक्षितुं प्रवृत्ते "ब्रह्मास्मृत्वायुषो वेदमुपवेदमथर्वाणाम्" । इत्यथर्वण वेदोपवेदभूतायुर्वेदे "ब्राह्मे मुहूर्ते उत्तिष्ठेज्जीर्णाजीर्णे निरूपयेत् । अजीर्णे पुनरासन्ध्यागमात्स्वापो विधीयते" । इति । ईदृश सर्वक्रोडीकारेण हि "युक्तस्स्वप्नावबोधस्य"

मू :-सप्तकृत्वो हरिर्हरिरिति शब्दं कीर्तयन् तमेव चिन्तयंश्चोत्थाय, "ग्राहग्रस्ते गजेन्द्रे रुवति सरभसं तार्क्ष्य मारुह्य धावन् व्यघूर्णन्माल्यभूषावसनपरिकरो मेघगम्भीरघोषः । आबिभ्राणो रथाङ्गं शरमसिमभयं शङ्खचापौ सखेटौ हस्तैः कौमोदकीमप्यवतु हरिरसावंहसां संहतेर्नः ॥ प्रातस्स्मरामि भवभीतिमहार्तिशान्त्यै नारायणं गरुडवाहन-मञ्जनाभम् । ग्राहाभिभूतमद-वारणमुक्तिहेतुं चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥ प्रातर्नमामि मनसा वचसा च मूर्ध्ना पादारविन्दयुगलं परमस्य पुंसः । नारायणस्य नरकार्णवतारणस्य पारायणप्रवणविप्रपरायणस्य । प्रातर्भजामि भजता-मभयङ्करन्तं प्राक्सर्वजन्मकृतपापभयापनुत्यै । यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोरशोकप्रणाशन (म) करोद्धृतशङ्खचक्रः । श्लोकत्रयमिदं पुण्यं प्रातरुत्थाय यः पठेत् । लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः" । इति हरिशब्दार्थतया प्रसिद्धं समस्तपापहरं भगवन्त-

---

इति गीतम् । तस्मात्सर्वेषु मानवेषु प्रायिकतयौत्सर्गिकौ निद्रा प्रबोधकालौ यामद्वयं शयान इत्यादिभिरुपदिश्यन्ते इति विषयव्यवस्था" इति।

सप्तकृत्वः हरिशब्दं कीर्तयन्निति। तदुक्तं "अत्र हरिशब्दसङ्कीर्तनं सप्तकृत्व इति श्री गृद्ध्रसरोमुनिभिर्नित्यक्रमसङ्ग्रहे निबद्धम्। उत्तिष्ठतश्च हरिशब्द पूर्वकभगवदनुस्मरणं श्रीविष्णुधर्मे भगवता शौनकेनोक्तं

मू :–मनुसन्धाय, निद्रान्ताचमनं दक्षिणश्रवण-स्पर्शरूपं वा तदानीं शक्यं विधाय, तस्मिन्नेव शयने आसीनः अखिलहेयप्रत्यनीककल्याणैकतान, स्वेनतर-समस्तवस्तु विलक्षणानन्तज्ञानानन्दैकस्वरूप, स्वाभि-मतानुरूपैकरूपाचिन्त्यदिव्याद्भुतनित्यनिरवद्यनिरतिशयौ ज्वल्यसौन्दर्य सौगन्ध्यसौकुमार्य लावण्ययौवनाद्यनन्त-गुणनिधिदिव्यरूप, वत्सल, स्वामिन्, सुशील, सुलभ, सर्वज्ञ, सर्वशक्ते, परमकारुणिक, कृतज्ञ, स्थिर, परिपूर्ण, परमोदार, एवं भूतमार्दवार्जवाद्यनन्तकल्याण-गुण परिपूर्ण, स्वोचितविविधविचित्रानन्ताश्चर्य-नित्यनिरवद्यनिरतिशयसुगन्ध-निरतिशय-सुखस्पर्श निरतिशयौज्ज्वल्य किरीट मकुटचूडावतंस मकरकुण्डल-ग्रैवेयकहारकेयूरकटक श्रीवत्सकौस्तुभ-मुक्तादामोद-रबन्धन पीताम्बरकाञ्चीगुण नूपुराद्यपरिमितदिव्य

''उत्तिष्ठंश्चिन्तय हरिं व्रजंश्चिन्तय केशवं'' इत्यादिना, ''पापं तद्विपाकरूपं सर्वं हरतीत्यत्र हरिशब्दः ''ब्रह्माणमिन्द्रं रुद्रं च यमं वरुणमेव च । प्रसह्य हरते यस्मात् तस्माद्धरिरितीर्यते'' इत्यादिभिस्तस्यैव निखिलजगदुदयविभवलयलीलस्य निरङ्कुश-स्वातन्त्र्यं चानुसन्धेय'' मित्यन्तेन। निद्रान्ताचमनं दक्षिण श्रवणस्पर्शरूपं वेति तदुक्तं ''एवमुत्थाय निद्रान्ताचमनं मुख्यं दक्षिण श्रवणस्पर्शरूपं वा तदानीं शक्यं विधाय'' इति। ''निद्रान्तनिमित्ततया उत्तरकर्माङ्गतया चात्र तन्त्रेणाचमनं, तु शब्देन स्वशास्त्रोक्तविशेषः तोयालाभदशायां दक्षिणश्रवणस्पर्शश्च व्यज्यते । स्मरन्ति हि

मूः- भूषण, स्वानुरूपाचिन्त्यशक्तिशङ्खचक्रगदासि शार्ङ्गाद्यसङ्ख्येयनित्यनिरवद्यनिरतिशयकल्याणदिव्यायुध, स्वाभिमतनित्यनिरवद्यानुरूपस्वरूपरूपगुणविभवैश्वर्य शीलाद्यनवधिकातिशयासङ्ख्येय कल्याणगुणगण श्रीवल्लभ, एवंभूत भूमिनीला नायक, स्वच्छन्दानुवर्ति-स्वरूपस्थितिप्रवृत्तिभेदाशेषशेषतैकरतिरूपनित्यनिरवद्य निरतिशयज्ञानक्रियैश्वर्याद्यनन्तकल्याणगुणगणशेष-शेषाशनगरुडप्रमुख नानाविधानन्तपरिजनपरिचारिका-परिचरित चरणयुगल, परमयोगिवाङ्मनसापरिच्छेद्य स्वरूपस्वभाव, स्वाभिमतविविधविचित्रानन्तभोग्य भोगोपकरणभोगस्थानसमृद्धानन्ताश्चर्यानन्तमहाविभवा-नन्तपरिमाण नित्यनिरवद्यनिरतिशय श्री वैकुण्ठनाथ, निखिलजगदुदयविभवलयलील, अनालोचितविशेषा शेषलोकशरण्य, प्रणतार्तिहर, आश्रितवात्सल्यैक जलधे, अनवरतविदितनिखिलभूतजातयाथात्म्य,

---

''सम्यगाचमनाशक्तावभावे सलिलस्य च। पूर्वोक्तेषु निमित्तेषु दक्षिणं श्रवणं स्पृशेत्''। इति तु शब्देनेति, समाचम्य तु वारिणेति पूर्वोदाहृत श्री सात्वतवचनस्थ तु शब्दार्थविवरणं - अपररात्रयोगमाह - तस्मिन्नेव शयने आसीनः अखिलहेयेत्यादिना प्राप्यकश्चास्मीति पूर्वरात्र्यनुसंहित प्रकारेणानुसन्धायेत्यन्तेन । तदुक्तं ''तस्मिन्नेव शयने समासीनः प्रतिसंहितयोगः'' इत्यादिना पूर्वमप्युक्तं ''एवं प्राप्तकालमपनीत-निद्रातमस्कत्वेन सत्वस्थः प्रसन्नधीश्च भवति । तेन पूर्वयामानु-संहितमन्तं करणचित्रभित्तिगतं विचित्र शुभाश्रयविशिष्टं ध्येयः

मू :-सत्यकाम, सत्यसङ्कल्प, सकलेतरविलक्षण, अर्थिकल्पक, आपत्सख, श्रीमन्नारायण, अणुपरिमाण-देहेन्द्रियादिविलक्षणज्ञानानन्द स्वरूपोऽहं, त्वदेकशेष-स्त्वदेकनियाम्यस्त्वदेकाधारस्त्वदेकशरणस्त्वदेक-प्राप्यकश्चास्मि'' इति पूर्वरात्र्यनुसंहितप्रकारेणानुसन्धाय ''भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैक-रसेन मया स्वकीयैश्चोपकरणैस्स्वाराधनैकप्रयोजनाय परमपुरुषस्सर्वशेषी स्वशेषभूतमिमं योगं कारितवान्'' इति सात्विकत्यागं कृत्वा ''कृतश्च करिष्यामि भगवन्नित्येन भगवत्प्रीत्यर्थेन महाविभूति चातुरात्म्य भगवद्वासुदेव पादारविन्दार्चनेन योगेन भगवत्कर्मणा भगवान् प्रीयतां वासुदेवः'' इति योगं समापयेत्।

निद्रातमोन्तरितमपि तत्कालसमुन्मिषितसत्वसन्धुक्षित सात्विकज्ञान-रूप प्रदीपप्रकाशेन सम्यगवलोक्येत तत एवापररात्र योगो निष्पद्यते'' इति । पूर्वरात्र्यनुसंहितप्रकारेणानुसन्धायेति । तदुक्तं ''योगं व्याख्यास्यामः इत्युपक्रम्य, यद्यप्यनन्यप्रयोजनस्यापि तत्र तत्रोक्त-न्यासविद्याभेदात् स्वनिष्ठाविषय तत्तत्संहितोक्तप्रक्रियाभेदाच्चानुसन्धेय रूप गुणविभूत्यादिकं नाना भवति । तथापि स्वरूपनिरूपकानन्द-त्वादिपञ्चकनिरूपित स्वरूपे सर्वशेषिणि परस्मिन् ब्रह्मणि श्रीमति पुरुषोत्तमे तत्तद्विद्योदितरूपादि विशेषविशिष्टमनोवृत्तिनैरन्तर्यरूपत्वं योगस्याविशिष्टम् । अत एव ''पृथग्भूतेषु दृष्टेषु चतुर्ष्वाश्रमकर्मसु । समाधौ योगमेवैकं शाण्डिल्यस्सम मुक्तवान् ॥'' इति महाभारतवचनं सुसङ्गतं भवति- अत्र तु भाष्यकाराद्युक्तनित्यगद्यस्तोत्रादिषु

यथानुसन्धानमुक्तं तत्सम्प्रदायनिष्ठैरनुसन्धेयं'' इत्यन्तेन प्रतिपादित श्रीभाष्यकारसम्प्रदायागतयोगप्रकारेणानुसन्धायेत्यर्थः । अखिल-हेयेत्यादीनां पदानामर्थाः आचार्यपादकृतपृथुगद्यविवरणेऽनुसन्धेयाः। अथ सात्विकत्यागपूर्वकम् योगसमापनमाह - भगवानेवेत्यादिना ''या मे तुरीये यतवाग्ररजन्यां विहाय शय्यां विहिताङ्घ्रिशुद्धिः । योत्यादरेणास्थितयोगशेषस्तं वेङ्कटेशं गुरुमानमाम'' इत्याचार्य-पाददिनचर्या श्लोकोऽत्रानुसन्धेयः । पश्चिमयामकर्तव्यवेदाभ्यासपर्यन्तं योगः इति इतरेषां परेषां च पक्षः आचार्यपाद श्रीसूक्त्यनुष्ठान-विरोधादुपेक्ष्यः - निर्वेदात्पूर्वमेवापररात्रयोगो निष्पद्यते इत्यनुगृही-तत्वात् - आचार्यपादैः 'तस्मिन्नेव शयने समासीनः ''प्रतिसंहित-योगः'' इत्यादिना नियतेन्द्रियस्समाहितः अतिक्रान्तमनन्तं कालं निरर्थकमवलोक्य निर्वेदं परं गच्छेत् इत्यादिना च, अपररात्रयोगसमापनं, निर्वेदगमनं, नारायणमुनिवङ्गिवंशेश्वरप्रदर्शित-निर्वेदप्रकारः, सात्विकधृत्यालम्बनं, इति क्रमः प्रतिपादितः - अत्र प्रतिसंहितयोग इत्यत्रातीतार्थकनिष्ठाप्रयोगेण योगस्य निर्वेदपूर्वभावित्वं प्रतीयते - ''दिनावसाने सम्प्राप्ते पूजां कृत्वा समभ्यसेत् । योगं निशावसाने तु विश्रमैरन्तरीकृतम् ।। पञ्चमो योगसंज्ञोसौ कालांशो ब्रह्मसिद्धिदः ।'' इत्याचार्यपादोदाहृतजयाख्यवचनतः सर्वव्यापारो-परतिसुभगनिद्रापूर्वापर कालयोस्तत्पूर्वापररात्रेषु युञ्जान इत्याद्युक्ता-वसरलब्धयत्नलभ्य इत्यादिकया श्री पाञ्चरात्ररक्षा श्रीसूक्त्या ''नीत्वैवं प्रथमं यामं जपहोमादिना सुधीः । योगस्थ एव तद्धीरः ततो यामद्वयं स्वपेत् । उत्थायापररात्रे तु पूर्वोक्तमनुसञ्चरे''दिति लक्ष्मीतन्त्राष्टा-विंशाध्यायवचनेन चोत्थानानन्तरसमय एवापररात्रयोगविध्यवगमाच्च।

एतेन उत्थानदशायामेव पाञ्चकालिकसमुदायसङ्कल्पः; पश्चात् क्रमेणाभिगमनादिविशेषसङ्कल्पः - त्वय्याराधनकाम इति प्रतिबन्धक निवृत्तिप्रार्थना मन्त्रानन्तरमपररात्र योगः सन्ध्यायामासन्नायामित्युक्त-कालपर्यन्तः इत्यन्यपक्षः, सन्ध्यायामासन्नायामभिगमनादिपाञ्च-कालिकसमुदायसङ्कल्पः । ततः प्रत्येकं सङ्कल्प इति पञ्चकालक्रिया-दीपोक्तपक्षश्च निरस्तः । ''आप्रभातं निशान्तं वै पञ्चधा परिकल्पना । पृथक्कर्मवशात् कार्या न काला बह्वस्स्मृताः । आद्यं कर्माभिगमन-मुपादानं ततः परम् । इज्या च पश्चात्स्वाध्यायस्ततो योगस्ततः परम् ।। पञ्चैते विधयः प्रोक्ताः कालाः पञ्चैव ते क्रमात् ।'' इत्याचार्यपादोदाहृत-पाद्मवचनतः ''शास्त्रविभक्तकालविशेषनियतமாய், उत्तरकैङ्कर्यத்துக் கவसरलाभार्थமாக पूर्वकैङ्कर्यந் தலைக்கட்ட வேண்டும்படி சங்கிலித் துவக்காய்'' इत्युत्तरकृत्याधिकार श्रीसूक्त्या च पञ्चकाल तद्विहित-कर्मणामसङ्कीर्णतया भेदावगमात् पाञ्चकालिकसमुदायसङ्कल्पे मानाभावात् । सर्वेषु च कर्मारम्भेष्वित्यादिपूर्वोदाहृताचार्यपाद श्री सूक्त्या कर्मभेदेन सात्विकत्यागभेदावगमेन सङ्कल्पस्यापि तथैवौचित्यात् । अन्याह्निकोक्त योगाभिगमनतन्त्रानुष्ठानमप्ययुक्तं - अत्र योगासमर्थस्य तच्छेषभूतस्वाध्यायः समर्थस्य तु योग एवेति न समानकाल तदुभयविधायकशास्त्रद्वय विरोधः - यामयामार्ध विभागः, स्वाध्यायादिषु नातिदूरपूर्वापर न्यूनाधिकनाडिकाविभागादयस्तु मतभेदेन निर्वाह्या इत्येककाले कालद्वयकर्मविधायकवचना-नामधिकारिभेदमतभेदाभ्यामाचार्यपादैर्व्यवस्थोक्तेः, तन्त्रानुष्ठा-नानुक्तेश्च । एतत्तत्वं श्री निक्षेपचिन्तामणौ स्पष्टम् । अभिगमनं

अथाभिगमनम्

मू :–उत्थाय शयने तस्मिन्नासीनो नियतेन्द्रियः त्रस्तनिर्विण्णहृदयो व्यर्थं वीक्ष्य गतं वयः । तापत्रयेण चाक्रान्तस्तीव्रेणाध्यात्मिकादिना । दावजेनाग्निना लीढो भ्राम्यन्निव वने मृगः ॥ संसार वागुरान्तस्थो लूनपक्ष इवाण्डजः । अपश्यन्निर्गमोपायमागामिष्वपि जन्मसु ॥ अकार्यैरतिबीभत्सैः क्रियमाणैः कृतैरपि । लज्जितश्च विषण्णश्च स्मर्यमाणै स्स्वकर्मभिः ॥ अविनीतमशिक्षार्हमसद्गुण गणाकरम् । अवधार्य स्वमात्मानमचिदाद्य शुभाश्रयम् ॥ दह्यमानेन्धनान्तस्थो विष्फुरन्निव कीटकः । अलब्धनिर्गमस्तिष्ठन् मध्ये मरणजन्मनोः ॥ विह्वलश्च विषण्णश्च विमृशन् स्वामिमां दशाम् । चिन्तयेत्प्रथमं चैवमाचरन् प्रियमात्मनः ॥ संसार चक्रमारोप्य बलिभिः कर्मरज्जुभिः । कालेनाकृष्यमाणस्य जङ्गमस्थावरात्मनः ॥ अहो मे महती याता निष्फला जन्मसन्ततिः । अनास्वादितसत्कर्मज्ञानभक्तिसुधारसा । अदृष्टानन्तसंसार सागरोत्तरणप्लवा ॥ श्रुतिस्मृत्युदिताशेषसदाचारपराङ्मुखी । अनुपासितसद्वृद्धा स्वीकृतासत्समागमा ॥ असंपादितशुश्रूषा गुर्वाचार्यपितृष्वपि । त्यक्तवर्णसमाचारा भ्रष्टा वैदिकवर्त्मनः ॥ निजकर्मजदेवादिदेहाध्यस्तात्मभावना ।

प्रतिजानीते - अथाभिगमनमिति - मया संगृह्यत इति शेषः - वङ्गिवंशेश्वरोक्तनिर्वेदवाक्यान्युदाहरति उत्थायेत्यादिना निर्वेदानन्तरं

तद्भावनानुगोद्भूतसुखदुःखव्यवस्थितिः ॥ अनुद्भूत-स्वयाथात्म्यज्ञानजोत्तमनिर्वृतिः । पशुवत्प्राकृतैरेव गुणै-रधिकनिर्वृता ॥ न कर्मनिष्ठानात्मज्ञा नापि भक्तियुता-हरौ । नोद्युक्ता भक्तिहीनत्वात्तत्क्रियास्वर्चनादिषु ॥ कर्मभिः पुण्यपापाख्यैरविद्यापरनामभिः । धूमैरवार्चि-राग्नेयं ज्ञानमावृत्य देहिनः ॥ भूषयित्वा स्वकं देहं शब्दाद्यैस्स्वाश्रयैर्गुणैः । दर्शयित्वा स्वसौन्दर्यमात्मने तिष्ठमानया । निरस्तातिशयाह्लादसुखभावैक लक्षणम् ॥ संछाद्य स्वगुणैरेव स्वरूपं परमात्मनः । गुणमय्या प्रकृत्याख्य भगवन्माययाऽनया ॥ स्वसंलीनानन्तजीव-कृतकर्मानुरूपया । गुणत्रयाश्रयानन्त विचित्र परिणामया । अतिदुस्तरया देवप्रपत्तिरहितात्मभिः । प्रलोभ्यमाना सततं तयैवात्यन्तनिर्वृता ॥ अजानतीव स्वहितं मूकस्वप्नानुकारिणी । निष्पानीये निरालम्बे निश्छाये निरपाश्रये । द्राघीयस्यशुभे मार्गे यमस्य सदनं प्रति । गच्छतो मेऽसहायस्य वर्द्धयन्ती महद्भयम् ॥ अतीतापि सदैवैषा तिष्ठतीव पुरो मम । गतायास्त्वीदृशं रूपं वर्तमानेऽपि जन्मनि ॥ तथैव सुमहान् कालो गतः क्षण इवाल्पकः । अलब्धसुखसंस्पर्शमकृताघौघनिष्कृति। विनैव हरिपादार्चामहो पश्यत एव मे । किं करिष्यामि पदयोर्निपतिष्यामि कस्य नु ॥ दुस्तरां मद्दशामेतां कथयिष्यामि कस्य वा ॥ इति निर्विण्णो भूत्वा (इति निर्विद्य तदनुधृतिमालम्ब्य सात्विकीम् । विधूय चेमं निर्वेदं सर्वकार्यावसादकम् । उद्धरिष्यन् स्वमात्मानं

मज्जन्तं भवसागरे ।। पुनर्निश्चिनुयादेवं स्थिरधीस्स्वार्थ-सिद्धये । गतमेवं गतं जन्म का नु तत्र प्रतिक्रिया ।। प्रवहत्येव हि जले सेतुः कार्यो विजानता । इदानीं कर्तुमेतावत् शक्यं काले गतेऽहनि ।। मयात्र हितकामेन बिभ्यता भवसागरात्) "इत उर्ध्वमहन्तावद्यावज्जीवं श्रियश्श्रियः । पदयोरर्चनं कर्तुं यतमानस्समाहितः ।। अभिगच्छन् हरिं प्रातः पश्चाद्द्रव्याणि चार्जयन् । अर्चयंश्च ततो देवं ततो मन्त्रान् जपन्नपि । ध्यायन्नपि परं देवं कालेषूक्तेषु पञ्चसु । वर्तमान स्सदाचैवं पाञ्चकालि-कत्मना ।। स्वार्जितैर्गन्धपुष्पाद्यैः शुभैश्शक्त्यनुरूपतः । आराधयन् हरिं भक्त्या गमयिष्यामि वासरान् ।।" इति

सात्विकधृत्यालम्बनप्रकारमाह - इत ऊर्ध्वमित्यादिना - तदुक्तं "तस्मिन्नेव शयने समासीनः" इत्यारभ्य "नियतेन्द्रियस्समाहितोऽति क्रान्तमनन्तं कालं निरर्थकमवलोक्य निर्वेदं परं गच्छेत् - निर्वेदप्रकाराश्च विविधास्तत्तत् संहिताविशेषेष्वनुसन्धेयाः । तदितं सङ्गृहीतं नारायणमुनिभिः "ब्राह्मे मुहूर्ते सत्वस्थो हरिर्हरिरिति ब्रुवन् । उत्थाय शयने तत्र समासीनस्समाहितः । व्यर्थं वीक्ष्य गतं कालं निर्विद्याहमितः परम्" । इति विस्तरेणोद्धृतं चैतद्भङ्गि वंशेश्वरै"रित्यादि । "यद्यपि मुमुक्षोः "परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन, तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्" इति प्राथमिकगुरूपसत्ति-कालात्पूर्वमेव तृणीकृत हिरण्यगर्भादिभोगः परिपूर्णो निर्वेदस्संवृत्तः तथापि विषमविपाकविशेषगुणत्रयाश्रयभूत प्रकृतिसम्बद्धतया सम्भावितविषयसङ्गादि दोषपरिहाराय तथाविध एव निर्वेदोऽनु-

सात्त्विकधृति मवलम्ब्य, कृतश्च करिष्यामि भगवन्नित्येन भगवत्प्रीत्यर्थेन महाविभूति चातुरात्म्यभगवद्वासुदेव पादारविन्दार्चनेनाभिगमनेन भगवत्मर्कणा भगवन्तं वासुदेवमर्चयिष्यामि, भगवतो बलेन भगवतो वीर्येण भगवतस्तेजसा भगवतः कर्मणा भगवतः कर्म करिष्यामि भगवतो वासुदेवस्य, इत्यनुसन्धाय भगवानेव स्वनियाम्य स्वरूपस्थिति प्रवृत्ति-स्वशेषतैकरसेन मया स्वकीयैश्चोपकरणैः स्वाराधनैक-प्रयोजनाय परमपुरुषस्सर्वशेषी स्वशेषभूतमिदमभि-गमनाख्यं कर्म(स्वस्मै) स्वप्रीतये स्वयमेव कारयतीति

वर्तनीयः - अगीयत चास्य नित्यानुवर्तनीयत्वं - अमानित्वादि गुणगणमध्ये - ''जन्ममृत्युजराव्याधि दुःखदोषाऽनुदर्शनं'' इति अतस्सिद्धोपायस्यापि पराङ्कुश परकालादीनामिव भगवदनुभव-विच्छेदकतया हेयतमरजस्तमोमयनिद्रादिप्रतिकूलवर्गप्रवाहानुवृत्ति-दर्शनेन संसारवैराग्योपचयार्थमहरहस्तदुचितावसरेषु निर्वेदः कर्तव्य एव। एवं सति विवेकविमोकादिसप्तकान्यतमभूतानवसादविरुद्धावसादव-शादुत्तर कैङ्कर्यप्रवृत्तेरनिष्पत्तिस्स्यादिति तत्परिहारायानन्तमुच्यते। ''इति निर्विद्य तदनु धृतिमालम्ब्य सात्विकीम्। विधूय चेमं निर्वेदं सर्वकार्यावसादकम्''। इत्यादिना गतजलसेतुबन्धनाभिलाष-तुल्यानुतापप्रशमनपूर्वकं सात्विकधृत्यवलम्बनात्मकागामिकाल-शक्यकैङ्कर्य निश्चयः'' इत्यादि। सात्विकधृत्यालम्बनस्य कैङ्कर्यप्रवृत्तिहेतुतया तदुक्त्यनन्तरमभिगमनसङ्कल्पसात्विकत्यागावाह ओं कृतश्चेत्यादिना - ''अचम्य वाग्यतो भूत्वा प्रारभेत समर्चनम्।

त्यागं कृत्वा, करिष्यमाणकैङ्कर्यप्रतिबन्ध निवृत्त्यर्थं

अर्चयामि त्वदीयोऽहं त्वद्दत्तैरौपचारिकैः । सांस्पर्शिकैरिति ब्रूयादेनमाभ्यवहारिकैः ।'' इत्यहिर्बुध्न्यसंहिताष्टाविंशाध्यायवचनानुसारात् परिजनपरिच्छदध्यान विधेश्च इज्याद्यन्तयोः भाष्यकारैरौपचारिकादि भोगहेतुक परिजन परिच्छदान्वितस्वात्मप्रीतिबोधक सात्विकत्यागवाक्यरचन मनुगृहीतम् । तद्व्यतिरिक्तकर्मसु उक्तभोगपरिजनपरिच्छदध्यानान्वयाभावात् - श्री गीताभाष्यस्थसात्विकत्यागवाक्ये स्वकीयैश्चोपकरणैस्स्वाराधनैकप्रयोजनाय परमपुरुषस्सर्वशेषी सर्वेश्वरस्स्वयमेव कर्माणि कारयतीत्यनुगृहीततत्वात् श्री गीतार्थसङ्ग्रहरक्षायां तस्यैवानूदितत्वात् शिष्टाचार सम्प्रदायाच्च स्वाराधनैकप्रयोजनायेत्यादि सात्विकत्यागवाक्यमनुगृहीतं । एतेन इज्याव्यतिरिक्ताभिगमनादिसात्विकत्यागवाक्येषु परिजन परिच्छदान्वितत्वं वदतामेकान्यपरेषां पक्षः पञ्चकालक्रिया दीपोक्तः औपचारिकादिभोगाधीनपरिजनपरिच्छदान्वितस्वात्मप्रीति बोधाकाभिगमनसात्विकत्यागवाक्यपक्षश्च प्रत्युक्तः - पूर्वोदाहृतप्रमाणाचार्यपाद श्रीसूक्तिशिष्टाचारैरपररात्रयोगस्य ब्राह्ममुहूर्तप्रबोधसमयकर्तव्यत्वात् ''ब्राह्मान्मुहूर्तादारभ्य उत्थानादिक्रमादेत्'' इत्याचार्यपादोदाहृतप्रमाणेन निर्वेदसात्विकधृत्यालम्बनयोरप्यभिगमन कालकर्तव्यत्वावागमादभिगमन एवान्तर्भावः - यथा श्री भाष्यादि मङ्गळश्लोकस्य ग्रन्थसमाप्त्यर्थस्यापि प्रथमपादादावन्तर्भावः तद्वदिति हृदयम् । कैङ्कर्यप्रतिबन्धकनिवृत्तिप्रार्थनतन्मन्त्रादिकमाह करिष्यमाणेत्यादिना । तदुक्तं ''यदयमपवर्गांकुरभूत स्वयंप्रयोजन स्वामिकैङ्कर्यमहानन्दलाभः ''विघ्नायुतेन गोविन्दे नृणां भक्तिर्निवार्यते'' इति कथं भविष्यतीति भयादनन्तरं प्रतिबन्धकनिवृत्तिं प्राार्थ्य ''एतत्क्रियाविरोधीनि-प्राचीनान्यशुभानि

''एतत्क्रियाविरोधीनि प्राचीनान्यशुभानि मे । कर्माण्यनन्तान्यच्छेद्यान्यनादीन्यशुचीन्यपि । त्वयैव कृपया देवो विनाश्यास्मन्मनोरथान् । पूरयत्विति सम्प्रार्थ्य मन्त्रमेतदुदीरयेत् । त्वय्याराधनकामोऽयं व्रतं चरितुमिच्छति । सङ्कल्पसिद्ध्यै भगवन् पूरयास्य मनोरथान्'। इति मन्त्रेण सदाचार्योपदिष्टेन प्रतिबन्धक-निवृत्तिं सम्प्रार्थ्य, निर्विघ्नकैङ्कर्यहेतुभूतभगवत्प्रसाद-सिध्यर्थं भगवन्तं ध्यातुकामः स्वाचार्यप्रभृति भगवत्पर्यन्त गुरुपरम्पराप्रपदनपूर्वकं भगवन्तं प्रपद्य

मे । कर्माण्यनन्तान्यच्छेद्यान्यनादीन्यशुचीन्यपि'' । इत्यादि । ''स च प्रार्थनामन्त्रः'' ''त्वय्याराधनकामोय'' मित्यादिकः यथान्यायं देशिकसकाशादधीत्यात्रान्वहं प्रयोक्तव्यः । एव मेव सर्वेषां मन्त्राणां समाधिः । विपर्यये हि नैष्फल्यं दृष्टादृष्ट प्रत्यवायश्च तेषु तेषु शास्त्रेषु पठ्यते । ''यदृच्छया श्रुतो मन्त्रश्छन्नेनाथ छलेन वा । पत्रेक्षितो वा व्यर्थस्स्यात् प्रत्युतानर्थदो भवेत् ॥ इति - अथ निर्विघ्न कैङ्कर्यभगवत्प्रसादसम्पादनमाह निर्विघ्नेत्यादिना - तदुक्तम्'' एवं विध निर्विघ्न कैङ्कर्यसिद्धिरपि ''सङ्कल्पादेव भगवान् तत्वतो भावितात्मनाम् । वृत्तान्तमखिलं कालं सेचयत्यमृतेन तु'' । इति श्री सात्वतादि-कथितप्रकारेण भगवत्प्रसादादेव भविष्यतीति तत्सिध्यर्थमपि प्रथमं हरेरेवध्यानमुच्यते ॥ इत्यादि भगवत्प्रपदनं गुरुपरम्परा-प्रपदनपूर्वकमित्याह - स्वाचार्यप्रभृतीत्यादिना - अत्र प्रमाणाचार्य श्रीसूक्त्यादिकं पूर्वमेव दर्शितं गद्योक्तध्यानप्रकारमाह - अखिलहेयेत्यादिना - तदुक्तम् । ''भगवच्छास्त्रतदुपब्रह्मणनित्यगद्य-

अखिलहेयेत्यादिना पूर्वोक्तप्रकारेण भगवन्तं ध्यात्वा, "सव्यं पादमित्युक्तप्रकारेण वा ध्यात्वा। "ओं नमो वासुदेवाय नमस्सङ्कर्षणाय ते। प्रद्युम्नाय नमस्तेऽस्तु अनिरुद्धाय ते नमः। नमो नमः केशवाय नमो नारायणाय च। माधवाय नमस्तेऽस्तु गोविन्दाय नमस्ततः। विष्णवेऽथ नमस्कुर्यान्नमस्ते मधुसूदन। नमस्त्रिविक्रमायाथ वामनाय नमस्ततः। श्रीधराय नमश्चाथ हृषीकेशाय ते नमः। नमस्ते पद्मनाभाय नमो दामोदराय च। नमस्ते मीनरूपाय कमठाय नमो नमः। नमोऽस्त्वादिवराहाय नारसिंहाय ते नमः। नमो वामनरूपाय नमो रामत्रयाय च। कुठारज्याहलास्त्राय नमः कृष्णाय वेधसे। कल्क विष्णो नमस्तुभ्यं सर्वं सप्रणवं द्विज" इति पारमेश्वरोत्कप्रकारेण सङ्कीर्त्य, ओं श्रियै नमः, ओं भूम्यै नमः, ओं नीळायै नमः, इत्यादि

स्तोत्रादिषु विप्रकीर्णोक्तं ध्यानं यथावगमं समाहृत्यानुतिष्ठेत् इति गद्योक्तध्यानाशक्तं प्रत्याह - सव्यं पादमित्युक्तप्रकारेण वेति - अथ पारमेश्वरोक्तनामसङ्कीर्तनप्रकारमाह ओं नमो वासुदेवायेत्यादिना - ओं वासुदेवाय नमः, ओं सङ्कर्षणायनमः इति प्रणवादि नमोन्तमन्त्रात्मक नामसङ्कीर्तनं विवक्षितम्। तदुक्तं "तत्र वासुदेवादिकल्किपर्यन्त-सङ्कीर्तनं प्रणवपूर्वकं मन्त्रात्मकं पारमेश्वरे प्रोक्तं "सम्प्रबुद्धः प्रभाते तु उत्थायशयने स्थितः। नाम्नां सङ्कीर्तनं कुर्यात् षोडशानां प्रयत्नतः॥ "ओं नमो वासुदेवाये"त्यारभ्य "सर्वं सप्रणवं द्विज" इत्यन्तं देव्यादिनाम सङ्कीर्तनमाचार्यपादैरनुगृहीतं - सत्सङ्गादित्यादिवरदगुरु-निर्मितश्लोकद्वयकीर्तनं मुमुक्षुत्व निबन्धनम्। "प्रातर्नित्यानु

क्रमेण देव्यादिनामान्यपि सङ्कीर्त्य, ''सत्सङ्गाद्भव निस्पृहो गुरुमुखाच्छ्रीशं प्रपद्यात्मवान् प्रारब्धं परिभुज्य कर्मशकलं प्रक्षीण कर्मान्तरः। न्यासादेव निरङ्कुशेश्वर-दया निर्लूनमायान्वयो हार्दानुग्रहलब्धमध्यधमनिद्वारा बहिर्निर्गतः। मुक्तोर्चिर्दिनपूर्वपक्ष षडुदङ्मासाब्दवातां - शुमद्ग्लौ विद्युद्वरुणेन्द्रधातृमहितस्सीमान्तसिन्ध्वा-प्लुतः। श्री वैकुण्ठमुपेत्य नित्यमजडन्तस्मिन् परब्रह्मण-स्सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान्। प्रातर्नित्यानुसन्धेयं परमार्थं मुमुक्षुभिः । श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत्'' । इत्यपि सङ्कीर्त्य, पूर्वाचार्य प्रणीतस्तोत्राण्यपि शृण्वतामपि हर्षजन-केनोच्चैस्स्वरेण सङ्कीर्त्य, तत्कालोचितद्वयादिमन्त्रजपं पश्चिमयामकर्तव्यं वेदाभ्यासं च कुर्यात्।

सन्धेयं परमार्थं मुमुक्षुभिः। श्लोकद्वयेन संक्षिप्तं सुव्यक्तं वरदोऽब्रवीत्''। इति वरदगुरूक्तेः । ''ब्राह्मान्मुहूर्तादारभ्य प्रागंशं विप्रवासरे । जपध्यानार्चन स्तोत्रैः कर्मवाक्चित्तसंयुतैः । अभिगच्छेज्जगद्योनिं तच्छाभिगमनं स्मृतं'' इति जयाख्यसंहितावचनमनुसृत्य स्तोत्र-जपादिकमाह - पूर्वाचार्यप्रणीणेत्यादिना । स्तोत्रजपादिकमाचार्य-पादैरप्यनुगृहीतम्।

अथ ''प्रहरार्धं तथा सन्ध्या'' इति आशौचशतकव्याख्योक्त-सन्ध्यासन्नकालकर्तव्यमाह ततस्सन्ध्यायामित्यादिना । वामपादं भुवि विन्यस्येति ''अवकुण्ठ्य च वस्त्रेण शरीरं दक्षिणाङ्घ्रिणा। आक्रम्य भूमिं

ततस्सन्ध्यायामासन्नायां सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितम् । भगवन्तमुपासितुं जिगमिषुः हरिर्हरिर्हरिरिरिति कीर्तयन् तल्पादुत्थाय "नमः क्षितिधरायै"ति मन्त्रेण क्षितिधरं महावराहमनुध्यायन् वामपादं भूमौ विन्यस्य "नमोऽस्तु प्रियदत्तायै तुभ्यं देवि वसुन्धरे। त्वं माता सर्वलोकानां पादन्यासं क्षमस्व मे" इति भुवं प्रपद्य पदक्रमान् कुर्वन्, "विष्णोः क्रमोस्यभि-मातिहा गायत्रेण छन्दसा पृथिवीमनु-विक्रमेनिर्भक्तस्सयं द्विष्णो विष्णोः क्रमोस्यभिशस्तिहा त्रैष्टुभेन छन्दसान्तरिक्षमनुविक्रमे निर्भक्तस्स यं द्विष्मो

प्रथमं त्रिविक्रममनुस्मरन्। विन्यसेद्दक्षिणं पादं पूर्वं भूमिमपीडयन्" इति पाद्मवासिष्ठसंहितादिषु दक्षिणपादविन्यासविधानेपि "हरिर्हरिर्ब्रुवन् तल्पादुत्थाय भुवि विन्यसेत्। नमः क्षिति धरायोक्त्वा वामपादं महामते। निशाक्षये तु शयनात् स्तुत्वा नारायणं विभुम् । उत्थाय दक्षिणांसेन वामपादं न्यसेद्भुवि" इति पारमेश्वरजयाख्य वचनविहितवामपादन्यास एवाचार्यपादाभिमतः आचारप्राप्तश्चेत्यभिप्रायेण वामपादन्यासाभि-धानम् । क्षितिधरवराहध्यानपूर्वकं भूप्रपदनमन्त्रमाह नमः क्षितिधरायेत्यादिना । तदुक्तं "नमः क्षितिधरायोक्त्वा वामपादं महामते" इति पारमेश्वरादिपठितेन नमः पूर्वेण क्षितिधरलिङ्गेन मन्त्रेण महावराहं क्षितिधरमनुध्यायन् वामपादं भूमौ विन्यस्येत्यादि । अथ पदक्रममन्त्रानाह पदक्रमानित्यादिना। तदुक्तम् "ततः पदक्रमान् कुर्वन् विष्णुक्रमण मन्त्रेण पादेन्द्रियाधिदैवतं त्रिविक्रमं विष्णुं ध्यायेत्" इत्यादि । केषुचिदाह्निककोशेषु" समुद्रवसने देवी"ति श्लोकोऽस्ति -

विष्णोः क्रमोस्यरातीयतो हन्ता जागतेन छन्दसा दिवमनुविक्रमे निर्भक्तस्सयं द्विष्मो विष्णोः क्रमोसि शत्रूयतो हन्ता नुष्टभेन छन्दसा दिशोऽनु विक्रमे निर्भक्तस्सयं द्विष्मः'' इति पादेन्द्रियाधिदैवतं त्रिविक्रमं ध्यायेत्, एष सन्ध्या-पूर्वकाल कर्तव्यक्रमः।

ततस्स्नानीय तिलाक्षतदर्भवस्त्र दृष्टादृष्टार्थ स्नानोपकरणं सर्वं संभृत्य, तमस्तिरोहित दुष्टजन्तु पलायनार्थं वैणवदण्डं सङ्गृह्य, निर्गममार्गं सञ्चाल्य, केशवमनुध्यायन् सङ्कीर्तयन्, गृहान्निर्गत्य, विशुद्धदेश-

---

आचार्यपादैरनुपात्तत्वात्स नानुसन्धेयः । ततो नद्यादिगमनमाह तत इत्यादिना - निर्गममार्गं सञ्चाल्य केशवमनुध्यायन् गृहान्निर्गत्येति । तदुक्तं ''तमस्तिरोहितदुष्टजन्तुपलायनार्थं निर्गममार्गं सञ्चालयेत्''। यथोक्तं पारमेश्वरे ''बहिर्निर्गममार्गन्तु सञ्चाल्ये'' त्यादि । ततो गृहान्निर्गच्छन् केशवमनुध्यायेत् ''व्रजंश्चिन्तय केशवं'' इति स्मरणात् । केशवशब्देन अंशवो ये प्रकाशन्ते - यदादित्यगतं तेज इत्याद्युक्तांशव उच्यन्ते तद्वत्त्वात् केशवः । गच्छतो मार्गादिप्रकाशनार्थं दिङ्मोहान्तरतमोनिरासार्थं, '' क इति ब्रह्मणो नाम ईशोहं सर्वदेहिनाम्। आवां तवाङ्गे सम्भूतौ तस्मात्केशवनामवान्'' इति ब्रह्मरुद्रोपलक्षित विश्वसृष्टिरक्षाहेतुत्वात् केशिवधोपलक्षितसर्व-दुष्टदमनस्वभावत्वाच्च असहाय दशासाहाय्यार्थं तदा तच्चिन्तनं'' इति, केशिवधकर्तृत्वार्थस्य व्याकरणा बोध्यत्वेपि श्रीविष्णुपुराण पञ्चमांश-निर्वचन सिद्धत्वं बोध्यं - विशुद्धदेशनिक्षिप्तस्नानोपकरण इत्यादि ''ग्रामाद्बहिर्दिशं गत्वा निरृकृति''मिति पाद्मादिवचनमनुसृत्य-

निक्षिप्तस्नानोपकरणः, स्वाश्रमादिभ्यो नैरृत्यां दिशि चित्रेषुपातप्रतितां भुवमतिक्रम्य, फालकृष्टवल्मीकादि-व्यतिरिक्तपरिशुद्धप्रदेशान्मृदमादाय, शौचस्थले यत्र कचिद्वा निधाय ततो मूत्रपुरीषादिकं कुर्यात् । ''कृत्वा यज्ञोपवीतन्तु कर्णे सम्यङ्निवीतकम् । मलमूत्रन्त्यजे-द्विप्रश्शिरः प्रावृत्य वाससा। उदङ्मुखो दिवासन्ध्यं रात्रौ चेद्दक्षिणामुखः । अयाज्ञियैस्तृणैर्भूमिं सञ्छाद्योदस्त-वस्त्रधृत् । ष्ठीवनोच्छ्वासरहितो विण्मूत्रे विसृजेद्विजः । सस्ये गर्ते बिले तोये पाषाणे तुलसीवने । वृक्षमूले दर्भमूले शाड्वले जनसंसदि । देवालये तत्समीपे

निरृतिगमनमुक्तम् । दिगन्तरगमनमप्याचार्यपादसम्मतमित्युत्तरत्र स्पष्टम् । मृद्ग्रहणविण्मूत्रविसर्जनादिकमाह - फालकृष्टवल्मीकेत्यादिना । तत्र वासिष्ठसंहितावचनान्युदाहरति - ''कृत्वा यज्ञोपवीतं'' त्विति । तदुक्तं तत्रैव पाद्मे ''उपवीतं कर्णदेशे निधाय च तृणादिना'' इत्यादिना विण्मूत्रविसर्जनप्रकारमुक्त्वा अनन्तरमेवं शौचविधिरुक्तः । ''दक्षिणेतरहस्तेन गृहीत्वा मेहनं ततः । दक्षिणे मृत्तिकां हस्ते समुत्थाय जलाशयम् । प्रागुदीच्यामुदीच्यां वा गत्वा शौचं समाचरेत् । मृत्तिकाभिर्द्वदशभिः गुदं षड्भिस्तु मेहनम् । अन्तरा चान्तरा वामकरं प्रक्षाल्य *वारिभिः । मृत्तिकाभिस्तदन्ते द्वौ करौ द्वादशसङ्ख्यया । संशोध्य चरणौ जङ्घे कटिं चोरुं च वारिभिः । प्रत्येकं मृत्तिकामात्र चतुष्केण विशोधयेत् । पितामहस्तु सनत्कुमारायैव माह ''ततः पूर्वं समुत्थाय प्राचीमेवोपनिष्क्रमेत् । उदीपं प्रागुदीचीं

---

* मृज्जलैः इति पाठान्तरम् ।

देवोद्यानेऽनिलान्तिके। स्त्रीसन्निधौ महाकूपे तटाके पर्वते शुचौ ॥ पुरीषगर्ते वाप्यादौ श्मशाने तु गृहाङ्गणे । गृहारामे नदीतीरे गोष्ठे भस्मनि वर्त्मनि । औषरे फालकृष्टे च छायायामग्निसन्निधौ। एतेषु नोत्सृजेन्नित्यं मलमूत्रे द्विजोत्तमः ॥ इत्यादि निषिद्धप्रदेशव्यतिरिक्तप्रदेशे दक्षिणकर्णनिक्षिप्त ब्रह्मसूत्रः दिवासन्ध्ययोश्चोदङ्मुखः रात्रौ दक्षिणामुखः प्रावृतशिराः पिहिताननश्च भूमियाज्ञिय तृणादिना प्रच्छाद्य देवालयनदीगोब्राह्मणाग्निवाय्वश्वत्थाद्यनभिमुखो मौननियमयुक्तो वामेन मेहनं गृहीत्वा विण्मूत्रविसर्जनं कृत्वा अयाज्ञियकाष्ठादिना पुरीषलेपं वामेन निघृष्य दक्षिणहस्तेन पूर्वस्थापितां मृदं गृहीत्वा शौचस्थलं गत्वा गुदलिङ्गपादहस्तशौचार्थं पूर्वस्थापितां तदास्थापितां वा मृदं चतुर्धा विभज्य स्थापयित्वोदङ्मुखः परिचारकेणोद्धृत जलप्रक्षेपपूर्वकं शौचं कुर्यात्। मूत्रपुरीषयोर्युगपत्प्रवृत्तौ

वा शौचाचारक्षमां दिशम्। यत्रोदकं प्रभूतं तु तद्गत्वा शौचमाचरेत्।'' इति। स्मरन्ति च देशादिभिन्नं शौचं ''देशं कालं तथा ज्ञानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत्'' इति – दिवसादिभेदेनापि शौचतारतम्यं स्मर्यते ''अह्नि यच्छौचमुद्दिष्टं निश्यर्धं तु ततो भवेत्। पथि पादस्ततः प्रोक्तो यथा शक्त्यातुरस्य तु। इति— पारमेश्वरे तु प्रावृडादिकालभेदेनापि मृत्सङ्ख्याभेदादिकमुक्तं'' इत्यादि – ''तिस्रो लिङ्गे मृदो देयाः एकैकान्तरमृत्तिकाः । पञ्चवामकरे देयाः

पुरीषस्य प्रथमं, क्रमेण प्रवृत्तौ यथाक्रमं, शौचं कुर्यात्। अत्र विण्मूत्रयोस्साहित्ये षण्मृत्तिकाभिर्मूत्रशौचं कुर्यात्। पञ्चदशभिः द्वादशभिर्वा गुदशौचं कुर्यात्। गुदलिङ्गान्यतरशौचानन्तरं पञ्चषमृत्तिकाभिर्वामहस्तं प्रक्षाल्य अनन्तरशौचं कुर्यात्। मूत्रशौचे आर्द्रामलक-मात्रा मृत्तिकाः, गुदशौचे प्रथममृत्तिका प्रसृतिमात्रा, द्वितीया तृतीया च तदर्धपरिमाणा, इतरास्त्वार्द्रामलक-द्विगुणाः, तत्समा वा। सर्वत्र गुदलिङ्गशौचेषु प्रतिमृत्तिकमन्तरान्तरा वामहस्तं मृज्जलाभ्यां प्रक्षालयेत्। पुरीषे कट्यादौ मलसम्बन्धशङ्कायां सप्तमृत्तिका देयाः। सर्वत्र शौचे वामहस्तमुभयजान्वन्तः दक्षिणञ्च दक्षिणजानुबहिः कुर्यात्। उत्थाय वामं दशभिः पादौ

स्तिस्रः पाण्योर्विशुद्धयोः। मूत्रोत्सर्गे शुद्धिरेषा पुरीषस्याप्यनन्तरम्। अर्धप्रसृतिमात्रन्तु प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्धा परीकीर्तिता। बिडालपादमात्रन्तु तदूर्ध्वा परिकीर्तिता। पञ्चापानेमृत्तिकास्स्युस्तथैवान्तरमृत्तिकाः। दश वामकरे देयास्सप्त-तूभयहस्तयोः। पादाभ्यां तिसृभिश्शुद्धिः जङ्घाशुद्धिस्तु पञ्चभिः। नियोजयेत्ततो विप्रः कट्यां वै सप्तमृत्तिकाः। स्वदेहस्वेष दोषघ्ना बाह्यकर्दमशान्तये। भक्तानां श्रोत्रियाणाञ्च वर्षास्वेवं निरूपितम्"। इत्यादि "हेमन्तशिशिरे विप्रैश्श्रोत्रियैस्संयमस्थितैः। पथि शौचं प्रकर्तव्यं देशकालानुरूपतः" इत्यादि। यदन्योक्तं "दक्षिणे मृत्तिकां हस्ते समुत्थाय जलाशयं" इति पाद्मवचनेन मलमूत्रकरणानन्तरमपि मृत्तिकाग्रहणप्रतीतेः "विण्मूत्रकरणात्पूर्वमादद्यान्मृत्तिकां सदा।

प्रत्येकं सप्तभिः संहतकरौ दशभिस्सप्तभिर्वा शोधयेत्। मूत्रमात्रप्रवृत्तौ पञ्चभिस्त्रिभिर्वा मृत्तिकाभिर्लिङ्गशौचं कुर्यात्। वामहस्ते पञ्च, हस्तयोस्तिस्रो मृत्तिका देयाः, इदमहश्शौचं, अहश्शौचापेक्षया रात्रावर्धं, पथि पादः, स्त्रीणामर्धं, ब्रह्मचारिणो द्विगुणं वानप्रस्थयत्योश्चतुर्गुणं, यथाशक्त्यातुरस्य, एवं धर्मशास्त्राद्युक्त स्ववर्णाश्रमावस्थाद्यनुगुणदृष्टादृष्टार्थमृत्संख्या वर्णपरिमाणादिनियमवत् गन्धलेपक्षयकरं अर्शः पीडादिरहितं

आददानस्तु वै पश्चात् सवासा जलमाविशेत् ॥'' इति देवलस्मृतिनिषेधस्त्याज्यः, पञ्चरात्रात् स्मृतेः दुर्बलत्वात्— हस्तद्वयशौचानन्तरमेव पादशौचं पाद्मवचनसिद्धं – अतः दुर्बलधर्मशास्त्रसिद्धं पादशौचानन्तरं करशौचं न कार्यमिति च – तदसाधु –दक्षिणे मृत्तिकां'' इति वचनस्य मलादिविसर्जनपूर्वकालस्थापितमृद्विषयतया देवलवचनाविरोधस्य मलादिविसर्गोत्तरमृद्ग्रहण निषेधस्य च स्मृतिरत्नाकरसमर्थितत्वात्– ''आचारे धर्मशास्त्राणि अधिकारि विशेषनियतानन्यभजनप्रस्थाने पञ्चरात्रं'' इति श्री न्यायपरिशुद्धचनुगृहीताचारविषय धर्मशास्त्रप्राबल्यस्य निराबाधत्वात्। वासिष्ठसंहितायां ''पादयोः पक्षसङ्ख्या स्यात् करयोः पञ्चविंशतिः'' इति पादशौचानन्तरं करशौचोक्तेः, भवदुक्तप्राबल्यदौर्बल्यासिद्धेः। वस्तुतः धर्मशास्त्रसिद्धानां भगवच्छास्त्रसिद्धानां वा शौचाचमनादिधर्माणां पूर्वाचार्यपरिग्रहानुसारेण परिग्राह्यत्वमाचार्यपादानुगृहीतमिति न कश्चिद्विरोधः। एतत्तत्वं सत्पथरक्षायामस्माभिः प्रपञ्चितम्। वाप्यादौ विशेषमाह – वपीकूपेति। स्मृतिरत्नाकरे चन्द्रिकायां यदाकथञ्चि-

शौचं कुर्यात्। वापी कूपतटाकादौ बाह्यदेशान्मृदं नाहरेत्। मणिबन्धात्परतः जले मृत्तिकां गृहीत्वा शौचं कुर्यात्। जलस्यारत्निमात्रात्परतः स्थले स्थित्वा शौचं कुर्यात्। ततो मूत्रे चतुष्षड्वा पुरीषेऽष्टौ द्वादश वा वामभागे आसीनो गण्डूषान् कृत्वा, अन्तर्जानुगतकरयुग्मस्स्व-

---

दुद्धरणमपि न सम्भवति तदा विशेषमाह विवस्वान् ''अरत्निमात्रं जलं मुक्त्वा कुर्याच्छौचमनुद्धृत'' इति– यमः ''वापीकूपतटाकेषु नाहरेद्बाह्यमृत्तिकाम्। अन्तर्जलगताग्राह्याः परतो मणिबन्धनात्। आद्यन्तयोस्तु शौचानामद्भिः प्रक्षालनं स्मृतम्। सुनिर्णिक्ते मृदं दद्यात् मृदन्ते जलमेव च।'' इति–कटचादिमृद्वचनं मलसम्बन्ध शङ्काविषय-मित्याचारादभिहितम्। एवं शलाकादिना नवशोधनमृत्सेचनादिकमपि कर्तव्यम्। रत्नााकरादौ विस्तरो द्रष्टव्यः। अथ गण्डूषाचमनादिकमाह तत इति। स्मृतिरत्नाकरे ''मूत्रे पुरीषे भुक्त्यन्ते तथैवा भक्ष्यभक्ष्यणे। चतुरष्टद्विषड्द्व्यष्टगण्डूषैस्तु विशुद्ध्यति''। इति – तत आचमनमाह – अन्तर्जानुगतकरयुग्म इति – तदुक्तं ''चतुर्धा मणिबन्धस्थं तोयं कृत्वा सुनिर्मलम्। बुद्बुदाद्यैर्विनिर्मुक्तं पिबेद्विप्रो हृदा ततः। एकैकां ह्रासयेन्मात्रां वर्णत्रयमनुक्रमात्। पाणिना क्षालितेनैव पुनराचा-मयेद्बुधः'' इति। आचमनप्रकाराश्च बहुधा धर्मशास्त्रेषु भगवच्छास्त्रेषु च प्रतिपादिताः। तत्र स्वसूत्रोक्तमन्यद्वा यथाधिगमं आचमनं कुर्यात्'' इति वासिष्ठसंहितायां ''गोकर्णाकृतिहस्तेन मुक्त्वाङ्गुष्ठकनिष्ठिते। संवीक्ष्य ब्रह्मतीर्थेन द्विज आचमनं चरेत्। चतुर्मन्त्रेण वा कुर्यान्नित्यमाचमनं

सूत्रसंहिताद्युक्तप्रकारेण ''विण्मूत्रोत्सर्जने त्रयं'' इत्युक्त-

बुधः । अङ्गानां स्पर्शनं कुर्यात् केशवाद्यैश्च नामभिः । अष्टाक्षरेण वा कुर्यात् द्वादशार्णेन वा पुनः । नामत्रयेण वा नित्यं द्विज आचमनं चरेत्'' इति वासिष्ठसंहिता वचनविहितेषु नामत्रयकरणकाचमन केशवादि-मन्त्रकरणकाङ्गस्पर्शाश्शिष्टपरिगृहीताः । स्पृष्टव्यान्यङ्गानि कानीत्य-पेक्षायां, पञ्चरात्रविहितनामत्रयकरणकाचमनस्य पञ्चरात्रविहित-स्पर्शकर्मीभूतान्यङ्गान्येव स्वीकार्याणि – न धर्मशास्त्रोक्तान्यङ्गानि – आचार्यपादैः धर्मशास्त्रोक्तस्य भगवच्छास्त्रोक्तस्य वाधिगमसिद्धस्य ग्राह्यत्वानुशासनात्, भगवच्छास्त्रविहितनामत्रयकरणकाचमनानुष्ठाने धर्मशास्त्रविहिताङ्गस्पर्शाङ्गीकारे उदाहृत श्रीसूक्तिविरोधप्रसङ्गाद-नौचित्याच्च । पारमेश्वरे ''द्विरामृज्य मुखं पुनः'', ''अङ्गुष्ठानामिकां कृत्वा नेत्रे स्पृष्ट्वा च वारिणा । तथैव तर्जनीं कृत्वा तथा ते नासिकापुटे । कनिष्ठिकां तता कृत्वा तेनैव श्रवणे क्षिपेत् । तथैव मध्यमां कृत्वा बाहुदेशावुभौ स्पृशेत् ।'' तेनैव नाभिदेशं च सर्वैर्युक्त शिरस्स्पृशेत् । इत्यङ्गस्पर्शप्रमाणमस्ति । आह्निककाण्डोदाहृत दक्षवचनेनापि हृदयव्यतिरिक्ताङ्गस्पर्श एव प्रतिपन्नः । एवं च, केशवादिभिर्नमोन्तैः मुखे द्विः परामर्शप्रभृतिनेत्रनासापुट श्रवणबाहुद्वयनाभिशिरस्तु, उदाहृत वचनविहिताङ्गुलीभिस्स्पर्शाश्शिष्टाचारानुगुणाः । न च पारमेश्वरोदाहृत वामहस्ततलप्रोक्षणादित्यागेन मुखनेत्रादिस्पर्श-मात्रानुष्ठानमयुक्तमिति वाच्यं, आचार्यानुगुण्येन तावन्मात्रस्य ग्राह्यत्वात् । यथा दशरात्रादिपूर्णशावाशौचकालातिक्रमविषये ''आत्रिपक्षात् त्रिरात्रं स्यात्'' इति देवलवचने आत्रिपक्षादित्यं-

रीत्या मूत्रपुरीषोत्सर्जने त्रिराचम्य, तत आचमनद्वय-पूर्वकं "षोडशाङ्गुलिदीर्घैस्तु वक्रग्रन्थिविवर्जितैः। अर्क

सम्परित्यज्य "आत्रिमासात्त्रिरात्रं स्यात्" इति वृद्धवसिष्ठवचने "अहस्तु नवमादर्वा" गित्यंशं परित्यज्य, शेषमादाय शिष्टाचारानुसारेण "त्रिरात्रं त्रिषु मासेषु पक्षिण्येव ततस्त्रिषु । ततोऽहष्षट्स्वथ स्नानं दशरात्रात्यघश्रुतौ" । इत्याशौचं सार्वभौमोक्तं, एवं यथाधिगममित्याचार्यपादानुगृहीतत्वेन पूर्वोक्तपारमेश्वरवचन-सिद्धाङ्गस्पर्शानुष्ठानं न्याय्यम् । यत्पराह्निकोक्त मच्युतादि मन्त्रवदाचमनं केशवाय नम इत्याद्यैः कपोलनेत्र नासिकापुट श्रोत्र भुजद्वय स्पर्शानन्तरं पद्मनाभाय नम इति मन्त्रेण नाभिहृदयस्पर्श इति। यदपराह्निकेऽच्युतादि मन्त्रयुक्ताऽऽचमनं केशवाय नम इत्योष्ठोपरि परामर्शः नारायणादि मन्त्रैः नेत्र नासाश्रोत्र भुजद्वयनाभिहृदय शिरस्स्पर्श इत्यभिहितं, तत्पूर्वोपदर्शितरीत्या धर्मशास्त्रविहिते भगवच्छास्त्रविहिते वा आचमनेऽनन्तर्गतत्वात् उपात्ताचार्यपाद श्रीसूक्तिविरुद्धत्वाच्चोपेक्ष्यम् । रत्नाकरे दक्षः "गोकर्णाकृतिहस्तेन त्रिः पिबेद्ब्रह्मतीर्थतः । देवलः "अप्सु प्राप्तासु हृदयं ब्राह्मण श्शुद्धिमाप्नुयात्। राजन्यः कण्ठतालुं च वैश्यश्शूद्रस्तथा स्त्रियः" । याज्ञवल्क्यः "शुध्येरन् स्त्री च शूद्राश्च सकृत्स्पृष्टाभिरन्ततः" । अन्ततः तालुना सकृत्स्पृष्टाभिः स्त्रियश्च शूद्राश्च शुद्ध्यन्तीत्यर्थः । व्यासः "संहताङ्गुलिना तोयं गृहीत्वा पाणिना द्विजः। मुक्त्वाङ्गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत् । संवर्तः "शिरः प्रावृत्य कण्ठं वा तिष्ठन् मुक्तशिखोऽपि वा । अकृत्वा

पादयोश्शौचमाचान्तोऽप्यशुचिर्भवेत्'' । आपस्तम्बः ''जान्वोरध-स्तात्सलिले उपविष्ट उपस्पृशेत् । जलाशयाद्यास्वाचामेदूर्ध्वमं भस्सुसंस्थितः'' । दक्षः ''स्नात्वा चामेद्यदा विप्रः पादौ कृत्वा जले स्थले। उभयोरप्यसौ शुद्धः ततः कर्मक्षमो भवेत् ।'' भवद्वाजः ''स्नानपानक्षुतस्वापहोमभोजनकर्मसु । रथ्योपसर्पणे मूत्रविडुत्सृष्टौ द्विराचमेत्। जपे श्मशानाक्रमणे परिधाने च वाससः। चत्वरक्रमणे चैव द्विजातिर्द्विरुपस्पृशेत्'' । याज्ञवल्क्यः ''स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे। आचान्तः पुनराचामेत् वासो विपरिधाय च'' । स्मृतिरत्ने ''दाने प्रतिग्रहे होमे जपे सन्ध्यात्रये तथा। बलिकर्मणि चाचामेदादौ द्विस्सकृदन्ततः। भोजने च तथा चामेदादावन्ते च नित्यशः'' । विष्णुः ''रथ्यामाक्रम्य कृतमूत्रपुरीषः चण्डालभाषणे च''। बोधायनः ''भोजने हवने दाने उपहारे प्रतिग्रहे। हविर्भक्षणकाले च द्विर्द्विराचमनं स्मृतं'' उपहारः, देवार्चनम् । इत्यादीनि पुनराचमन-निमित्ततत्प्रमाणानि तत्रैव द्रष्टव्यानि । स्नात्वाचामेदिति दक्षवचनं स्नानोत्तरार्द्रवस्त्र कर्तृकाचमनमात्रविषयमिति माधवीयाह्निक-काण्डयोरुक्तम्। अथ दन्तधावनमाह – तत आचमनद्वयपूर्वकमिति। तदुक्तं ''आचमनोक्त्यनन्तरञ्च दन्तधावनमुखशोधनप्रकारः पारमेश्वरे उक्तः – ''एवं प्रक्षाल्य विधिवदाचम्य प्रयतश्शुचिः। प्राङ्मुखोदङ्मुखो-वापि उपविश्यासनं ततः। अर्कादिभिरपामार्गैः कारयेद्दन्तधावनम्। प्रातर्हृत्वा च मृद्वग्रं कषायकटुतिक्तकम्। भक्षयेद्दन्तकाष्ठञ्च दन्तमांसा

क्षदर्भाश्च वैणवान्'' इत्युक्तलक्षणान् दन्तकाष्ठान् *सर्षिच्छन्दोधि

*न्यपीडयन् ।'' अर्कन्यग्रोधेत्यादिमूलस्थवचनं पारमेश्वरोक्तं ''आम्राङ्कुरमपामार्गमर्जुनं धातकी शमी। अन्यानि च पवित्राणि तेषु सम्पन्नमाहरेत्।'' इति – अत्राभक्षणीयस्यापि दन्तकाष्ठस्य भक्षणोक्तिः भक्षणवदाद्यन्ताचमनादिप्राप्त्यर्था । पाद्मेऽप्येवं दन्तधावनमुक्त'' मित्यादि – ''अत्र सर्वत्र प्रतिषिद्धानां वर्जनं सर्वत्र विहितानां **ग्रहणं कचिद्विहितानां कचिच्च प्रतिषिद्धानां गत्यभावे ग्रहणं इति निष्कर्षः – एवं सर्वत्र भाव्यम् । यथोक्तलक्षणं दन्तकाष्ठं समन्त्रकं गृहीत्वा ''आयुर्बल''मित्यादि स्मार्तमन्त्रपूर्वकं प्रादक्षण्येन प्रथममधरतो दन्तधावनं कुर्यात् –काष्ठालाभादिदशासु तत्तत्तरुपर्णैस्तृणैर्वा – तेषामप्यभावे द्वादशगण्डूषैः मुखशुद्धिः इत्यादि - अत्र ''प्रतिपत्पर्वषष्ठीषु चतुर्दश्यष्टमीषु च । दन्तानां काष्ठसयोगो दहत्यासप्तमात्कुलम्। अष्टम्यां च चतुर्दश्यां पञ्चदश्यां त्रिजन्मसु। तैलं मांसं व्यवायञ्च दन्तकाष्ठञ्च वर्जयेत्'' । इत्यादिभिः प्रतिषिद्धदिनानि ग्राह्याणि - भक्षयेद्दन्तकाष्ठञ्चेत्यत्र भक्षणाङ्गाचमनविधौ पूर्वप्रदर्शित-तात्पर्यवर्णनस्योचिततया भक्षयेदित्यस्यास्य प्रवेशो तात्पर्यमिति रत्नाकरोक्तं न सम्यक् - सर्वत्र सर्वेषु प्रमाणेषु - भगवच्छास्त्रेषु धर्मशास्त्रेष्विति यावत् । पारमेश्वरोक्तानां दन्तकाष्ठानां पाद्मोक्तानाम्

* दन्तधावनमन्त्रस्य मार्कण्डेय ऋषिः, अनुष्टुप्छन्दः, वनस्पतिर्देवता।

* न्यबाधयन् इति पाठान्तरम्।

** उपादानञ्च इति पाठान्तरम्।

''अपामार्गश्च निम्बश्च जम्ब्वाम्रार्कद्रुमास्तथा । एते प्रशस्ताः कथिता दन्तधावनकर्मणि । अन्ये द्रुमा निषिद्धास्स्युस्सर्वधा द्विजधावने'' इति वासिष्ठसंहिताविहितानाश्चैककण्ठ्येन दन्तधावनसाधनतया प्रतिपन्न-निम्बार्कन्यग्रोधादिव्यतिरिक्ता वृक्षादयो भगवच्छास्त्रे प्रतिषिद्धाः । स्मृतिरत्नाकरे मार्कण्डेयोशनोभारद्वाजस्मृतिभिः केचन वृक्षा निषिद्धाः । उभयशास्त्रनिषिद्धा वर्ज्याः । उभयविहिता उपादेयाः, एकशास्त्रे निषिद्धानामन्यशास्त्रे विहितानां गत्यभावे ग्रहणमिति फलितम् । एवं ''पयोभिस्सह तर्जन्या'' इति भगवच्छास्त्रे विहिततर्जनीग्रहणस्य ''तृणपर्णोदकानामङ्गुल्या वा दन्तान् धावयेत् प्रदेशिनीवर्ज''मिति स्मृत्युक्तप्रदेशिनीनिषेधस्य च व्यवस्था आस्थेया ॥

यत्तु–पारमेश्वरोक्तेषु पाद्मोक्तान्येव ग्राह्याणि, इतराणि तु गत्यन्तराभावे ग्राह्याणि, ''एकादशे''ति सङ्ख्यया इतरेषां निषिद्धत्वात् । तदभिप्रायेण हि अत्र ''सर्वत्र प्रतिषिद्धाना''मित्याद्युच्यत इति, ''सर्वत्र प्रतिषिद्धानामिति श्रीसूक्तेर्भगवच्छास्त्रमात्र विषयत्वमिति चान्योक्तं; तदसङ्गतम् - ''एकादश च'' इति पाद्मवचनस्थ चकारेण पारमेश्वरोक्तसमुच्चयेन, ''एकादशे''ति सङ्ख्यानिर्देशस्य इतरनिषेध-परत्वासम्भवात् । शौचस्नानादिषु भगवच्छास्त्र धर्मशास्त्र वचनानामा-चार्यपादोदाहृतत्वेन उभयत्र दन्तकाष्ठविधिप्रतिषेध दर्शनेन च ''सर्वत्रे''त्यादि श्री सूक्तेस्तदुभयविषयत्वौचित्यात् । एवं सर्वत्र भाव्यं, दन्तकाष्ठविषयविहित प्रतिषिद्धव्यवस्थाविहितप्रतिषिद्धक्रियान्तर-विषयेऽपि भाव्येत्यर्थः ॥

4

दैवतम्। "आयुर्बलं यशो वर्चः प्रजां पशु वसूनि च। ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो देहि वनस्पते" इति मन्त्रेणाभिमन्त्र्य गृह्णीयात्। काष्ठनिषेधतिथिषु च तत्तत्पर्णानि तृणं वा गृह्णीयात्। एकादश्यमावास्ययोस्तु जम्बुप्लक्षाम्र पर्णान्येव गृह्णीयात्, नान्यत्। तेनैव मन्त्रेणावकुण्ठितशिराः भोजने यावन्तो नियमास्तावन्नियमसहितं दन्तधावनं कुर्यात्। जिह्वा निर्लेखनं च कृत्वा, दन्तकाष्ठं प्रक्षाल्य, निरृत्यां शुद्धदेशे निरस्य, षोडशगण्डूषान् कुर्यात्।

अत्र "जान्वोरन्तःकरौ कृत्वा कुक्कुटासनमास्थितः। शिरः प्रच्छाद्य वस्त्रेण एकान्ते प्रयतो बुधः। मौनेन सह कुर्वीत दन्तधावनमुत्तमम्। भुक्तकाले तु नियमा यावन्तस्सम्प्रकीर्तिताः। तावन्तो नियमाः सर्वे दन्तधावनकर्मणि" इति वासिष्ठसंहितावचनानि, "यावन्तो नियमाः प्रोक्ता द्विजश्रेष्ठस्य भुञ्जतः। प्रेक्ष्याप्रेक्ष्येषु कर्तव्या दन्तधावनकर्मणि" इति स्मृतिसङ्ग्रहवचनञ्च "आयुरित्यादि मन्त्रोऽयमुक्तश्शाखाभिमन्त्रणे। विनाभिमन्त्रणं तूर्ष्णीं वृथा स्याद्दन्तधावनम्। अस्य प्रजापतिर् ऋषिश्छन्दोऽनुष्टप् वनस्पतिः। देवतेति हृदि स्मृत्वा मन्त्रारम्भे वदेत् बुधः। अभिमन्त्र्य हृतां शाखां मन्त्रेणानेन वै द्विजः। अधरोर्ध्वक्रमेणैव शोधयेच्छाखया तया" इति रत्नाकरस्थवचनानि, "प्राङ्मुखः प्रागुदङ्मुखो वा दन्तधावनं कुर्यात् नान्यदिङ्मुखः" इति रत्नकरोक्तम्, "तृणपर्णैस्सदा कुर्यादमां चेकादशीं विना। तयोरपि च कुर्वीत जम्बू प्लक्ष रसालकैः" इति। मुक्ताफलस्थवचनम्, "दन्तान्सशोध्य निर्लिह्य जिह्वां गण्डूषयेन्मुहु" रिति नारायणमुन्युक्तं चानुसन्धेयानीत्यन्यत्र विस्तरः।

दन्तधावनासम्भवे, द्वादश गण्डूषान् कृत्वा, द्विराचम्य भगवद्भागवताधिष्ठितं तीर्थं गत्वा, तीरं संशोध्य, मृद्वारिभिस्सुप्रक्षालितपाणिपादो द्विराचम्य, त्रिः प्राणा-नायम्य, गुरुपरम्परास्मरणपूर्वकं ''स्वशेष-भूतेन मया स्वीयैः सर्वपरिच्छदैः । विधातुं प्रीतमात्मानं देवः प्रक्रमते स्वयम्'' हरिः ओं तत् श्री गोविन्देत्यादि अस्यां

दन्तधावनानन्तरं ''द्विराचम्ये''त्युक्तिः, ''भोजनेचे''त्यादि वचनविहिताद्यन्ताचमनद्वयस्य दन्तकाष्ठभक्षणविधिवाक्यात् दन्त-धावनाङ्गतया विहितत्वस्य पूर्वं दर्शितत्वादिति ध्येयम्।

ततस्थीर्थागमनस्नानादिकमाह– भगवद्भागवताधिष्ठितं तीर्थं गत्वेत्यादि। तदुक्तम्– ''तत्र यत् शुद्धेः पूर्वं जलाशयगमनमुक्तम्, तत्र भागवतं भागवताश्रितं च तीर्थं विवक्षितम्, यथाहुः – 'तीर्थं भागवतं शुद्धमुपगच्छेन्मनोहर'मिति । 'ततस्तीर्थं समासाद्य शुद्धं भागवता-श्रित'मिति । स्मरन्ति च 'जलं शुद्धमशुद्धं वा विष्णुवास्तुसमीपतः (गं)। विष्णुगङ्गासमं तीर्थं महापातकनाशनम् ।' इत्यादि ''यत्र भागवताः स्नानं कुर्वन्ति विमलाशयाः । तत्तीर्थमधिकं विद्धि सर्वपापप्रणाशनम्'' इति।

स्नानसङ्कल्पमाह– तीर्थे नद्यां वा प्रातः स्नानं करिष्य इति सङ्कल्प्य इति । ''आयम्यासून् करिष्ये सकलशुभकृते यज्ञसूत्रप्रतिष्ठामि'' त्याचार्यपाद श्रीसूक्त्यनुसारेणैव दीक्षितव्यतिरिक्त त्रैविद्यानामिज्या-व्यतिरिक्त क्रियासङ्कल्पः कार्यः । इज्यायां तु सङ्कल्पः ''कृतं चे''त्यादिरूपः, शिष्टानुष्ठानमपि तथैवेति हृदयम्। एतेन स्नानकाले

शुभतिथौ श्री भगवदाज्ञया भगवत्प्रीत्यर्थं कर्मण्यतासिद्ध्यर्थं अस्मिन् तीर्थे अस्यां नद्यां वा प्रातःस्नानं करिष्य इति सङ्कल्प्य, अस्त्राभिमृष्टकाष्ठादिना मूलमन्त्रेण शुद्धदेशान्मृदमादाय द्विधा विभज्य तीरे निधायाभ्युक्ष्य, एकेनाधिकभागेन देहं सर्वतः प्रक्षाल्य, त्रिर्निमज्ज्योत्तीर्याचम्यासीनो भगवन्तं ध्यायन् मूलमन्त्रेण प्राणायामत्रयं कृत्वा, अन्यमृद्भागमादाय दक्षिणपाणिना वामपाणितलस्यादौ मध्येऽन्ते च त्रिधा कृत्वा, पृथक्पृथक्सम्प्रोक्ष्य, मूलमन्त्रेणाभिमन्त्र्य, आदिमभागेनावाहयिष्यमाणगङ्गायाः पीठमन्तर्वारि कल्पयित्वा, मध्यमभागेन साङ्गुष्ठतर्जन्यास्त्रमन्त्रेण

अभिगमनेन भगवत्कर्मणा भगवन्तं वासुदेवमर्चयिष्यामीति सङ्कल्पं, क्रियान्तरेषु तत्तत्कर्मणा भगवन्तमर्चयिष्यामीति सङ्कल्पं च वदतामपरेषां पक्षः आचार्यपाद श्रीसूक्तिशिष्टानुष्ठानविरुद्धः । पाञ्चरात्रिकाणामेव तथा सङ्कल्पोक्तेः ॥

अथ भगवच्छास्त्रोक्तस्नानविशेषमाह– अस्त्रमन्त्रेति । अयं स्नानविशेषः श्रीभाष्यकारैरिज्याकालेऽभिहितः । तदुक्तिम्– "एवं गृहीतस्नानोपकरणस्तीर्थमासाद्य मुखशोधनपर्यन्तं कृत्वा वक्ष्यमाणक्रमेण तीर्थावगाहनपूर्वकं सर्वक्रियामूलभूतं स्नानमाचरेत् । प्रातः स्नानस्य नित्यत्वं प्रभावश्च तत्र तत्र द्रष्टव्यः" इति । वक्ष्यमाणक्रमेण = इत्यारम्भे वक्ष्यमाण क्रमेण । आचार्यपादकृतनित्यव्याख्याया एकदेशिभिरपहृतत्वात् आचार्यपाद श्रीसूक्तौ स्नानविशेषादर्शनमिति प्रपञ्चयिष्यते । तत्र प्रमाणानि

सञ्छोटं स्नानविघ्नकरान्निरस्य अन्तिमभागेन पाणिभ्यां मूलमन्त्रेण स्वगात्रमनुलिप्य जलं प्रविश्य कल्पितपीठे "आवाहयामि त्वां देवि स्नानार्थमिह सुन्दरि । एहि गङ्गे नमस्तुभ्यं सर्वतीर्थसमन्विते" इत्युदकाञ्जलिना गङ्गामावाह्य, उदकाञ्जलिमादाय "विष्णुवामपदाङ्गुष्ठ नखस्रोतोविनिस्सृते । तद्भक्तिविघ्नरूपा त्वं गङ्गे मां मोचयैनसः" इत्यर्घ्यं दत्वा, उदकाञ्जलिमादाय मूलमन्त्रेणसप्तकृत्वोऽभिमन्त्र्य स्वमूर्ध्नि सिञ्चेत् । एवं त्रिः पञ्चकृत्व स्सप्तकृत्वोवाऽवसिच्य, दक्षिणेन पाणिना

अहिर्बुध्न्यवचनानि इज्याप्रकरणे प्रदर्शयिष्यन्ते । "समाचम्य शुचौ देशे गृह्णीयात् स्नानमृत्तिकाम् । अस्त्राभिमृष्टैः काष्ठाद्यैः स्वमन्त्रेणैव वाग्यतः । तां विभज्य द्विधा तीरे न्यस्याभ्यज्य मृदोस्तयोः । भागेनैकेन महता देहं प्रक्षाल्य सर्वतः । ततो जलं प्रविश्य त्रिर्निमज्ज्योत्तीर्य संयतः । आसीनश्शोधिते तीरे समाचम्य यथाविधि । अन्यं मृद्भागमादाय न्यसेद्दक्षिणपाणिना । वामपाणितलस्यादौ मध्येऽन्ते च समन्त्रकम् । तत आदिममृद्भागमन्तर्वारिणि निक्षिपेत् । पीठार्थमागमिष्यन्त्या गङ्गायाः स्नातुमात्मनः । मध्यमेन मृदंशेन बध्नीयात्सकला दिशः । साङ्गुष्ठतर्जन्यास्त्रेण स्नानविघ्नकरान् क्षिपेत् । पश्चादग्रिमभागेन स्वगात्रमनुलिप्य च । स्वमन्त्रेणैव पाणिभ्यां प्रविशेच्च जलं ततः । पाणिभ्यां जलमादाय तीर्थायार्घ्यं प्रदित्सया । तिष्ठन्नावाहयेद्गङ्गां सर्वतीर्थसमन्विताम् । आवहयामि त्वां देवि स्नानार्थमिह सुन्दरि । एहि गङ्गे नमस्तुभ्यं सर्वतीर्थ समन्विते । विष्णुवामपदाङ्गुष्ठ-नखस्रोतोविनिस्सृते । तद्भक्तिविघ्नरूपा त्वं गङ्गे मां मोचयैनसः । एव

जलमादाय त्रिः पञ्चकृत्वो वा मूलमन्त्रेणाभिमन्त्र्य पीत्वाचम्य, मूलमन्त्रेण स्वात्मानं प्रोक्ष्य परिषिच्य तीर्थे निमग्नो भगवत्पादारविन्दे विन्यस्तशिरस्कः यावच्छक्ति मूलमन्त्रं जप्त्वाऽदित्यमण्डलान्तःस्थं हरिन्ध्यात्वा भिवीक्ष्योत्तीर्य दक्षिणपादं जले वामपादं स्थले च निधायासीनो द्विराचम्य तीरस्थस्सन् वस्त्र-खण्डद्वयेन प्रत्येकं शिरोऽङ्गं च संमृज्य व्याहृतिभिः

मुच्चार्य दत्वार्घ्यं गङ्गायै सुरसिन्धवे । तोयमादाय पाणिभ्यां त्रिर्मन्त्रेणाभिमन्त्र्य तत् । त्रिः पञ्चकृत्वो वा तेन सिंचेन्मूर्धानमात्मनः । ततो दक्षिणहस्तेन समादाय जलं शुचि । त्रिर्वाथ पञ्चकृत्वो वा स्वमन्त्रेणाभिमन्त्र्य तत् । पीत्वा पुनः समाचम्य प्रोक्षयेदात्मनस्तनुम्'' इति वङ्गिवंशेश्वरवचनान्यत्रानुसन्धेयानि । ''स्वात्मानं सम्प्रोक्ष्य परिषिच्ये''ति नित्यग्रन्थेषु बहुषु सत्त्वात् अत्र तदुक्तिः । ''गुरोर्नाम सदा जपे''दिति प्रमाणादाचाराच्च स्नानसमये स्वाचार्य प्रभृति भगवदन्ताचार्याणां श्रीमत्पदपूर्वकाणि नमोऽन्तानि चतुर्थ्यन्तनामानि कीर्तनीयानि । ''गुरुपादोदकं सिञ्चेत् शिर आदौ तु पूर्ववत्'' इति वर्णाश्रमकाण्डस्थवचनमिहानुसन्धेयम् ।

यत्तु अन्योक्तम्–'न प्रातर्मृत्तिकास्नान''मिति स्मृतिवचनात् प्रातर्मृत्तिकास्नानविषेधेऽपि ''वक्ष्यमाणक्रमेण जलावगाहनादी''त्यादिनाचार्यपादैः प्रातर्मृत्तिकास्नानविधानेन पञ्चरात्रप्राबल्यावगमात् धर्मशास्त्रविहितस्नानं तदनभिमतमिति । तदयुक्तम्– ''प्रातः सङ्क्षेपतः स्नानं होमार्थं तु विधीयते । मृन्मन्त्रविधिनिष्पाद्यं मध्याह्ने तु सविस्तरम् । कल्पत्वाद्धोमकालस्य बहुत्वात् स्नानकर्मणः'' इति रत्नाकरस्थ

"शुचीवोहव्यामरुतश्शुचीनां शुचिꣳ हिनोम्यध्वरꣳ शुचिभ्यः । ऋतेन सत्यमृतसाप आयन् शुचिजन्मानश्शुचयः पावका" इति मन्त्रेण शुष्कं वासः प्रोक्ष्य, "देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो-हस्ताभ्या माददे" इत्यादाय, "उदुत्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्यम्" इत्यादित्याय दर्शयित्वा, "अवधूतꣳरक्षोऽवधूता अरातयः" इत्यवधूय, "अवहन्ती वितन्वाता कुर्वाणा चीरमात्मनः वासाꣳसि मम गावश्च अन्नपाने च सर्वदा ततो मे श्रियमावह" इत्युच्चार्य, उपवीतं निवीतं कर्णे निधाय कौपीनं धृत्वा

दक्षकात्यायनवचनतो बहुमन्त्रयुक्तमृत्तिकास्नाननिषेधेन तत्र 'न प्रातर्मृत्तिकास्नानमि'ति सामान्यनिषेधस्य छागपशुन्यायेन पर्यवसानेन भगवच्छास्त्र विहितलघुमन्त्रकरणक संक्षिप्तमृत्तिकास्नाननिषेधाप्रसक्त्या विरोधाभावात् । धर्मशास्त्रविहितस्नानमप्याचार्यपादाभिमतमिति सत्पथरक्षायां सम्यक् स्थापितमस्माभिः ।

स्नानानन्तरं शिरस्सम्मार्जनवस्त्रग्रहणादिकमाह– वस्त्रखण्ड-द्वयेनेत्यादिना । शाण्डिल्यः - "चतुर्निमज्ज्य विधिवदाचम्यादाय वाससः । खण्डद्वयं शिरोऽङ्गं च प्रत्येकं परिमार्जयेत् । अन्तराच्छाद्य कौपीनं वाससी परिधाय च । उत्तरीयं सदा दध्यात्तद्विना नाचरेत् क्रियाः। शुचीवोहव्यामरुत इत्युक्त्वा शुद्धमम्बरम् । सम्प्रोक्ष्य देवस्यत्वेति व्याहृत्यादाय चाम्बरम् । उदुत्यं जातवेदसमित्युक्त्वा दर्शयेत्ततः । आवहन्तीत्युदाहृत्य परिधाय द्विराचमेत् । जाबालिः - स्नात्वा निरस्य वस्त्रन्तु जङ्घे शोध्ये मृदंभसा । अपवित्रीकृते ते तु कौपीनास्राववारिणा ।

योगयाज्ञवल्क्यः - ''स्नात्वैवं वाससी धौते अच्छिन्ने परिधापयेत्। प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेत्ततः । अच्छिन्ने'' इति शक्तिविषयम्। अत्रापस्तम्बः– ''अप्रतिकृष्टं च शक्तिविषये''। वसिष्ठः – ''स्नानशाट्यां च दातव्या मृदस्तिस्रो विशुद्धये। उत्तरीयं च निष्पीड्य तां च शेषं समाचरेत्। तां-स्नानशार्टी शेषं = सन्ध्यावन्दनादिकं कर्म, इति रत्नाकरस्थवचनानि, व्यासः– ''नोत्तरीयमधः कुर्यान्नोपर्या- धस्त्यमम्बरम् । नान्तर्वासो विना जातु निवसेद्वसनं बुधः । भृगुः – ''नरक्त मुल्बणं वासो न नीलं च प्रशस्यते । दशाहीनं जलार्द्रं च वर्जयेदम्बरं बुधः'' इत्याह्निककाण्डस्थ वचनद्वयं चात्र भाव्यानि।

यत्तु कण्ठभूषणे– अत ऊर्ध्वं स्नातकस्यान्तः परिधानमेव कर्तव्यं, न कौपीनं, ब्रह्मचारिणो नान्तर्वासः अस्नातकत्वात्तस्य कौपीनमेव, ''स्वोक्तं वासश्च कौपीनं धारयेत् प्रथमाश्रमी''ति भारद्वाजस्मृतेरिति गृहिकौपीननिषेध उक्तः, सोऽनुपपन्नः । गृहिकौपीनधारणस्य धर्मशास्त्रभगवच्छास्त्र शाण्डल्य वृद्धहारीत स्मृतिविहितत्वेनावश्य- धार्यत्वात्। वासिष्ठसंहिता प्रथमद्वितीयाध्याययोः – ''यज्ञोपीतं कर्णे तु दक्षिणे सन्निधाय च। कटिसूत्रं सकौपीनमुत्तरीयं यथाक्रमम्। अन्तरीयं बहिर्वस्त्रं धृत्वाचम्य द्विरन्ततः । कौपीनं सोत्तरीयं च कटिसूत्र- समन्वितम्। धृत्वा वस्त्रद्वयं शुद्धमाचम्य विधिवत्सुधीः'' इति । वासिष्ठसंहिताद्वितीयाध्याये उत्तरतो वैश्वदेव पञ्चमहायज्ञविधानेन गृहस्थविषयत्वं सिद्धम् । शेषसंहितायाम् –''कौपीनं कटिसूत्रञ्च वस्त्रयुग्मं च धारयेत् ।'' इदं प्रभावव्यवस्थाधिकारे सारप्रकाशिकोदाहृतम्। पराशरसंहिताप्रथमाध्याये ''कौपीनं कटिसूत्रं च स योक्त्रं चोत्तरीयकम्'' । च शब्दः अन्तरीयसमुच्चायकः,

पूर्वोदाहृतवचनैकार्थ्यात्। योक्तृपदं वस्त्रोपरिबन्धनसूत्रपरम् । अन्तराच्छाद्येति शाण्डिल्यस्मतिवचनम् पूर्वमुदाहृतम् । वृद्धहारीत स्मृतौ "धौतवस्त्रं चोत्तरीयं सकौपीनं धरेत्सितम् । इति । न चैतद्वचनजातं ब्रह्मचारिविषयं, तस्यान्तर्वस्त्राभावस्य कण्ठभूषणोक्तेः, अत्रान्तर्वस्त्रविधानेन गृहिविषयत्वध्रौव्यात् । न च शाण्डल्यवचन-स्थकौपीन शब्दः "नाच्छादयति कौपीनमि"त्यत्रेव गुह्यपरः, न वस्त्रखण्डपर इति वाच्यं; अन्तश्शब्द वैय्यर्थ्यात्, 'आच्छाद्ये'ति त्वाप्रत्ययेन छादनक्रियायां वस्त्रद्वयपरिधानपूर्वकालिकत्वप्रतीत्या प्रच्छादनक्रियाकरणतया पूर्वप्रदर्शित वचनविहित वस्त्रखण्डरूप कौपीनस्यैवाभ्युपेयत्वात्, 'परिधायचे'ति च शब्दस्याच्छादनक्रियास-मुच्चायकतया वस्त्रद्वयपरिधानस्य, गुह्यप्रच्छादनरूपत्वासम्भवात् । न च कौपीनमाच्छाद्येत्यनुपपन्नं, कौपीनेनान्तराच्छाद्येति प्रयोक्तव्यादिति वाच्यम्; "वस आच्छादन" इति वसधातु समानार्थकस्य आङ्पूर्वक छदिधातोस्सकर्मकत्वेन "वसानः कौपीन"मिति भवभूतिप्रयोगवत् द्वितीयोपपत्तेः, तत्रैव "वाससी परिधाय चे"ति द्वितीयाप्रयोगाच्च । आपादचूडं भगवच्छास्त्र विहितपाश्चकालिकभगवद्धर्मप्रतिपादक-शाण्डिल्यस्मृतिवचनस्य तच्छास्त्रानुगुणपूर्वोक्तार्थपरत्वस्यैवोचि-तत्वात्। सार्वभौमजयन्तीनिर्णये पाञ्चरात्रप्राबल्यं प्रतिपाद्य "सामान्योक्तमविरुद्धं सर्वैर्ग्राह्यमिति निष्कर्ष" इत्युक्तमिति पाञ्चरात्रविहितस्य ग्राह्यत्वमङ्गीकृतम् । मुमुक्षुदर्पण एकपञ्चा-शच्छ्लोकव्याख्याने "यत्तु संवर्तवचनं 'अकच्छः पुच्छकच्छो वा द्विकच्छः कटिवेष्टितः । कौपीनधारकश्चैव नग्नः पञ्च विधः स्मृतः" इत्यत्र कौपीननिन्दा तन्मात्रधारणपरा, यतो वस्त्रद्वयेन

सह तद्धारणं विधीयते। भरद्वाजसंहितायाम् – "तामसं त्वेकवस्त्रं तु राजसं वसनद्वयम्। सकौपीनं वस्त्रयुग्मं सात्विकं मुनिभिः स्मृतम्" इति, कण्ठभूषणे गृहीकौपीननिषेधप्रमाणं नोदाहृतमिति । पूर्वोक्तप्रमाणादर्शनेऽपि होलकाधिकरणन्यायेन गृही कौपीनधारणस्य शिष्टाचारमूलत्वेन त्याज्यत्वं न सम्भवति। 'दशाहीनन्तु कौपीनमन्तरा धारयेत् गृही''ति इतराह्निकेऽप्युक्तम् वैकुण्ठदीक्षितीये। अत्र नारदः - "कटिसूत्रन्तु कौपीनं शुद्धवस्त्रद्वयं तथा। कुण्डलेचाङ्गुलीयादि गृहस्थस्य विशिष्यते" । संग्रहे "अन्तर्वासस्तु कौपीनमुपवीतं पवित्रकम् । शिखाछिद्रोर्ध्वपुण्ड्रं च शुद्धवैदिकलक्षणम्। सकौपीनं धौतवस्त्रद्वयं च कटिबन्धनम् । व्यतिस्यूतं विधृत्यैव कर्म कुर्वीत वैष्णवः । त्रिभिर्वा पञ्चभिर्वापि कार्पासैरेव तन्तुभिः । कटिसूत्रं व्यतिस्यूतं धारयेद्वैष्णवोत्तमः। कटिसूत्रं व्यतिस्यूतं धारयेन्नान्यथा कृतम्। अन्यथा कृतमव्यतिस्यूतं न धारयेदित्यर्थः । भरद्वाजन्यासोपदेशे "अर्कसूत्रैर्व्यतिस्यूतं धारयेत्कटिबन्धनम् । कौपीनवस्त्रयुग्मञ्च यथार्हमितराणि च" इति कश्यपस्मृतौ "उपवीतं निवीतं तु कृत्वा कर्णावलम्बितम् । उत्तरीयेण वस्त्रेण शिरस्संवेष्ट्य मौनवान् । प्राङ्मुखोदङ्मुखो वापि वस्त्रं संधारयेद्विजः । कटिसूत्रं च कौपीनमन्त्ररीयं क्रमेण तु । उत्तरीयं बहिर्वस्त्रं द्विराचामेत्ततो बुधः । कौपीनस्य प्रमाणं हि वक्ष्यते मुनिसत्तमाः । बाहुमात्रप्रमाणं हि दीर्घं कौपीनमुच्यते । द्वादशाङ्गुलिविस्तारं शुभ्रं मलिनवर्जितम् । एकवस्त्रं तामसं स्यात् राजसं वसनद्वयम्। कौपीनसहितं तत्तु सात्विकं मुनिभिः स्मृतम् । कौपीन रहितो नग्नो नग्नो रक्तपटस्तथा" इति । रत्नाकरे कौपीनविधायकं "अन्तराच्छाद्य कौपीन"मिति शाण्डिल्य-वचनमुदाहृतम्। कण्ठभूषणे तद्विरुद्धकथनम्। तत्रैव "गर्भाष्टमेऽष्टमे वाब्दे" इति स्मृतिविषये "अष्टवर्षं ब्राह्मणमि"ति श्रुतिबलात् विज्ञानेश्वरोक्त तुल्यविकल्पोऽङ्गीकृतः, शतकव्याख्यादश निर्णययोः

जङ्घेमृज्जलाभ्यां संशोध्य। हस्तौ प्रक्षाल्य वस्त्रमुत्तरीयञ्च धृत्वा, मन्त्रस्नानं कुर्यात्। स्नानवस्त्रमनिष्पीड्य, स्वपार्श्वे निक्षिपेत्, न पुरतः। ततो वक्ष्यमाणक्रमेण ऊर्ध्वपुण्ड्रादि कुर्यात्।

अथ धर्मशास्त्रोक्तस्नानविधिः प्रसङ्गाल्लिख्यते, पाद-प्रक्षालनादि सङ्कल्पान्तं पूर्ववत्कृत्वा "समस्तजगदाधार शङ्खचक्रगदाधर। देहि देव ममानुज्ञां युष्मत्तीर्थनिषेवणे।

गर्भाष्टमस्य उपनयनमुख्यकालत्वमभिहितम्। कण्ठभूषणे "अत्र पद्न्याः पादग्रहणस्यायुक्तत्वात् वरस्तत्पाणिममुञ्चन्नेव पादमुद्धृत्य निक्षिपेत्येव वधूं प्रक्रमयतीत्युक्तं, "நாராயணன் நம்பி செம்மையுடைய திருக்கையால் தாள் பற்றி அம்மிமிதிக்கக் கனாக் கண்டேன்" इति गोदा श्रीसूक्तिविरुद्धम्। 'पाणिं गृह्णीष्व पाणिने''ति सीताविवाहप्रकरणश्लोकव्याख्यायामपि तथैवोक्तम्। एवं शतक-व्याख्यादौ पूर्वोत्तर विरोधानुक्तिदुरुक्ति निरर्थकोक्त्यादि दोषाः बहुधा सन्ति। सार्वभौमकृताः ग्रन्थाः अशोधिता एव प्रचारमुपगताः। ततस्तत्र तत्र दोषास्सन्तीति प्रामाणिकानां महतां प्रवादः। "परकल्पित तटाकोपजीवनवत् न हि तटाकस्थः पङ्कोऽप्यपङ्किलबुद्धिभिः तदवगाहिभिरुपजीव्यत" इति श्री न्यायपरिशुद्धि श्रीसूक्त्यनुसारेण प्रमाणन्यायशिष्टाचाराविरुद्ध-सार्वभौमग्रान्थार्थ एव ग्राह्यः न त्वन्यः। अतः गृहस्थकौपीन निषेध कथनमुपेक्ष्यमेवेति।

अथ धर्माशास्त्रोक्तस्नानानि वक्तु मूर्ध्वमुण्ड्रधारणानां वक्ष्यमाणत्वमाह ततो वक्ष्यमाणेत्यादिना।

अथ धर्मशास्त्रोक्तस्नानविधिः प्रसङ्गाल्लिख्यते इति। आचार्यपादैः स्मृतिवचनप्रदर्शनपूर्वकं स्नानभेदप्रदर्शनात् धर्मशास्त्रविहितस्नानानुष्ठान-

रघुवीरपदन्यासपवित्रीकृतपांसवे। दशकण्ठशिरश्छेद हेतवे सेतवे नमः'' इत्यादिना भगवन्तमनुज्ञाप्य जलं प्रविश्य त्रिर्निमज्ज्य, उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यम॑ श्रधाय। अथावयमादित्यव्रतेतवानागसो अदितये स्याम, अस्कभ्नाद्यामृषभो अन्तरिक्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वाभुवनानि सम्राड्विश्वेत्तानि वरुणस्य व्रतानि, यत् कित्किश्चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि। अचित्तीयत्तवधर्मायुयोविम मानस्तस्मादेनसो देव रीरिषः। कितवासो यद्रिरिपुर्नदिवि यद्वाघासत्यमुतयन्नविद्म । सर्वाता विष्यशिथिरेवदेवाथाते-स्याम वरुण प्रियासः, अवते हेडो वरुण नमोभिरवयज्ञे-भिरीमहे हविर्भिः । क्षयन्नस्मभ्यमसुरप्रचेतो राजन्नेना॑सि शिश्रथः कृतानि, तत्त्वायामिब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेहबोध्युरुशा॑समान आयुः प्रमोषीः इति वरुणसूक्तं जपित्वा। ''हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः। यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्म इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः' इति द्वाभ्यामवगाह्य 'सुमित्रा न आप औषधय-स्संत्वि'त्यात्मानमभिषिच्य, 'दुर्मित्रास्तस्मैभूया सुर्योऽस्मान् द्वेष्टि यश्च वयं द्विष्म'' इति जलं हस्ताभ्यां तीरे त्रिर्निक्षिप्य, ''नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः'' इति तीर्थाधि दैवतं श्रियःपतिं प्रणम्य, ''यदपाङ्क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात्'' इति जलस्थामेध्यांशं दक्षिणतो निरस्य ''आत्याशना-

दतीपानाद्यच्च उग्रात् प्रतिग्रहात् । तन्मे वरुणो राजा पाणिनाह्यवमर्शतु । सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः नाकस्य पृष्ठमारुह्य गच्छेत् ब्रह्मसलोकताम्'' इत्यृग्भ्यां तोयं त्रिरालोड्य, हस्तायामप्रमाणं चतुरश्रं तीर्थे पीठमोमिति विलिख्य, तत्र ''आवाहयामि + समन्विते'' इति गङ्गामुदकाञ्जलिनावाह्य, 'विष्णुपादाब्जसम्भूते गङ्गे त्रिपथगामिनि। धर्मद्रवेति विख्याते पापं मे हर जाह्नवि ।'' इति सम्प्रार्थ्य, ''विष्णुवाम + एनस'' इत्युदकाञ्जलिनार्घ्यं दत्वा । ''नन्दिनी नलिनी सीता मालती च मलपहा। विष्णुपादाब्ज सम्भूता गङ्गा त्रिपथगामिनी । भागीरथी भोगवती जाह्नवी त्रिदशेश्वरी''ति द्वादशगङ्गा नामानि सङ्कीर्त्य, ''गङ्गे च यमुने चैव गोदावरि सरस्वति। नर्मदे सिन्धुकावेरिजलेऽस्मिन्सन्निधिं कुरु'' इति सान्निध्यं प्रार्थ्य, ''इमं मे गङ्गे यमुने सरस्वति शुतुद्रिस्तोमꣲ स च तापरुष्णया । असिक्रिया मरुद्धृधे वितस्तयार्जीकीये शृणुह्या सुषोमया'' इति पुण्यतीर्थानि संस्मृत्य, ''पुष्कराद्यानि तीर्थानि गङ्गाद्यास्सरितस्तथा। आगच्छन्तु महाभागाः स्नानकाले सदा मम'' इत्युक्त्वा, ''आपो अस्मान् मातरश्शुन्धन्तु घृतेन नो घृतवपुः पुनन्तु विश्वमस्मत् प्रवहन्तुरि प्रमुदाभ्यश्शुचिरापूत एमि'' इति निमज्ज्य स्नात्वा, ''आपोहिष्ठा मयोभुवस्तान ऊर्जे दधातन। महेरणाय चक्षसे । योवश्शिवतमो रसस्तस्य भाजयते ह नः । उशतीरिवमातरः । तस्मा अरङ्गमामवो यस्यक्षयाय जिन्वथ । आपो जनयथा च नः'' इति तिसृभिः, ''हिरण्यवर्णाश्शुचयः पावका या

सु जातः कश्यपो यास्विन्द्रः । अग्निं या गर्भं दधिरे विरूपास्तान आपश्शऽस्योना भवन्तु । या साऽराजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्च्युतश्शुचयो याः पावकास्तान आपश्शऽस्योना भवन्तु । यासान्देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा भवन्ति याः पृथिवीं पयसोऽन्दन्ति शुक्रास्तान आपश्शऽस्योनाभन्तु । शिवेन मा चक्षुषा पश्यतापश्शिवया तनुवोपस्पृशतत्वचंमे । सर्वाऽ अग्नीऽरप्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त'' इति चतसृभिः, पवमानानुवाकेन च प्रोक्ष्य, अघमर्षणसूक्तस्याघमर्षण ऋषिः, अनुष्टुप्छन्दः, भाववृत्तो देवता, अघमर्षणजपे विनियोगः, तीर्थे निमग्नः, ''ऋतञ्च सत्यञ्चाभीद्धात्तपसोध्यजायत ततो रात्रि रजायत ततस्समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत। अहोरात्राणि विदध द्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवञ्च पृथिवीञ्चान्तरिक्षमथो सुवः'' इति षड्वाक्यं द्वादशाष्टौ त्रिर्वा यथा शक्त्यावर्त्य भगवन्तं नारायणं ध्यात्वा तत्पादाम्बुजान्निपतन्तीं स्वमूर्ध्नि गङ्गां ध्यात्वा, तया बाह्यमान्तरञ्च मलं संक्षाल्य, ''यत्पृथिव्याऽरजस्व-मान्तरिक्षे विरोदसी । इमाऽस्तदापो वरुणः पुनात्वघमर्षणः । एष भूतस्य भव्ये भुवनस्य गोप्ता। एष पुण्यकृतान् लोकानेष मृत्योर्हिरण्मयम् । द्यावापृथिव्योर्हिरण्मयऽसऽश्रितऽ सुवः । स न स्सुवस्सऽ शिशाधि'' इत्यञ्जलिना जलं गृहीत्वा,

शिरस्यभिषिच्य, "आर्द्रं ज्वलति ज्येतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा" इति चुलकेन जलं पीत्वा, "अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोऽपामघमर्षणस्तस्मात्पात् प्रमुच्यते । रजोभूमिस्त-माऽऽरोदयस्व प्रवदन्ति धीराः । पुनन्तु ऋषयः पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः" इति द्वाभ्यां प्रोक्ष्य आचम्य, यथाविधि स्नानाङ्गं देवर्षिपितृतर्पणं कृत्वा, आसीनो द्विराचम्य, निवीती उपरितनवस्त्रं चतुर्गुणीकृत्य, "ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः । ते गृह्णन्तु मया दत्तं वस्त्रानिष्पीडनोदकम्" इति मन्त्रेणापसव्यं स्थले निपीड्य वस्त्रं मणिबन्धे निधाय, द्विराचम्य वस्त्रखण्डाभ्यां शिरः अङ्गञ्च प्रत्येकं सम्मृज्य, पूर्ववद्वस्त्रपरिधानादि कृत्वा, द्विराचम्य, स्नानवस्त्रं चतुर्गुणीकृत्य निवीती अमन्त्रकं, "उच्छिष्टभागिनो दासा ये मृता स्तेत्वमन्त्रकम् । तृप्यन्तु तरुतां प्राप्ताः मम सम्बन्धिनो मृताः" इति मन्त्रेण वा निष्पीड्य मणिबन्धे निधाय उपवीती द्विराचामेत् ।

पारम्पर्यवद्भिस्तदनुष्ठानाय तद्विधिर्लिख्यत इति भावः । तदुक्तम्– "तत्र तत्र वर्णभेदेन स्नाननियमं स्मरन्ति पितामहादयः "अपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम् । मन्त्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यते" इति । तत्र शक्तस्य वारुणमेव स्नानं, तदशक्तस्य तु "न स्नानमाचरेद्भुक्त्वा नातुरो न महानिशि । न चान्यवस्त्रमाच्छाद्य नाविज्ञाते जलाशये ।" इत्यादिभिस्तत् प्रतिषेधात् स्नानान्तराणि भवन्ति । तेषु च वारुणानन्तरमाकण्ठं स्नानं,

अप्रतिषिद्धदिनेष्वशक्तश्चेदुष्णोदकेन स्नायात् । वारुणस्नानाशक्तौ अशिरस्कं स्नायात् । तदशक्तौ कापिल-स्नानम् । ''आसीनः पुनरप्येवं मन्त्रस्नानं

'अशक्तावशिरस्कं वे'ति स्मरणात्, तत्राप्यशक्तस्य कापिलं तस्मिन्नप्यशक्तस्य तत्तच्छास्त्रचोदितेषु पार्थिवाग्नेय वायव्य दिव्यमान्त्रमानसात्मध्यानपञ्चाङ्ग पुरुषान्तर (स्पर्श) पूर्वकावगाहन-रूपेषु स्नानान्तरेषु तत्कालसम्भावितं, तत्रापि स्वशक्यं कुर्यात्। आह चैवं क्रतुः – ''प्राक्छौचं स्नानमाग्नेयं ब्राह्मं वा स्नानमिष्यते। वृद्धा तुराणामुष्णाद्भिः योगाङ्गैर्वा यमादिभिः'' इति। अत्र यथाधिकारमिति विवक्षा । एवं चोक्तं पारमेश्वरे ''विना विविधसम्पर्कैः पञ्चाङ्गं स्नानमाचरेत्। मुखं करद्वयोपेतं पादौ कटितटावधि। स्त्रीसङ्गाद्युपघाते तु स्नानं कुर्याद्यथाविधि।'' इति शीतोदकस्नानासमर्थस्य उष्णोदकेन स्नानं तच्चानुपहतस्याप्रतिषिद्धेषु दिवसेष्वेव । एवं शक्त्याद्यनुगुणं स्नानं कुर्यात्। बलानुरूपं च स्नानं प्रत्येकं समुदितं वा सञ्जगृहुः ''दिव्याप्यमान्त्र वायव्यभौमतैजसमानसैः । एतैस्समस्तैर्व्यस्तैर्वा कृतशुद्धिर्यथाबलम्।' इति। अन्यथात्वकर्मण्यो भवति, स्नानमूलाः क्रियास्सर्वाः इति विधानात्' इति । कापिलं स्नानं ''नाभेरधः प्रविश्याप्सु कटिं प्रक्षाल्य मृज्जलैः। आर्द्रेण वाससाचाङ्गमार्जनं कापिलं स्मृतम्'' इत्युक्तम् । स्नानविषयप्रमाणादिकं सर्वं रत्नाकरादा-वनुसन्धेयम्। अशक्तं प्रत्याह– अप्रतिषिद्धदिनेष्विति । तथा यमः ''आदित्यकिरणैः पूतं पुनः पूतन्तु वह्निना। आम्नात मातुरस्नाने पुनः पूतं हृतोदकम् । मृते जन्मनि संक्रान्त्यां श्राद्धे जन्मदिने तथा । अस्पृश्यस्पर्शने चैव न स्नायादुष्णवारिणा। षट्त्रिंशन्मते ''आपः स्व भावतो मेध्याः किं पुनर्वह्नि संयुताः। तेन सन्तः प्रशंसन्ति स्नानमुष्णेन

प्राणायामसमन्वितम् । असङ्ख्येयाशुचिस्पर्शदूषितैर्बाह्य-वारिभिः । स्नातस्यापि भवेदेतत् स्नानमन्यस्य किं पुनः'' इति वङ्गवंशेश्वरोक्तं मूलमन्त्रप्राणायामजपरूपं मन्त्रस्नानं ''शन्न आपस्तु द्रुपदा *आपोहिष्ठाघमर्षणं'' इत्युक्त मन्त्रस्नानं वा - ''मुखं कर द्वयोपेतं पादौ कटितटावधि'' इत्युक्तपञ्चाङ्ग स्नानं वा, तत्तच्छास्त्रोक्तं पार्थिवं वायव्यं दिव्यञ्च स्नानं, ''स्वस्थितं पुण्डरीकाक्षं मन्त्रमूर्तिं हरिं स्मरेत् । अनन्तादित्य सङ्काशं

सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा । शीतास्वप्सु निनीयोष्णान् मन्त्रसम्भारसंभृतान् । गेहे प्रशस्यते स्नानं तद्धीनमफलं बहिः ।'' इत्यादीनि रत्नाकरवचनान्यत्र भाव्यानि । अथ गौणस्नान्याह– वारुणस्नानाशक्ता-वित्यादिना । योगयाज्ञवल्क्यः – ''मान्त्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च। वारुणं मानसञ्चेति सप्तस्नानान्यनुक्रमात्। आपोहिष्ठादिभिर्मान्त्रं मृदालम्भस्तु पार्थिवम्। आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्। यत्तु सातपवर्षेण तत् स्नानं दिव्यमुच्यते। वारुणं चावगाहस्तु मानसं विष्णुचिन्तनम्'' इत्यादि । रत्नाकरोक्तस्नानेषु वारुणस्नानाशक्तस्याशिरस्कस्नानं तच्च पूर्वोदाहृताचार्यपाद श्रीसूक्ति-सिद्धम्। कापिलमपि प्रदर्शितं पाद्मे ''स्नानमूलाः क्रियास्सर्वाः स्नानं च बहुधा स्मृतम् । वारुणं दिव्यमाग्नेयं वायव्यं पार्थिवन्तथा । मान्त्रं मानसमित्येवं स्नानं सप्तविधं भवेत् । अवगाहनमप्स्वन्तर्वारुणं स्नानमिष्यते । सहातपेन वर्षेण स्नानं दिव्यमनन्तरम् । समिधां

* भुवि मूर्ध्नि तथाकाशे मूर्ध्न्याकाशे तथाभुवि। आकाशे भुवि मूर्ध्नि स्यादापोहिष्ठादि मन्त्रतः ।

चतुर्भुजम् । शङ्खचक्रगदापद्मधारिणं वनमालिनम् । केयूरहारिणं देवं सुवर्णमकुटोज्ज्वलम् । ध्वजवज्राङ्कुशालक्ष्य पादपद्मं सुनिर्मलम् । तत्पादाङ्गुष्ठजां गङ्गां निपतन्तीं स्वमूर्द्धनि । चिन्तयेद्ब्रह्मरन्ध्रेण प्रविशन्तीं स्वकान्तनुम् । तया संक्षालयेत्सर्वं बाह्यमाभ्यन्तरं मलम् । तत्क्षणाद्विरजामर्त्यो जायते स्फटिकोपमः । इमं मानसिकं स्नानं मन्त्राच्छतगुणं स्मृतम्'' इत्युक्तमानसिकस्नानं, इत्येतानि यथासम्भवं कुर्यात् । तत अस्त्रमन्त्रेण वामपाणितलं संशोध्य, प्रणवेन मृदं निधाय जलमादाय, ''गन्धद्वारां

दीपितानां च गोमयस्य हुतस्य च । सितेन भस्मनाङ्गेषु ललाटादिषु च क्रमात् । यदूर्ध्वपुण्ड्रकरणं मन्त्रोच्चारणपूर्वकम् । तदाग्नेयं भवेत् स्नानं शोधनं परमं स्मृतम् । गच्छत्सु गोषु पादोत्थैः रजोभिर्भूमिसम्भवैः । स्पर्शनं वपुषि स्नानं वायव्यं तदुदाहृतम् । प्रशस्ते पर्वताग्रादौ जातया श्वेतमृत्स्नया । उच्चार्य केशवादीनि नामान्यङ्गे यथा क्रमम् । ललाटादौ यद्विधानमूर्ध्वपुण्ड्रस्य तद्भवेत् । पार्थिवं स्नानमब्लिङ्गैर्मन्त्रैः विप्रकरेरितैः । अम्भोभिः प्रोक्षणं ब्रह्मन् तन्मान्त्रं स्नामिष्यते ।'' इति स्नानानि प्रदर्शितानि । इत्येतानि यथासम्भवं कुर्यादिति । ''तत्तच्छास्त्रेषु चोदितेषु पार्थिवाग्नेय वायव्य दिव्यमान्त्रमानसे''त्यादिना भगवच्छास्त्रधर्मशास्त्रोक्त गौणस्नानानामाचार्यपादानुगृहीतत्वात् 'पादोक्तान्येव गौण-स्नानानि परमैकान्त्यनुष्ठेयानि, न धर्मशास्त्रोक्तानीत्य'न्योक्तमनादरणीयम् । अथ ऊर्ध्वपुण्ड्रधारणमाह अस्त्रमन्त्रेणेत्यादिना । ऊर्ध्वपुण्ड्रधारणतदधिकारिमृद्वर्णाकृत्यादिकं सप्रमाणं

श्रीसच्छरित्ररक्षायां स्पष्टमनुगृहीतम्। यत्तु आह्निककाण्डे ब्राह्मणादीनां त्रिपुण्ड्रधारणप्रतिपादकानि चन्द्रिकामाधवीयाद्यनुदाहृतानि वचनानि ब्राह्मणस्य त्रिपुण्ड्रनिषेधपराणि, सम्प्रतिपन्नवचनानि चोदाहृत्योक्तम् – "एवमादित्रिपुण्ड्रनिषेधवचनानि पाशुपतादितन्त्र दीक्षाप्रविष्ट-ब्राह्मणनिन्दापराणि । अत एव वाराहे गौतमः "शशाप तान् जटाभस्मदीक्षाव्रतधरांस्तथा । त्रिपुण्ड्रधारिणो नित्यं भस्मोद्धूलन-तत्पराः । भविष्यथ त्रयीबाह्या मिथ्याज्ञानप्रलापिनः । बौद्धे चाप्यार्हते चैव तथा पाशुपतेऽपि च। शाम्भवे दीक्षिता यूयं भवत ब्राह्मणाधमाः" इत्युक्तम्। तदयुक्तम् –ब्राह्मणस्त्रिपुण्डं न धारयेदित्यादीनां स्वोदाहृतानां आचार्यपादोदाहृतानां पठ्यमानस्मृतिपुराणवचनानां शैवपाशुपतादि-दीक्षाप्रविष्ट ब्राह्मण निन्दापरत्वस्यायुक्तत्वात् । न तावच्छ्रुति-लिङ्गादिभिरयमर्थोऽवगम्यते । भवदुदाहृतवचनेन त्रिपुण्ड्रधारण भस्मोद्धूलन मिथ्याज्ञान प्रलापानां शापग्रस्त विषयत्वावगमेन त्रिपुण्ड्रादेः तद्धार्यत्वे तद्व्यतिरक्ताधार्यत्वपरत्वेन च लिङ्गदर्शनात् । अपच्छेदाधिकरण न्यायेन निषेधस्य बलीयस्त्ववादिनः अद्वैतिनः । प्रायश्चित्तकाण्डे श्राद्धशिष्टभोजनविधिसत्वेऽपि निषेधस्य बलीयस्त्वात् तदभोज्यत्वं वदतः वैद्यनाथस्य ब्राह्मणत्रिपुण्ड्रनिषेधबलीयस्त्वस्या-वश्याङ्गीकार्यत्वात् । निषेधवचनानां शैवदीक्षाप्रविष्टब्राह्मणनिन्दा-परत्ववर्णनं स्वमतस्थैकदेशि दुराचारस्थापनाभिनिवेशमूलकमिति सद्भिर्विभावनीयमिति । तदुक्तम्– "आदौ तु लक्षणोपेतां सुगन्धां सात्विकीं शुभाम्। वामेऽस्त्रशोधिते हस्ते वाग्यतः प्रणवेन तु। निधाय जलमादाय गन्धद्वारेति सेचयेत् । अस्त्रमन्त्रेण रक्षां च कृत्वा

"गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीꣳ सर्वभूतानां त्वामिहोपह्वये श्रियम्" इति श्वेतमृत्सेचनं कृत्वा, अस्त्रमन्त्रेण दशदिक्षु रक्षां कृत्वा, प्रणवेन संमिश्रं कृत्वा, मूलमन्त्रेणाभिमन्त्र्य यथासम्प्रदायं नृसिंहबीजं विलिख्य, "भगवान् पवित्रं वासुदेवः पवित्रं शतधारं सहस्रधार मपरिमितधार मरिष्ट मच्छिद्र मच्युत मनन्त मक्षयमव्ययं परमं पवित्रं भगवान्वासुदेवः पुना" त्विति जलं निस्स्राव्य भगवत्पादयुगलं स्मृत्वा तर्जन्यामृदञ्जलं चैकीकृत्य, "विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि यो अस्कभायदुत्तरꣳ सधस्थं विचक्रमाण स्त्रेधोरुगाय" इति मन्त्रेण पञ्चोपनिषन्मन्त्रैर्मूलमन्त्रेण चाभिमन्त्र्य द्वादशाक्षरेणेष्टं प्रार्थ्य, विष्णो रराटमसि विष्णोः पृष्ठमसि विष्णोश्नप्त्रेस्थो विष्णोस्स्यूरसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवेत्वे"ति सप्तभि-र्वैष्णवैमन्त्रैश्चाभिमन्त्र्य, तर्जन्या प्रणवेन मूर्ध्नि किञ्चिन्न्यस्य गृहस्थस्यानामिकया, ब्राह्मणस्या-नामिकया," इत्याद्युक्ताश्रमवर्णविशेष चोदिताङ्गुल्या ललाटे चतुरङ्गुल-मूर्ध्वं द्व्यङ्गुलं त्र्यङ्गुलं

दशासु दिक्ष्वपि । तारमन्त्रेण सम्मिश्रं मूलमन्त्रेण मन्त्रयेत् । नृसिंह्मबीजञ्च लिखेत् रक्षार्थं दोषशान्तये । शतधारेति मन्त्रेण तीर्थतोयञ्च निक्षिपेत् । तामेकीकृत्य तर्जन्या स्मृत्वा मम पदद्वयम् । विष्णोर्नुकेन मन्त्रेण मन्त्रयित्वा यथाक्रमम् । पञ्चोपनिषदैर्मन्त्रै-

मूलमन्त्रेण मन्त्रयेत् । द्वादशाक्षरमुच्चार्य प्रार्थयेदिष्टसिद्धये । सप्तभिर्वैष्णवैर्मन्त्रैः मन्त्रयेन्मोक्षसिद्धये । मृदं प्राक्तारमन्त्रेण तर्जन्या मूर्ध्नि विन्यसेत्।'' इति। ''इष्टसिद्धये'' इत्यत्र ''सत्समृद्धिश्च युक्तां'' इत्यनुगृहीत भगवद्भागवतसमृद्धिर्विवक्षिता, प्रपन्नानां ''त्रैवर्गिकां स्त्यजेद्धर्मान्'' इति काम्यान्तर निषेधात् । ''मोक्षसिद्धये'' इत्यत्र अनन्यप्रयोजन कैङ्कर्यसिद्धिर्विवक्षिता, प्रपन्नानां मोक्षार्थं कर्तव्यान्तराभावात् । अथ पुण्ड्रधारणसाधनमाह– गृहस्थस्यानामिकयेत्यादिना । तदुक्तं ''ब्राह्मणस्य विशेषेण कल्पितानामिका स्मृता। अङ्गुष्ठमेव राज्ञश्च तर्जनी विश एव च। शूद्रस्य मध्यमा प्रोक्ता सर्वेषां वाप्यनामिका । तर्जनी भिक्षुकस्यैव वनस्थस्य तु मध्यमा । अनामिकागृहस्थस्याङ्गुष्ठाग्रमथापि वा । अङ्गुष्ठेन ब्रह्मचारी सर्वेषां स्यादनामिका'' इति । यदपरोक्तं स्कान्दे मार्गशीर्षमाहात्म्ये ब्रह्मचारियत्यादीनधिकृत्य दर्पणविधेः तेषान्तु दर्पणनिषेधोऽन्यविषयः। तत्रैव रात्रौ दर्पणविधेः तत्र दर्पणनिषेधोऽन्यविषयः तत्रैव दर्पणाभावे जलावलोकनविधानात् । जले प्रतिबिम्बावलोकन निषेधोऽपि तथा इति। तदसङ्गतम् । निबन्धनेषु तद्वचनानुदाहरणेनाचारविरहाच्च । यतीनां सर्वदा इतरेषां रात्रौ दर्पणावलोकनस्य जलावलोकन पूर्वपुण्ड्रधारणस्य चाननुष्ठानपराहतत्वात्। यदप्यपरोक्तं ''अङ्गुष्ठं पुष्टिदं प्रोक्तं मध्यमायुष्करी तथा। अनामिकान्नदा नित्यं मुक्तिदा च प्रदेशिनी। एतैरङ्गुलिभेदैस्तु कारयेन्न नखैर्लिखेत्'' इति श्री सच्चरित्ररक्षोक्त तत्तदङ्गुलिफलनिरपेक्षाणां तत्तत्कर्माङ्गत्वादिमात्रेणोर्ध्वपुण्ड्रकरण-दशायाम् ''अनामिका ब्राह्मणस्य गृहस्थस्यानामिका'' इत्यादिवर्णा

श्रमविषयव्यवस्थावचनानीति देशिकचरणैः कण्ठतो व्यवस्थापितत्वात्, मोक्षापेक्षावद्भिः भगवत्प्रीत्यर्थं मूर्ध्वपुण्ड्रकरणे प्रदेशिन्येव देशिकसम्मता । तयार्जवादिगुणासम्भवे तदनुगुणया यया कयाचिदङ्गुल्या धार्याणि । "यथाकामन्तु सर्वाभिः न नखैरिति केचन" इत्युक्तत्वात् । स्मृतिचन्द्रिकायां 'स्वयं धौतेन कर्तव्यं कारुधौतं विवर्जयेत्'' इत्यत्र स्वयं धौतेनेत्येव सिद्धे कारुधौतनिषेधेन कारुधौतव्यतिरिक्त धौतमभ्यनुज्ञातं इत्युक्तरीत्या न नखैर्लिखेदिति निषेधेन नखव्यतिरिक्तं पुण्ड्रधारणेऽभ्यनुज्ञातं भवति "येनोर्ध्वपुण्ड्रं सौम्यं स्यादार्जवं च कृतं भवेत्। तेन कुर्यात् प्रकारेण तादृशं च भवे' दिति नारदीयवचने येन तेनेति सामान्योक्तेश्च। एवञ्चाङ्गुल्यैव धारणीयानीति निर्बन्धो न कर्तव्य इति । तदत्यन्तमसङ्गतम् । आचार्यपाद श्रीसूक्तिन्यायविरुद्धत्वात् । या चात्र वर्णाश्रम मात्रविषयतयाङ्गुलि व्यवस्था सा तत्तत्फलविशेषनिरपेक्षाणां तत्तत्मर्काङ्गत्वादि मात्रेणोर्ध्वपुण्ड्रकरणदशायामिति मन्तव्य' मिति श्रीसूक्तौ पूर्वोदाहृतवचनावगतमोक्षतदितरफलकामनारहितानां तत्तत्कर्माङ्गत्वादिनोर्ध्वपुण्ड्रधारणे वर्णाश्रमाङ्गुलिव्यवस्थेति प्रतीयते । कर्माङ्गत्वादीत्यादिपदेन "यच्छरीरं मनुष्याणामूर्ध्वपुण्ड्रं विना भवेत् । द्रष्टव्यन्नैव तद्देहं श्मशानसदृशं स्मृतम्" इत्यकरणे दोषश्रवणेन करणे प्रत्यवायपरिहारस्य, "प्रातर्मध्यन्दिने सायमूर्ध्वपुण्ड्रेण केशवः । अकृतैर्वाकृतैर्वापि तैस्तैः प्रीणाति माधवः ।" इति भारद्वाजवचनावगत भगवत्प्रीतिविशेषस्य च सङ्ग्रहः । मात्रपदेन पूर्वोदाहृत वचनावगत

फलाभिसन्धि व्यवच्छेदः । एवं च तत्तत्कर्माङ्गत्वेन ''अक्रिया-वदनर्थाय'' इति लक्ष्मीतन्त्रवचनाचार्यपाद श्रीसूक्तवगत प्रत्यवाय-परिहारार्थत्वेनोपदर्शितभगवत्प्रीत्युद्देशेन चोर्ध्वपुण्ड्रकरणदशायां वर्णाश्रमाङ्गुलिव्यवस्थेत्युक्तं भवति। ''फलाश्रुतेर्वीप्सया वा तन्नित्य-मुदितं बुधैः, अस्य चैवमकामोपाधिनिबद्धविधिप्राप्तत्वात् नित्यत्वं सिद्ध'मिति प्रमाण श्रीसच्चरित्ररक्षा श्रीसूक्त्यनुसारेणात्र नित्यविधि-परत्वस्याङ्गीकार्यत्वात् । अयमर्थः ''अतस्सिद्धं कर्माङ्गत्वादि-भिरूर्ध्वपुण्ड्रस्यावश्यधार्यत्वम्, कर्मङ्गत्वादिना ऊर्ध्वपुण्ड्रग्रहणमिह भवे''दित्याचार्यपाद श्रीसूक्त्यभिप्रेतश्च। ''ज्योतिष्टोमेन स्वर्गकामो यजेत, वृष्टिकामः कारीर्या यजेत, श्येनेनाभिचरन् यजेत'' इत्यादौ तत्तत्फलकामनारूपाधिकारवतस्तत्तत्फलोद्देशेन तत्तत्कर्मविधिरिति मीमांसकसिद्धान्तितत्वात्, ऊर्ध्वपुण्ड्रविषयकफलसाधनाङ्गुलिविधीना मपि तथैवार्थवर्णनौचित्यात् । ''मुक्तिदा च प्रदेशिनी'' इत्यत्र मुक्तिरूपफलोद्देशेनानुष्ठान एव प्रदेशिनी विधानमिति न तद्वाक्येन भगवत्प्रीत्यर्थमूर्ध्वपुण्ड्रधारणं विधीयते । फलसाधन-वाक्यस्य नित्यविधित्वासम्भवात् । श्री सच्चरित्ररक्षाप्रथमाधिकारे ''कामाधिकारत्वे सम्भवति नित्यत्वकल्पनायोगात्'' इत्यनुगृही-तत्वाच्च । यदपि स्मृतिचन्द्रिकोक्तदृष्टान्तेनाङ्गुली व्यतिरिक्तस्यापि पुण्ड्रधारणसाधनत्वमुक्तम्। तदपि मन्दम्। दृष्टान्त वैषम्यात्। ''स्वयं धौतेन कर्तव्यं कारुधौतं विवर्जयेत्'' इत्यत्र विशेषनिषेधेन शेषाभ्यनुज्ञानात् कारुधौत व्यतिरिक्तधौताभ्यनुज्ञानमिति

चन्द्रिकोक्तम्। आचार्यपादोदाहृते तु "ऊर्ध्वपुण्ड्रविधौ मोक्ष" मित्यादिषु भरद्वाजवचनेषु पञ्चाङ्गुलीन्विधाय" न चान्येन विधीयीत" इत्यङ्गुलि व्यतिरिक्तनिषेधात्। "न नखैरिति केचन" इति वचनस्य शेषाभ्यनुज्ञान्यायेन शलाकाभ्यनुज्ञापरत्वस्य कतिपयसम्मतत्वेन भूयसां न्यायेन प्रत्यवाय श्रवणसहितसामान्यनिषेधस्य प्रबलत्वात् शिष्टाचाराच्च, उदाहृतदृष्टान्त वैषम्येणाङ्गुलीनामेव पुण्ड्रधारणकरणत्वमङ्गीकार्यम् । श्रीसच्चरित्ररक्षाप्रथमाधिकारे "ब्राह्मणस्य विशेषेण वैणवस्य विशषतः ।" इत्यपि वचनं न ब्राह्मणमात्रस्यावश्यकर्तव्यत्वप्रतिक्षेप-परम्। अपि तु अकरणे प्रत्यवायलाघवपरम्। अतः अङ्गुल्यैव पुण्ड्राणि धारणीयानीति सिद्धम्। एतेन "येनोर्ध्वपुण्ड्रमित्यादिवचने येन तेनेति सामान्यनिर्देशादङ्गुलि व्यतिरिक्तस्यापि पुण्ड्रधारणकरणत्वमनुमत-मित्युक्तं परास्तम् । उपात्तवचने येन तेनेति पदद्वयस्य विशेष्यसमर्पकं प्रकारेणेति पदं प्रयुक्तम् । प्रकारशब्दोऽपृथक्सिद्धविशेषणपरस्सन् अवयवसंस्थानरूपं प्रकारमभिधत्ते । श्रीभाष्यादौ प्रकारत्वं विशेषणत्वमिति बहुधाभिहितत्वात् । श्री न्यायसिद्धाञ्जनोपक्रमे "अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्वं तत्र प्रकारप्रकारिणोः प्रकाराणाञ्चात्यन्त भेदेऽपि विशिष्टैक्यादिविवक्षया एकत्व व्यपदेश" इति चिदचितोः भगवत्प्रकारत्वप्रतिपादनात् । अतः समीचीना-वयवसन्निवेशविशिष्टपुण्ड्रधारणमुक्तवचनाभिप्रेतमिति। मुमुक्षुदर्पणे "न नखाद्यैश्च" आद्यशब्दात् शलाकादिभिरपि न कुर्यादित्यर्थ इत्युक्तम् । अतः प्रकारेणेत्येतत्परित्यज्य येन तेनेत्यस्याङ्गुलि व्यतिरिक्तसाधन-

परत्ववर्णनमाग्रहमूलमेव । अतस्सुष्ठूक्तम् "गृहस्थस्यानामिकया" इत्यादिकमिति बोध्यम्।

पार्श्वयोर्घनविन्यास मूर्ध्वपुण्ड्रमिहोच्यते । यथा चर्म न दृश्येत तथोर्ध्वं पुण्ड्रमाचरेत् । इषुपातस्थितैर्ग्राह्यमूर्ध्वपुण्ड्रं समाचरेत् । पार्श्वमङ्गुलिमानं स्यान्मध्यमे द्व्यङ्गुलं भवेत् । त्रिधा सर्वत्र विस्तारश्चतुस्त्रिद्व्यङ्गुलं क्रमात्। उत्तमो मध्यमो हीनः पार्श्वावाङ्गुलिकौ स्मृतौ । वर्तुलं तिर्यगच्छिद्रं ह्रस्वं दीर्घं ततन्तनु । वक्रं विरूपं बद्धाग्रं भिन्नमूलं पदच्युतम् । अशुभ्रं रूक्षमासक्तं तथानङ्गुलिकल्पितम् । विगन्धमपसव्यञ्च पुण्ड्रमाहुरनर्थकम् । आसीनोऽङ्गुलिभिर्दद्या-दूर्ध्वपुण्ड्रान् स्वयं क्रमात्। पार्श्वमङ्गुलिमात्रन्तु मध्ये छिद्रं प्रकल्पयेत्। पार्श्वमङ्गुलिमात्रन्तु विन्यसेद्विजसत्तमः । सपवित्रेण हस्तेन नोर्ध्व-पुण्ड्राणि धारयेत्। चन्दनालेपनञ्चैव तद्दानञ्चैव वर्जयेत् ॥" इति श्री सच्चरित्ररक्षोदाहृत वसिष्ठभरद्वाजपराशरसंहितावृद्धहारीतवसिष्ठ-स्मृतिवचनान्यनुसन्धेयानि।

आचार्यपादानां पारमेष्ठ्यसंहितावचनानामेव चरमोपात्तत्वे-नाभिमतत्वात् प्रायशस्तदनुसारेण पूर्वाचार्यानुष्ठितोर्ध्वपुण्ड्रधारण-प्रकारमाह ललाटे चतुरङ्गुलमित्यादिना । चतुरङ्गुलमिति । "ऊर्ध्पुण्ड्रं ललाटे तु कुर्वीत चतुरङ्गुम्" इति भरद्वाजवचनमनुरुध्योक्तम् । "भ्रुवोरधस्तादारभ्य रेखाद्वयसमन्वितम् । केशान्तं विन्यसेत्पुण्ड्रमूर्ध्वं नित्यं द्विजोत्तमः" इति वासिष्ठसंहितावचनमप्यत्र भाव्यम् । यत्तु "नासिकामूलमारभ्य ललाटे प्रथमन्यसेत्" इत्याचार्यपादोदा-हृतवचनादौ नासामूले ललाटपुण्ड्रविधिरिति। तन्न, यतस्तत्र नासिका-

वा विस्तृतं, कुक्षौ नाभ्यादिद्वादशाङ्गुलमूर्ध्वं त्र्यङ्गुलं विस्तृतं, हृदये प्रादेशमात्रमष्टाङ्गुलं वा ऊर्ध्वं चतुरङ्गुलं विस्तृतं, कण्ठे चतुरङ्गुलमूर्ध्वं द्व्यङ्गुलं विस्तृतम्, दक्षिणकुक्षिपार्श्वे

मूलस्य मर्यादात्वमेव, न त्वभिविधित्वं, ''भ्रुवोरधस्तादारभ्ये''त्युदाहृतवासिष्ठवचनानुरोधात् । ''विस्तारन्त्र्यङ्गुल''मित्याद्याचार्यपादोदाहृतवचनावगत त्र्यङ्गुलादिविस्तारस्य नासामूलेऽसम्भावितत्वेन, नासामूलोपरि भ्रुवोरधः ललाटपुण्ड्रधारणमेव युक्तमिति बोध्यम् । ''विस्तारं त्र्यङ्गुलं प्रोक्तं द्व्यङ्गुलं वा ललाटके'' इति पारमेष्ठ्यसंहितावचनविहितद्व्यङ्गुलपक्षे पूर्वोक्तपार्श्वाङ्गुलि मानमध्यछिद्रयोरसम्भावितत्वात्, मध्यछिद्रार्थं पार्श्वाङ्गुलिमानसङ्कोचस्स्यादित्यस्वरसादाह। त्र्यङ्गुलं वेति। त्र्यङ्गुलपक्षे नोक्तानुपपत्तिरिति बोध्यम्। ''स्तनान्तरेऽपि च तथा कुर्यात् प्रादेशमायतम्'' इति पारमेष्ठ्यसंहितावगत प्रादेशपरिमाणस्य 'कुक्षौ तु नाभेरूर्ध्वं स्याद्द्वादशाङ्गुलमायतम्'' इत्युक्त द्वादशाङ्गुलोर्ध्व प्रदेशासंभाव्यतया क्वचित् प्रादेशप्रमाणासम्भवमभिप्रेत्य ''अष्टाङ्गुलं वे''त्युक्तम् । ''वक्षःस्थले माधवञ्च न्यसेदष्टाङ्गुलायतम् । हृदये माधवायेति धारयेदङ्गुलाष्टकम्'' इति वासिष्ठसंहिता ब्रह्मरात्रादिवचनजातमिह भाव्यम्।

कण्ठे चतुरङ्गुलमूर्ध्वं द्व्यङ्गुलं विस्तृतमिति। ''ललाटे कण्ठदेशे तु स्कन्धयोश्च त्रिके तथा । चतुरङ्गुलमानानि पञ्च पुण्ड्राणि धारयेत्'' इत्याचार्यपादोदाहृत ब्राह्मरात्र वचनाद्यभिप्रायेण कण्ठपुरोभागे ''चतुरङ्गुलमूर्ध्वं''मित्युक्तम्। द्व्यङ्गुलं विस्तृतं रम्यं चतुरङ्गुलमायतम्'' ''इत्याचार्य पादप्रदर्शितवचनात् द्व्यङ्गुलं विस्तृतमित्युक्तम्।

द्वादशाङ्गुलमूर्ध्वं त्र्यङ्गुलं विस्तृतं, दक्षिणबाहुमूले दशाङ्गुल-मूर्ध्वं त्र्यङ्गुलं विस्तृतं, जत्रौ दक्षिणकण्ठपार्श्वे चतुरङ्गुलमूर्ध्वं

द्व्यङ्गुलपक्षे मध्ये छिद्रार्थं पार्श्वाङ्गुलिमानसङ्कोचः कार्यः, तदसङ्कोचेच्छायां ''कण्ठकूपेऽपि च तथा त्र्यङ्गुलायतविस्तृतम्'' इति पारमेष्ठ्यसंहितोक्तं ग्राह्यम् । आह्निकेऽप्येतदभिप्रेतम्, इतर पुण्ड्रेषु पारमेष्ठ्यसंहितोक्तविस्ताराद्यभिधानात् ।

दक्षिणबाहुमूले दशाङ्गुलमूर्ध्वमिति । श्री सच्चरित्ररक्षायां प्रथमाधिकारे बाहुमूले सुदर्शनपाञ्चजन्यचिह्नधारणविधानात्, ''हेतुत्वात्सद्गृहीतेरितरपरिहृतेर्द्राविणात्किङ्करादेर्धार्यं चक्रादिचिह्नम्'' इत्युक्त हेतुत्रयस्य तच्छिह्नप्रकाशाधीनत्वात् ''हृदये चोदरे चैव पार्श्वयोः पृष्ठ एव च ।बाह्वोर्मध्ये च सप्त स्युः'' ''दक्षिणे बाहुमध्ये तु चिन्तयेन्मधुसूदनम् । तत्पार्श्वे बाहुमध्ये तु मधुसूदन इष्यते'' इत्याचार्यपादोदाहृत वचनपारमेश्वरवचनतः बाहुमध्यदेशस्य पुण्ड्रस्थानत्वावगतेः, बाहुमूलशब्दस्य सुदर्शनादिधारणाश्रयव्यतिरिक्त बाहुमूलपरत्वमाश्रयणीयम्, श्री वैखानसशास्त्रे मरीचिप्रोक्ते पञ्चपसप्तति पटले ''दक्षिणबाहुमध्ये मधुसूदनाय, वामबाहुमध्ये श्रीधराये''ति, बाहुमध्य एव पुण्ड्रधारणं विहितम् । आचार्यार्चाचित्रलिखित विग्रहेषु सुदर्शनादि चिह्नादधः प्रदेश एव बाहुपुण्ड्रदर्शनात् तथैवास्मदाचार्य-प्राचार्य तच्छिष्यप्रशिष्यानुष्ठान दर्शनाच्च, तथैव बाहुपुण्ड्रधारणं युक्तम् । यदन्योक्तं - बाह्वोर्द्वादशाङ्गुलपुण्ड्रधारणं पारमेष्ठ्यसंहितोक्तमिति, तन्न, बहुषु श्री सच्चरित्ररक्षा श्रीकोशेषु ग्रन्थमुद्राक्षर तच्छ्रीकोशेषु च ''दक्षिणे तु भुजे कुर्यादा यतन्तु दशाङ्गुलम्''। इति तत्संहितावचनदर्शनात् तत्परिमाणस्य ''दशाङ्गुलप्रमाणन्तु

उत्तमोत्तममुच्यते'' इत्याचार्यपादोपात्तवचन प्रशंसितत्वाच्च बहुष्वसंकीर्णाह्निककोशेषु ''दक्षिणबाहौ दशाङ्गुलमूर्ध्वमि''त्येव पाठोऽस्ति। क्वचित् ''द्वादशाङ्गुळ'मिति पाठः, उदाहृतप्रमाणविरोधात् मानाभावाच्छोपेक्ष्यः । एवञ्च कूर्परप्रभृति पञ्चदशाङ्गुलपरिमिते बाहौ अधः द्व्यङ्गुलं परित्यज्य उपरि दशाङ्गुलपुण्ड्रधारणे त्र्यङ्गुलं परित्यज्य त्र्यङ्गुलबाहुमूलप्रदेशः सुदर्शनपाञ्चजन्यप्रकाशयोग्यस्स्यात्, एवं सति, सर्वप्रमाण श्रीसूक्त्याचारानुगुण्यं भवति । एतेन कूर्परादुपरि चतुरङ्गुलत्र्यङ्गुलाद्वा ऊर्ध्वं द्वादशाङ्गुलं, दशाङ्गुलं, नवाङ्गुलं, अष्टाङ्गुलं वा, आयतं बाहुपुण्ड्रमित्यपरोक्तं परास्तम्; नवाङ्गुलं मध्यमं स्यादष्टाङ्गुल मथाधमम्'' इति निन्दितनवाङ्गुलाष्टाङ्गुळ परिमाणयोः पूर्वप्रशंसित दशाङ्गुलपरिमाणेन तुल्यविकल्पकथनस्यानुचितत्वात् । पञ्चदशाङ्गुले बाहौ अधश्चतुरङ्गुलत्यागे द्वादशाङ्गुलपुण्ड्रधारणस्थलाभावात्, दशाङ्गुल नवाङ्गुल पुण्ड्रधारणे सुदर्शनाद्यंकनछादनापत्त्या तत्प्रकाशाधीनस्य ''हेतुत्वात्सद्गृहीते''रित्यादि हेतु-त्रयस्यासम्भवप्रसङ्गात्। त्र्यङ्गुलादूर्ध्वं द्वादशाङ्गुलपुण्ड्रधारणेऽपि तद्दोषतादवस्थ्याच्च। एतेन, इतरपराङ्गीकृतः अष्टाङ्गुलबाहुपुण्ड्रपक्षः प्रत्युक्तः, ''अष्टाङ्गुलमथाधमम्'' इति तन्निन्दनात् । न चैवं हृदयेऽष्टाङ्गुल पुण्ड्राधार्यत्वं स्यादिति वाच्यम्, पूर्वोक्तरीत्या तत्रागत्याष्टाङ्गुल पुण्ड्रस्यैव धार्यत्वात् । यत्र दशाङ्गुल विधेरवकाशसम्भवश्च तत्रैवाष्टाङ्गुल निन्दनस्य स्वीकार्यत्वात्।

जत्रौ दक्षिणकण्ठपार्श्वे इति । ''जत्रौ त्र्यङ्गुलमायामं विस्तरञ्च तथैव च'' इति पारमेष्ठ्यसंहिता वचनमनुसृत्य जत्रावित्युक्तम् ।

विस्तृतं, वामकुक्षिपार्श्वे वामबाहुमूले वाम जत्रौ दक्षिणवत्, जघनोपरि पृष्ठभागे त्र्यङ्गुलमायतं विस्तृतञ्च, ककुदे त्र्यङ्गुलमायतं विस्तृतञ्च, ककुदे त्र्यङ्गुलमायतं विस्तृतञ्च, भगवत्पादाकृतीन् पुण्ड्रान्, ''चतुश्चक्रं नमस्यामि केशवं कनकप्रभम् । नारायणं घनश्यामं चतुश्शङ्खं नमाम्यहम् ।

''त्रिविक्रमेति मन्त्रेण धारयेद्दक्षिणे गले । हृषीकेशेति मन्त्रेण धारयेद्वामकण्ठके। त्रिविक्रमं च तत्स्कन्दे वामपार्श्वे तु वा मनम्। श्रीधरं बाहुके वामे हृषीकेशन्तु स्कन्धके ।'' इत्याचार्यपादोदाहृतवचनतः ''தெளிவுடைவாளுருவிக் கரங்களிலிரண்டேந்தி வலக்கழுத்தும், என்னிருடீகேசனிறைக் கீழிடக் கழுத்தென்றிவற்றில்'' इति द्वादशनाम गाधावाक्याच्च, दक्षिणवामकण्ठयोरेव पुण्ड्रस्थानत्वाव-गमात् ''जत्रा''वित्यस्य जत्रुस्थानमारभ्येत्यर्थो ग्राह्यः, एवं ''वाम जत्रावि''त्यत्रापि बोध्यम् । अतः केषाञ्चित् जत्रावेव पुण्ड्रधारणञ्चिन्त्यमिति ऊर्ध्वपुण्ड्रविषयस्थानपरिमाण प्रमाणोपपत्ति परपक्षप्रतिक्षेपादेः बहुधा प्रदर्शितत्वात् पार्श्वयोरङ्गुलिपरिमाण-न्यूनाधिक चोदितस्थानच्युतातिदीर्घातिह्रस्वमध्यछिद्ररहित बद्धाग्र शलाकादि-कल्पित पुण्ड्राण्यनर्थकानीति बोध्यम्।

भगवत्पादाकृतीन् पुण्ड्रानिति। तदुक्तम् ''क्रियमाणस्य चोर्ध्व-पुण्ड्रस्य हरिपादसंस्थानवत्त्वं सान्तरालत्वञ्च हरेः पादाकृतिमित्यादि-कया श्रुत्या प्रागुपात्तया प्रदर्शितम्। सन्ति च पुराणादिष्वपि तथात्वे

माधवं मणिभङ्गाभं चिन्तयामि चतुर्गदम् । चन्द्रभासं चतुश्शार्ङ्गं गोविन्दमभिसंश्रये । विष्णुश्चतुर्हलं वन्दे पद्म-किञ्जल्कसन्निभम् । चतुर्मुसलमब्जाभं संश्रये मधुसूदनम् । अग्निवर्णं चतुःखड्गं भावयामि त्रिविक्रमम् । वामनं बालसूर्याभं चतुर्वज्रं विभावये । श्रीधरं पुण्डरीकाभं चतुः पट्टसमाश्रये । चतुर्मुद्गरमभ्येमि हृषीकेशं तटित्प्रभम् । पद्मा-युधं पद्मनाभं प्रणमाम्यर्करोचिषम् । दामोदरं चतुः पाश-मिन्द्रकोपनिभं भजे । वासुदेवमुपासेऽहं पूर्णेन्द्वयुत सन्निभम् ।

वचांसी''त्यादिना - ''अतः श्रुत्यादिविहितहरिपादसंस्थानमेव भागवतैरुपादेयमिति स्थित''मित्यन्तेन हरिपादसंस्थानस्यैव भाग-वतैरुपादेयत्वम्, अन्याकृतीनामेकान्तिव्यतिरिक्तग्राह्यत्वमनुगृहीतम् । ''भगवल्ललाटे न तत्पादाकृति पुण्ड्रं, मन्त्रविशेषकरणकध्यान विशेषयुक्तश्वेतमृदादि धारणस्यैव पुण्ड्रत्वाद् । तत्र शोभार्थमलङ्कार विशेषः पुण्ड्रसदृशः तिलकसदृशो वा यथा शोभाभिमानं क्रियत'' इत्याचार्यपादानुगृहीतञ्च ग्राह्यम् । एतेन पुण्ड्रमूलभागे त्र्यङ्गुलद्व्यङ्गुल-परिमाणं, ऊर्ध्वभागे द्व्यङ्गुलैकाङ्गुल परिमाणं पुण्ड्रं कैश्चित् क्रियमाणं, तस्य वेणुपत्र दीपशिखाद्याकृतित्व कथनञ्च पारमैकान्त्याननुगुणमिति बोध्यम् । ऊर्ध्वपुण्ड्रधारणदशायां तत्तत्पुण्ड्रदेवताध्यानमाह - चतुश्चक्रन्नमस्यामीत्यादिना 'वासुदेवमुपासेहं पूर्णेन्द्वयुतसन्निभम्'' इत्यन्तेन । वासुदेवमित्यादि त्रयोदश पुण्ड्रपक्षाभिप्रायेण । ललाटे चतुरङ्गुल मूर्ध्वमित्यादिना ककुदे त्र्यङ्गुलमायतं विस्तृतञ्चेत्यभिधानात्

चरमोपात्त पारमेष्ठ्यसंहितावचनेषु द्वादशनाम गाधासु च द्वादशपुण्ड्रधारणावगमात्, ''मोक्षार्थी च विशेषेण द्वादशाक्षरविद्यया। द्वादशैतानि पुण्ड्राणि कुर्यात् द्वादशनामभिः । इति इन्द्ररात्रवचनेऽपि तथावगमाच्च द्वादशपुण्ड्र पक्ष एवाचार्यपादसम्मतः । द्वादशाक्षरविद्यया = शेषशिरोधारणमन्त्ररूपया सह, द्वादशनामभिः एतानि = ''चतुश्चक्रधरं मान्तु स्मृत्वा जाम्बूनदप्रभम्'' इत्यादिभिः ''दामोदराय मन्त्रेण धारयेत्पश्चिमे गले'' इत्यन्तैः पूर्वोदाहृतवचनैः प्रतिपादितानि, द्वादशपुण्ड्राणि मोक्षार्थी विशेषेण कुर्यादित्युदाहृतवचनार्थः । यत्त्वन्योक्तं द्वादशाक्षरमन्त्रेण शिरोधारणन्तु ''त्रयोदशमधो मूर्ध्नि धारयेदूर्ध्वपुण्ड्रकम्'' इत्युक्तत्रयोदशपुण्ड्रपक्षे वेदितव्यम् । ''द्वादशाक्षरमन्त्रेण मूर्ध्नि दत्वा मृदन्ततः'' इत्यादि प्रमाणात्; द्वादशपुण्ड्रपक्षे तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि' इति वचनविहितेन वासुदेवाय नम इति मन्त्रेण शेषशिरोधारणमिति । तदसङ्गतम् – श्री सच्चरित्र रक्षायां ''त्रयोदशमधो मूर्ध्नि धारयेदूर्ध्वपुण्ड्रकं'' इत्येतदनन्तरं द्वादशाक्षरमन्त्रेण मूर्ध्नि दत्वा मृदन्तः'' इति वचनासत्वात्, ''द्वादशेति द्वयः पक्षः तस्मिन् शिरसि वर्जयेत्। अष्टौ वेति द्वयः पक्षः शिर आदीनि वर्जयेत्'' । ''तत्र मन्त्रं प्रवक्ष्यामि ऊर्ध्वपुण्ड्रस्य धारणे'' इत्यादिना द्वादशनामान्युक्त्वा ''द्वादशाक्षरमन्त्रेण मूर्ध्नि दत्वा-मृदन्ततः'' इत्याचार्यपाद श्रीसूक्त्या द्वादशपुण्ड्रपक्ष एव द्वादशाक्षरमन्त्रकरणक देशशिरोधारणावगमात्, मोक्षार्थी चेति पूर्वोदाहृत वचनेनाप्यस्यार्थस्य सिद्धत्वाच्च । द्वादशपुण्ड्रप्रकरणे ''तत्प्रक्षालनतोयेन'' इत्यादिवचनस्यासत्वेन तत्पक्षे वासुदेवाय नम

इत्यादि ध्यानपुरस्सरम् ओं केशवाय नम इत्यादि मन्त्रैर्ललाटादिस्थानेषु क्रमेण धृत्वा शेषं द्वादशाक्षरेण मूर्ध्नि

इति मन्त्रेण शिरःपुण्ड्रधारणस्य वक्तव्यत्वासम्भवात् । ब्रह्माण्डे ''ललाटे केशवं ध्याये''दित्यारभ्य ''तत्प्रक्षालनतोयेन वासुदेवेति मूर्धनि'' इत्यन्तस्य वचनजातस्योदाहृतत्वात्, परिशेषात् त्रयोदशपुण्ड्रपक्ष एव वासुदेवाय नम इति शिरः पुण्ड्रधारणस्य स्वीकार्यत्वात् । एतेन तत्प्रक्षालनतोयेन द्वादशाक्षरेण मूर्ध्नि चतुरङ्गुलं पुण्ड्रं धार्यमित्यपरोक्तं निरस्तम् ।

इत्यादि ध्यानपुरस्सरमित्यादि । चतुश्चक्रधरं मां तु स्मृत्वा जाम्बूनदप्रभम् । ललाटे केशवायेति धारयेदूर्ध्वपुण्ड्रक' मित्यादीनि 'द्वादशाक्षरमुच्चार्य शेषं मूर्ध्नि विन्यसेत्'' इत्यन्तानि ध्यानविधायकानि । तत्तद्ध्यानस्यावश्यम्भावित्वमुक्तम् । ''ध्यानं तत्संप्रवक्ष्यामि ऊर्ध्वपुण्ड्रस्य धारणे । येन नाम्ना च यत्कुर्यात् तन्नामार्थं विचिन्तयेत् । विना कृतन्तु ध्यानेन ऊर्ध्वपुण्ड्रन्तु निष्फलम्'' इति देशिकचरणोदाहृत वचनान्यत्र भाव्यानि । अथ श्रीचूर्णधारणमाह – विष्णुगात्रपरा-मृष्टमित्यादिना । तदुक्तम् – यथेश्वरसंहितायामेव ''कुङ्कुमश्चन्दनश्चैव कर्पूरश्चानुलेपनम् । विष्णुगात्रपरामृष्टं तद्धै पावनपावनम्'' । तथा पाद्मोद्भवे ''विष्णुदेहपरामृष्टं यः चूर्णं शिरसा वहेत् ।। सोऽश्वमेधफलं प्राप्य विष्णुलोके महीयते'' । इत्यादि । तथान्यत्र ''विष्णुगात्रच्युतं चूर्णं ललाटे धारयेत् द्विजः । अपोह्य पातकान्याशु मोदते दिवि देववत्'' इति । ललाट इत्युपलक्षणम् ''तत्तन्मन्त्रेण तन्मूर्तिं ध्यात्वा पुण्ड्राणि धारयेत्'' । अन्तराले तु सर्वेषां हरिद्रान्धारयेच्छ्रियम् ।

धारयेत्। विष्णुगात्रपरामृष्टहरिद्राचूर्णं श्रीमन्त्रैस्सर्वपुण्ड्रमध्ये धृत्वा, ओं केशवाय नम इत्यादिक्रमेण पुण्ड्रानङ्गुलीभिः स्पृष्ट्वा, अञ्जलिं च कुर्यात् एकपुण्ड्रपक्षे पूर्ववत्सकलं कृत्वा,

---

कुङ्कुमं वापि हारिद्रं चूर्णं विष्ण्वभिषेचितम्। ऊर्ध्वपुण्ड्रस्य मध्ये तु धारयेद्दीपवत् द्विजः। श्रीचूर्णरहितं पुण्ड्रं कदाचिन्नैव धारयेत्। धारयेद्यदि मोहेन तत्पुण्ड्रं स्यादनर्थकम्। ब्रह्मचारिगृहस्थानां यतीनां वनिनामपि। सुवासिनीनां कन्यानां विधवानामपि द्विजाः। श्री चूर्णं सततं धार्यमूर्ध्वपुण्ड्रस्य मध्यतः। धात्रीपत्रसमं धार्यं श्रीचूर्णं ब्रह्मवादिनाम्। अन्येषां क्षत्रियादीनां तिन्त्रिणीदलसम्मितम्। कूश्माण्डबीजवत्स्त्रीणामितरेषां यथारुचि। द्रव्यान्तरविहीनन्तु ललाटे धारयेद्द्विजः। तावद्भवति चण्डालो यावच्च स्नाति दुर्मतिः'' इत्यादीनि प्रमाणन्यत्र द्रष्टव्यानि। द्रव्यान्तरं = शालितण्डुलादिचूर्णम्। ''श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा। तृतीयं कमला प्रोक्ता चतुर्थं चन्द्रशोभिनी। पञ्चमं विष्णुपत्नी स्यात् वैष्णवी षष्ठमेव च। सप्तमं तु वरारोहा अष्टमं हरिवल्लभा। नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका। एकादशं महालक्ष्मीः द्वादशं सुरसुन्दरी'' इति प्रमाणानुसारेण श्रियै नमः इत्यादिभिः मन्त्रैर्धार्यम्॥

अथ पुण्ड्रस्पर्शनादिकमाह—ओं केशवाय नम इत्यादिना। तदुक्तम् ''धृतोर्ध्वपुण्ड्रो विधिवन्न्यस्य नामानि द्वादश। नमोऽन्तान्यञ्जलिं कुर्यान्नामान्युक्त्वा यथाक्रमम्'' इति। पुण्ड्र श्रीचूर्णधारणानन्तरं साञ्जलिस्सन् ''चतुश्चक्रं नमस्यामी''त्यादि-क्रमेण ध्यायेदिति परोक्तं तु पूर्वोदाहृतप्रमाणाचार्यपाद श्रीसूक्तिविरुद्धमित्युपेक्ष्यम्। एकपुण्ड्रधारणक्रममाह – एकपुण्ड्रपक्ष

इति। तदुक्तम् ''अत्र च पुण्ड्रसङ्ख्यानुरूपमन्त्रविशेषनिर्देशदर्शनात्। ब्रह्मरात्रोक्तं प्रणवेन ललाटे धारणं, ब्रह्माण्डोक्तं ''उद्धृतासी''ति मन्त्रेण धारणं चैकसङ्ख्याविषयं मन्तव्य''मिति। ''दामोदरं केशवं''चेत्यादि वासिष्ठसंहितावचनस्योत्तरार्द्धं ''यदि त्यजेत्तु मोहेन तन्मुखं नावलोकयेत्'' इति। एतेन -''द्विपुण्ड्राधारणे चिन्त्यं वचनं द्विजसत्तमैः'' इतीतरोक्तमपास्तम्। ''द्वादशैक चतुःपुण्ड्रैः भूषितास्स्युः सदा द्विजाः'' इति पारमेश्वरवचनस्याचार्यपादोक्तत्वात् ''अष्टौ षट्चतुरः पुण्ड्राननाचारान्न धारये''दितीतरोक्तचतुः पुण्ड्रनिराकरणमपास्तम्। अष्टषट्पुण्ड्राणां काम्यत्वाभिधानात् परमैकान्त्यधार्यत्वेऽपि चतुःपुण्ड्रेषु फलाश्रुतेः नित्यत्वेन निष्कामधार्यत्वात्। ''गुरुलघुविकल्पस्य एकस्मिन्नसम्भवात्, गुरोरेव मुख्यत्वं सिद्धम्। यत्र तु कर्मविशेषाङ्गतया वा फलविशेषमुद्दिश्य वा न्यूनसंङ्ख्याविधानं तत्र विशेषवचनबलात् न्यूनतयैव तत्परिग्रहः। अन्यत्र त्वधिकपरिग्रह एव मुख्यः। द्रव्यालाभासामर्थ्यादि दशासु गत्यभावान्न्यून परिग्रहः, अत्यन्ताकरणाद्यथाशक्तिकरणस्य नित्येषु शास्त्रीयत्वात्'' इत्याचार्यपाद श्रीसूक्त्या त्रयोदशपुण्ड्रस्य मुख्यत्वावगमेऽपि द्वादशपुण्ड्रपक्ष एव मुमुक्षु ग्राह्यः इत्याचार्यपादोदाहृत प्रमाणसिद्ध इति पूर्वमेव प्रतिपादितम्। अतस्स एव पक्षश्शिष्टाचारसिद्धः ग्राह्यः। ''अर्धचन्द्राकृति स्त्रीणाम्'' ''ऊर्ध्वपुण्ड्रं तथा स्त्रीणामर्धचन्द्राकृतिर्भवेत्।'' इति वासिष्ठपराशर-संहितावचनसत्त्वात्, भगवत्पादाकृत्येव ऊर्ध्वपुण्ड्रं स्त्रीणां, अन्यधा धारणे वचनं नास्तीतीतरोक्तमपास्तम्। नारिकेलफलार्धं द्विनेत्रयुक्तं पुण्ड्रधारणजलपात्रं, बिल्वफलकरण्डे श्रीचूर्णनिक्षेपादिकं तत्र तत्रोक्तमनुसन्धेयमित्यन्यत्र विस्तरः।

''उद्धृतासि वराहेण कृष्णेन शतबाहुना । भूमिर्धेनुर्धरणी लोकधारिणी । मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् । त्वया हतेन पापेन जीवामि शरदश्शतम् ।। मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम्'' इति मन्त्रेण प्रणवेन वा ''दामोदरं केशवं च पुण्ड्रेषु न परित्यजेत्'' इत्युक्तरीत्या ललाटे ककुदे च पुण्ड्रं धृत्वा, श्री चूर्णमपि धृत्वा केशवदामोदरमन्त्राभ्यां केशवदमोदरौ ध्यायेत् । अथ सन्ध्यावन्दनम् । आचम्य प्राणानायम्य, श्री भगवदाज्ञया

सर्वकर्माङ्गोर्ध्वपुण्ड्रविधानं समाप्यानन्तरकर्तव्यं प्रतिजानीते– अथ सन्ध्यावन्दनमिति। सर्वकर्माङ्गं पवित्रमवश्यं धार्यम्। शातातपः - ''कौशेयं बिभृयान्नित्यं पवित्रं दक्षिणे करे । भुञ्जानस्तु विशेषेण नान्नदोषेण लिप्यते ।।'' अत्रिः - उभाभ्यामेव हस्ताभ्यां विप्रैर्दर्भपवित्रके। धारणीये प्रयत्नेन ब्रह्मग्रन्थिसमन्विते । यज्ञोपवीते मौञ्ज्यां च तथा कुशपवित्रके । ब्रह्मग्रन्थिं विजानीयादन्यत्र तु यथारुचि । ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिर्विधीयते। भोजने वर्तुलः प्रोक्तः एवं धर्मो न हीयते ।।'' संवर्तः - ''उभाभ्यामपि हस्ताभ्यां पवित्रन्धारयेद्द्विजः । दैवे कर्मणि पित्र्ये च ब्रह्मग्रन्थिसमन्वितम् ।।'' स्मृतिभास्करे - ''सप्तभिर्दर्भपुञ्जीलैः ब्राह्मणस्य पवित्रकम् ।'' मार्कण्डेयः - ''चतुर्भिर्दर्भपुञ्जीलैः ब्राह्मणस्य पवित्रकम् । एकैकन्यूनमुद्दिष्टं वर्णतस्तु यथा क्रमम्। सपवित्रस्सदर्भश्च कर्माङ्गाचमनं चरेत्। नोच्चिष्टं तत्स दर्भश्च भुक्त्वोच्छिष्टं तु वर्जयेत्। कूर्चेण वा पवित्रेण येन कर्माणि कारयेत्। तस्य ग्रन्थिं विसृज्यैव कर्मान्ते तु ततस्त्यजेत् ।।

पवित्रकूर्चयोस्त्यागे सग्रन्थ्यास्तु प्रमादतः । उपवासं चरेदेकमुपवासत्रयं तु वा ।'' कौशिकः - ''गवां वालपवित्रस्य सुवर्णस्य तथैव च । ''न ब्रह्मग्रन्थिनियमः धारयेत्तु यथा तथम् ।'' ''न ब्रह्मग्रन्थिनाचामेत्'' इत्यादि निषेधः केवलाचमनविषयः, ''सपवित्रेण हस्तेन कर्माङ्गाचमनं स्मृतम्'' इति कर्माङ्गाचमनस्य ब्रह्मग्रन्थि सहितहस्तेन कर्तव्यत्वस्मरणात्, आचाराच्च इति स्मृतिरत्नाकरादावभिप्रेतः । पवित्रनिर्माणमुक्तं पारिजाते ''तर्जन्यङ्गुष्ठयोरग्रं योजितं तु यथा भवेत् । ज्ञानमुद्रा तया कार्यं कूर्चवद्ग्रन्थिबन्धनम्'' स्मृतिरत्ने ''अङ्गुष्ठं घर्षयेदूर्ध्वं तर्जन्यातु पुनः पुनः । ज्ञानमुद्रामधः कृत्वा कूर्चवद्ग्रन्थिबन्धनम् । साग्राभ्यामृजुदर्भाभ्यां प्रादक्षिण्येन मध्यतः । मूलाग्रावुद्धृतौ कृत्वा कुर्यात् ग्रन्थिश्च मन्त्रवत् । तारेण कुर्यात्तं ग्रन्थिं पवित्रस्य द्विजोत्तमः ।'' स्मृतिभास्करे ''चतुरङ्गुलमूर्ध्वाग्रं ग्रन्थिरेकाङ्गुलन्तथा । वलयं द्व्यङ्गुलश्चैव पवित्रस्य तु लक्षणम्'' इत्याह्निककाण्डस्थवचनानि, ''सकृत्प्रदक्षिणीकृत्य पवित्रमभिधीयते । तदेव द्विगुणीकृत्य ब्रह्मग्रन्थिर्विधीयते'' इति रत्नाकरस्थवचनानि चात्र भाव्यानि । स्नानाङ्गतर्पणप्रकारमाह - आचम्येति । तदुक्तं ''तर्पणे 'आदावोङ्कारमुच्चार्य नामान्ते तर्पयामि च । देवान् ब्रह्मऋषींश्चैव तर्पये दक्षतोदकैः ॥ तिलोदकैः पितृन् भक्त्या सूत्रोक्तविधिना ततः'' इति । अत्र प्रणवपूर्वकत्वेन भगवदात्मकत्वानुसन्धानं विहितम् । एतदेव च नित्ये भाष्यकारैरपि दर्शितम् - ''देवानृषीन् पितृन् भगवदात्मकान् ध्यात्वा सन्तर्प्येति'' । इदं च व्यासेन मध्याह्नविहितमपि प्रातः स्नानाङ्गतयापि विहितम् । तदुक्तम् - ''एवं स्नातः कृतोर्ध्वपुण्ड्रः

भगवत् प्रीत्यर्थं स्नानाङ्गं देवर्षिपितृतर्पणं करिष्य इति सङ्कल्प्य, ओं ब्रह्मादयो ये देवा इत्यादिक्रमेण उपवीती निवीती प्राचीनावीती च क्रमेण देवर्षिपितृतर्पणं तत्तत्तीर्थेन कुर्यात्। भगवानेवेत्यादि प्रातःस्नानाख्यं कर्म

स्नानाङ्गं भगवदात्मक देवर्षिपितृतर्पणं कृत्वा'' इति। ''धृतोर्ध्वपुण्ड्रो देवर्षिपितृन् सन्तर्प्य मन्त्रतः'' इति वङ्गि वंशेश्वरैरुक्तम्। ''नित्यं स्नात्वा शुचिः कुर्यात् देवर्षिपितृतर्पणं'' इति मनूक्तेः, प्रातः स्नानाङ्गमपि तर्पणं भवति। अहिर्बुध्न्यसंहितायामष्टाविंशेऽध्याये ''तत उत्तीर्य चाचम्य धृत्वा वस्त्रोत्तरीयके। धृतोर्ध्वपुण्ड्रः स्वाचान्तो देवादीनच्युतात्मकान्। ध्यात्वा सन्तर्पयेदन्यदाह्निकं विधिवच्चरेत्'' इति वचनानुसारेण वङ्गिवंशेश्वरोक्तमूर्ध्वपुण्ड्रधारणानन्तरं स्नानाङ्गतर्पण-माचार्य पादानुगृहीतम्। एतेन केषाञ्चिदूर्ध्वपुण्ड्रधारणात्पूर्वं स्नानाङ्गतर्पणकथनमसाम्प्रदायिकमिति बोध्यम्। माधवीये ''नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तर्पणं तु भवेत्तस्याङ्गत्वेन परिकीर्तितम्''। कार्ष्णाजनिः ''देवान् देवगणांश्चापि ऋषीन् ऋषिगणानपि। अव्यग्रस्तर्पयेन्नित्यं मन्त्रैरेव स्वनामभिः। पितॄन् पितृगणांश्चापि नित्यं सन्तर्पयेत्ततः।'' भरद्वाजः ''तर्पणे देवतादिभ्यः तत्तत्तीर्थेन तर्पयेत्। गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत्। येन तीर्थेन गृह्णीयात्तेन दद्याज्जलाञ्जलिम्। अन्यतीर्थेन गृह्णीयात्तत्तोयं रुधिरं भवेत्। पूर्वाशाभिमुखो देवानुत्तराभिमुखांस्त्वृषीन्। पितृंस्तु दक्षिणास्यस्तु जलमध्ये तु तर्पयेत्। यज्ञोपवीती देवानां निवीती ऋषितर्पणे। प्राचीनावीती पित्र्येषु तेन तीर्थेन तर्पयेत्। मनुः -

कारितवानित्यनुसन्दधीत । ततः द्विराचम्य, श्री भगवदाज्ञया भगवत्प्रीत्यर्थं प्रातस्सन्ध्यामुपासिष्य इति

''मनुष्यतर्पणे स्नानवस्त्रनिष्पीडने तथा । निवीती तु भवेद्विप्रस्तथा मूत्रपुरीषयोः । अङ्गुष्ठमूलान्तरतो रेखायां ब्राह्ममुच्यते । अन्तराङ्गुष्ठ देशिन्योः पितॄणां तीर्थमुच्यते । कनिष्ठामूलतः पश्चात् प्राजापत्यं प्रचक्षते। अङ्गुल्यग्रे स्मृतं दैवं तथैवार्षं प्रकीर्तितम् । मूले वा दैवमार्षं स्यादाग्नेयं मध्यमं स्मृतम् । तदेव सौमिकं तीर्थमेतत् ज्ञात्वा न मुह्यति ॥'' इत्याह्निककाण्डोदाहृतानि, ''सर्वदेवान् सर्वगणान् पतिपत्नीसहेति च। तिलोदकैस्तर्पयित्वा पितॄनथ पितामहान् । प्रपितामहसंज्ञांश्च सदाराननुतर्पये''दिति पराशरपारमेश्वरसंहितादि-वचनानि चात्रानु-सन्धेयानि।

प्रातस्सन्ध्योपास्तिप्रकारमाह - तत इति। सन्ध्योपासननित्यत्व प्रमाणानि श्रीपाञ्चरात्ररक्षायां तत्तन्निबन्धनेषु च बहुधा उदाहृतानि । पादप्रक्षालनपूर्वकाचमनद्वयप्रमाणमाचमनप्रकरणे पूर्वं प्रदर्शितम् । कर्मप्रदीपे ''देवार्चने जपे होमे स्वाध्याये श्राद्धकर्मणि। स्नाने दाने तथा ध्याने प्राणायामास्त्रयस्त्रयः । आदावन्ते च गायत्र्याः प्राणायामास्त्रय-स्त्रयः। सन्ध्यायामर्घ्यदाने च प्राणायामैकमुच्यते। अङ्गुष्ठानामिकाभ्यां तु तथैव च कनिष्ठया । प्राणायामस्तु कर्तव्यो मध्यमां तर्जनीं विना ।'' बृहस्पतिः ''बद्ध्वासनं नियम्यासून् स्मृत्वा चर्ष्यादिकं तथा । सन्निमीलितदृङ्मौनी प्राणायामं समाचरेत् ।'' संवर्तः - ''प्रणवेन तु संयुक्ता व्याहृतीस्सप्त नित्यशः । गायत्रीं शिरसा सार्थं मनसा त्रिः पठेत् द्विजः । योगयाज्ञवल्क्यः-''पूरकः कुम्भको रेच्यः प्राणायामस्त्रि-

सङ्कल्प्य, कृतश्चेत्यादिसात्विकत्यागं कृत्वा, भगवन्तं श्री भूमिनीलासमेतं ध्यात्वा पूर्वं पुण्ड्राधारणे

लक्षणः। नासिकाकृष्ट उच्छ्वासो ध्मातः पूरक उच्यते। कुम्भको निश्चलश्वासो रेच्यमानस्तु रेचकः। कुम्भकेन जपं कुर्यात् प्राणायामस्य लक्षणम्। शनैर्नासापुटे वायुमत्सृजेन्न तु वेगतः। न कम्पयेच्छरीरं तु स योगः परमो मतः॥" अत्रिः "दक्षिणघ्राणरन्ध्रेण रेचयेत्प्रथमं द्विजः। प्राणायामेऽथ वामेन नासारन्ध्रेण पूरयेत्। तं वायुं धारयेच्छक्यं दक्षिणेनाथ रेचयेत्॥" इत्यादीनि रत्नाकरस्थवचनान्यत्र भाव्यानि। प्रातस्सन्ध्यामुपासिष्ये इति सङ्कल्प्येति। "प्रीत्यर्थं देवदेवस्य श्रीशस्य जगतीपतेः। नित्य कर्माणि कुर्वीत तथा नैमित्तिकान्यपि। ततस्सम्यक् द्विराचम्य प्रणम्य गरुडध्वजम्। शुचौ देशे समासीनः प्राङ्मुखोदङ्मुखोऽपि वा। प्रातस्सन्ध्यामुपासिष्ये प्रीत्यर्थं श्रीपतेरहम् इति सङ्कल्प्य मनसा प्रातस्सन्ध्यां समाचरेत्" इति वासिष्ठसंहिता-वचनान्यत्रानुसन्धेयानि। "आयम्यासून् करिष्ये सकलशुभकृते यज्ञसूत्रप्रतिष्ठां सङ्कल्प्येत्थं" इत्युक्त्वा "विविधमुनिमतां यज्ञसूत्रप्रतिष्ठां" इत्यभिधानात् धर्मशास्त्रसूत्रविहितकर्मसु तत्तत्कर्म करिष्ये इति सङ्कल्प एवाचार्यपादाभिप्रेतः शिष्टाचारसिद्धश्च। तदुक्तम् - "स्वसूत्रविहितमेव सन्ध्योपासनादिकं कर्तुमुचित"मिति। एतेन, ओं भगवन्नित्येन प्रातस्सन्ध्योपासनेन भगवत्कर्मणा भगवन्तमर्चयिष्या-मीति सङ्कल्पं, बलमन्त्रं, भगवानेव स्वकीयेनैव कल्याणतमेन प्रातस्सन्ध्योपासनेनाखिल परिजनपरिच्छदान्वितं स्वात्मानं स्वयमेव प्रीतं कारयितु मुपक्रमते, इति च सात्विकत्यागं कृत्वा, एवं तत्र तत्र

उदकोर्ध्वपुण्ड्रं धृत्वा आपोहिष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः, देवी गायत्री छन्दः, आपो देवता इति, ''शिरो जिह्वा हृदयेषु सर्वत्र ऋषिछन्दो देवताः न्यसेत्''

सङ्कल्पसात्विकत्यागाववगन्तव्यावित्यपरोक्तं परास्तम् । ''विशुद्ध परिवारस्य नित्यं शुद्धा हरेः क्रिया'' इति शुद्धयाजिविचारे स्वोदाहृतभरद्वाजसंहितावचनेन पूर्वं स्नानप्रकरणोक्तयुक्त्या च इज्याया मेव परिजनपरिच्छदान्वित प्रीत्युद्देश्यकानुष्ठानावगमात्, क्रियान्तरे भगवत्प्रीत्युद्देश्यकानुष्ठानस्य तत्र तत्राचार्यपादोद्घोषितत्वाच्च । भरद्वाजः ''प्रारभ्यातारकाज्योतिराभानूदयदर्शनात् । प्रातस्सन्ध्येत्यभिहिता स्वाध्यायैश्च महर्षिभिः । सूर्यस्यास्त मयात्पूर्वमारभ्यातारकोदयात् । सायं सन्ध्येति सा मध्यमे तयोर्मध्यमा स्मृता ।'' विष्णुपुराणे - सन्ध्या मुहूर्तमात्रा वै ह्रासवृद्धी न कारणम्'' इति रत्नकरस्थवचनानि । यत्तु ''द्विघटीतूदयात्पूर्वं प्रहरार्थं तथोपरि । सन्ध्याकालस्स विज्ञेयो ह्यन्यथा लङ्घनं स्मृतम् ।'' इति तद्गौणकालाभ्यनुज्ञापरम् । तदाह वृद्धमनुः - ''न प्रातर्न प्रदोषश्च सन्ध्याकालोऽतिपद्यते । मुख्यकल्पोनुकल्पश्च सर्वस्मिन् कर्मणि स्मृतः ।'' मध्याह्नसन्ध्यागौणकालमाह दक्षः - ''अध्यर्धयामादासायं सन्ध्या माध्याह्निकीष्यते। इत्याह्निककाण्डस्थवचनानि चात्र भाव्यानि।

कर्माङ्गोर्ध्वपुण्ड्रधारणानुपपत्तौ कर्तव्यमाह पूर्वमित्यादिना । ''जपकाले मृदा धार्यं सन्ध्याकालेषु वारिणा'' इति ब्रह्मकैवर्तवचनमत्र प्रमाणम् । आपोहिष्ठेति मन्त्रस्येत्यादि । अत्र हारीतः ''मार्जनार्चनबलिकर्महोमभोजनानि देवतीर्थेन कुर्यात्'' इति । एतेन

इत्युक्तरीत्यानङ्गुष्ठाभिरङ्गुलीभिर्न्यस्य, प्रोक्षणे विनियोग इत्युक्त्वा वामहस्तेन तोयं संस्पृश्य, देवतीर्थेनोर्ध्वमुखेन शिरसि प्रणवेनैकवारं, समस्तव्याहृतिभिरेकवारं, गायत्र्या च एकवारं, प्रणवादिभिः आपोहिष्ठेत्यादिभिः प्रत्येकं सम्प्रोक्ष्य ओम् यस्य क्षयाय जिन्वथेति पादद्वये सम्प्रोक्ष्य, ओं आपो जनयथा च न इति पुनश्शिरसि प्रोक्ष्य, समस्तव्याहृतिभिरात्मानं परिषिच्य, सूर्यश्चेत्यनुवाकस्य अग्निर् ऋषिः, देवीगायत्रीछन्दः, सूर्यो देवता । इति मुखादौ न्यस्य, अपां प्राशने विनियोग इत्युक्त्वा,

विखनस्सूत्रोक्ताग्नितीर्थेन वेत्यपरोक्तं परास्तं, देवतीर्थेनैव शिष्टाचारात् विखनस्सूत्रोक्तस्य तत्सूत्रनिष्ठविषयत्वाच्च । चतुर्विधं मार्जनमाह कात्यायनः - ''शिरसि मार्जनं कुर्यात्सकुशोदकबिन्दुभिः । प्रणवो भूर्भुवः स्वश्च गायत्री च तृतीयका । अब्दैवत्यत्रयं चैव चतुर्थमिति मार्जनम् ।'' प्रणवेन प्रथमं, भूर्भुवस्सुवरिति द्वितीयं, गायत्र्या तृतीयं, आपोहिष्ठेति त्र्यृचेन चतुर्थमिति मार्जनक्रमः । त्र्यृचे विशेषमाह शौनकः - ''नवप्रणवयुक्तेन आपोहिष्ठे त्र्यचेन च । संवत्सरकृतं पापं मार्जनान्ते विनश्यति । आपोहिष्ठेत्र्यृचा कुर्यान्मार्जनन्तु कुशोदकैः । प्रतिप्रणवसंयुक्तं क्षिपेद्वारि पदे पदे ॥ विप्रुषोऽष्टौ क्षिपेदूर्ध्वमधो यस्य क्षयाय च ।'' अधः = अधश्शरीरे इत्यर्थः । नवभिरिति नियमात् प्रत्यृचं मार्जनं कार्यम् । भरद्वाजः - ''आपोहिष्ठादिभिर्मन्त्रैः शिरस्सन्मार्जयेद्-द्विजः । सिन्धुद्वीपऋषिश्छन्दो गायत्र्यापोहि देवताः । मार्जने विनियोगस्तु सूर्यश्चेति जलं पिबेत् । अस्यानुवाकस्याग्निर्ऋषिः छन्दो

''सूर्यश्च मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्र्या पापमकार्षम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुंपतु । यत्किञ्च दुरितम्मयि । इदमहम्मामृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा'' इत्यनुवाकेन भोजनकालीनापोशनोक्त नियमसहितमपश्चुलकेन प्राश्याचम्य, दधिक्रावण्ण इति मन्त्रस्य वामदेव ऋषिः, अनुष्टुप्छन्दः, दधिक्रावा देवता, प्रोक्षणे विनियोग इति पूर्ववत्कृत्वा, दधिक्रावण्णो अकारिषम् । जिष्णोरश्वस्य वाजिनः, सुरभि नो मुखाकरत् । प्रण आयूꣳषितारिषत् । ''अपोहिष्ठा + अरङ्गमामवः'' इत्येकादशभिः शिरसि प्रोक्ष्य, यस्य क्षयाय जिन्वथेति पादयोः, आपो जनयथा च न इति शिरसि च प्रोक्ष्य, व्याहृतिभिरात्मानं परिषिच्य, प्राणानायम्य, ओं अर्घ्यप्रदानमन्त्रस्य, विश्वामित्र ऋषिः, देवी गायत्री छन्दः, सविता देवता, अर्घ्यप्रदाने विनियोगः, इति पूर्ववत्

गायत्र्यंशुमान् । देवताविनियोगोऽपां प्राशने समुपस्पृशेत् । आत्मानं प्रोक्षयेत्पश्चात् दधिक्राविण्ण इत्यृचा । आपोहिष्ठादितिसृभिः ऋग्भिस्सकुसुमैर्जलैः । दधिक्राविण्ण इत्यस्य वामदेव ऋषिः स्मृतः । छन्दोनुष्टुब्विश्वे देवा देवताः प्रोक्षणे स्मृताः । ततोऽपसव्यं व्याहृत्या परिषिच्य समस्तया । पश्चादुभाभ्यां हस्ताभ्यामादायापस्समाहितः । रवेरभिमुखस्तिष्ठन् प्रणवव्याहृतिपूर्वया । गायत्र्याचाभिमन्त्र्यापस्त्रिः क्षिपे द्विजसत्तमः । देवलः - ''सन्ध्यातिक्रमे कृच्छ्रं कुर्यात्'' । बोधायनः

कृत्वा, सप्रणवव्याहृतिकगायत्र्या पार्ष्णिद्वय मुद्धरन् आभ्रूमध्यं समुद्धृत्य तर्जन्यङ्गुष्ठ संयोगरूपराक्षसमुद्रा-रहिताञ्जलिना तोयेनार्घ्यत्रयमादित्यान्तर्वर्ति भगवत् पादारविन्दयोर्दत्वा, अर्घ्यात् पूर्वमुदयेऽस्तमये च सन्ध्या-कालातिक्रमप्रायश्चित्तार्थं तुरीयार्घ्यप्रदानङ्करिष्य इति सङ्कल्प्य, (तुरीयार्घ्यप्रदानमन्त्रस्य सान्दीपिनी ऋषिः, देवीगायत्री छन्दः, सविता देवता) सप्तव्याहृतिसंपुटित-गायत्र्या तत्तत्सूत्रोक्त मन्त्रेण वा तुरीयार्घ्यं दत्वा, तीरं गत्वा समस्त व्याहृतिभिरात्मानं परिषिच्य, मन्देहाख्य-रक्षोविधूननपाप्मावधूननार्थं प्रदक्षिणं परिक्रम्य, ''असावादित्यो ब्रह्मे''ति ध्यात्वाचम्य, ओं केशवं तर्पयामीत्यादिक्रमेण केशवादीन् मार्गशीर्षादिमासेशान् द्वादश सन्तर्प्याचामेत्। प्रदक्षिणपरिक्रमणानन्तरं प्राक्कूलेषु दर्भेषूपविश्य त्रिः प्राणानाम्य असावादित्यो ब्रह्मेति

- ''सायमतिक्रमे रात्र्युपवासः''। ''प्रातरतिक्रमेऽह-रुपवासः'' इति। ''अर्घ्यप्रदानतः पूर्वमुदयेऽस्तमयेऽपि वा। गायत्र्यष्टशतं जप्यं प्रायश्चित्तं द्विजातिभिः''। पाद्मे— ''परिषेकं ततः कुर्यात् प्रादिक्षण्यं समाचरेत्। सन्तर्प्य केशवादींस्तान् आचामन्तु समाचरेत् । कौर्मे— ''प्रातर्मन्त्रवदाचम्य प्रोक्ष्य सूर्याय चाञ्जलिम्। दत्वा प्रदक्षिणं कृत्वा द्विराचम्य यथाविधि । प्राक्कूलेषु ततः स्थित्वा दर्भेषु सुसमाहितः । प्राणायामत्रयं कृत्वा ध्यायेत्सन्ध्यामिति श्रुतिः ।'' अशक्तस्य मुख्यकालातिक्रमे प्रायश्चित्तमाह सङ्ग्रहकारः - ''आचान्तो विधिवत्

सन्ध्यारूपं भगवन्तं ध्यायेदिति केचित्। अर्घ्यदानात्पूर्वमुदयेऽस्तमये वा गायत्र्यष्टशतं जपेत् । एककालमुपवसेदिति केचित् तुरीयार्घ्यप्रदानमिति केचित्। प्रातरतीते प्राणायामत्रयं, सङ्गवे षट्कम्। मध्याह्ने नवकं, अपराह्ने द्वादश, सायाह्ने षट्त्रिंशत् प्राणायामान् कुर्यादिति केचित्। एवं स्वसूत्रसंहिताद्युक्तक्रमेण तर्पणान्तं कृत्वा,

---

प्राणानायम्यार्घ्यं चतुर्थकम् । कालात्ययविशुध्यर्थं दत्वा सन्ध्यां समाचरेत् । चतुर्थमर्घ्यं गायत्र्या दद्याद्व्याहृतिसंपुटम् । कालात्ययविशुध्यर्थं त्रिसन्ध्यासु समाचरेत् । प्राणायामत्रयं कृत्वा सन्ध्याकर्म समाचरेत् । प्रातः काले त्रयं कुर्यात् सङ्गवे द्वादशोपरि । षट्त्रिंशन्मध्यमे काले ततो न प्राणसंयमः ।'' शङ्खोऽपि - ''सन्ध्यादिनित्यलोपे तु दिनमेकमभोजनम्। दिनद्वये त्रिरात्रं स्यात् कृच्छ्रार्धं तु दिनत्रये। दशाहे कृछ्रमेकं स्यात् ऊर्ध्वं चान्द्रायणश्चरेत्। चान्द्रायणं पराकं च मासादूर्ध्वं विधीयते । ततोप्येवं प्रकल्प्यं स्याद्व्यासस्य वचनं तथा ।' इति रत्नाकरोदाहृतानि मुक्ताफलोदाहृतानि च वचनान्यत्र भाव्यानि। यत्तु - ''अत्र विशेषमाह पैठीनसिः, सूतके सावित्र्या जलाञ्जलिं प्रक्षिप्य सूर्यं ध्यायन्नमस्कुर्यादिति, व्यासः 'सूतके मृतकेत्वर्घ्यं गायत्रीं तु समुच्चरन्। दत्वा प्रदक्षिणं कुर्यात् सूर्यं ध्यायन् ततो द्विजः ।' इति, अतोऽर्घ्यदाने वाचा मन्त्रोच्चारणं मार्जनादौ मनसेति रत्नाकरोक्तं, तदसङ्गम् - उदाहृतव्यासवचनस्य तत्स्मृत्यादौ विज्ञानेश्वरीयादौ चादर्शनेन चन्द्रिकामाधवीययोरर्घ्यदानमन्त्रवाचिकोच्चारण कथनावसरे उदाहृत

स्पष्टार्थकव्यासवचनमनुदाहृत्य, उदाहृतपैठीनसि वाक्योदाहरणेन च तस्य सन्दिग्धत्वात् । स्पष्टार्थ प्रमाणसत्वे तदुपेक्ष्यास्पष्टार्थ प्रमाणोदाहरणं तस्य सन्दिग्धत्वज्ञापकमिति श्री शतदूषण्यां यतिलिङ्गभङ्गेऽनुगृहीतम् । न च सूतके सावित्र्येत्यत्र सन्ध्याविधावुक्तस्य सावित्र्यनुवचनस्येह पुनर्वचनं मानसत्वनिवृत्त्यर्थं, तेन वा चोच्चारणं कार्यमिति चन्द्रिकोक्तेः कथं वाचिकत्वनिरास इति वाच्यम् । विज्ञानेश्वरीयशतकव्याख्याद्युदाहृत प्रमाणगणेनाशौचे सन्ध्योपासनमन्त्रोच्चारणनिषेधात् तदपवादतया "मनसोच्चारयेन् मन्त्रान्" इति पुलस्त्यवचनानुगुण्येन मानसगायत्रीकरणक जलाञ्जलिविधिपरत्वस्यैवात्र स्वीकार्यत्वेन वाचिकत्वविधि-परत्वासम्भवात् । अत एव श्रीपाञ्चरात्ररक्षातृतीयाधिकारे "गायत्रीस्मरणपूर्वकजलाञ्जलिप्रक्षेपन्यायेने"त्यनुगृहीतं सङ्गच्छते । तदुक्तम् - "मन्त्रप्रोक्षणमन्त्राचमन पुनःप्रोक्षणस्वात्मपरिषेचनानि स्वसूत्रसंहितोक्तप्रकारेण कृत्वा गायत्र्याभिमन्त्रितं जलमादित्यान्तः स्थिताय परमात्मनेऽर्घ्यरूपं दद्यात् । अत्र जलाञ्जलिप्रक्षेपस्त्रिरिति सनत्कुमाराय पितामहः प्राह - 'उभाभ्यां तोयमादाय हस्ताभ्यां सुसमाहितः । गायत्र्या चाभिमन्त्र्यापस्तार व्याहृतिपूर्वया । रवेरभिमुखस्तिष्ठन्नूर्ध्वं त्रिस्सन्ध्ययोः क्षिपेत् ।' ततो वज्रीभूत-तज्जलनिहतमन्देहाख्यरक्षोनिरसनपाप्मावधूननार्थं प्रदक्षिणं प्रक्रम्य मार्गशीर्षादिमासेशान् तत्तन्मन्त्रेण तर्पयित्वा" इति । अत्र मन्त्रप्रोक्षणेत्याद्याचार्यपाद श्रीसूक्ति यथावस्थितार्थः मन्त्रप्रोक्षणादि-

ऋषिर्ब्रह्मा। देवी गायत्री छन्दः परमात्मा देवता। भूरादि-सप्तव्याहृतीनां अत्रिभृगुकुत्सवसिष्ठगौतमकाश्यपाङ्गिरस ऋषयः । गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्ति त्रिष्टुब्जगत्य-श्छन्दांसि अग्निवाय्वर्कवागीशवरुणेन्द्र विश्वेदेवा देवताः। सावित्र्या ऋषिर्विश्वामित्रः। देवी गायत्री छन्दः। सविता देवता । गायत्री शिरसो ब्रह्मा ऋषिः । अनुष्टुप्छन्दः। परमात्मा देवता। सर्वेषां प्राणायामे विनियोगः। ओं भूः (पादयोः) ओं भुवः (जङ्घयोः) ओं सुवः (जान्वोः)

कमष्टाक्षरा संपुटिततत्तन्मन्त्रकरणकमेव कार्यमिति च सत्पथरक्षायां न्यदर्श्यस्माभिः।

अथ जपस्थानादिकमाह - विष्ण्वालयादिजपस्थान इति । योगयाज्ञवल्क्यः - ''गृहे त्वेकगुणं प्रोक्तं नद्यादौ द्विगुणं भवेत्। गवां गोष्ठे दशगुणमग्न्यगारे शताधिकम् । सिद्धिक्षेत्रेषु तीर्थेषु देवतायाश्च सन्निधौ । सहस्रशतकोटिस्स्यादनन्तं विष्णुसन्निधौ'' । यमः - ''उपास्य सन्ध्यां पूर्वान्तु शुचौ देशेऽवलोकिते। दर्भास्तृते शुचिस्तिष्ठन् प्राणायामत्रयं चरेत्।'' इति रत्नाकरस्थवचनान्यत्र ग्राह्याणि।

प्रणवादीनां ऋष्यादिकं प्रतिपादयति - प्रणवत्येत्यादिना । ऋष्यादिकमाह भरद्वाजः - ''प्रणवस्य ऋषिर्ब्रह्मा परमात्मा च देवता। छन्दश्च देवी गायत्री विनियोगः क्रियावशः ।'' अत्र ब्रह्मा - ''अत्रिर्भृगुश्च कुत्सश्च वसिष्ठो गौतमस्तथा । काश्यपोऽङ्गिरसश्चैव ऋषयस्स्युर्यथाक्रमम् । गायत्र्युष्णिगनुष्टुप्च बृहती पङ्क्तिरेव च । त्रिष्णुप्च जगती चैव छंदांस्येस्तानि सप्त वै । अग्निर्वायुस्तथार्कश्च

ओं महः (उदरे) ओ जनः (कण्ठे-हृदये) ओं तपः (मुखे) ओ३ सत्यं (मस्तके) न्यसेत्। श्वेतश्यामपीतपिशङ्गरोहित नीलकनकवर्णाः अभयाक्षस्रगप्पात्रवरहस्ताः सपवित्रचतुर्हस्ताः स्रक्चन्दनाद्यलङ्कृताः सर्वाभरणभूषिताः सोपवीताः सजटाः ध्यात्वा, ओं तत्सवितुः ज्ञानाय हृदयाय नमः। वरेण्यं ऐश्वर्याय शिरसे स्वाहा। भर्गो देवस्य शक्त्यै शिखायै वौषट्। धीमहि बलाय कवचाय हुम्। धियो यो नः तेजसे नेत्राभ्यां वौषट्। प्रचोदयात् वीर्यायास्त्राय-फडिति न्यासः। ध्यानम्। मुक्ताविद्रुम हेम

वागीशो वरुणस्तथा। इन्द्रश्च विश्वे देवाश्च देवतास्समुदाहृताः। ब्राह्मी स्वाहा वाहिनी च तथा नित्या विलासिनी। प्रभावनी च लोला च - सप्तव्याहृतिशक्तयः। पीतं श्यामं पिशङ्गञ्च नीलं लोहितमेव च। नीलं कनकवर्णं च वर्णान्येतान्यनुक्रमात्। प्रणवस्यैतयोर्वर्णः शुद्धस्फटिकसन्निभः। तत्वमेषां त्रयाणान्तु सर्वं तत्वमिति स्मृतम्। इत्येवमुक्त्वा नत्वा च प्राणायामान् समाचरेत्।'' एतयोर्गायत्रीशिरसोः ''विश्वामित्रस्तु गायत्र्या ऋषिश्छन्दः स्वयं स्मृतः। सविता देवता चैव ब्रह्मा शिर इति स्मृतः। अनुष्टुप्चैव छन्दस्स्यात्परमात्मा च देवता। प्राणायामप्रयोगे तु विनियोग उदाहृतः। न्यासमाह स एव— ''पादयोर्जङ्घयो र्जान्वो स्तथोर्वोर्जठरेऽपि च। मुखे चैव तथा मूर्ध्नि क्रमेण व्याहृतीर्न्यसेत्। हृदि तत्सवितुर्न्यस्य न्यसेन्मूर्ध्नि वरेणियम्। भर्गो देवस्येति पदं शिखायां तु ततो न्यसेत्। धीमहीति न्यसेद्वर्म धियो योनश्च नेत्रयोः। प्रचोदयादिति पदमस्त्रार्थे विनियुज्यते। शिरोन्यासस्तु सर्वाङ्गे प्राणायामपरो न्यसेत्।'' सप्तव्याहृति ध्यानम्—

नीलधवलच्छायैर्मुखै स्त्रीक्षणैर्युक्तामिन्दुकलानिबद्धमकुटां तत्वार्थ वर्णात्मिकाम् । गायत्रीं वरदाभयांकुशकशाश्शुभ्रं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे । इति ध्यात्वा ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोमिति शिरोमन्त्रेण कराभ्यां शिरः प्रभृति पादान्तं व्यापकन्यासं कृत्वा । अर्कमण्डलमध्यस्थं सूर्यकोटिसमप्रभम् । ब्रह्मादिसेव्यपादाब्जं नौमि ब्रह्म रमासखम् ।

''स्वस्वोक्तवर्णतनवः रूपयौवनसंयुताः । क्षौमवस्त्रपरीधानास्सर्वाभरणभूषिताः । दिव्यचन्दनलिप्ताङ्गा दिव्यमाल्यैरलङ्कृताः । सितोपवीतहृदयाः सपवित्रचतुष्कराः । उन्निद्रवदनां भोजप्रभामण्डलमण्डिताः । जटाकलापपूर्णेन्दुप्रभापूरितदिङ्मुखाः । अभयाक्षस्रगप्पात्रवरहस्त-सरोरुहाः । एवं होमजपारंभे ध्येया व्याहृतयो द्विजैः । ध्यानम् — मुक्ताविद्रुम हेमनीलधवलच्छायैर्मुखैस्त्रीक्षणैर्युक्तामिन्दुकलानिबद्ध मकुटां तत्वार्थवर्णात्मिकाम् । गायत्रीं वरदाभयाङ्कुशकशाः शुभ्रं कपालं गुणं शङ्खं चक्रमथारविन्दयुगलं हस्तैर्वहन्तीं भजे । इति रत्नाकरस्थवचनानीह चिन्तनीयानि ।

यत्तु— भरद्वाजः ''समाहितमनाः प्राणानायम्यैव तदाकृतिम् । जपित्वैव दशकृत्वः प्राग्गायत्रीं ततो जपेत् ।'' स्मृत्यन्तरे 'सप्तव्याहृतिसंयुक्तां गायत्रीं शिरसा सह । दशवारं जपित्वैव गायत्रीं तु ततो जपेत् । इति रत्नाकरे दीर्घगायत्री जपः कार्य इत्युक्तम्; तत्केवलधर्मशास्त्रविहितानुष्ठान श्रद्धाविजृम्भितम्; न तु नाथयामुनपूर्णभाष्यकारशिष्यप्रशिष्य ग्रन्धानुसार्याचार्यपाद श्रीसूक्त्यनुगुणम्, तत्सम्प्रदायस्थानुष्ठानानुगुणं च । तदुक्तं ''स व्याहृतिं सप्रणवां गायत्रीं

शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामस्स उच्यते । इत्युक्त प्रकारेण प्राणायामत्रयं कृत्वा गायत्रीमावाह्याष्टोत्तरसहस्र''मित्यादि ''दिगादिनमस्काराणामपि स्वपूर्वपूर्वोपदेशानुष्ठानपारम्पर्यमस्ति चेत् तत्रापि भगवदात्मकत्वध्यानपूर्वकं प्रणमेत्'' इति। दिगादिनमस्कारेषु अनुष्ठानपारम्पर्यसद्भाववचनमस्ति, दीर्घगायत्रीजपे तन्नास्ति । ''स्वसूत्रविहितान्वापि निषेकादीन् समाचरेत्'' इति नारदीयवचनानुसारेण 'स्वसूत्रविहितमेव सन्ध्योपासनादिकं कर्तुमुचितं' इति सौत्रसन्ध्योपासनानुष्ठानमनुगृहीतम् । गायत्रीजपविषये ''प्राणायामेन शतकृत्वः'' इत्यादि ''बोधायनादयः स्मरन्ति'' इति बोधायनसूत्रोदितग्राह्यत्वमनुगृहीतम्। ''स्वसूत्रे विद्यमानेऽपि परसूत्रेण वर्तते । बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेत् ।'' इति रत्नाकरस्थवृद्धमनुवचनेन आपस्तम्बानुक्तसन्ध्योपासनं तत्सूत्रनिष्ठस्य बोधायनोक्तमेव ग्राह्यमित्यवगम्यते । बोधायनीये ''दर्भेष्वासीनो दर्भान् धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखस्सावित्रीं सहस्रकृत्वः आवर्तये''दित्यारभ्य ''त्रिभिश्च प्राणायामैस्तां ततो ब्रह्महृदयेन वारुणीभ्यां रात्रिमुपतिष्ठते'' इत्यादिना, एवमेव ''प्रातः प्राङ्मुखस्तिष्ठन् मैत्रीभ्यामहरुपतिष्ठत'' इत्यादिना च सायं प्रातस्सन्ध्ययोः गायत्रीजपोपस्थानतन्मन्त्रा एव विहिताः, न तु दीर्घगायत्रीजपः । माध्याह्निकसन्ध्योपास्तावपि एवमेवोक्तम् । भगवद्गुणदर्पणे ''युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषते''त्येतद्व्याख्याने ''सन्तोह्याचार्य निष्ठामन्विष्य तद्रुचिपरिगृहीतमेव तत्वं हितं च रोचयन्ते। न तु प्रामाणिकत्वमात्रेण'' इति प्रामाणिकस्याप्याचार्यापरिगृहीतस्य सद्भिरग्राह्यत्वमुक्तम् । अतः परमैकान्तिषु दीर्घगायत्रीजपस्य नावकाशः ।

इत्युक्त्वा त्रिःप्राणानायम्य । अष्टोत्तरसहस्रमष्टोत्तरशतं दशवारं ओदयाद्वा गायत्रीजपं करिष्य इति सङ्कल्प्य, आयात्वित्यनुवाकस्य वामदेव ऋषिः । अनुष्टुप्छन्दः । गायत्रीदेवता । गायत्र्यावाहने विनियोगः । रविमण्डले

केवलधर्मशास्त्रोक्त श्रद्धावन्तः श्रीदेशिकसूक्तिविश्वासहीनाः दीर्घगायत्रीजपमनुतिष्ठन्तु नाम।

अथ गायत्रीजपसङ्कल्पमाह - अष्टोत्तरसहस्रमित्यादिना । ''प्राणायामत्रयं कृत्वा गायत्रीमावाह्ये''त्याचार्यपाद श्रीसूक्तौ जपसङ्कल्पाकथनेऽपि, उपस्थाने ''पूर्ववत्कृतप्राणायामत्रयः सन्ध्योपस्थानसङ्कल्पपूर्वक''मित्युक्तरीत्या गायत्रीजपसङ्कल्पोऽपि तदभिमत इत्यभिप्रायेण तदुक्तिः । भरद्वाजः ''अष्टोत्तरसहस्रं वा शतमष्टोत्तरन्तु वा । जप्त्वाष्टाविंशतिर्वापि बीजशक्तिक्रमाज्जपेत् । सहस्रपरमां देवीं शतमध्यां दशावराम्'' । यत्तु - रत्नाकरे योगयाज्ञवल्क्यः ''ब्रह्मचार्याहिताग्निश्च शतमष्टोत्तरं जपेत् । वानप्रस्थो यतिश्चैव सहस्रादधिकं जपेत् ।'' तयोरनग्निकत्वेन होमकालानतिपत्तेरिति भावः । आहिताग्नि ग्रहणं एकाग्नेरप्युपलक्षणं तस्याप्युदयादनन्तरं होमविधानात्'' इत्युक्तम् । तन्न चारु; आचार्यपादैस्सर्वाश्रमिसाधारण्येनाष्टोत्तर सहस्रमित्याद्यभिधानात्, आहिताग्निषु सहस्रावृत्तिनिषेधाङ्गीकारेऽपि एकाग्नेः होमकालस्य षट् घटिकात्मकप्रातः कालरूपतया सहस्रजपानन्तरमपि होमस्य कर्तुं शक्यत्वात्, गृहस्थशिष्टेषु सहस्र संख्याकगयात्रीजपानुष्ठानदर्शनाच्च । एतद्विस्तरः श्रीनिक्षेपचिन्तामणावनुसन्धेयः । आयात्वित्यनुवाकस्येत्यादि । भरद्वाजः ''आयात्वित्यनुवाकेन त्वावाह्य तु यथाविधि । गायत्रीं विमलां देवीं हृदि

हृत्पद्मे वा रत्नसिंहासने "आयातु वरदा देव्यक्षरं ब्रह्मसम्मितम्। गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व नः। ओजोसि सहोसि बलमसि भ्राजोसि देवानां धाम नामासि विश्वमसि विश्वायुस्सर्वमसि सर्वायुरभिभूरों गायत्री मावाहयामि" इत्यनुवाकेनावाह्य । "प्रातर्ध्यायामि गायत्रीं रविमण्डलमध्यगाम्। ऋग्वेद-मुच्चारयन्तीं रक्तवर्णां कुमारिकाम् । अक्षमालाकरां ब्रह्मदैवत्यां हंसवाहनाम् । मध्यन्दिने तु सावित्रीं रविमण्डल-मध्यगाम्। यजुर्वेदं व्याहरन्तीं श्वेतां शूलकरां शिवाम्। युवतीं रुद्रदेवत्यां ध्यायामि वृषवाहनाम्। सायं सरस्वतीं श्यामां रविमण्डलमध्यगाम् । सामदेवं व्याहरन्तीं चक्रायुधधरां शुभाम्। ध्यायामि विष्णुदैवत्यां

वा सूर्यमण्डले । देवीमावाह्य गायत्रीं ततो ध्यायेद्द्विजोत्तमः" पितामहः "आयात्वित्यनुवाकस्य वामदेव ऋषिः स्मृतः। अनुष्टुब्जगती छन्दो गायत्री देवता देवता स्मृता । गायत्रीं विमलां देवीं हृदि वा सूर्यमण्डले । ध्यानयोगेन सम्पश्येत् वर्णरूपसमन्विताम् ।" योग याज्ञवल्क्यः - प्रातः काले तु गायत्री सायङ्काले सरस्वती। मध्यन्दिनेतु सावित्री उपास्या नामभेदतः । गायत्री तु भवेद्रक्ता सावित्री शुद्धविग्रहा। सरस्वती कृष्णरूपा उपास्या रूपभेदतः । गायत्री ब्रह्मरूपा तु सावित्री रुद्ररूपिणी । सरस्वती विष्णुरूपा उपास्या रूपभेदतः। उदये ब्रह्मरूपन्तु मध्याह्ने तु महेश्वरम्। सायाह्ने विष्णुरूपन्तु त्रिरूपं चैवमुच्यते । नभिन्नां प्रतिपाद्येत गायत्रीं ब्रह्मणा सह । साहमस्मीत्युपासीत विधिना येन केनचित् ।" इति

वृद्धाङ्गरुडवाहनाम् ।'' एवं ध्यात्वा आसनादिषोडशोपचारान्मनसा प्रणवेन समर्प्य । प्रणवस्य ऋषिर्ब्रह्मा । देवीगायत्री छन्दः । परमात्मा देवता । भूरादिव्याहृतित्रयस्यात्रिभृगुकुत्सा ऋषयः गायत्रत्युष्णिगनुष्टुप्छन्दांसि । अग्निवाय्वर्का देवताः । सावित्र्या ऋषिर्विश्वामित्रः । देवीगायत्री छन्दः । सविता देवता । प्रातस्सन्ध्याजपे विनियोग इत्युक्त्वा । अस्त्रमन्त्रेण करतलकरपृष्ठयोश्शुद्धिं कृत्वा, प्रणवेन प्रकोष्ठान्तं करद्वयेऽपि तलयोः पृष्ठयोः पर्यायेण परामृश्य, करतलयोः प्रणवं न्यस्य । ओं भूः । ओं भुवः । ओं सुवः । ओं तत्सवितुर्वरेण्यम् । ओं भर्गोदेवस्य धीमहि ।

रत्नाकरस्थवचनान्यत्रानुसन्धेयानि । 'गायत्रीकल्पानान्तु लक्ष्मीविभूतिभूताया एव गायत्र्याख्यायाः देवतायाः सन्ध्याभेदेन वैष्णव्यादि समाख्यानुगुण वाहनरूपादि परिग्रहशक्त्या माहात्म्यवर्णने तात्पर्यं तत्र तत्र सुव्यक्त'मिति श्री चतुःश्लोकीभाष्येऽनुगृहीतत्वात्, सन्ध्याभेदेन नामरूपवाहनसमाख्या-विशेषविशिष्टगायत्री शरीरकपरमात्मध्यानं पारमैकान्त्याविरुद्धमेव । आसनादिषोडशोपचारान्मनसा समर्प्येति 'हैमे सिह्मासने देवीं स्थितां ध्यायेद् द्विजोत्तमः । पद्मपीठेऽथवा व्यूढे नानारत्नविभूषिते । पद्मासनेऽथवा सौम्ये तथा ध्यायेत् स्वचेतसा । पाद्यमाचमनं चार्घ्यं वस्त्रं यज्ञोपवीतकम् । चन्दनश्चाक्षतं पुष्पं धूपदीपौ निवेद्यकम् । करानुलेपं ताम्बूलं दत्वाऽथो जपमाचरेत् । प्रदक्षिणप्रणामांश्च यथाशक्त्यपि कारयेत् ।'' इति रत्नाकरस्थवचनान्यत्र द्रष्टव्यानि । अत्र भरद्वाजः - ''प्रकोष्ठान्तं बहिः पाण्योस्तलयोस्तल

ओं धियो यो नः प्रचोदयात् । इति करन्यासं कृत्वा तथैवाङ्गन्यासञ्च कुर्यात् । विस्तृतन्यासादिकमन्यत्र द्रष्टव्यम् । यो देवस्सवितास्माकं धियो धर्मादिगोचराः । प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे । इति गायत्र्यर्थं

पृष्ठयोः । तलयोर्मध्यमे विप्रः केवलं प्रणवं न्यसेत् ।'' व्यासः - ''भूरङ्गुष्ठद्वये न्यस्य भुवस्तर्जनिकाद्वये। ज्येष्ठाङ्गुलिद्वये धीमान् न्यसेत्तत्पदमग्रतः । कनिष्ठिकाद्वये भर्गः पाण्योर्मध्ये धियः पदम् । करन्यासविधिं कृत्वाऽङ्गन्यासं समाचरेत् । भूः पदं हृदि विन्यस्य भुवश्शिरसि विन्यसेत् । शिखायां स्वपदं न्यस्य कवचे तत्पदं न्यसेत् ।'' अक्ष्णोः भर्गः पदं न्यस्य न्यसेद्दिक्षु धियः पदम् । भरद्वाजः - ''हृन्मस्तकशिखागात्रनेत्रप्रहरणानि षट् । हृन्मन्त्रं हृदये कान्ते शिरोमन्त्रं शिखामनुम् । शिखायां कवचं देहे दृक्फालेषु च दृङ्मनुम् । पार्श्वयोर्दशदिक्ष्वस्त्रमन्त्रं कुर्याद्यथाक्रमम् । अङ्गुलीभिश्चतसृभिः द्वयोर्हृदयशीर्षयोः । मुष्टेरङ्गुष्ठशिरसा पश्चिमे तस्य वर्णतः । बहिः कराभ्यां दृक्फालमध्ये मध्याङ्गुलैस्त्रिभिः । अङ्गुष्ठतर्जन्यग्राभ्यां सशब्दं दिक्षु पार्श्वयोः । षडङ्गं न्यासमित्युक्तमिदमेतत् प्रचोदितम् । एवं विन्यस्य गायत्रीमावाह्य च यथाविधि । ध्यात्वोपचारं सकलं कृत्वाथो जपमाचरेत् ।'' एवं षडङ्गन्यासमित्युक्त्वा, अनन्तरं जपविधानात् नित्यजपे पुनरेतावदेव कार्यमिति गम्यते । फलाधिक्यापेक्षायां शक्तस्याक्षरन्यासादयः कार्याः'' इति रत्नाकरोक्तमिहानुसन्धेयम् । गायत्री प्रतिपाद्यदेवताध्यानमाह - यो देवेत्यादिना।, 'अत्र विश्वामित्रः - 'देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात् । भर्गो वरेण्यं तत् ब्रह्म धीमहीत्यर्थ उच्यते । यो देवस्सविताऽस्माकं धियो धर्मादिगोचराः ।

प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे । अनयोर्वचनयोर्भर्गशब्दस्य तेजःपरत्वेन यच्छब्दस्य सवितृपरत्वेन च व्याख्यानं कृतं वरदराजीये - तच्छब्द श्रुतेर्यच्छब्दोऽध्याहर्तव्यः । सवितुः जगतां प्रसवितुः, 'सविता वै प्रसवानामीशो उतेशिषे प्रसवस्यत्वमेक' इति श्रुतेः । वरेण्यं वृङ् संभक्तौ एण्यप्रत्ययः । सर्वेषां भजनीयं भर्गः तेजः । भञ्जनाद्भर्गः, प्रकाश प्रदानेन जगतो बाह्यान्तरतमोभञ्जकत्वाद्वा, भर्जनाद्वा कालात्मकतया सकलकर्मफलपाकहेतुत्वात्, भरणाद्वा वृष्टिप्रदानेन भूतानां भरणहेतुत्वात् । देवस्य द्योतमानस्य धीमहि चिन्तयामः । ''ध्यै चिन्तायाम्'' देवस्य सवितुः वरेण्यं यद्भर्गः तत् ध्यायेम । आदित्यमण्डलान्तर्वर्तिनं तेजोमयं पुरुषमनुचिन्तयामः । ''य एषोऽन्तरादित्ये हिरण्मयः पुरुषः, अथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषः'' इत्यादि श्रुतेः । यः सविता, नः अस्माकं, धियः हानोपादानविषयज्ञानानि, प्रचोदयात् प्रचोदयति, तत्सवितुः भर्गश्चिन्तयाम इति । विश्वामित्रः - आदित्यमण्डलासीनं रुक्माभं पुरुषं परम् । ध्यायञ्जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात् । सुप्रभं सत्यमानन्दं हृदये मण्डलेऽपि च । ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात् । ''स यश्चायं पुरुषे यश्चासावादित्ये स एकः'' इति ध्यानार्थः इति । अत्र जगत्कारणभूतं परं ब्रह्म सर्वान्तर्यामी सूर्यमण्डलान्तर्वर्ती तेजोमयः पुरुष इति व्याख्यातम् । स तु परुषः पुण्डरीकाक्ष एव ''य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात् सर्व एव सुवर्णः तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी'' इति श्रुतेः । कं जलं पिबतीति कपिः, सूर्यः तेन आस्यते विकास्यत इति कप्यासं रविकरविकसितमित्यर्थः ।

विचिन्त्य "आदित्यमण्डले ध्यायेत्परमात्मानमव्ययम्। विष्णुं चतुर्भुजं रत्नपङ्कजासनमध्यगम् । किरीटहारकेयूरकटकादिविभूषितम्। श्रीवत्सवनमालाश्री तुलसीकौस्तुभोज्ज्वलम्। हरिं पीताम्बरधरं शङ्खचक्रगदाधरम्। प्रसन्नवदनं रत्नकुण्डलैर्मण्डिताननम् । सर्वरत्नसमायुक्तं सर्वाभरणभूषितम् । एवं ध्यात्वा जपेन्नित्यं मन्त्रमष्टोत्तरं शतम् ।" इत्युक्तप्रकारेण

अन्तर्यामिपुरुषो नारायण एव "एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायणः" इति श्रुतेः । एवं च सवितृमण्डलान्तर्वर्ति पुण्डरीकाक्षं सकलजगदाधारं विष्णुसंज्ञं यद्भर्गस्तेजः तत्तेजश्चिन्तयाम इति सिद्धम् । अत्र मैत्रावरुणीय श्रुतिः "एतत्सवितुर्वरेण्यं ध्रुवमचलममृतं भर्गाख्यं विष्णुसंज्ञं सर्वाधारं धामेति। योगयाज्ञवल्क्यः — "ईश्वरं पुरुषाख्यं च सत्यधर्माण मच्युतम्। भर्गाख्यं विष्णुसंज्ञं यत् ध्यात्वामृतमुपाश्नुते । अनेन धीमहीति ध्यानविषयभूतो विष्णुरेवेति सिद्धम् । अत एव सनत्कुमारस्मृतौ ध्येयो विष्णुरेवेति निश्चितम् । आदित्यमण्डले ध्यायेत्परमात्मानमव्यय" मित्यादि । एवं ध्यात्वा जपेन्नित्यं मन्त्रमष्टोत्तरं शतम् । सर्वपापविशुद्धात्मा जितक्रोधो जितेन्द्रियः । संसारार्णवमुत्तीर्य परां सिद्धिमवाप्नुयात् ।" इत्येवं गायत्र्याः देवतात्वेन आदित्यमण्डलान्तर्वर्ति पुरुषोत्तमस्यैव ध्येयत्वावधारणात् अस्याः देवतान्तरत्वाशाभिक्षोः राज्ञः किरीटाशेव दुराशैव। अत्र भरद्वाजः "अथाहमर्थं गायत्र्याः प्रवक्ष्यामि यथा तथा। द्विजोत्तमानां सद्भक्त्या जपादीति प्रकुर्वताम् । विश्वासभक्ति-

जननमन्त्रार्थज्ञानमुत्तमम् । तस्मादर्थं विजानीयादुक्तेन जपकृन्नरः । विश्वासभक्तिभ्यां द्वाभ्यां जपादीनां महत्तरम् । फलं भवेज्जपकृतामिति वेदेषु भाषितम् । वृद्धयमस्मृतौ तृतीयाध्याये - ''वरेण्यं विरलं जप्यं जपकाले द्विजोत्तमैः । वरेण्यं संहिताकाले वरेणीयं जपे स्मृतम् । वरेण्यमिति यो ब्रूयाज्जपकाले द्विजो यदि । स च पाप्मा महाघोरे नरके पच्यतेऽग्निना । स्त्रीपुंसात्मकगायत्रीं वस्त्रेणाच्छाद्य वै जपेत् । उदये प्राङ्मुखस्तिष्ठन् संख्यायैव जपेद्बुधः । असंख्ययाऽपवित्रश्च जपो निष्फलतामियात् ।' इति वचनान्यत्र भाव्यानि'' । न च ''असंख्यातात्तु संख्यातः सहस्रगुण ईरितः'' इति वचनेन असंख्यातस्यापि साफल्यप्रतीतेः कथं तन्निषेध इति वाच्यं, वचनद्वयपर्यालोचने साफल्यं भवेन्नवेतीत्यर्थनिश्चयात् । यथा ''आहृत्य याच्ञया तैर्वा, अधमं तु क्रयक्रीतं याचितं त्वधमाधमम्' इति याचित कुसुमादेरभ्यनुज्ञानेऽपि ''प्रतिग्रहपुष्पे दातुरेव फलं, कर्तुः किञ्चिद्भवेन्नवे''ति श्रीपाञ्चरात्ररक्षायामनुगृहीतं तद्वत् । ''पदानि दश मन्त्रस्य तदादीनि यथाक्रमम् । पदप्रत्ययनिष्पत्तिः सुस्पष्टं क्रियतेऽत्रतु । एषा हि स्तोतुर्गायत्री सर्वपापप्रणाशिनी । विज्ञातव्या प्रयत्नेन द्विजैस्सर्वशुभेप्सुभिः । जपस्यानन्तरे व्याख्या स्मर्तव्याऽहरहर्द्विजैः । स्मरणात्सर्वपापानि प्रणश्यन्ति न संशयः ।' इत्यादि रत्नाकर वाक्यजातमत्रानुसन्धेयम् । ''प्रतिपुरुषमनेकाः प्रत्यवस्थं विचित्रा-श्शुभगतिषु धियो न श्चोदयत्यञ्जसा नः । अखिलचिदचिदन्तर्यामि तद्विष्णुसंज्ञं सवितुरहमुपासे तस्य देवस्य भर्गः । तेजः परं तत्सवितुर्वरेण्यं धाम्ना परेणाप्रणखात्सुवर्णम् । त्वां पुण्डरीकेक्षणमामनन्ति श्रीरङ्गनाथं समुपासिषीया ।'' इति श्रीशतदूषणी श्रीरङ्गराजस्तवश्लोकावत्र भाव्यौ ।

अहिर्बुध्न्यसंहितायान्तु — ''सावित्रं नाम तज्ज्योतिः तत्सावित्री-समाह्वयम्। तस्य व्याख्यामिमां सम्यग्गदतो मे निशामय । प्रतिसञ्चरवेलायां तामयत्येव तां पुनः । त्रायते तत्र तत्रैव भूत्यंशे धारकात्मना । प्रमाणत्वेन भूयश्च तत्तदर्थतया पुनः । अतस्तदिति सङ्कल्पः प्रोच्यते वैष्णवः परः । प्रसौति सकलां चेष्टां प्रसौति सकलं जगत्। अवतेर्गतिकान्त्यर्थात्तरतेर्दानकर्मणः । गतो ह्यवति सर्वत्र षड्भिः कान्तो गुणैः परम्। भोगापवर्गयोर्दाता सवितेति निरुच्यते। वरैर्नेयं वरेण्यन्तु वरदातार ईरिताः । वरेणियं वरेण्यं वा वरं नयति तत्परम्। भर्गस्तेजस्समाख्यातं प्रभावः कर्तृरूपता। भरतीदं जगत्कृत्स्नं संभरत्यपि चेश्वरान् । रमयत्यपि तत्सर्वं राति चार्थमभीप्सितम् । गमयत्यपि तन्नाशं स्मृतिबन्धमशेषतः । भर्गयत्यपि तत्कष्टं भर्गतस्तेन तत्तथा । अतो भर्गः परं विष्णोः सङ्कल्पं विदुरद्भुतम् । द्योतनस्सर्वभावानां द्योतमानः स्वयं सदा । अज्ञानमखिलं चान्यच्चोदयन्नखिलञ्जगत्। अयं सकलमेवेदं तथोतं मणिसूत्रवत्। इन ईरण ईभ्यश्च परितस्सकलं दधत्। देव इत्युच्यते विष्णुः परमात्मा सनातनः । धीमहीत्यधिविज्ञानं मननं भावनं तथा । धियो धीपूर्विकाश्चेष्टाः प्रेरणन्तु प्रचोदनम् । यस्सर्वशक्तिस्सविता देवस्संविन्मयश्च यः । यश्च सर्वदिगीशानो धियस्तास्ताः प्रचोदयात्। सृष्टिस्थितिलयत्राण त्रिधा करणमव्ययम् । तस्य देवस्य सङ्कल्पं भर्गसंज्ञमुपास्महे। गायतस्त्रायमाणायाः गायत्र्या अर्थ ईदृशः। या सत्ता सर्वभूतानां विष्णुशक्तिः परावरा । सा भूरिति समाख्याता भरतीदं जगत्स्वयम्। भू(त)त्वा शक्तिं समास्थाय यावतीदं जगत्स्वयम्। सा भुवः कथिता सद्भिरवती भावितं जगत्। वसीयो भोगमोक्षाख्यं सूते या

सततं सताम्। सा सुवः कथिता ब्रह्मन् व्याहृती वाङ्मयी ततः।'' इति गायत्री व्याहृत्यर्थाः प्रदर्शिता अनुसन्धेयाः । यदन्योक्तम् — गायत्र्याश्शास्त्रसिद्धमेव देवताद्वयं, एका तु मन्त्राभिमानिनी, अन्या तु प्रतिपाद्या ''आदित्यमण्डलासीनं रुक्माभं परुषं परम् । ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात् ।'' इत्यादिभिः रत्नाकरस्थवचनैरादित्यमण्डलान्तःस्थभगवत एव निष्कामध्ये यतोक्तेः, गायत्रीरूप मन्त्राभिमानि देवताध्यानस्य सकामविषयत्वं सिद्धमिति कालत्रयेऽपि नास्या ध्यानम् — इति । तदयुक्तं; पूर्वोदाहृतगायत्री देवताध्यानोपचारबोधकवचनेषु फलाश्रुतेः नित्यत्वावश्यम्भावेन पूर्वोदाहृत श्रीचतुःश्लोकी सूक्त्या च ''स प्रदक्षिणं भगवदात्मकसन्ध्यादिपञ्चक नमस्कारं कृत्वे'त्याचार्य पादानुगृहीत सन्ध्यादिनमस्कारवत्तस्याः कालत्रयेऽप्यवश्यध्येयत्वोक्तेः, वासिष्ठ संहितायां 'आवाह्य हृदये सूर्यबिम्बे वा वेदमातरम्। ततोऽभिवादयेद्देवीं गायत्रीं वेदमातरम्'' इति गायत्रीमन्त्राभिमानिदेवतावाहन नमस्कारोक्तेः, श्रीकृतकृत्य साध्योपाय शोधनचरमश्लोकाधि-कारादिबहु प्रबन्धेष्वनुगृहीतप्रकारेण मन्त्राभिमानिदेवताशरीरक-परमात्मध्यानविधौ पर्यवसानेन तद्ध्याने पारमैकान्त्य-विरोधाभावात्।'' ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात्'' इति वचने ध्यायन् जपेदिति जपाङ्गतया ध्यानं विधाय निष्कामकर्तृकध्यानपूर्वकजपस्य मुक्तिरूपं फलमुच्यमानं सकाम-कर्तृकध्यानस्य तत्तत्फलप्राप्तिं प्रमाणान्तरसिद्धामवगमयति, न तु मन्त्रप्रतिपाद्यदेवताध्यानस्य निष्काममात्रकर्तव्यत्वम्। श्री चतुःश्लोकीभाष्ये ''लक्ष्मी विभूतिभूतयाया एव गायत्र्याख्याया

भगवन्तमादित्यमण्डले ध्यात्वा, कनिष्ठामूलमारभ्य

देवतायाः'' इत्यनुगृहीतत्वात्, श्री पाञ्चरात्ररक्षायां ''प्राणायामत्रयं कृत्वा गायत्रीमावाह्ये''ति, ''पूर्ववत्कृतप्राणायामत्रयः उत्तमे शिखरे इति मन्त्रेण गायत्रीमनुज्ञाप्य स्वसूत्रोक्तैर्मन्त्रैरादित्यमण्डलान्तःस्थितं भगवन्तमुपस्थाये''ति श्री सूक्तिभिः भगवद्विभूतिभूतगायत्र्याख्य-देवतावाहनोपस्थानयोः गायत्रीप्रतिपाद्यादित्यमण्डलान्तः स्थित-भगवदुपस्थानस्य च पृथक् प्रतीतेः, श्रीरङ्गरामानुज महादेशिकैः गायत्र्यावाहनोपस्थानमन्त्रयोर्मन्त्राभिमानिदेवतापरतयैव व्याख्या-तत्वाच्च, शास्त्रसम्प्रदायसिद्धस्य देवताद्वय ध्यानस्य दुस्त्यजत्वात् ।। एतेनापरोक्तो मन्त्रप्रतिपाद्यदेवतामात्रध्यानपक्षो निरस्तः ।

जपकाले मन्त्रगणनाप्रकारमाह — कनिष्ठामूलेत्यादिना । तदुक्तं ''गणनायां च कराक्षसूत्रयोर्यथाशक्ति विकल्पतः करणत्वम् । उक्तं च जयाख्यसंहितायां, जपन्तु द्विविधं कुर्यादक्षसूत्रकरार्पितम् ।' अक्षसूत्रार्पितं करार्पितं वा इत्यर्थः । तदेव च विशेषितं श्री सात्वते — 'स्फाटिकेनाक्षसूत्रेण स्वकैर्वा करपर्वभिः' इति । स्फाटिकेनेत्यक्ष-मालावर्गोदाहरणं, शास्त्रान्तरे पद्माक्षमालादीनामाधिक्य-स्मरणात् । फलविशेषार्थं तु मणिमुक्तामयाद्यक्षमालाभेदाः । प्रतिष्ठाविशेषादि-नियमाश्च तत्र तत्र प्रपञ्च्यन्ते, करेऽपि शङ्खपद्मादिमुद्राभेदाश्च । तत्रैष सारः ''कनिष्ठामूलमारभ्य प्रादक्षिण्यक्रमेण तु । अनामिकान्तं देवेश जपेत् कोटिसहस्रकम् ।।' इति । बोधायनीये तु श्रीमदष्टाक्षर-विधावेवमुक्तम्— 'क्रियायागाच्छत गुणो जपयज्ञः प्रकीर्तितः । उच्चाच्छतगुणो ज्ञेयः उपांशुश्चेत्स्मृतस्सदा । उपांशोर्मानसः प्रोक्तः सहस्रं गुणतोऽधिकः ।' इति । अन्यदपि तत्रोक्तम्— 'जपमध्ये

प्रादक्षिण्य-क्रमेण गणनया यथासङ्कल्पं धर्मशास्त्रोक्त-नियमेन *पञ्चावसानजपं कृत्वा, त्रिः प्राणानायम्य ।

गुरुर्वापि वैष्णवो यस्समागतः । सम्भाषणादिपूजान्तु तस्य कृत्वानुमान्य च । अनुज्ञाप्य ततः कृत्वा जपशेषं समाहितः । सर्वस्य प्रभवो यस्मात् विष्णुपादाश्रया नराः । तन्मूलतः क्रियास्सर्वाः सफलास्तु भवन्ति हि ।' इति । नारदीये श्रीमदष्टाक्षरब्रह्मविद्यायां — 'सर्वस्सप्रणवो जप्यः जपादप्रणवादपि । सहस्र इति विज्ञेयं प्रणवोह्यक्षरं परम् । असङ्ख्याताच्च सङ्ख्यातः सहस्रगुण उच्यते । सङ्ख्यातादपि साहस्रः सोर्ध्वपुण्ड्रतनोर्जपः ।'' इत्यादि ।

जपकालनियममाह— धर्मशास्त्रोक्तनियमेनेत्यादिना । तदुक्तं— ''न च क्रमन् न च हसन् न पार्श्वमवलोकयन् । न पदापदमाक्रम्य न चैव हि तथा करौ । इत्यादयश्च जपकालनियमाः'' इति । ''कृत्वोत्तानकरौ प्रातः सायं चाधोमुखौ करौ । मध्ये स्कन्धभुजाभ्यां तु जप एव मुदाहृतः । अङ्गुलीर्न वियुञ्जीत किञ्चिदाकुञ्चिते तले । अङ्गुलीनां वियोगे तु छिद्रे तु स्रवते जपः ।, मनः प्रहर्षणं शौचं मौनं मन्त्रार्थचिन्तनम् । अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः, निष्ठीवं जृम्भणं कोधो निद्रालस्य क्षुधामदः । पतितश्वान्त्यजालोकाः दशैते जपवैरिणः ।'' सुमन्तुः— ''नाधोरद्विर्नान्यमनाः न च व्यत्यस्तपत्करः । अपवित्रकरो नग्नः शिरसि प्रावृतोऽपि वा। प्रजल्पन् वा जपेद्यावत् तावन्निष्फलमुच्यते । खण्डवस्त्रावृतस्यैव वस्त्रार्धालम्भिनस्तथा । उत्तरीयव्यतीतस्य समस्ता

* प्रणवान्ते व्याहृतित्रयान्ते पादानामन्ते चेति पञ्चावसानम् ।

निष्फलाः क्रियाः ।'' स्मृत्यर्थसारे—''सावित्र्यादिक्रियास्सर्वा आदित्याभिमुखश्चरेत् । देवालयसमीपे तु तमेवाभिमुखश्चरेत् । जपस्थानान्न निर्गच्छेत् देवतासन्निधौ कचित् । प्रदक्षिण नमस्कारं न कुर्याद्देवतालये ।'' भारीतः — आर्द्रावासा जले कुर्यात् तर्पणाचमने जपम् । उपस्थानं न निर्गच्छेत् वर्जयेच्च प्रदक्षिणम् । इत्यादीनि रत्नाकरादिस्थानि वचनान्यत्र भाव्यानि । आह्निक काण्डोदाहृतं च शौनकः — 'अपवित्रकरोऽशुद्धः प्रलपन्न जपेत् कचित् । अप्रावृतकरो वापि शिरसि प्रावृतोऽपि च ।' इति वचनमपीहानुसन्धेयम् ।

पञ्चावसानयुक्तं जपं कृत्वेति । पितामहः - गायत्री त्रिपदा ज्ञेया चतुष्पादा षडक्षरी । जपे तु त्रिपदा ज्ञेया ह्यर्चनेतु चतुष्पदा । एवमुक्तत्वात् प्रतिपादं विच्छिद्य जपः कार्यः । अविच्छेदे तु 'अच्छिन्नपादा गायत्री ब्रह्महत्यां प्रयच्छति । छिन्नपादा तु गायत्री ब्रह्महत्यां व्यपोहति ।' इति प्रत्यवायस्मृते; । ''व्यासः — 'प्रणवव्याहृतीयुक्तां गायत्रीं तु ततो जपेत्' बोधायनः— ''प्रणवो व्याहृतयः सावित्री चेत्येते पञ्चब्रह्मयज्ञा अहरहर्ब्राह्मणं किल्बिषात् पावयन्ते' अत्र सङ्ख्यानियमेन व्याहृतिमध्ये व्याहृत्यनन्तरं गायत्र्याद्यन्तयोश्च प्रणवप्रयोगो व्यवच्छिद्यते । दीर्घगायत्रीजपे गायत्र्यादौ प्रणवप्रयोगस्तु श्रुतिसिद्धः + जपादिषु सर्वत्र ब्रह्मचारि गृहस्थयोरेकप्रणवैव गायत्री ग्राह्या । अत्र स्मृतिसारसमुच्चये — 'संपुटैकषडोङ्कारा गायत्री त्रिविधा मता । तत्रैकप्रणवा ग्राह्या गृहस्थैर्जपकर्मणि । संपुटा च षडोंकारा यतीनामूर्ध्व रेतसाम् । गृहस्थवत्तु जप्तव्या गायत्री ब्रह्मचारिभिः । तत्रैकप्रणवेनैव गृहस्थव्रतिनोः सदा ।' सम्पुटमाह योगयाज्ञवल्क्यः —'ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वस्तथैव

च । गायत्रीं प्रणवश्चान्ते जप एव मुदाहृतः । एषा सम्पुटगायत्री सर्वपापप्रणाशिनी ।' मनुष्षडोङ्कारमाह - ''षडोंङ्कारां जपन् विप्रो गायत्रीं मनसा शुचिः । अनेकजन्मजैः पापैर्मुच्यते नात्र संशयः । तिस्रो व्याहृतयः पूर्वाः पृथगोङ्कारसंयुताः । पुनस्संहत्यचोङ्कारं मन्त्रस्याद्यन्तयोस्तथा ।'' इति रत्नाकरवचनान्यत्र भाव्यानि । यत्त्वपरोक्तम् — 'गृहस्थो ब्रह्मचारी च प्रणवाद्यामिमां जपेत् । अन्ते यः प्रणवं कुर्यात् नासौ वृद्धिमवाप्नुयात् ।' इति निषेधः त्रैवर्गिकविषयः, ''पूर्वा कार्या गृहस्थैस्तु उत्तरा यतिभिर्विभो । गृहस्था वृद्धिमिच्छन्ति यतो मोक्षं यतीश्वराः ।'' इति नारदीयादौ वृद्धिशब्दस्य त्रिवर्गपरत्वदर्शनात् स च निषेधः तेषामपि पाक्षिकः, तानधिकृत्यैव बोधायनसूत्रे उभयतः प्रणवां सव्याहृतिकाम्'' इति विहितत्वात् । एवं च अन्तप्रणवहीना मुमुक्ष्वनुपादेयैव; उत्तरैकादशीवत् । एवं षडोङ्कारापि मुमुक्षूपादेयैव - इति । तन्मन्दं; गृहस्था वृद्धिमिच्छन्ती'त्यादि वचने मोक्षस्य पृथगुपादानात् वृद्धिशब्दस्त्रिवर्गपरः । 'अन्ते यः प्रणवं कुर्या'दित्यादिवचने सङ्कोचकाभावात् वृद्धिशब्दश्चतुर्वर्गपर इति स्वीकार्यम् । पूर्वोदाहृतफल श्रवणरहितस्मृतिसारसमुच्चय वचनतः सम्पुटषडोङ्कारगायत्र्योः नित्यतया यतिविषयत्वस्य एकप्रणवगायत्र्याः गृहस्थब्रह्मचारिविषयत्वस्य च प्रतीयमानत्वात् । काश्यपस्मृतौ — ''एकप्रणवसंयुक्तां गायत्रीं प्रजपेद्गृही । ब्रह्मचारी च सन्ध्यासु नियतो नियतेन्द्रियः । वनी संपुटगायत्रीं यतिष्षड्प्रणवान्विताम् ।' इत्युक्तम् । वृद्धयमस्मृतौ तृतीयाध्याये — ''एकोङ्कारा संपुटा च षडोङ्कारेति सा त्रिधा । आद्यन्तोंकारसंयुक्ता गायत्री संपुटा स्मृता । सहोङ्कारा व्याहृतयः पुनरोङ्कारसंयुताः । मनोरादावथाऽन्ते च षडोङ्कारेयमुच्यते ।

आदावोङ्कारसंयुक्ता गायत्र्येकाह्युदाहृता । आद्योङ्कारा गृहस्थस्य वर्णिनश्च तथैव च । वानप्रस्थयतीनान्तु षडोङ्कारा प्रशस्यते । ओंकारं पूर्वमुच्चार्य भूर्भुवः स्वस्ततः परम् । गायत्रीं च ततश्चोक्त्वा जपकाले विशेषतः' इति । ततश्च संपुटषडोहङ्कारयोर्मुमुक्षुगृहस्थग्राह्यत्वं न सम्भवति । पूर्वा कार्या गृहस्थैस्तु' इत्यादिवचने 'गृहस्था वृद्धिमिच्छन्ती' त्यादेरर्थवादतया हेत्वधिकरणन्यायेन पूर्वार्धप्रतिपन्न-विधिशेषतया उत्तरैकादश्याः मुमुक्षुगृहस्थाग्राह्यत्वविधि-परत्वासम्भवात् । निष्कामस्तु गृही कुर्यादुत्तरैकादशीं सदा । सकामस्तु गृही पूर्वामिति बोधायने मुनिः' ''संपूर्णैकादशी यत्र प्रभाते पुनरेव सा । पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां सदा ।'' इति वचनभ्या-मुत्तरैकादश्याः मुमुक्षु गृहस्थग्राह्यत्वविधानवदत्र विधायकाभावात्, भवदुक्तव्यवस्था अयुक्तैव । बोधायनसूत्रे त्रिवर्गार्थिनोधिकृत्य 'उभयतः प्रणवां सव्याहृतिका'मिति विहितत्वादित्युक्त-मत्यन्तायुक्तं–तत्सूत्रप्रकरणाचार्यपाद श्रीसूक्ति-विरुद्धत्वात् । तत्सूत्रे ''प्रत्यङ्मुखस्सावित्रीं सहस्रकृत्वः आवर्तयेत्'' इति सहस्रसंङ्ख्याकगायत्रीजपं विधायाशक्तौ प्रत्याम्नायः 'प्राणायामतो वा शतकृत्वः उभयतः प्रणवां सव्याहृतिकां दशकृत्वः' इति विहितः । श्री पाञ्चरात्ररक्षायामेतदेव 'प्राणायामेन शतकृत्वः प्रणवव्याहृति-संभेदविशेषेण दशकृत्वः गायत्रीजपसहस्रतुल्यं बोधायनादयः स्मरन्ती'त्यनुगृहीतम् । तच्छ्रीसूक्त्यर्थः श्री निक्षेपचिन्तामण्यनुगृहीतः उत्तरत्र प्रपञ्चयिष्यते । अतो नोदाहृतबोधायन वचनं त्रैवर्गिकार्थिविषयं, किन्तु नित्यजपे सहस्रावृत्त्यशक्तौ प्रत्याम्नायविधायकम् । एतेन बोधायनश्च उभयतः प्रणवां स व्याहृतिकामिति । इदं वाक्यं संपुटगायत्री

विधायक' मिति रत्नाकरोक्तं परास्तम्। पूर्वोदाहृतेन 'प्रणवो व्याहृतयः' इत्यादिबोधयायनसूत्रविषयरत्नाकरवाक्येन ब्रह्मचारिगृहस्थयोरेकप्रणवगायत्रीजप एव कार्य इति सिद्धम् । श्री वैखानसे मरीचि ग्रन्थे अष्टसप्ततितमे पटले 'ओं भूर्भुवस्सुवः, तत्सवितुरिति सावित्रीं शताष्टकां त्रिसन्ध्यासु मनसा जपे'दिति फल श्रवणरहितः एकप्रणवयुक्तगायत्रीजपो विहितः । यदप्यपरोक्तम् — यथा सर्वेषां मन्त्राणां प्रणववैशिष्ट्येनोच्चारणं न गुरूपदेशसापेक्षं तथा व्याहृतित्रिकसप्तकद्विप्रणवषट्प्रणवमूलमन्त्र वैशिष्ट्येन गायत्रीजपोऽपि बोध्यः — इति । तदसाधु, श्री पाञ्चरात्र रक्षा श्री सूक्तिविरोधात् । "स च प्रार्थनामन्त्रः त्वय्याराधन कामोऽयमित्यादिकः यथान्यायं देशिकसकाशादधीत्यात्रान्वहं प्रयोक्तव्यः । एवमेव सर्वेषां मन्त्राणां समाधिः । विपर्यये नैष्फल्यम् । दृष्टादृष्टप्रत्यवायश्च तेषु तेषु शास्त्रेषु पठ्यते। 'यदृच्छया श्रुतो मन्त्रश्छन्नेनाथ छलेन वा । पत्रेक्षितो वा व्यर्थस्स्यात् प्रत्युतानर्थदो भवेत्।'' इति । "पारमेश्वरसंहितादिषु परिदृश्यमानसन्ध्योपास्ति भेदानामपि यथावदुपदेशानुष्ठान पारंपर्यासिद्धेः' "दिगादिनमस्काराणामपि स्वपूर्वपूर्वोपदेशानुष्ठानपारंपर्यमस्ति चेत् तत्रापि भगवदात्मकत्वध्यानपूर्वकं प्रणमेत्'', अतो यथाधिकारं यथाशक्यमत्र श्रद्दधानैः दयार्द्रहृदयदेशिकोपदेशपूर्वकं देशकालानुगुण्ये''त्यादिना पाञ्चकालिकधर्माणामाचार्योपदेशानुष्ठानपारंपर्यानुगुण्येनानु- ष्ठेयत्वानुग्रहात् । प्रणववैशिष्ट्येनोच्चारणे गुरूपदेशनिरपेक्षत्वस्यैवासिद्धतया तद्दृष्टान्तेन व्याहृतिप्रणवमूलमन्त्र-

वैशिष्ट्येन गायत्रीजपे मन्त्र वैशिष्ट्येन गायत्रीजपे गुरूपदेश-निरपेक्षत्वस्य दूरतो निरस्तत्वात्। मूलमन्त्रादिव्यापकयोजनप्रमाणानां पञ्चरात्रविहितदीक्षा - विशेषयुक्ताधिकारिविषयत्वं श्रीभाष्यकार-संप्रदायस्थसूत्रनिष्ठ-परमैकान्तिनां केवलसौत्रमन्त्रकरणक-सन्ध्याद्यनुष्ठानं च प्रमाणाचार्यपाद श्रीसूक्तिसम्प्रदायोक्ति शिष्टा-चारैस्सत्पथरक्षायां नित्यनैमित्तिकविचारेऽस्माभिस्सम्यक् स्थापितं द्रष्टव्यम्। किं च श्रीपाञ्चरात्ररक्षायां ''यद्यप्यार्षी वैष्णवी प्राजापत्येति त्रिधा सन्ध्योपास्तिभेदाः'' इत्यारभ्य ''प्रथमपरिगृहीतपरित्यागे निर्बन्धा-भावात् यथासूत्रमनुष्ठानेऽपि भगवत्समाराधनरूपत्वसिद्धेः स्वसूत्र-विहितमेव सन्ध्योपासनादिकं कर्तुमुचित''मित्यनुगृहीतम्। तत्र 'प्रथमपरिगृहीतपरित्यागे निर्बन्धाभावात्' इत्यस्यायमर्थः - सूत्रविहितोपनयनदशायां परिगृहीतसौत्रसन्ध्योपासनस्य उपनयना-नन्तरभाविपञ्चसंस्काररूपवैष्णवत्वप्राप्त्यनन्तरं परित्यागे प्रमाणा-भावात् — इति। श्री सच्चरित्ररक्षायाम् — ''उपरितने हि चतुर्थे पटले ''ब्रह्मचारी गृहस्थो वा वानप्रस्थोऽथ भिक्षुकः। एते ह्याश्रमिणः प्रोक्ताश्चत्वारः क्रमयोगतः'' इत्यारभ्य ''चक्रलिङ्गधरास्सर्वे समयव्रतनिष्ठिताः'' इति भवेयुरिति शेषः इति ब्रह्मचार्यादिधार्यं समयव्रतचक्रादिचिह्नादिकमित्यनुगृहीतम्। व्यापकयोजनप्रमाणादिकं काप्याचार्यपाद श्रीसूक्तौ न दृश्यते। अतः स्वसूत्रविहित-मेवेत्यनुगृहीतमेवाचार्यैरनुसृतमिति बोध्यम्। एतेन अन्योक्त-मूलमन्त्रादियोजनपक्षोऽपि प्रत्युक्त इति। ''प्राणायामेन शतकृत्वः प्रणवव्याहृतिसम्भेदविशेषेण दशकृत्वः गायत्रीं सहस्रतुल्यं बोधायनादयः स्मरन्ती''त्याचार्यपादानुगृहीतं श्रीनिक्षेपचिन्तामणौ विवृतं - ''सहस्रजपाशक्तौ प्रतिनिधिमाह - प्राणायामेनेति।

बोधायनेति । ''दर्भेष्वासीनो दर्भान् धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखस्सावित्रीं सहस्रकृत्वः आवर्तयेत्, प्राणायामशो वा शतकृत्वः उभयतः प्रणवां सप्तव्याहृतिपूर्विकां मनसा वा दशकृत्वः त्रिभिश्च प्राणायामैस्तामेवं प्रातः प्राङ्मुखस्तिष्ठन्'' इति बोधायनस्मरणादिति भावः । आदिशब्देन ''सहस्रकृत्वस्सावित्रीं जपेदव्यग्रमानसः । शतकृत्वोऽपि वा सम्यक् प्राणायामपरोयदि । सप्तव्याहृतिपूर्वां चेदाद्यन्तप्रणवान्विताम् । मनसा वा जपेच्चैव दशकृत्वो वरःस्मृतः'' इति योगयाज्ञवल्क्य वचनग्रहणमि''ति । सहस्रजपवत् प्राणायामसंपुटित शतसङ्ख्यागायत्रीजपवत् सप्तव्याहृतिपूर्वामाद्यन्त-प्रणवान्वितां वा गायत्रीं जपेद्यदि एष दशकृत्वोऽपि जपः मुख्य इति उक्तवचनार्थः । यदप्यपरोक्तं — बृहस्पतिस्मृतौ ''ऋषिश्छन्दो देवतां चे'त्यादिवचने षडङ्गन्यासाद्यनुक्तेः रत्नाकरे फलाधिक्यापेक्षायां शक्तस्याक्षरन्यासादयः कार्या इति दर्शितहेतोः षडङ्गन्यासादावपि तुल्यत्वात् षडङ्गन्यासादिकं न नियतम्—इति । तन्न, रत्नाकरोदाहृते, ''एवं विन्यस्य गायत्रीं'' इत्यादिभारद्वाजवचने फलाश्रुतिरूप-नित्यत्वग्राहकप्रमाणबलाच्छिष्टाचाराच्च सिद्धस्य षडङ्गन्यास नैयत्यस्य दृष्टान्तमात्रेणानिवार्यत्वात् । यदप्यपरोक्तम् .... ''न चान्तरा व्याहरेद्वा विरमे द्वे''ति प्रमाणात् सङ्कल्पितसमास्यनन्तरमनुदिते सूर्ये आसूर्योदयं गायत्रीजप एव कार्यः, ''अर्धमर्धांश संयुक्तमधिकं वाग्रवर्तिनाम् । जपकाले तथा होमे कर्तव्यं सिद्धिमिच्छता ।'' इति सङ्कल्पितसमास्यनन्तरमपि यथाशक्ति जपहोमयोः पारमेश्वरादि-सिद्धत्वाच्च - इति । तन्न, ''नचान्तरा व्याहरेद्वा विरमेद्वे'ति वचनस्य सङ्कल्पितजपमध्यकालविषयत्वात्, ''असङ्ख्यातात्तु सङ्ख्यातः सहस्रगुण उच्यते'' इत्याचार्यपादप्रशंसित सङ्ख्यातजपानन्तरं

प्रातस्सन्ध्योपस्थानं करिष्य इति सङ्कल्प्य उत्तम इत्यनुवाकस्य वामदेव ऋषिः । अनुष्टुप्छन्दः । गायत्री देवता । गायत्र्युद्वासने विनियोगः । "उत्तमे शिखरे देवि भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योभ्यनुज्ञानं गच्छ देवि यथासुखम् ।" इति गायत्रीमुद्वास्य, मित्रस्येति तृचस्य विश्वामित्र ऋषिः आद्यस्य भीरुट्-छन्दः । परयोर्गायत्री त्रिष्टुभौ छन्दसी, मित्रो देवता ।

पूर्वोदाहृतवृद्धयमस्मृति वचननिषिद्धस्य "लोकवार्तादिकं श्रुत्वा दृष्ट्वा स्पृष्ट्वा प्रभाषिणम् । सङ्ख्यां विना च यज्जप्तं तत्सर्वं निष्फलं भवेत् ।" इति स्वाह्निकोदाहृतवचननिन्दितस्यासंख्यातगायत्रीजपस्याप्रामाणिकत्वात् । उदाहृत पारमेश्वरवचने "सिद्धिमिच्छते" ति फलार्थिविषयत्वावगमेन निष्कामजपविषये तदप्रसक्तेः । रत्नाकरोक्त-तुरीय गायत्रीजप तदुपस्थानयोः दर्शितबोधायनसूत्रे श्रीभाष्यकार-शिष्यप्रशिष्य ग्रन्था-चार्यपाद श्रीसूक्तिष्वनुक्तेः तत्सम्प्रदायस्थेष्वनुष्ठानादर्शनात्तदनुक्तिः । केषांचित्तुरीयगायत्रीजपादिकथनं धर्मशास्त्र श्रद्धाविजृम्भितमिति बोध्यम् ।

"आदावन्ते च गायत्र्याः प्राणायामास्त्रयस्त्रयः" इति पूर्वोदाहृतवचनविहितप्राणायामत्रय पूर्वकमुपस्थानमाह — त्रिः प्राणानायम्येत्यादिना । तदुक्तम् "एवमासूर्योदयात् पूर्वोत्तराशाभि-मुखस्त्वपरोत्तरदिङ्मुखः" इत्यादिस्मृत्यनुसारेण प्राङ्मुखः प्रागुदङ्मुखो वा तिष्ठन् गायत्रीमावर्त्य पूर्ववत् कृतप्राणायामत्रय स्सन्ध्योपस्थान-सङ्कल्पपूर्वकमुत्तमे शिखर इति मन्त्रेण गायत्रीमनुज्ञाप्य स्वसूत्रोक्तैर्मन्त्रैरादित्यमण्डलान्तःस्थितं भगवन्तमुपस्थाय सप्रदक्षिणं

प्रातस्सन्ध्योपस्थाने विनियोगः । "मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिं, सत्यं चित्रश्रवस्तमम् । मित्रो जनान् यातयति प्रजानन्मित्रोदाधार पृथिवीमुत द्यां मित्रः कृष्टीरनिमिषाभिचष्टे सत्याय हव्यं घृतवद्विधेम । प्रसमित्रमर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन न हन्यते न जीयते त्वो तो नैनमऽंहो अश्नोत्यन्तितो न दूरात्" इति मन्त्रैस्सहस्ररश्मिं भगवन्तमादित्यमण्ड-लान्तःस्थं सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तित-

---

भगवदात्मकसन्ध्यादिपञ्चकनमस्कारं कृत्वा 'स यश्चारं पुरुषे यश्चासा वादित्ये' इत्यधीतं हृदयान्तः स्थितं परमात्मानमभिवाद्य प्रणम्य दिगादिनमस्काराणामपि स्वपूर्वपूर्वोपदेशानुष्ठानपारम्पर्यमस्ति चेत् तत्रापि भगवदात्मकत्वध्यानपूर्वकं प्रणमेत् । एवन्तूपस्थानप्रकारं पितामहस्सनत्कुमारायाह 'एताभिः प्राञ्जलिर्नित्यं विस्पष्टोदित-मण्डलम् । सहस्ररश्मिं भगवन्तमुपतिष्ठेद्दिवाकरम् । ततस्तस्मै नमस्कृत्वा सन्ध्याद्याः पञ्चदेवताः । प्रदक्षिणनमस्कारैर्दिशश्चैवोपतिष्ठते । परमात्मानमात्मानं भावयित्वा द्विजोत्तमम् ।" इति । "उत्तमेत्यादिमनुना देवीमुद्वासयेत्ततः । अनुवाकस्य चैतस्य वामदेवाह्वयो मुनिः । छन्दोऽनुष्टुप् च सावित्री देवतोपास्थितो मुनिः । ततः क्रमान्नमस्कुर्यात्ततस्सन्ध्यादि देवताः । सन्ध्या पुरस्ताद्गायत्री सावित्री च सरस्वती । एतास्सन्ध्यादयः प्रोक्ताश्चतस्रो देवताः क्रमात् । स्वस्वनाम चतुर्थ्यन्तं प्रणवादिनमोन्तकम् । मन्त्रमासामिह प्रोक्तं प्रणमेत् स्वस्वमन्त्रतः । केचिद्धि मुनयः प्राहुः प्रतिमन्त्रं प्रदक्षिणम् । कुर्वन् प्रणामं कुर्वीतेत्येताभ्यो भक्तितो द्विजः । मित्रस्येत्यादिभी

ऋग्भिर्विस्पष्टोदितमण्डलम् । आदित्यं तिसृभिर्देवमुपतिष्ठेत वै द्विजः । आसामृषिर्विश्वामित्रो देवता वै दिवाकरः । भीरुड्गायत्रमादिस्तु त्रिष्टुभ्भाविह पश्चिमौ । अथोपतिष्ठेदादित्यमुदयन्तं समाहितः । मन्त्रैश्च विविधैस्सौरैः ऋग्यजुस्सामसम्भवैः । इत्येवमुक्त्वोपस्थाय ततस्तमभिवादयेत् । अभिवादनमन्त्रेण सद्भक्त्या लोकसाक्षिणम् । स्वगोत्रनामशर्माहं भोः पदैरभिवादयेत् । इत्येतद्भाषणं यत्तन्मन्त्रमर्काभिवादने । सर्वाभ्यो देवताभ्यश्चेत्येतत्प्रणव संपुटम् । उक्त्वा नमो नम इति प्रणमेत्सर्वदेवताः । कामोकार्षीन्मन्युर-कार्षीदित्येतत्पूर्वमन्त्रवत् । उक्त्वा प्रदक्षिणेनैव नमस्कुर्यात्त्रयीतनुम् । प्राची च दक्षिणा चैव प्रतीची चोत्तरोर्ध्वका । अधरा चान्तरिक्षं च एतास्सप्तोदिता दिशः । सन्ध्यादीनां यथा प्रोक्तं मन्त्रमासान्तथैव च । ज्ञात्वा प्रदक्षिणेनैव ताः प्रणमेत् स्वस्वमन्त्रतः ।'' इति रत्नाकरोदाहृतवचनान्यत्र भाव्यानि । ''प्रादक्षिण्यान्नमस्कुर्याच्चतु-स्सन्ध्यादिदेवताः । सन्ध्यादितश्च गायत्रीं सावित्रीं च सरस्वतीम् । चतुर्थ्या च नमस्कुर्यात् प्रणवादिनमोऽन्तकम् । सर्वाभ्यो देवताभ्यश्च कामोऽकार्षीति सन्नमेत् । दिशश्चतस्रः प्राच्याद्याः प्रणवादि-नमोऽन्तकम् । चतुर्थ्यान्तैर्नमस्कुर्यादूर्ध्वाधस्संज्ञिके दिशौ । अन्तरिक्षं च भूम्यां च दण्डवत् प्रणमेद्द्विजः ।'' इति वृद्धयमस्मृति-तृतीयाध्यायवचनसिद्धं, भूम्यै नमः विष्णवे नमः इति नमस्कार द्वयमाचारप्रमाणसिद्धमित्यवधेयम् । उदाहृतप्रमाणेन गायत्र्युपस्थाना-नन्तरं सन्ध्यादिनमस्कारविधानेऽपि पितामहस्मृत्याचारानुसार्या-चार्यपादाभिहितः सूर्योपस्थानानन्तरं सन्ध्यादिनमस्कार एव कार्य इत्यभिप्रायेण तथोक्तम् । उदाहृत वचने कामोऽकार्षीदिति मन्त्रानन्तरं त्रयीतनुनमस्कारक्रमप्रीतीतेस्ततस्तदभिवादनमुक्तम् । पितामहस्मृतौ

मुपस्थाय, सन्ध्यादिपञ्चदेवतास्सप्रदक्षिणं "ओं सन्ध्यायै नमः, सावित्र्यै नमः, गायत्र्यै नमः, सरस्वत्यै नमः, सर्वाभ्यो देवताभ्यो नमो नमः" इति प्रणम्य कामोऽकार्षीन्मन्युरकार्षीदिति चोक्त्वा, त्रयीतनुं प्रणम्याभिवाद्य, दिगादिनमस्कारमपि कृत्वा "स यश्चायं पुरुषे, यश्चासावादित्ये, स एकः" इत्यधीतं

दिङ्नमस्कारानन्तरं हृदयान्तं स्थितपरमात्माभिवादनविधानमनुसृत्य तथोक्तम्। यत्वन्योक्तं "कामोऽकार्षीन्मन्युरकार्षी' दित्यस्याचार्य-पादानुक्तेर्नानुष्ठानम् — इति। तदयुक्तं — दिङ्नमस्कारोक्तरीत्या पूर्वपूर्वोपदेशानुष्ठान पारम्पर्यवतां तस्यावश्यानुष्ठेयत्वात्। "कामोऽकार्षीन्मन्युरकार्षीन्नमो नम इति। "ध्येयस्सदे"ति पूर्वोक्तध्यानं कुर्यादिति शेषसंहितापञ्चमाध्यायवचनाच्च। यदुक्तमपराह्निके — 'अथोपतिष्ठेदादित्यमुदयन्तं दिवाकरम्। मन्त्रैस्तु विविधैस्सौरैः ऋग्यजुस्सामसंभवैः" इति व्यासवचनेन "अष्टाक्षरं च पुंसूक्तमवश्यं प्रत्यहञ्जपेत्। उपस्थाने ब्रह्मयज्ञे श्राद्धे चैवार्चने हरेः।" इति वरदराजीयोपात्तशौनकवचनेन च मन्त्राणामपि विहितत्वात्, श्रीपाञ्चरात्ररक्षायां "उपस्थाय स्वशाखोक्तेः" इति स्वशाखीय-मन्त्रणामपि विहितत्वात्, बोधायनसूत्रे द्वाभ्यामित्यस्य अन्यव्यवच्छेदपरत्वाभावात्, प्रसमित्रेत्यनेन पुंसूक्तादिना च उपतिष्ठेत - इति। तन्मन्दम् - आचार्यपादैः स्वसूत्रोक्तैर्मन्त्रैरादित्य-मण्डलान्तःस्थितं भगवन्तमुपस्थाये'त्यनुगृहीतत्वात् बोधायनसूत्रे 'मित्रस्येति द्वाभ्यां प्रातः' इत्युपस्थानविधेश्शिष्टाचाराच्च, पुंसूक्तादि-मन्त्रान्तरकरणकोपस्थानस्यासाम्प्रदायिकत्वात्। यदप्यपरोक्तं —

हृदयान्तः स्थितं भगवन्तमभिवादयेत् । जपादिमध्ये वाङ्नियमाति क्रमे "इदं विष्णुरि"ति ऋचं जपेत् । विष्णुं वा संस्मरेत्। श्री कृष्णं वा ध्यात्वा कीर्तयेत् । जपमध्ये शूद्रान्त्यपतितश्वादिदर्शने आचम्य पुनर्जपेत् ।।

अथाष्टाक्षरजपविधिः ।।

उदयात्पूर्वं सङ्कल्पित सङ्ख्यासमाप्तौ उदयानन्तरं करिष्यमाणोपस्थानस्य च कालाभावेनावसरलाभेऽ-

---

सौरैस्सर्वैरुपस्थानोक्तेः ऋष्यादिस्मरणं प्रायिकमिति; तन्न — सर्वशाखाप्रत्ययन्यायेन सर्वस्मृत्यैककण्ठ्येन पूर्वोदाहृत वचनविहित ऋष्यादि-स्मरणस्याचारसिद्धस्यावश्यकत्वेन प्रायिकत्वासम्भवात् ।

जपमध्ये वाङ्नियमत्यागे कर्तव्यमाह —जपमध्य इति । "यदि वाग्यमलोपस्स्यात् जपादिषु कथञ्चन । व्याहरेद्वैष्णवं सूक्तं स्मरेद्वा विष्णुमव्ययम् ।" इति योगयाज्ञवल्क्यवचनमिहाभिप्रेतम् । "कृष्णानुस्मरणं परम्" 'कृष्णेति मङ्गलन्नामे'ति प्रमाणात् कृष्णध्यानकीर्तनकथनम्। जपकालेऽनिरीक्ष्य दर्शनादौ प्रतिविधानमाह — जपमध्य सति । नारदः — "श्वशूद्रपतितादींश्च रासभं च रजस्वलाम्। दृष्ट्वा तोयमुपस्पृश्याभाष्य स्नात्वा पुनर्जपेत्।" व्यासः - चण्डालपतितांश्चैव दृष्ट्वाचम्य पुनर्जपेत्। तैरेव भाषणं कृत्वा स्नात्वाचम्य पुनर्जपेत्।" इति रत्नकरस्थवचनद्वयमिहाभिप्रेतम्।

ततोऽष्टाक्षरजपमाह — अथाष्टाक्षरजप इति। मया प्रदश्यंत इति शेषः। आचमनप्रकरणोदाहृतवचनानुसारेण सन्ध्यान्ताचमनमेकं कृत्वा

ष्टाक्षरजपं कुर्यात् । अवसरालाभे उदयानन्तरमुपस्थाय ततोऽष्टाक्षरजपं कुर्यात् । तत्प्रकारः - भगवन्तं प्रणम्य, मूलमन्त्रेण पञ्चविंशत्यभ्यस्तेन त्रिःप्राणानायम्य, प्रात-

---

मूलमन्त्रजपः कार्य इति बोध्यम् । तदुक्तं—"मद्भक्ता ये नरश्रेष्ठा मद्गता मत्परायणाः । मद्याजिनो मन्नियमास्तान् प्रयत्नेन पूजयेत् । तेषान्तु पावनायाहं नित्यमेव युधिष्ठिर । उभे सन्ध्येऽधितिष्ठामि ह्यस्कन्नं तद्व्रतम्मम । तस्मादष्टाक्षरम्मन्त्रं मद्भक्तैर्वीतकल्मषैः । सन्ध्याकालेषु जप्तव्यं सततञ्चात्मशुद्धये ।" इति श्री वैष्णवधर्मशास्त्रोक्त श्रीमदष्टाक्षरजपोपि सन्ध्यायामवसरे कार्यः" इति । अत्र गायत्र्युपस्थानात्पूर्वमेवाष्टाक्षरजपः आचार्यपादाभिमत इत्येकेतरोक्तं प्रमाण न्यायाचार्यपाद श्रीसूक्तिविरुद्धमिति हृदि निधाय उदाहृताचार्यपाद श्री सूक्त्यभिप्रेतार्थमाह - उदयात्पूर्वमित्यादिना । न च सङ्कल्पितसङ्ख्यात गायत्री जपानन्तर मुपस्थानान्तमसङ्ख्यात गायत्री जपोऽनुष्ठेयः । अतो नाष्टाक्षरजपावसर इति वाच्यम् । असङ्ख्यातगायत्री जपनैष्फल्यस्य गायत्री जपप्रकरणे समर्थितत्वेन तत्परित्यागेनाष्टाक्षर-जपस्य कार्यत्वात् । अत्र वक्तव्यं सर्वं श्री निक्षेपचिन्तामणौ सम्यगनुगृहीतं तदभिप्रेतार्थाः केचन प्रदर्श्यन्ते "तस्मादष्टाक्षरं मन्त्रं इत्यादिवचनविहिताष्टाक्षरजपः नित्यः उत काम्य इति विवेचनीयम्, एकेतराह्निकपक्षः सन्ध्याकालविहितस्तज्जपे नित्यः, सततमिति विहितः काम्यः, "सततं चात्म शुद्धये" इति तत्रैवात्मशुद्धिरूपफल श्रवणादिति । तन्मन्दम् — आचार्यपाद श्रीसूक्त्यभिप्रायन्याय-विरोधात्, श्री सच्चरित्ररक्षायां "कामाधिकारत्वे सम्भवति नित्यत्वकल्पनायोगात्" इति, "तत्तद्वाक्यप्रकृतफल-विशेषापेक्षया निषेध इत्यासक्तेः व्यवस्थाप्यमि"ति चानुगृहीतं, प्रकृते

आत्मशुद्धिकामाधिकारत्वे सम्भवति नित्यत्वकल्पनं न न्याय्यम्। यथा ऊर्ध्वपुण्ड्रविधौ मध्यमाकनिष्ठिकानिषेधस्य निषेधबोधकवाक्यसमभिव्याहृतवाक्यावगताङ्गुल्यन्तरफलविषयत्वमासत्तेर्व्यवस्थापितं, तथा 'सन्ध्याकालेषु जप्तव्य मित्यत्रापि विधेस्समभिव्याहृतवाक्यप्रतिपन्नात्मशुद्धिफलविषयत्व मासत्तेर्व्यवस्थाप्यमिति, तत्रापि काम्यविधिरेव। यदपरोक्तं—''तेषान्तु पावनायाहं नित्यमेव युधिष्ठिर। उभे सन्ध्येऽधितिष्ठामि ह्यस्कन्नं तद्व्रतं मम । तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीतकल्मषैः । सन्ध्याकालेषु जप्तव्यं सततं चात्मशुद्धये ।'' इत्यत्र, शाबरभाष्ये ''यावज्जीवमग्निहोत्रं जुहोतीत्यत्र जीवनरूपनिमित्त नैयत्येनाग्निहोत्रं नियत''मिति भाषितरीत्या सन्ध्याकालयोर्भगवदधिष्ठानरूपनिमित्तस्य नियतत्त्वेन तन्निमित्तक श्रीमदष्टाक्षरजपस्यापि नियततमत्वं सन्ध्याकालयोस्सिद्धं— इति । तन्न दृष्टान्ते फलाश्रुतेः 'यावज्जीव'मिति श्रुतेश्च निमित्तनियतत्वाधीन नित्यत्वसिद्धावपि, तेषान्तु पावनाये' त्यादिवचने पावनत्वफलार्थसन्ध्याकालभगवदधिष्ठानरूपनिमित्त नैयत्यावगमेन दृष्टान्तवैषम्यात्। तस्य निमित्तस्य ''तस्मादष्टाक्षरं मन्त्रं'' इत्यत्र तच्छब्देन परामर्शात्, तद्धेतुकस्य सन्ध्याकालाष्टाक्षरजपस्यात्मशुद्धि कामनाधिकारत्वस्य शब्दस्वरससिद्धत्वात्, अन्यथा पावनार्थसन्ध्याधिष्ठानं, 'तस्मादि' ति तच्छब्देन परामृश्य तद्धेतुकसन्ध्याकालिकाष्टाक्षरजपविधानेऽपि नित्यत्वाङ्गीकारे तद्वाक्यं जरद्गवादिवाक्यवदनन्वितार्थकं स्यात् । न चात्मशुद्धिफलकत्वं नित्यत्वपर्यवसायीति वाच्यं—श्रुतिस्मृतिविरोधात्। ''वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टाकपालो भवती''त्यारभ्य, 'यस्मिन् जात एतामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवती'त्यन्तेन काम्यफलानि

प्रतिपाद्य, 'अपवा एष सुवर्गाल्लोकाच्छिद्यत' इति प्रत्यवायपरिहारं श्रुतिराह, एतच्छ्रुति विहितजातेष्टिविषयमधिकारं ''प्रत्यवायपरीहारे फलान्तरसमन्विते । तत्र संवलितं प्राहुरधिकारं विचक्षणाः ।'' इति शास्त्रीयनियमनाधिकारेऽन्वगृह्णन् । एतत्कारिकार्थः श्री सारास्वादिन्यामवलोकनीयः । अत्र पूतत्वं काम्यफलतयोक्तम् । स्मृतिरत्नाकरे—''येषां जपैश्च होमैश्च पूयन्ते'' इत्युपक्रमात्, 'एतानि जप्यानि पुनन्ति जन्तून्' इत्युपसंहाराच्च एते जपाः काम्या इति मध्याह्नसन्ध्यायां गायत्री व्यतिरिक्तमन्त्राणां परिशुद्धिफल श्रवणेन काम्यत्वोक्तेः, अत्रापि काम्यत्वस्यैव वाच्यत्वात् । आश्वमेधिके पञ्चाशीति तमेऽध्याये श्रीवैष्णवधर्मशास्त्रे युधिष्ठिरः 'वृथा च कति जन्मानि वृथा दानानि कानि च ।वृथाच जीवितं केषां नराणां पुरुषोत्तम । '' इति वृथा जन्मदानादिकं पप्रच्छ । श्री भगवान् वृथा जन्मदानादिकं विस्तरेण प्रतिपाद्य सत्पात्रदानफलकथनावसरे आत्मशुद्धि फलकसन्ध्याकालतदितरकालिकाष्टाक्षरजपं विधायाध्यायान्ते ''एवं सर्वास्ववस्थासु सर्वदानानि पाण्डव । मद्भक्तेभ्यः प्रदत्तानि स्वर्गमार्गप्रदानि वै ।'' इति दानफलमेव प्रतिपादितम् । उपरितनाध्यायेषु च, आचारदोषब्राह्मणादि गुणदोषदानविशेष फलादिकमेव प्रपञ्चितम् । तत्रैकनवतितमेऽध्याये—''गायत्रीं च यथाशक्ति जप्त्वा सूक्तं च मामकम् । मन्मयानि च सामानि पौरुषं व्रतमेव तत् । ततश्चालोकयेदर्कं हंसश्शुचिषदित्यपि । प्रदक्षिणं समावृत्य नमस्कृत्य दिवाकरम् ।'' इति गायत्री साममन्त्रशेषजपानन्तरमुपस्थान प्रदक्षिणनमस्कारादिकमेव क्रमात् प्रतिपादितं, मध्ये नाष्टाक्षरजपो विहितः । एवं च प्रकरणानुगुण्येनात्मशुद्धिकामनायां सन्ध्याकालेषु सततं चाष्टाक्षरजपः

कार्य इति सिद्धम् । "ततः परं चाध्ययनं जपं भागवतो यदा । कुर्यात् स्वाध्यायकालोऽसौ कीर्तितो मुनिपुङ्गव । अर्चयंश्च ततो देवं ततो मन्त्रान् जपन्नपि । ध्यायन्नपि परं देवं कालेषूक्तेषु पञ्चसु ॥" "स्वाध्यायश्च श्रुतिस्मृतीतिहासमन्त्रजपसत्संवादाध्यात्मशास्त्र श्रवणप्रवचनाद्यात्मा, "अत्र परिपूर्णज्ञानस्य उपबृंहणनिरपेक्षस्याधिकारिविशेषस्य द्विषडष्टषडक्षर द्वयादिजप एव स्वाध्याय इति, तत्र तद्विधिः, अत एव रहस्याम्नाये वेदान्तरनिषेधेन द्विषट्कमात्रस्वाध्यायविधानं निर्व्यूढं", "सङ्ग्रहरुचीनां महामन्त्रसक्तानां च सर्वसारभूतव्यापकमन्त्र जपोपदेशः" इति नारदीयसंहितावचन - वङ्गिवंशेश्वरकारिका - श्रीपाञ्चरात्ररक्षावाक्यैः स्वाध्यायकाल एवाष्टाक्षरजपो नित्य इत्यवगम्यते, फलाश्रवणात् । श्रीचरमश्लोकाधिकारे — "तस्मादष्टारं मन्त्र"मिति कृत्स्नवचनमुपादाय "*இப்புடைகளிலுள்ள வைகளெல்லாம்* अवश्यकर्तव्य*ங்களான* नित्यनैमित्तिक*ங்களுக்கு* विरोध*ம் வாராதபடி அவற்றுக்குப் போக்கிமிக்க காலத்திலேயாகக் கடவது* इति तस्यावश्यकर्तव्य सन्ध्याद्यनविरुद्धकालकर्तव्यत्वाभिधानात् । उपरि "श्रौतस्मार्ता-विरुद्धेषु कालेषु जपमाचरेत्" *என்று நாரதாதிகளுஞ் சொன்னார்கள்*" इति श्री सूक्त्यापि श्रुतिस्मृतिविहित सन्ध्याद्यना-विरुद्धकाल एव भारतेतिहासाश्वमेधिकपर्वस्थ श्री वैष्णव धर्मशास्त्र-विहिताष्टाक्षरजपाचरणं न्याय्यमिति प्रतीयते । श्री न्यायपरिशुद्धौ "अचारे धर्मशास्त्राणी"त्यनुगृहीतत्वेनाधिकृतधर्मशास्त्रविहित सान्ध्यकर्माद्युपरोधेनाचारानधिकृतेतिहासविहिताष्टाक्षरजपो नाचार्य-पादाभिमतः । स्मृत्यधिकरण श्रीभाष्ये धर्मशास्त्रस्य कर्मभागोप-

बृंहणत्वस्येतिहासपुराणयोर्वेदान्तोपबृंहणत्वस्यानुगृहीतत्वाच्चायमर्थ-स्सिद्धः । श्री पाञ्चरात्ररक्षायां गायत्री जपविध्यनन्तरं ''न च क्रमन्न च हसन्नि'' त्यादिना ''इत्यादयश्च जपकालनियमाः'' इति जपकालनियममुक्त्वा ''मद्भक्ता ये नरश्रेष्ठाः'' इत्यादिना ''श्री वैष्णवधर्मशास्त्रोक्त श्रीमदष्टाक्षरजपोऽपि यथाशक्ति सन्ध्यायामवसरे कार्यः'' इति अष्टाक्षरजपं प्रसङ्गादभिधाय, 'प्राणायामेने'त्यादिना गायत्रीजपविशेषमुक्त्वा, गायत्र्यष्टाक्षरादिजपसाधारण्येन जपस्थान-गणन-साधन-तत्प्रकार-जपप्रभाव-जपमध्यागत गुरुवैष्णवी यसम्भाषणादिपूजानुमतिसप्रणव सङ्ख्यातमानस जपादिकं कथितम् । उपस्थानात्पूर्वमेवाष्टाक्षरजपः आचार्यपादाभिमत इति वदद्भिः पाठक्रम एव नियामक इति वक्तव्यम् । ''प्राङ्मुखः प्रागुदङ्मुखो वा तिष्ठन् गायत्रीमावर्त्य पूर्ववत्कृतप्राणायाम त्रयः सन्ध्योपस्थानसङ्कल्पपूर्वकमुत्तमे शिखर इति मन्त्रेण गायत्रीमनुज्ञाप्य'' इत्यादि श्री सूक्तौ क्त्वा श्रुत्या गायत्र्यनन्तरमुपस्थानक्रमः प्रतीतः । अयं च क्रमः श्रीपाञ्चरात्ररक्षायां ''स्वसूत्रविहितमेव सन्ध्योपासनादिकं कर्तुमुचित''मित्यत्र साधकतया उदाहृतैः, ''पाद्मे च शौचाचमनदन्तधावनस्नानानि यथाक्रमं विधायानन्तरमेवं सन्ध्योपासनमुक्तं ''आचम्य प्रोक्षयेद्दर्भवारिभिर्मन्त्रवत्तनुं'' इत्याद्युदाहृतैः ''तर्पयेदुपविश्याथ तत्तन्मन्त्रमुदीरयन् । देवादीन् सलिले तिष्ठन् सावित्रीं प्राङ्मुखो जपेत् । यावत्सूर्योदयं दृष्ट्वा प्राञ्जलिस्तिमिरापहम् । उपस्थाय स्वशाखोक्तैः मन्त्रैर्ध्येयं हृदि स्थितम् ।' इति वचनैः, ''प्राङ्मुखस्सावित्रीं सहस्रकृत्वः आवर्तयेदित्यादिभिः ''त्रिभिश्च प्राणायामैस्तांस्ततो ब्रह्महृदयेन

वारुणीभ्यां सायमुपतिष्ठते इमं मे वरुण तत्वायामीति द्वाभ्यां, एवं प्राङ्मुखः प्रातस्तिष्ठन् मैत्रीभ्यामहरहरुपतिष्ठते, मित्रस्य चर्षणीधृतः मित्रोजनान् यातयतीति द्वाभ्यां, दर्भेष्वासीनो दर्भान् धारयमाणः सावित्रीं सहस्रकृत्वः आवर्तयेत् शतकृत्वोऽपरिमितकृत्वो वा, दशवारम्। अथादित्यमुपतिष्ठते, उद्वयन्तमसस्परि उदुत्यं चित्रं, तच्चक्षुर्देवहितं, य उदगादि''ति बोधायनधर्मसूत्र वाक्यैश्च श्रौतक्रमेण प्रतिपादितम् । गायत्रीजपोपस्थानक्रममनुसृत्याचार्य पादानुगृहीतः । आचार्यपादोदाहृतेषु ''गायत्रीजपपर्यन्तं मन्त्राचमनपूर्वकम् । सान्ध्यं कर्माखिलं साधु समाप्य च यथाविधि । ततः स्वकर्मभोक्तारमादित्यान्तरवस्थितम् । उपस्थाय स्वकैर्मन्त्रैः नारायणमतन्द्रितः । आदित्यान्तः स्थितायार्घ्यं वितीर्य परमात्मनः । प्रतिपादिकया विष्णोस्सावित्र्या तं जपेद्धरिम् । ध्यायन् जप्त्वोपतिष्ठेत तमेव पुरुषोत्तमम् ।'' इति वङ्गिवंशेश्वर नारायणमुनिवचनेषु जप्त्वा 'ततः' इति श्रुत्यैव गायत्रीजपानन्तरमुपस्थानक्रमोऽवगतः । ''एवं जपित्वा गायत्रीमुपस्थाय दिवाकरम् । सूर्यस्याभिमुखं जप्त्वा गायत्रीं नियतात्मवान् । उपस्थानं ततः कृत्वा नमस्कुर्यात्ततो हरिम् । एवं जप्त्वा यथाशक्ति ह्युदिते तु दिवाकरे । उत्तमेत्यनुवाकेन उद्वास्य तु यथागतं'' इति वासिष्ठसंहिता - वृद्धहारीत - स्मृतिरत्नाकरस्थवचनैः श्रौतक्रमेण गायत्रीजपानन्तर्यमुपस्थाने प्रतीयते । पाठक्रमात् श्रौतक्रमस्य बलीयस्त्वं सर्वमीमांसकसम्मतम् । अनुगृहीतं च श्रीभाष्ये अर्चिरादिपादे । यद्यष्टाक्षरजपः उपस्थानात्पूर्वं नियमेनाचार्यपादाभिप्रेतः, तदा ''प्राङ्मुखः प्रागुदङ्मुखो वा तिष्ठन् गायत्रीमावर्ते''त्यनन्तरं, ''अष्टाक्षरं जप्त्वा पूर्ववत्कृतप्राणायामत्रयः'' इत्यादिवाक्यं रचनीयं

स्यात्, न तथा रचितम् । ''सन्ध्याकालेषु जप्तव्य''मिति वचन विहिताष्टाक्षरजपस्योदयात्पूर्वं सङ्कल्पितसमाप्तौ उदयानन्तरं पूर्वोपदर्शितार्धप्रहरपर्यन्त सन्ध्याकालकरणेऽपि विधेश्चारितार्थ्य-सम्भवात्, तद्वचनबलेन पञ्चरात्रस्मृतिवचनसम्प्रदायोक्त्याचार्यपाद श्रीसूक्त्यवगतप्रदर्शित श्रौतक्रमबाधो न युक्त एव । किं बहुना स्मृतिरत्नकरे–''किञ्चिदभ्युदिते रवौ'' इति विहितमाघस्नानं स्त्रीशूद्रादि विषयमिति व्यवस्थाप्योक्तं— 'विप्रादिविषये तु सन्ध्यातिक्रमदोषो दुर्वारस्स्यात्, मार्जनाद्युपस्थानान्तमेककर्मत्वेन मध्ये कर्मान्तरानुष्ठाना-योगात्, 'उदयन्तं दिवाकर'मिति उदयकाल सूर्योपस्थानविधानाच्च किञ्चिदभ्युदिते स्नात्वानुष्ठाने मासं सन्ध्यातिक्रमेणाशुचित्व-कर्मानर्हत्वशूद्रत्वादिदोषाः प्रसज्येरन्नि'ति मार्जनाद्युपस्थानान्तमेकं कर्म इति मध्ये माघस्नानादिक्रियानुष्ठाने दोषाश्च प्रतिपादिताः । इतराह्निके ''माघस्नानस्य नित्यत्वात् किञ्चिदभ्युदिते ररौ । स्त्रीणां स्मृतं द्विजानान्तु प्रगादित्योदयादिति । किञ्चिदभ्युदिते भानौ माघस्नाने कृते द्विजैः । सन्ध्यातिक्रमदोषेण महान् दाषो भवेद् ध्रुवम् । प्रोक्षणादेरुप-स्थानान्तस्यैकत्वेन कर्मणः'' इति रत्नाकरानुसारः कृतः । न हि कर्मणि क्रियान्तरमिति मीमांसकघोषितम् । श्रीमदष्टारजपः न श्रुतिस्मृतिविहितसान्ध्यकर्माङ्गाद्यन्तर्भूतः, मानाभावात् । अत उपस्थानान्तसान्ध्यकर्ममध्ये उपस्थानोपरोधेन क्रियान्तराष्टाक्षरजप-कर्तव्यत्वकथनं प्रमाणाचार्यपाद श्रीसूक्ति स्वमूलग्रन्थस्वोक्तिमीमांस-कवाक्यविरुद्धमिति, उपस्थानात्पूर्वमेवाष्टाक्षरजप पक्षः आचार्य-पादाभिमत इति कथनमविमर्शकृतमिति सदुपदेशपूर्वकाचार्यपादसर्व श्रीसूक्तिमीमांसान्यायविमर्शकृद्भिरनुसन्धेयम् । अष्टाक्षरजपप्रभावा-

स्सन्ध्यायामष्टाक्षरजपं करिष्य सति सङ्कल्प्य, अस्य श्रीमदष्टाक्षरमहामन्त्रस्य अन्तर्यामी नारायण ऋषिः, बदरिकाश्रमवासी नारायण ऋषिर्वा, देवी गायत्री छन्दः, परमात्मा श्रीमन्नारायणो देवता, (श्रीरधिष्ठानदेवता) अं बीजं, आय शक्तिः, मं कीलकं, ह्रीं शक्तिः, ऐं अस्त्रं, शुक्लादिर्वर्णः, उदात्तादिः स्वरः, बुद्धिस्तत्वं, श्री वैकुण्ठः क्षेत्रं, जीवपरयोः स्वस्वामिभावस्सम्बन्धः । श्रीमन्नारायणप्रीत्यर्थे जपे विनियोगः । मूलमन्त्रेण कूर्परमारभ्याङ्गुल्यग्रपर्यन्तं स्वहस्तौ परस्परं त्रिः परामृश्य, ततश्शुद्धयोर्हस्तयोः मन्त्रस्य व्यापकन्यासं कृत्वा, ओमोमिति दक्षिणतर्जनीमध्यमपर्वणि न्यस्य, आद्यन्तपर्वणोः ओमिति प्रणवं न्यसेत् । एवं ओं नमिति मध्यमाया मध्यमपर्वणि, ओमित्याद्यन्तपर्वणोः प्रणवं न्यसेत् । ओमोमित्यानामिकामध्यमपर्वणि ओमित्यद्यन्तयोः । ओं नामिति कनिष्ठिकामध्यमपर्वणि ओमित्याद्यन्तयोः । ओं रां ओमिति वामतर्जन्यां पूर्ववत् । ओं यं ओमिति वाममध्यमायाम् । ओं णां ओमिति वामानामिकायाम् । ओं यं ओमिति-वामकनिष्ठिकायां च पूर्ववन्मध्यमाद्यन्तक्रमेण न्यसेत् । एष स्थिति न्यासो गृहस्थस्य । वामतर्जन्यादिदक्षिण तर्जन्यन्तं अष्टानामङ्गुलीनां मध्यमपर्वसु प्रणवोपेतस्य नादान्तस्य मन्त्राक्षरस्य आद्यन्तपर्वसु प्रणवस्य च

क्रमेण न्यासस्संहाराख्यो यतीनां वानप्रस्थानां च । दक्षिणतर्जन्यादिवामतर्जन्यन्तं सृष्टिन्यासो ब्रह्म-

दिकं तत्र तत्रोक्तं द्रष्टव्यम्।

अथाष्टाक्षरजपप्रकारमाह - तत्प्रकार इत्यादिना। पाद्मे चर्यापादे तृतीयाध्याये — "तलं पृष्ठं च करयोश्शोधयित्वास्त्रविद्यया। अङ्गुलीनां च सर्वासां पर्वस्वाद्यन्तवर्तिषु। इष्यते प्रणवन्यासः मध्यमेषु च पर्वसु। मन्त्राक्षराणि विन्यस्य न्यास एष सनातनः । पर्वदक्षिणतर्जन्याः प्रक्रम्याङ्गुलिपर्वसु । दक्षिणेतरतर्जन्याः पर्वान्तं साधकोत्तमः । सृष्टिन्यासमिमं कुर्यात् व्यत्यासे न तु संहृतिः । प्रक्रम्य तर्जनीपर्वकनिष्ठापर्वविश्रमः। स्थितावष्टाक्षरस्यैष मन्त्रन्यास उदीरितः। ताभ्यां पादादिमूर्द्धान्तं देहे न्यस्येत्समन्ततः । व्यापकं कञ्चुकं यद्वत् मन्त्रस्त्वक्षरशस्ततः । मूर्ध्नि नेत्रे मुखे चित्ते नाभ्यां गुह्ये च जानुनि । चरणौ क्रमशः सृष्टौ न्यासो मन्त्रस्य इष्यते। विपरीतक्रमो ज्ञेयः संहृतौ पालने पुनः। नाभ्यादिहृदयान्तेषु न्यासोऽङ्गेषु प्रकीर्तितः। अष्टाक्षरस्य मन्त्रस्य स्थानान्येतानि तानि च। मूर्ध्नि मध्यमयाङ्गुल्या तर्जन्या सा च चक्षुषोः । न्यसेन्मुखेऽनामिकया चाङ्गुष्ठेन च मन्त्रवित् । अङ्गुष्ठ-तर्जनीभ्यान्तु हृदये न्यसनं भवेत्। तथाङ्गुष्ठकनिष्ठाभ्यां नाभौ न्यासः प्रशस्यते। विनाङ्गुष्ठेन शेषाभिः गुह्ये जानुनि चोभयोः । समस्ताभि-श्चरणयोरित्यष्टाक्षरभूमयः।" इति सङ्ग्रहेण करन्यासाङ्ग-न्यासभेदाः प्रदर्शिताः । पराशरसंहितायाम्–"अष्टाक्षरस्य मन्त्रस्य नरनारायणेति च। ऋषिं चोक्त्वा ततो देवं नरनारायणेति च" वासिष्ठसंहितायां– "अष्टाक्षरस्य मन्त्रस्य ऋषिर्नारायणः स्मृतः। छन्दश्च देवी गायत्री देवो नारायणस्स्वय"मिति ऋष्यादिकं प्रदर्शितम् । "ऋषयेऽष्टा

चारिणाम् । अथ ओमों ज्ञानाय हृदयाय नम इति दक्षिणतर्जन्यां दक्षिणाङ्गुष्ठेन न्यस्य ओं नं ऐश्वर्याय शिरसे स्वाहा इति दक्षिणतर्जन्यां दक्षिणाङ्गुष्ठेन न्यस्य ओ मों शक्त्यै शिखायै वौषट् इति दक्षिणमध्यमायां, ओं नां बलाय कवचाय हुं इति दक्षिणानामिकायां, ओं रां वीर्यायास्त्रायफडिति दक्षिणकनिष्ठिकायां क्रमेण दक्षिणाङ्गुष्ठेन दक्षिण तर्जन्यादितत्कनिष्ठान्तास्वङ्गुलीषु न्यस्य, ओं यं तेजसे नेत्राभ्यां नमः इति वामतर्जन्या वामाङ्गुष्ठे न्यस्य, ओं णां तेजसे उदराय नमः इति वामतर्जन्यां, ओं यं तेजसे पृष्ठाभ्यां नमः इति वाममध्यमायां, ओं यं तेजसे बाहुभ्यां नमः इति वामा नामिकायां, ओं यं तेजसे ऊरुभ्यां नमः इति, वामकनिष्ठिकायां क्रमेण वामाङ्गुष्ठेन तर्जन्यादिक-निष्ठान्तास्वङ्गुलीषु न्यस्य, ओं यं तेजसे जानुभ्यां नम इति दक्षिणाङ्गुष्ठेन तदितराङ्गुलि नखमुखेषु न्यस्य, ओं यं तेजसे पादाभ्यां नम इति वामाङ्गुष्ठेन तदितराङ्गुलि नखमुखेषु न्यसेत् । एष स्थिति न्यासः । वामाङ्गुष्ठादि-दक्षिणाङ्गुष्ठान्तं तथैव नखमुखेऽपि न्यासस्संहारः । दक्षिणाङ्गुष्ठादिवामाङ्गुष्ठान्तं तथैव नखमुखेषु न्यास-स्सृष्टिन्यासः । अथाङ्गन्यासः मूलमन्त्रेण पाणिभ्यां स्वशिरः प्रभृति पादान्तं वर्मवेष्टनवत् स्वपार्श्वयोः स्पर्शनरूपं व्यापकन्यासं कृत्वा, ओं ओमिति दक्षिणाङ्गुष्ठकनिष्ठिकाभ्यां नाभौ विन्यस्य, ओं नं ओ मोमित्यक्षर द्वयं व्यङ्गुष्ठाभिरङ्गुलीभिर्गुह्ये जान्वोश्च क्रमेण न्यस्य ओं नामिति साङ्गुष्ठाभिरङ्गुलीभिः पादयोः, ओं रामिति मध्यमाङ्गुल्या शिरसि, ओं यमिति तर्जनी-

मध्यमाभ्यां नेत्रयोः, ओं णामिति साङ्गुष्ठानामिकया मुखमध्ये घ्राणस्य पुरतः, ओं यमिति साङ्गुष्ठ तर्जन्यग्रेण हृदये न्यसेत् । अयं स्थितिन्यासः । तत्रापि शिरः प्रभृतिपादान्तन्यासस्सृष्टिः, पादादिशिरोन्तं न्यास-स्संहार न्यासः । ओं ओं ज्ञानाय हृदयाय नम इति अङ्गुष्ठयुक्ततर्जन्या हृदये, ओं नं ऐश्वर्याय शिरसे स्वाहेति अनङ्गुष्ठाङ्गुलीभिर्मस्तके ओं मों शक्त्यै शिखायै वौषडिति अङ्गुष्ठनालेन मुष्टिना शिखामध्ये ओं नां बलाय कवचाय हुमिति कण्ठादिकट्यन्तं तनुं पाणिभ्यां वर्मवत् स्पृष्ट्वा, ओं रां वीर्यायास्त्राय फडिति साङ्गुष्ठतर्जन्यांसयोः क्रमेण शब्दयेत् । ओं यं तेजसे नेत्राभ्यां नम इति तर्जनीमध्यमाभ्यां युगपन्नेत्रद्वये, ओं णां तेजसे उदराय नम इति नाभ्यामङ्गुलीभिर्न्यस्य, ओं यं तेजसे पृष्ठाभ्यां नम इति पृष्ठयोः, ओं यं तेजसे बाहुभ्यां नम इति बाह्वोः, ओं यं तेजसे ऊरुभ्यां नम इत्यूर्वोः, ओं यं तेजसे जानुभ्यां नम इति जान्वोः, ओं यं तेजसे पादाभ्यां नम इति पादयोः अङ्गुलीभिर्न्यसेत् । ततः सास्त्रच्छोटेन साङ्गुष्ठतर्जन्यग्रेण पूर्वाद्या दिशः पूर्वं पश्चात् वह्न्याद्या विदिशश्च बध्नीयात्, साङ्गुष्ठतर्जन्यग्रेण भ्रामयन् सन्नात्मनः प्राकारं कुर्यात् । ओं बलाय कवचाय हुमिति देहावकुण्ठनं कुर्यात् । ततः, इदं गुरुभ्यः पूर्वेभ्यः क्रियते शिरसा नमः । मन्त्रज्ञानप्रदातृभ्यस्तद्गुरुभ्योपि साम्प्रतम् । नमस्ते मन्त्रराजाय नमस्तेऽष्टाक्षरात्मने । नमस्ते चेतनाधार परब्रह्माभिधायिने । स्थित्वान्तर्हृदये सर्वानात्मनस्सन्नियच्छते । ऋषयेऽष्टाक्षरस्यान्तर्यामिणे हरये नमः । अष्टाक्षरमहामन्त्रवर्णसङ्ख्याभिधायिनीम् ।

छन्दश्च देवीं गायत्रीं शिरसा प्रणमाम्यहम् । मन्त्रस्य दैवतं चापि परमात्मानमव्ययम् । नारायणं परं ब्रह्म नतोऽस्मि शिरसा हरिम् । मन्त्रशक्तिः स्थिता यस्मिन्नाश्रितेष्टार्थसाधिनी । पदं नारायणायेति शक्तिं तां प्रणतोऽस्म्यहम् । अकारादुत्थिताद्बीजाद्वासुदेवाभिधायिनः । तद्बीजमस्य प्रभवं प्रणवं प्रणतोऽस्म्यहम् । इति गुर्वादीन् प्रणम्य, मनसा गन्धाद्यैरभिपूज्य, "सव्यं पादं प्रसार्य श्रितदुरितहरं दक्षिणं कुञ्चयित्वा जानुन्याधाय सव्येतरमितरभुजं नागभोगे निधाय । पश्चाद्बाहुद्वयेन प्रतिभटशमने धारयन् शङ्खचक्रे देवीभूषादिजुष्टो जनयतु जगतां शर्म वैकुण्ठनाथः ।" इति ध्यात्वा "ओमर्थाय नमो नारायणायेत्येकवाक्यता । न्यासोऽत्र नमसोऽर्थस्स्यात्तेनोपायपरो मनुः । ओमर्थनारायणीय शेषवृत्तिं नमो गिरा । उपलक्ष्य तदेकात्मा कृत्स्नः फलपरो मनुः । आर्थनारायणस्यैव स्वमहं नास्म्यहं मम । इति द्विवाक्ये जीवेशस्वरूपे तत्परो मनुः । आर्थनारायणस्याहं भरत्वेनार्पितो नमे । भरोऽस्मीति द्विवाक्यस्सन् उपायैकपरो मनुः । आर्थनारायणस्याहं किङ्करस्तद्विरोधि मे । न स्यादिति द्विवावाक्यस्सन् पुमर्थैकपरो मनुः । आयैवाहं नमो नारायणकैङ्कर्यमस्तु मे । इति त्रिवाक्यो जीवेशस्वरूपफलतत्परः । आयैवास्मीत्येकवाक्यात् स्वरूपं शेषवाक्ययोः । अनिष्टं नश्यतादिष्टं स्यादित्याह

क्षरस्यान्तर्यामिणे हरये नमः" इति वङ्गिवंशेश्वरोक्तेः अन्तर्यामी नारायण ऋषिरित्युक्तम् । भाष्यकारानुक्तो मन्त्रन्यास स्तच्छिष्याद्युक्तप्रकारेणानुष्ठेय इति ज्ञापनाय" इत्याचार्यपाद श्रीसूक्तेर्वङ्गिवंशेश्वरोक्त न्यासादिकमत्रानुगृहीतम् ।

त्रिवाक्यतः। स्वरूपं तार नमसोरर्थो गोप्तृत्वयाचनम्। शेषस्यातस्त्रिवाक्योऽसौ स्वरूपोपाय तत्परः। केचित्तु चरमश्लोके द्वये चोक्तक्रमादिह। भरन्यासपरं तारं शेषं फलपरं विदुः। तारे स्वरूपं नमसि न्यासं शेषे फलार्थनम्। प्राह त्रिवाक्यो मन्त्रोऽयमाहत्यार्था दशोरिताः। वाक्यैकत्वे योजने द्वे तिस्रो वाक्यद्वये तथा। वाक्यत्रये पञ्च तय्यस्ताः पृथक्पृथगिरीताः।'' इति करिकादर्पणोक्तक्रमेण निगमान्तदेशिकोक्तमन्त्रार्थमपि चिन्तयन् यथाशक्ति मूलमन्त्रं जपेत्॥

—★—

आधारशक्तितर्पणक्रमः

ततः द्विराचम्य श्री भगवदाज्ञया भगवत् प्रीत्यर्थमाधारशक्त्यादितर्पणं करिष्य इति सङ्कल्प्य ओं आधारशक्त्यै नमः। ओं प्रकृत्यै नमः। ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः। ओमनन्ताय नागराजाय नमः। ओं भूं भूम्यै नमः। ओं श्री वैकुण्ठाय दिव्यलोकाय नमः। ओं श्री वैकुण्ठाय दिव्यजनपदाय नमः। ओं श्री वैकुण्ठाय दिव्यनगराय नमः। ओं श्री वैकुण्ठाय दिव्यविमानाय नमः। ओं

ततः श्रीभाष्यकारनित्योक्ताधारशक्त्यादीनां तर्पणप्रकारमाह– ततः श्रीभगवदाज्ञया इत्यादिना। ''क्रमेण विधिवज्जप्त्वा द्विराचम्याथ तर्पयेत्। आधारशक्तिमारभ्य गन्धपुष्पाक्षतादिभिः। पार्षदान्तां-स्तर्पयित्वा वस्त्रं निष्पीड्य मन्त्रतः'' इति वासिष्ठसंहिताचनमिह भाव्यम्।

आनन्दमयाय दिव्यमण्टपरत्नाय नमः । ओं आस्तरण-रूपायानन्ताय नागराजाय नमः । (आग्नेयादिविदिक्षु) ओं धर्माय पीठपादाय नमः । ओं ज्ञानाय पीठपादाय नमः । ओं वैराग्याय पीठपादाय नमः । ओं ऐश्वर्याय पीठपादाय नमः । (प्रागादिदिक्षु) ओं अधर्माय पीठगात्राय नमः । ओं अज्ञानाय पीठगात्राय नमः । ओं अवैराग्याय पीठगात्राय नमः । ओमनैश्वर्याय पीठगात्राय नमः । ओं एभिः परिच्छिन्नतनवे पीठभृते सदात्मने अनन्ताय नागराजाय नमः । (तदुपरि) ओमष्टदलपद्माय नमः । (अष्टसु दलेषु प्रागादिक्रमेण प्रादक्षिण्येन) ओं विमलायै चामरहस्तायै नमः । ओमुत्कर्षिण्यै चामरहस्तायै नमः । ओं ज्ञानायै चामरहस्तायै नमः । ओं क्रियायै चामरहस्तायै नमः । ओं योगायै चामरहस्तायै नमः । ओं प्रह्वै चामरहस्तायै नमः । ओं सत्यायै चामरहस्तायै नमः । ओं ईशानायै चामरहस्तायै नमः । (कर्णिकापूर्वभागे) ओमनुग्रहायै चामरहस्तायै नमः । ओं जगत्प्रकृतये दिव्ययोगपीठाय नमः । ओं दिव्ययोगपर्यङ्काय नमः । ओं सहस्रफणामणि-मण्डितायानन्ताय नागराजाय नमः । ओं पाद-पीठात्मने अनन्ताय नागराजाय नमः । ओं सर्वपरिवाराणां पद्मासनेभ्यो नमः । ओं अनन्तगरुड-विष्वक्सेनानां सपीठकपद्मासनेभ्यो नमः । (योगपीठस्य पश्चिमोत्तरदिग्भागे) ओं अस्मद्गुरुभ्यो नमः । (कल्पिते नागभोगे) ओं श्रीमते नारायणाय नमः । मूलमन्त्रेण वा (तस्य दक्षिणतः) ओं श्रीं श्रियै नमः । (वामतः) ओं भूं

भूम्यै नमः । (तत्रैव) ओं नीं नीलायै नमः । ओं सर्वाभ्यो भगवद्दिव्यमहिषीभ्यो नमः । ओं किरीटाय मकुटाधिपतये नमः । ओं किरीटमालायै आपीडात्मने नमः । ओं दक्षिणकुण्डलाय मकरात्मने नमः । ओं वामकुण्डलाय मकरात्मने नमः । ओं वैजयन्त्यै वनमालायै नमः । ओं श्रीमत्तुलस्यै नमः । ओं श्रीवत्साय श्रीनिवासाय नमः । ओं हाराय सर्वाभरणाधिपतये नमः। ओं श्रीकौस्तुभाय सर्वरत्नाधिपतये नमः । ओं काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय नमः । ओं सर्वेभ्यो भगवद्दिव्य-भूषणेभ्यो नमः। (दक्षिणतः) ओं सुदर्शनाय हेतिराजाय नमः । ओं नन्दकाय खड्गाधिपतये नमः । ओं पद्माय नमः । ओं पाञ्चजन्याय शङ्खाधिपतये नमः । ओं कौमोदक्यै गदाधिपतये नमः । ओं शार्ङ्गाय चापाधिपतये नमः ।ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नमः। (पृष्ठतः) ओमनन्ताय नागराजाय नमः । ओं सर्वेभ्यो भगवत्परिजनेभ्यो नमः । (पुरतः) ओं भगवत् पादुकाभ्यां नमः। ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नमः । (अग्रे) ओं वैनतेयाय नमः । (प्रागुत्तरपार्श्वे) ओं भगवते विष्वक्सेनाय नमः । (तस्य प्राच्यादिदिक्षु ओं गं गजाननाय नमः । ओं जं जयत्सेनाय नमः । ओं हं हरिवक्त्राय नमः । ओं कं कालप्रकृतिसंज्ञाय नमः । ओं सर्वेभ्यो विष्वक्सेनपरिजनेभ्यो नमः । (प्राग्द्वारादि-क्रमेण) ओं चण्डाय द्वारपालाय नमः । ओं प्रचण्डाय द्वारपालाय नमः । ओं भद्राय द्वारपालाय नमः । ओं

सुभद्राय द्वारपालाय नमः। ओं जयाय द्वारपालाय नमः। ओं विजयाय द्वारपालाय नमः । ओं धात्रे द्वारपालाय नमः । ओं विधात्रे द्वारपालाय नमः । ओं सर्वेभ्यो भगवद्द्वारपालेभ्यो नमः (प्रागादिक्रमेण) ओं कुमुदाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः । ओं कुमुदाक्षाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः । ओं पुण्डरीकाय गणाधिपतये सवाहनपरिवार-प्रहरणाय नमः। ओं वामनाय गणाधिपतये सवाहान-परिवारप्रहरणाय नमः । ओं शङ्कुकर्णाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः । ओं सर्व (सर्प)नेत्राय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः । ओं सुप्रतिष्ठताय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः । ओं सर्वेभ्यो भगवत्पार्षदेभ्यो नमः । इति सन्तर्प्य।

★ ★ ★

देवर्षिपितृतर्पणक्रमः।

अथ देवर्षिपितृतर्पणं करिष्य इति सङ्कल्प्य, धर्म-शास्त्रोक्तक्रमेण ब्रह्मादयो ये देवास्तान् देवांस्तर्पयामि, सर्वान् देवांस्तर्पयामि, सर्वदेवगणांस्तर्पयामि । सर्वदेवपत्नीस्तर्पयामि। सर्वदेवगणपत्नीस्तर्पयामि। इति क्रमेण प्रणवपूर्वकं देवान् भगवदात्मकान् प्राङ्मुख उपवीती । सप्रणवं भगवदात्मकान् ऋषीन्

देवादितर्पणान्याह–देवर्षिपितृतर्पणमित्यादिना । तदुक्तम्– "तत आधारशक्त्यादिपार्षदान्तान् देवर्षिपितृंश्च भगवदात्मकान् ध्यात्वा प्रणवपूर्वकैस्तत्तन्नामभिस्सन्तर्प्ये"ति । "तत आधार-

शक्त्यादींस्तर्पयित्वा स्वनामभिः । नमोऽन्तैः प्रणवोपेतैर्निष्पीड्य स्नानशाटिकाम् । श्रुतिस्मृत्युदितं कर्म यावच्छक्ति परात्मनः । आराधनत्वेनापाद्य सोर्ध्वपुण्ड्रश्च तर्पयेत्'' मंत्रैराधारशक्त्यादि पारिषदान्तसंस्थितैः । इति वङ्गिवंशेश्वरभट्टारकवचनान्यत्रानु-सन्धेयानि। ''नारायणात्मकान्देवान् ऋषीन् सन्तर्पयेत्पितॄन् । तत आधारशक्त्यादीन् सर्वान् पारिषदान्तकान्'' इति नारायणमुन्युक्तौ देवर्षिपितृतर्पणानन्तरमाधारशक्त्यादि तर्पणावगमेऽप्याचार्यपादैर्ना-थयामुनपूर्णादिसम्प्रदायानुसारिभिरनुगृहीतप्रकारेणाधारशक्त्यादि तर्पणानन्तरं देवादितर्पणोपदेशः।

यत्तु कैश्चित् ब्रह्मयज्ञानन्तरं देवादितर्पणं कार्यमित्युक्तं; तदाचार्य-पाद श्रीसूक्तिविरुद्धमित्युपेक्ष्यम्। ''यजुश्शाखिनान्तु काण्डानुक्रमण्यां काण्डर्षितर्पणमुक्तं– 'अथ काण्डऋषीनेतानुदकाञ्जलिभिश्शुचिः । अव्यग्रस्तर्पयेन्नित्यं मन्त्रैः पर्वाष्टमीषु च ।' अत्र कपर्दिस्वामी - ''काण्डर्षितर्पणं नित्यमुपेतेन निवीतिना। वार्यञ्जलिभिरन्यैश्च कार्यं पर्वाष्टमीषु च। तर्पणन्तु द्विजः कुर्यात् प्रत्यहं स्नातकस्ततः। देवेभ्यश्च ऋषिभ्यश्च पितृभ्यश्च यथाक्रमं'' इति शातातपादिभिरुक्तेषु तर्पणीयेषु यथास्वशाखं व्यवस्थानुसन्धातव्ये''ति रत्नाकरवचनान्यत्र भाव्यानि। यदपरोक्तं– जीवपितृकस्य पितृतर्पणं न कार्यम्। 'कव्यवाडनलस्सोमो यमश्चैवार्यमा तथा। अग्निष्वात्तास्सोमपाश्च तता बर्हिषदोऽपि च। यदि स्स्याज्जीवपितृक एतान् सन्तर्पयेन्नवे''ति विकल्पोक्तेरननुष्ठाने प्रत्यवायाभावात्, 'अक्रियावदनर्थाय तत्तु कर्मसमाचरे''दिति प्रपन्नान् प्रतिनियमात्–इति । तदयुक्तं– जीवपितृकेष्वपि पितृतर्पणानुष्ठान-दर्शनेनोक्तविकल्पस्याचारव्यवस्थिततया 'येनास्य पितरो याता' इति वचनेनावश्यकतया अकरणे प्रत्यवायस्य दुर्वारत्वात् । अथ वस्त्र-निष्पीडनमाह–निवीती ये के चास्मदित्यादिना। तदुक्तं–शुचौ स्थले

काण्डऋर्षींश्च, कृष्णद्वैपायनादयो ये ऋषयस्तानृषीं स्तर्पयामि । सर्वानृषींस्तर्पयामि । सर्वऋषिगणा-स्तर्पयामि । सर्वर्षि-पत्नीस्तर्पयामि । सर्वर्षिगणपत्नी-स्तर्पयामि । प्रजापतिं काण्डऋषिन्तर्पयामि । सोमं काण्डऋषिन्तर्पयामि । अग्निं काण्डऋषिन्तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तपर्ययामि । साꣳहिती-र्देवता उपनिषदस्तर्पयामि । याज्ञीकीर्देवता उपनिषदस्तर्पयामि । वारुणीर्देवता उपनिषदस्तर्पयामि । ब्रह्माणꣳस्वयंभुवन्तर्पयामि । सदसस्पतिन्तर्पयामि । इत्युदङ्मुखोऽङ्गुष्ठ सक्तनिवीती, सोमः पितृमान्यमोऽङ्गिर-स्वानग्निः कव्यवाहन इत्यादयो ये पितरः तान् पितॄंस्तर्पयामि । सर्वान् पितॄंस्तर्पयामि । सर्वपितृगणांस्तर्पयामि । सर्वपितृपत्नीस्तर्पयामि । सर्व-पितृगणपत्नीस्तर्पयामि । इति सप्रणवं भगवदात्मकान् पित्रादीन् दक्षिणामुखः प्राचीनावीती सन्तर्प्य, उपवीती आचम्य, निवीती *ये के चास्मदिति स्नानवस्त्रश्चतु-र्गुणीकृत्य शुचौ देशे अपसव्यं निष्पीड्य, वामप्रकोष्ठे विन्यस्योपवीती द्विराचम्य, आवाहिततीर्थमन्त्रान्,

स्नानवस्त्रं निवीती निष्पीड्याचम्ये'ति । 'ये के चास्मत्कुले जाता इति मन्त्रेण मानवः' इति रत्नाकराद्युदाहृतवचनादाचाराच्च तन्मन्त्र-करणकमेव वस्त्रनिष्पीडनं कर्तव्यं, स च मन्त्रः काष्र्णाजिनिनोक्त इति मुक्ताफलोदाहृतम् । एतेनामन्त्रकं वस्त्रनिष्पीडनमित्यन्योक्तं परास्तम् ।

* ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः । ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ।

‘‘हे आवाहित तीर्थानि तदर्थमन्त्राश्च ममात्मनि समागच्छते’’ति आह्वानमुद्रया समाहरेत् ।।

अथ ब्रह्मयज्ञक्रमः

—★—

आचम्य, प्राणानायम्य, ब्रह्मयज्ञेन यक्ष्य इति सङ्कल्प्य, विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमीत्यप

अथावाहिततीर्थमन्त्रसमाहरणमाह—आवाहिततीर्थमन्त्रानिति । तदुक्तं—‘आवाहित तीर्थमन्त्रांश्च स्वात्मनि समाहरे’दिति । ‘आवाहिताश्च गङ्गाद्यास्तत्तन्मन्त्रगणास्तथा । अनुज्ञाप्य समारोप्य स्वात्मन्येव समाहितः’’ इति वङ्गिवंशेश्वरोक्तमिह भाव्यम् ।।

ब्रह्मयज्ञं प्रतिजानीते—अथेति । तदुक्तं— ‘‘अथ ब्रह्मयज्ञं प्रत्यक्षतैत्तरीय श्रुत्याद्यनुसारेण उदित आदित्ये कुर्यात् । माध्यन्दिनानन्तरं वा भोजनात् पूर्वं वा यत्र कुत्र चिदवसरे वा’’ । आदिपदेन स्मृतिपरिग्रहः । ननु रत्नाकरादिधर्मशास्त्रनिबन्धनेषु प्रातर्होमानन्तरं ब्रह्मयज्ञानुष्ठानमुक्तं, अत्र कथं होमात्पूर्वं ब्रह्मयज्ञकथनमिति चेन्न–‘उदित आदित्य’ इति ‘प्रत्यक्षत्तैत्तरीयादी’ त्याचार्यपादानुगृहीतत्वात् । ‘उदिते सूर्ये प्रातर्जुहोतीति प्रत्यक्षश्रुतौ प्रातश्शब्दस्य षड्घटिकात्मक कालपरतया ब्रह्मयज्ञानन्तरमपि होमकालसत्त्वेन कर्तुं शक्यत्वात् । अनुष्ठानप्रकारतदङ्गादिप्रतिपादक ब्रह्मयज्ञविधायकश्रुतेः बलीयस्त्वात् । ‘अङ्गेषु यथाश्रयभावः’ इत्यधिकरण श्रीभाष्यं— ‘‘यथोद्गीथादयः उपासनाश्रयाः क्रत्वङ्गतया प्रयोगविधिना नियमेनोपादीयन्ते’’ इति । तत्र श्रुतप्रकाशिका - ‘प्रयोगविधिः अनुष्ठापकत्वदशापन्नविधिः, न तु ज्ञापकावस्थः’ इति ।

उपस्पृश्य, तूष्णीं त्रिरपः प्राश्य द्विः परिमृज्य, सकृदुपस्पृश्य, शिरस्सर्वाभिरङ्गुलीभिः चक्षुषी अनामिकया नासिके तर्जन्या श्रोत्रे कनिष्ठिकया, हृदयं तलेन चोपस्पृश्य शुचौ देशे दर्भानास्तीर्य तत्रासीनस्सपवित्र पाणिद्वंद्वः त्रिः प्राणानायम्य, दक्षिणपादोत्तरमुपस्थं कृत्वा, दक्षिणजानुनि दक्षिणोत्तरौ पाणी कृत्वा, ओं भूर्भुवस्सुवः इति व्याहृतित्रयमुक्त्वा, ओं तत्सवितुर्वरेण्यं, ओं भर्गोदेवस्य धीमहि, ओं धियो यो नः प्रचोदयादिति पादशः गायत्रीमुक्त्वा तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयादित्यर्द्धर्चशश्च ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयादित्यनवानं चोच्चरेत्, इति श्रौतप्रक्रिया। अथ वा, ओं भूः तत्सवितुर्वरेण्यं, ओं

अत्र प्रयोगविधेः ज्ञापकत्वदशापन्नविध्यपेक्षया प्राबल्यमवगतम्। शिष्टाचारेणापि होमात्पूर्वं ब्रह्मयज्ञानुष्ठानमेव सिद्धम्। होमानन्तरं ब्रह्मयज्ञविधायकस्मृतिवचनान्युदाहृत श्रुतिविरुद्धतया विरोधाधिकरणनयेन दुर्बलानि। एतेन इतराह्निकोक्तं प्रातर्होमानन्तरं ब्रह्मयज्ञानुष्ठानं प्रत्युक्तम्।

''ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यान्दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्य' इत्यादि श्रुतिः। अछदिर्दर्शेछदिर्दर्शनरहिते देशे। छदिश्शब्दः गृहाच्छादकतृणादिपरः। 'अथ पटलं छदि'रिति निखण्डुः। ''अत्र कात्यायनः - ''यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञस्स उच्यते' 'ततो वेद एव ब्रह्मयज्ञोऽध्येतव्यः, पैठीनसिः—

''स्वशाखाध्ययनं यत्तत् ब्रह्मयज्ञस्स उच्यते । ब्रह्मयज्ञपरो विप्रो ब्रह्मलोके महीयते ।'' अत्र स्वशाखेति विशेषितत्वादधीतमपि वेदान्तरं ब्रह्मयज्ञे नाध्येतव्यमिति सिद्धम्। कौर्मेऽपि—''यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि । कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमारभेत् । शौनकः प्राणायामैर्दग्धदोषश्शुक्लाम्बरधरश्शुचिः । यथाविध्यप आचम्य आहरेद्दर्भसंस्तरम् । पवित्रपाणी कृत्वा तु उपस्थेदक्षिणोत्तरौ + ब्रह्म यज्ञस्यापि महायज्ञत्वात् 'सर्वेषु यज्ञक्रतुष्विति । होष्यन्नप उपस्पृशेत् । विद्युदसि विद्य मे पाप्नानमिति । अथ हुत्वोपस्पृशेत् । वृष्टिरसि वृश्चमे पाप्मानमि''ति श्रुतेरत्रापि विद्युद्वृष्टी भवतः । ब्रह्मयज्ञेन यक्ष्य'' इत्यादिकं, ''दर्भास्तरितशुचौ देशे उपस्थं कृत्वा प्राङासीनः त्रिः प्राणानायम्य सपवित्रौ दक्षिणोत्तरौ करौ कृत्वा तत्सवितुरिति पच्छोर्ध्वर्चशः ततस्सर्वा व्याहृतीः विहृताः पादादिष्वन्तेषु वा तथार्चयोरुत्तमां कृत्स्नायामिति ब्रह्मोपदेशोक्तक्रमेण सप्रणव-मुच्चार्ये''त्यादि ''स्मृतिरत्नावल्यां - प्रणवं व्याहृतीश्चैव गायत्रीं च जपेत् क्रमात् । पच्छोऽर्ध्वर्चश उच्छ्वासात् वेदादींश्चतुरो जपेत् । शौनकश्च — ओं पूर्वया व्याहृत्या सावित्री मन्वाह पच्छोऽर्ध्वर्चशस्सर्वामिति द्यावापृथिव्यास्समीक्ष्यमाणः सम्मील्य वा । यथा युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत। विष्णुश्च - ओङ्कारं व्याहृतीस्तिस्रो गायत्रीं च तदित्र्यचम् । मनस्येताननुस्मृत्य वेदादीन् समुपक्रमेत् । एवं नित्यं प्रश्नमधीत्य ओं नमो ब्रह्मणे । इति परिधानीयां त्रिरन्वाह । ततो वृष्टिरसीत्युक्त्वा अप उपस्पृश्य गृहानेति । अत्र मनुः । आहैव स नखाग्रेभ्यः परमं तप्यते तपः । यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् । आनखाग्रेभ्य इत्यन्वयः । हेति प्रसिद्धौ । तप्यत एव । स्रग्वीति स्वैराचारं दर्शयति । तथा यदधीतेऽन्वहं शक्त्येति च । भूर्भुवस्सुवस्सत्यं तपश्श्रद्धायां जुहोमीत्युक्त्वा, परिधानीयां त्रिः जपेत् ।

भुवः भर्गोदेवस्य धीमहि,ओं सुवः धियो यो नः प्रचोदयादिति पादशः, ओं भूः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि, ओं भुवः धियो यो नः प्रचोदयात् इत्यर्धश, ओं सुवः तत्सवितुः + चोदयात् इत्यनवानं, ओं भूर्भुवस्सवः तत्स + चोदयादिति चोक्त्वा, वेदादीनुक्त्वा, अधीतक्रमेण स्वशाखायां प्रश्नमनुवाकं वा यथाशक्त्यधीत्य, पुंसूक्तं गायत्रीं दशकृत्वोवाऽधीत्य, ओं भूर्भुवस्सुवस्सत्यं तपः श्रद्धायां जुहोमीत्युक्त्वा, ''ओन्नमो ब्रह्मणे नमो अस्त्स्वग्नये नमः पृथिव्यै नम ओषधीभ्यः, नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि'' इति त्रिरुक्त्वा, पृष्टिरसिवृश्च मे पाप्मानममृतात्सत्यमुपागामित्यप उपस्पृश्याचामेत् ।

ब्रह्मयज्ञविहीनश्च ब्रह्महा कीर्तितो बुधैरिति प्रत्यवायस्मृतेः । अनधीतवेदेनापि ब्रह्मयज्ञे गायत्री यथाशक्ति जप्तव्या । तथा मनुः - अपां समीपे नितयो नैत्यकं विधिमास्थितः । गायत्रीमप्यधीयीत गत्वारण्यं समाहितः । श्रीविष्णुधर्मोत्तरे — 'ब्रह्मयज्ञे जपेत्सूक्तं पौरुषं चिन्तयन् हरिम् । स सर्वान् जपते वेदान् साङ्गोपाङ्गान् समाहितः ।' अतोऽनधीतवेदोऽशक्तो वा ब्रह्मयज्ञे पुरुषसूक्तमेव जपे''दित्युक्तं रत्नाकरवाक्यजातमनुसन्धेयम् ।

यदपरोक्तं—वरदराजीय इत्यादिना विष्णुगायत्र्यष्टाक्षर द्वादशाक्षरषडक्षर मन्त्ररत्नतद्विष्णोरिति सूक्तानां ब्रह्मयज्ञे जप्यत्वं वेदादिपदेन विवक्षितम् । स्मृत्यन्तरे — ''वेदधर्मपुराणानि सेतिहासानि शक्तितः । ब्रह्मयज्ञप्रसिध्यर्थं विद्यां चाध्यात्मिकां जपेत् ।'

एतेन ब्रह्मयज्ञे च 'वेदादींश्चतुरो जपे''दित्यत्र तद्गुणसंविज्ञानो बहुव्रीहिरिति सिद्धमिति । तदयुक्तं—शिष्टेषु वेद गायत्रीपुं सूक्तव्यतिरिक्तानां विष्णुगायत्र्यादीनां जपानुष्ठानाभावात् । 'वेदादींश्चतुर' इत्यत्र तद्गुणसंविज्ञानबहुव्रीहिसमासाश्रयणमप्ययुक्तं' 'वेदधर्मपुराणानी'ति वचने वेदधर्मशास्त्रपुराणेतिहासाध्यात्मविद्यानां पञ्चानां जप्यत्वावगमेन ''चतुर' इत्यनन्वयप्रसङ्गात् । वेदानामादयः वेदादयः, तानिति तत्पुरुषसमास एव चतुर इत्यस्यान्वयोपपत्तेः । न च पूर्वोदाहृतरत्नाकरस्थवचनात् स्वशाखामात्रस्य ब्रह्मयज्ञोऽध्येतव्यत्वं सिद्धं, तत्कथं वेदादीनां चतुर्णां जप्यत्वमिति वाच्यं; 'वेदादींश्चतुरो जपेत्, ओङ्कारं व्याहृतीस्तिस्रो गायत्रीं च तदित्र्यचम् । मनसैताननुस्मृत्य वेदादीन् समुप्रक्रमे'दिति रत्नाकरोदाहृतवचनतः वेदादिभागजप्यत्वविधानात्, शिष्टाचाराच्च स्वशाखाव्यतिरिक्ताध्ययननिषेधस्य प्रश्नानुवाकादिविषयत्वस्य वक्तव्यत्वात् ।

यदप्यपराह्निके— अयं च यतिभिः कार्यः - ''वेदान्तज्ञाननिष्ठो वा पञ्च यज्ञान् समाहितः । कुर्यादहरहः स्नात्वा भिक्षान्नेन चरेद्बहिः । स्वाध्यायञ्चान्वहङ्कुर्यात् सावित्रीं सन्ध्ययोर्जपेत् । अभ्यसेत्सततं वेदं प्रणवाख्यं सनातन''मिति व्यासस्मरणादित्युक्तम् । तदत्यन्तमसाधु । उदाहृतवचनयोः व्यासस्मृतौ प्रसिद्धनिबन्धनेषु चादर्शनात् । ''पञ्चसूना गृहस्थस्य वर्तन्तेऽहरहस्सदा । पेषिणी खण्डिनी छुल्ली उदकुम्भ उपस्करः । एताभिर्वाहयन्विप्रो बध्यते च मुहुर्मुहुः । व्यासः— पञ्चयज्ञांश्च यो मोहान्न करोति गृहाश्रमी । तस्य नायं न च परो लोको भवति धर्मतः ।'' इत्यादिभिः रत्नाकराद्युदाहृत वचनैः पञ्चयज्ञविधानस्य गृहस्थाधिकारित्वावगमात् । ''नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन'' इति यति धर्मसमुच्चयसप्तमपर्वस्थवचनेन

यतेर्वेदाध्ययनादिनिषेधाच्च । वर्णाश्रमकाण्डे व्यासः—अभ्यसेत्सततं वेदं प्रणवाख्यं सनातनम् । नाध्येतव्यं न वक्तव्यं न श्रोतव्यं कथञ्चन ।'' ''नाध्येतव्य' मित्यादिकर्मकाण्डविषया, 'उपनिषदमावर्तये' दित्यादि श्रुतेरिति कर्मकाण्डाध्ययनत्यागोक्तेश्च । श्रीभाष्ये - ऊर्ध्वरेतसो यज्ञाद्य भावात् तदङ्गिका विद्या न सम्भवतीत्याशङ्क्याह - अत एवा-चाग्नीन्धनाद्यनपेक्षा । तेषु विद्या केवल स्वाश्रमविहितकर्मापेक्षेत्यर्थः । सर्वापेक्षा च यज्ञादि श्रुतेरश्ववत् । यदि विद्या यज्ञाद्यनपेक्षैवामृतत्वं साधयति तर्हि गृहस्थेष्वपि तदनपेक्षैव साधयितुमर्हती''ति यतेः यज्ञाभावोऽनुगृहीतः । न च यज्ञशब्दः पञ्चमहायज्ञव्यतिरिक्तविषय इति वाच्यं; लघुसिद्धान्ते — तल्लब्धिः विवेकविमोकाभ्यास क्रियेत्यादिवाक्यस्थक्रियाशब्दस्य ''पञ्चमहायज्ञाद्यनुष्ठानं शक्तितः क्रियेति निर्वचनं, 'क्रियावानेष ब्रह्मविदां वरिष्ठः, तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन'' इति पञ्चमहायज्ञादिपरत्वस्यानुगृहीतत्वात् । ''त्यक्ते यज्ञादिधर्मे परभजनविधेरूर्ध्वरेतस्सु दृष्टये''ति श्री सारावली श्रीसूक्त्या ''यज्ञेन दानेन तपसानाशकेने'ति यज्ञादेर्ब्रह्मविद्याङ्गत्वेनोपदेशात् यज्ञाद्यनधि-कृतेषूर्ध्वरेतस्सु यज्ञादिधर्मपरित्यागेऽपि परभजनविधेः दृष्टत्वा'' दित्यादिकया अधिकरण चिन्तामणि श्री सूक्त्याचोपदर्शित श्रीभाष्यार्थस्यैव प्रदर्शितत्वात् ।

श्री तत्वटीकायां ''यज्ञोपादानं गृहस्थोऽपि विमुच्यत इति स्मृति सूचनार्थ''मिति पञ्चमहायज्ञादीनां गृहस्थैकान्तत्वं ह्यनुगृहीतम् । पञ्चमहायज्ञानां गृहस्थधर्मत्वं ''लब्ध्वानुज्ञां गुरोस्स्नात्वा सम्प्राप्य विधिवत्स्त्रियम् । तया सह चरेद्धर्मं नित्यं स्वाध्यायतत्परः । स्नातकव्रतशाली च पञ्चयज्ञपरायणः'' इत्यहिर्बुध्न्यसंहिता

पञ्चदशाध्यायवचनसिद्धम् । यतिषु पञ्चमहायज्ञाचारः क्वापि नास्ति । अतः प्राचीनसत्पथान्यधाकरणसम्भ्रमोऽज्ञानविजृम्भितः । यतेः पञ्चमहायज्ञानुष्ठानकथनं प्रमाणाचार्य श्रीसूक्तिविरुद्धमिति सद्भिरुपेक्ष्यम् । यदप्यपराह्णिके - विधुराद्यैरपि ब्रह्मयज्ञः कार्यः - अनाश्रमिणामपि विद्यानुग्रहः स्मर्यते—"जप्येनापि च संसिध्येत् ब्राह्मणो नात्र संशयः । कुर्यादन्यं न वा कुर्यान्मैत्रो ब्राह्मण उच्यत' इति । संसिध्येत् = जपाद्यनुगृहीतया विद्यया सिद्धो भवतीत्यर्थ इति श्रीभाष्ये भाषितत्वात् इदं मनुवचनं ब्रह्मयज्ञपरं; 'ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशी''मिति तत्पूर्ववचनम् । "अयज्ञो वा एषः । योऽपत्नीकः" इति श्रुतौ यज्ञशब्दोऽग्निसाध्ययज्ञपरः, अन्यथा 'कुर्यात् प्रतिदिनं वर्णी ब्रह्मयज्ञं च तर्पण'मिति स्मृतेरुक्त श्रुतिविरुद्धत्वेनाप्रामाण्यात् ब्रह्मचारिणोऽपि न स्यात् - इति ब्रह्मयज्ञस्य विधुरादिकार्यत्वमुक्तम् । तदाग्रह-मूलकभ्रममूलं; श्रीभाष्यादिविरुद्धत्वात् । 'अन्तराचापि तु तद्दृष्टे'रित्यधिकरण श्रीभाष्ये - "न चाश्रमधर्मैरेव विद्यानुग्रह इति शक्यते वक्तुं, यज्ञेन दानेन तपसानाशकेनेति दानादीनामाश्रमेष्व-नैकान्तिकानामप्यनुग्राहकत्वश्रवणात् । तथानाश्रमिष्वपि विद्यादर्शनात् आश्रमानियतैर्जपोपवासदानदेवताराधनादिभिर्विद्यानुग्रहश्शक्यते कर्तु''मिति आश्रमानियतजपोपवासादिभिरनाश्रमिणां विद्यानिष्पत्ति-मभिधाय "अपि स्मर्यते । अनाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते । 'जप्येनापि च संसिध्ये'दिति मनुवचनमुदाहृत्य 'संसिध्येत् - जपाद्यनुगृहीतया विद्यया सिद्धो भवती'त्यनुगृहीतम् । ब्रह्मयज्ञः नाश्रमानियतः; उदाहृत तत्वटीका श्रीसूक्त्यहिर्बुध्न्यसंहिता वचनादिभिस्तस्याश्रमनियतत्वावगमात् । श्री तत्वटीकायां 'क्रियावाने

ब्रह्मविदा' मिति श्रुत्यतर्थविचारे ''मत्वर्थीयस्य भूमपरतया विधुरादि-ब्रह्मयज्ञविद्याव्यावृत्तिपरं वा तेषां हि वर्णधर्ममात्रयोगित्वादरत्वं अतस्त्वितरज्ज्यायो लिङ्गाच्चेति सूत्रसिद्ध' मित्यादिना 'क्रियाशब्दस्य चित्तसमाधानादिमात्रव्यावृत्त्यैवमेतमित्याद्युपात्तमि'' त्यन्तेन वाक्येन, ''दारालाभे विरक्तेर्मृदिमनि च भवेदन्तरेणाश्रमान्यस्तस्मिन् निश्शेषधर्मत्यजि भवतु कथं ब्रह्मविद्येति चेन्न । सामान्यैर्वर्ण-धर्मैर्गुणनियतियुतैस्साहि तत्रापि साङ्गे'' ति श्री सारावली श्री सूक्त्या च विधुरादीनां वर्णधर्ममात्रयोगित्वं ह्यनुगृहीतम् । उदाहृतमनुवचन-स्थजप्यशब्दो न ब्रह्मयज्ञपरः, प्रकरणव्याख्यादिविरोधात् । तत्स्मृतिद्वितीयाध्याये — ''विधियज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुस्स्याच्छतगुणस्सहस्रो मानसः स्मृतः'' इति जपयज्ञस्य क्रियारूपयज्ञात् श्रैष्ठ्यमुपांशुमानसजपफलभेदश्चाभिधाय 'ये पाक यज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशी'' मिति पूर्ववचनप्रतिपन्नजपयज्ञं प्रशस्य 'जप्येनापि च संसिध्ये' दित्यनेना श्रमविशेषानियतजपाद्यनुगृहीतविद्यया ब्रह्मप्राप्ति-रभिहिता । मनुस्मृतिव्याख्याने उदाहृतमनुवचनमेवं व्याख्यातं - जप्येनेति । ब्राह्मणः जप्येनैव निस्सन्देहां सिद्धिं लभते । मोक्षप्राप्तियोग्यो भवति । अन्यत् यागादिकं करोतु न करोतु वा । यस्मान्मैत्रो ब्राह्मणः । ब्रह्मणस्सम्बन्धी । ब्रह्मणि नियत इत्यागमेषूच्यते। मित्रमेव मैत्रः । स्वार्थेऽण् प्रत्ययः । यागादिषु पशुबीजादिवधान्न सर्वप्राणिप्रियता भवति । तस्माद्यागादिना विनापि प्रणवादिजपनिष्ठो निस्तरतीति जपप्रशंसा । न तु यागादीनां निषेधः । तेषामपि शास्त्रीयत्वादिति ।
10 हारीतस्मृतौ चतुर्थेऽध्याये — ''प्राणायामत्रयं धीमान्

यथान्यायमतन्द्रितः । जपयज्ञं ततः कुर्यात् गायत्रीं वेदमातरम् । त्रिविधा जप यज्ञस्स्यात्तस्य तत्त्वं निबोधत । वाचकश्च उपांशुश्च मानसश्च त्रिधा मतः । त्रयाणामपि यज्ञानां श्रैष्ठ्यं स्यादुत्तरोत्तर''मिति जपयज्ञशब्दः मन्त्रजप एव प्रयुक्तः । अत्रिस्मृतौ द्वितीयेऽध्याये— आलम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुस्स्याच्छत-गुणस्सहस्रो मानसः स्मृत'' इति जपयज्ञपदं मन्त्रावर्तनपरं प्रयुक्तम् । भगवद्गुणदर्पणे — 'किञ्जपन्मुच्यते जन्तु'रित्येतद्व्याख्याने नियमविशेषवन्मन्त्राद्यावर्तनं जपः । ''जप्येनापि च संसिध्येत् ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यात् मैत्रो ब्राह्मण उच्यते । द्रव्य यज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः ।'' 'यज्ञानां जपयज्ञोऽस्मी'ति जपश्रैष्ठ्या''दित्यादिना उदाहृतमनुवचनस्थजप्यपदस्य ब्रह्मयज्ञव्यति-रिक्तजपपरत्वमुपवर्णितम् । अतोऽत्र जप्यपदं न ब्रह्मयज्ञपरम् । किन्तु तद्व्यतिरिक्तमन्त्राद्यावर्तनपरमेवेति । यच्चोक्तं—'अयज्ञो वा एषः याऽपत्नीक' इति श्रुतौ अग्निब्दोऽग्निसाध्ययज्ञपरः । अन्यथा — ''कुर्यात् प्रतिदिनं वर्णी ब्रह्मयज्ञं च तर्पण''मिति स्मृतेरुक्त श्रुतिविरोधेन ब्रह्मचारिणोऽपि ब्रह्मयज्ञो न स्यादिति । तन्मन्दं पूर्वोपदर्शित श्रीभाष्यलघुसिद्धान्त श्रीसूक्त्यनुसारेण पञ्चमहाय-ज्ञसाधारणतयावगतस्य यज्ञशब्दस्य यज्ञविशेषे संकोचाभावात् । उक्तश्रुतेरपत्नीकसामान्यविषयतया कुर्यात् प्रतिदिनमिति विशेष-शास्त्रविहितब्रह्मयज्ञस्य ब्रह्मचारिणि निराबाधात् । अहो भवतां महत्त्वं मीमांसकत्वस्य; यदुत्सर्गेणापवादबाधवर्णने प्रवर्तयति । ''विरोधाधि-करणस्य स्पष्टार्थ श्रुतिविषयत्वादि'ति श्रीस्तोत्रभाष्येऽनुगृहीतत्वे-नोक्तसामान्य श्रुत्योक्तस्मृतिविशेषबाधवर्णनस्य हास्यत्वात् ।

प्रातर्ब्रह्मयज्ञाकरणे माध्याह्निकानन्तरं तर्पणात्पूर्वं वैश्वदेवावसाने वा ब्रह्मयज्ञं कुर्यात्।

रत्नाकरे—विधुरं प्रकृत्यत्रिः "साग्निकः पितृयज्ञान्तं बलिकर्म समाचरेत् । अनग्निर्हुतशेषन्तु बलिं काकबलिं हरेत् । पुरुषयज्ञादृते नान्यदनग्नेस्तु महामखे ।" तु शब्दाभ्यां देवादियज्ञचतुष्टयं व्यावर्तते । स्वाध्यायाविस्मृत्यर्थं वेदमधीयीत, न ब्रह्मयज्ञं कुर्यादिति विशेष्यते । 'पञ्चक्लृप्ता महायज्ञाः प्रत्यहं गृहमेधिना' मिति पराशरेण पञ्चमहायज्ञानां गृहमेधिविषयत्वस्मरणात् । मनुष्येभ्यो दानमिति न विरोधः ।" इति अनाश्रमिणां ब्रह्मयज्ञनिषेधः स्थापितः । भवदभिमत-वैकुण्ठदीक्षितीये— 'अयज्ञो वा एषः योऽपत्नीकः' इति श्रुतिं प्रस्तुत्य पाणिग्रहणादधिगृहमेधिनो व्रतमित्यादिभिः पञ्चमहायज्ञानां गृहमेधिविषयशिष्टत्वात् अपत्नीकस्यायज्ञत्व श्रुतेश्च न विधुरस्य ब्रह्मयज्ञप्रसङ्गः । ब्रह्मचारिभिस्तु ब्रह्मयज्ञः कर्तव्य एव । तथा च नारदीये—"सायं प्रतस्त्वग्निकार्यं यथाकालं जितेन्द्रियः । कुर्यात् प्रतिदिनं वर्णी ब्रह्मयज्ञं च तर्पणमि' ति रत्नाकरपक्ष एवादृतः । अतः प्रमाणाचार्य श्रीसूक्ति शिष्टानुष्ठानविरुद्धं विधुरादिब्रह्मयज्ञानुष्ठान-वर्णनमिति सद्भिर्विभावनीयम्।

श्रुत्युक्तकाले ब्रह्मयज्ञानुष्ठानासम्भवे कालान्तरे तत्करणमाह— प्रातरित्यादिना । माध्याह्निकानन्तरं तर्पणात् पूर्वमिति । अत्र "अथ ब्रह्मयज्ञं प्रचक्षते तैत्तरीये" त्याद्याचार्यपाद श्रूसूक्तिः पूर्वं प्रदर्शिता । व्यासस्मृतौ — "ततो मध्याह्नसमये स्नानार्थं मृदमाहरे' दित्युपक्रम्य, 'प्रदक्षिणं समावृत्य नमस्कुर्यात्ततः क्षितौ । निष्पीड्य स्नानवस्त्रं तु

द्विराचम्य......' इत्यन्तैर्वचनैर्माध्याह्निकस्नानसन्ध्योपासन गायत्री-जपप्रदक्षिणनमस्कारवस्त्रनिष्पीडनान्युक्त्वा ''ततस्सन्तर्पयेद्देवान् ऋषीन् पितृगणानपि। आदावोङ्कारमुच्चार्य नामान्ते तर्पयामि च। देवान् ब्रह्मऋषींश्चैव तर्पये दक्षतोदकैः। तिलोदकैः पितॄन् भक्त्या सूत्रोक्तविधिना ततः'' इत्यादिना देवर्षितर्पणं विहितम्। श्रीपाञ्च-रात्ररक्षायां श्रीपञ्चरात्र व्यासस्मृत्यैककण्ठ्यसमर्थनावसरे ततस्तृतीय-कालकर्तव्यमाह — ''ततो मध्याह्नसमये स्नानार्थं मृदमाहरे'' दित्यादिना। 'स्नाने चैवं भगवदनुसन्धानमाह— ''अभिमन्त्र्य जलं मन्त्रैरब्लिङ्गैर्वारुणैश्शुभैः। भावपूतं तदव्यग्रं ध्यायन्वै विष्णुमव्ययम्। आपो नारायणोद्भूतास्ता एवास्यायनं पुनः। तस्मान्नारायणं देवं स्नानकाले स्मरेद्बुधः।'' इत्यादिना स्नानेब्लिङ्गवारुणादिमन्त्रकरणकत्व नारायणस्मरणादिकं विधाय ''तर्पणे ''आदावोङ्कारमुच्चार्ये'त्यादि सार्द्धश्लोकमुदाहृत्य'' ''अत्र प्रणवपूर्वकत्वेन भगवदात्मकत्वानुसन्धानं विहितम्। तदेव नित्ये भाष्यकारैरपि दर्शितम्। देवान् ऋषीन् पितॄन् भगवदात्मकान् ध्यात्वा सन्तर्प्ये''ति माध्याह्निकानन्तरकर्तव्य-देवर्षितर्पणं भाष्यकारानुगृहीतमिति दर्शितम्। तत्स्मृतावुत्तरत्र वैश्वदेवपञ्चमहायज्ञादिकं प्रतिपाद्य ''यदि स्यात्तर्पणादर्वाक् ब्रह्मयज्ञः कृतो न हि। कृत्वा मनुष्ययज्ञं वै ततः स्वाध्यायमारभे''दिति तर्पणात् पूर्वं ब्रह्मयज्ञाकरणे मनुष्ययज्ञानन्तरं ब्रह्मयज्ञो विहित इति तर्पणात्पूर्वमपि ब्रह्मयज्ञानुष्ठानकालोऽस्तीति प्रतीयते। एवं रत्नाकरादिनिबन्धनेषु तर्पणात्पूर्वं ब्रह्मयज्ञविधायकानि वचनानि प्रदर्शितानि। एवञ्च–माध्याह्निकसन्ध्योपास्त्यनन्तरं व्याससमृति-

विहितदेवर्षिपितृतर्पणानामाचार्यपादानुगृहीतत्वादुक्ततर्पणानुष्ठानं नास्तीति कस्यचित् वचनमविमर्शकृतमेवेति बोध्यम्।

"सन्ध्योपासनानन्तरकृत्यश्चैवं विवृतं— अभिवाद्य गुरून् वृद्धान् तथा भागवतान् क्रमात् । प्रविश्य स्वाश्रमं देवमभिगम्य यथाविधी"त्याचार्यपादानुगृहीतत्वेन सन्ध्योपास्त्यनन्तरं गुर्वादिवन्दनं कार्यम् । यदुक्तं गोविन्दराजीये— "विनीतवदुपागम्य राघवौ प्रणिपत्य च" इति रामायणश्लोके। अत्र भिक्षुरूपस्य हनुमतः गृहस्थ श्रीराम प्रणामावगमात् अन्यत्रापि भिक्षुणा गृहस्थवन्दनं कार्यमिति विज्ञायते । संन्यासिनो गृहस्थादिप्रणामनिषेधकवचनानि अनभिज्ञ-गृहस्थविषयाणीति मन्तव्यानि । यदि हि ज्ञानाधिकं गृहस्थं दृष्ट्वा कर्ममात्रेणाधिको यतिर्न प्रणमेत्, तर्हि 'विप्राणां ज्ञानतो ज्यैष्ठ्य'मिति मनुवचनं विरुध्येत । न हि तत्प्रणामनिषेधकमनुवचनं क्रिञ्चिद्दृश्यते, किन्तु अनारभ्याधीतमदृष्टाकरं यत्किञ्चित् यतिप्रणाम-निषेधकवचनं किं वदन्ती सिद्धं, तस्य विषयोऽज्ञगृहस्थादिरूपः" इति । तदसङ्गतं–तत्र भिक्षुपदस्य याचकपरत्वेन यतिपरत्वासम्भवात्। तथा हि– कृत्येषु वाली मेधावी राजानो बहुदर्शनाः । भवन्ति परहन्तारस्ते ज्ञेयाः प्राकृतैर्नरै"रिति श्लोकः । एवं गोविन्दराजीये व्याख्यातः– "कृत्येष्विति। कृत्येषु कर्तव्यकार्येषु वाली मेधावी दूरदर्शी । स्वभावश्चायं राज्ञामित्याह– राजान इति। बहुदर्शनाः बहूपायज्ञाः । परहन्तारो भवन्ति, ते प्राकृतैः दीनवेषधरैः ज्ञेयाः" तौ त्वया प्राकृतेनैवगत्वा ज्ञेयौ प्लवङ्गमे"ति । तत्र गोविन्दराजीयव्याख्या 'प्राकृतेन प्राकृतवेषेणे'ति । उदाहृतश्लोकव्याख्यानुसारेण उत्तरस्य

''कपिरूपं परित्यज्य हनुमान्मारुतात्मजः। भिक्षुरूपं ततो भेजे ततो भेजे शठबुद्धितया कपि''रिति श्लोकस्यार्थपरामर्शे श्रीरामलक्ष्मण-दर्शनभीतेन महाराजेन 'ते ज्ञेयाः प्राकृतैर्नरै'रिति राजनीतिं प्रदर्श्य'तौ त्वया प्राकृतेनैव गत्वा ज्ञेयौ प्लवङ्गमे'त्याज्ञप्तो हनुमान् कपिरूपं परित्यज्य भिक्षुरूपं भेज इत्यर्थलाभात् प्राकृतशब्दस्थानपठितं भिक्षुपदं दीनवेषधरचारपरमिति प्रतीयते। न हि प्राकृतशब्दः सन्यासिपरो युक्तः, 'प्राकृतस्तब्ध' इति श्री गीतास्थप्राकृतपदं ह्यनधिगतविद्य इति श्री गीताभाष्ये विवृतम्। नह्यज्ञस्य सन्यासेऽधिकारः। 'इति हासपुराणाभ्यां श्रुत्या च प्रतिबोधितः। यतते परमं स्थानं यतनात्स यतिर्भवेत्। चीर्णवेदव्रतो विद्वान् ब्राह्मणो मोक्षमाश्रयेत्' इत्यादिभिः यतिधर्मसमुच्चय-द्वितीयपर्वस्थवचनैः, ''प्रवृत्तिलक्षणो योगो ज्ञानं सन्यासलक्षणम्। तस्मात् ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान्'' इत्याश्वमेधिकपर्व त्रयस्त्रिंशाध्याय वचनेन चेतिहास पुराण श्रवणाधीन ज्ञानवेदव्रतादिविशिष्टस्य ज्ञानं पुरस्कृत्य सतः संन्यासाधिकाराव-गमात्। 'दीनवेषधरै'रिति स्वव्याख्याविरोधाच्च। 'निस्वस्तुदुर्विधो दीनो दरिद्रो दुर्गतश्च स'' इति निखण्डुः। कच्चित्सर्गस्थस्य कच्चिदष्टादशान्येष्वि'ति श्लोकस्य व्याख्याने–'तथोक्तं नीतिशास्त्रे 'चारान्विचारयेत्तीर्थेष्वात्मनश्च परस्य च। पाषण्डादीनविज्ञाता नन्योन्यमितरैरपि' इति स्वेनैव पाषण्डादिरूपत्वं चाराणामुक्तम्। श्रीभागवते चतुर्थस्कन्धे एकोनविंशोऽध्याये– 'कपालखट्वाङ्गधरं वीरो नैनमबाधत। यानि रूपाणि जगृहे इन्द्रो हयजिहीर्षया। तानि पापस्य षण्डानि लिङ्गं पाषण्डमुच्यते। एवमिन्द्रो भरत्यश्वं वैरियज्ञजिघांसया। तद्गृहीतविसृष्टेषु पाषण्डेषु मतिर्नृणाम्। धर्म इत्युपधर्मेषु नग्नरक्तपटादिषु।

प्रायेण सज्जते भ्रान्त्ये''त्यादिवचनैः पाषण्डवेषः रक्तवस्त्रकपालधारणरूपः प्रतीयते । विज्ञानेश्वरीयप्रायश्चित्तप्रकरणे– 'पाषण्डानाश्रिता' इत्येतद्व्याख्याने –''नरशिरः कपालादि श्रुतिबाह्यलिङ्गधारणं पाषण्डम् । तद्येषान्ते पाषण्डिनः'' इत्युक्तम् । मुद्राराक्षसनाटके प्रथमाङ्के– 'प्रयुक्ताश्च स्वपक्षपरपक्षयोरनुरक्तापरक्तजनजिज्ञासया बहुविधवेषभाषाचारसञ्चारवेदिनो नानाव्यञ्जनाः प्रणिधयः' इत्यादेः ''स मया क्षपणकलिङ्गधारी'त्यन्ता द्वाक्याच्चास्य क्षपणकलिङ्गधारणं प्रतीयते । लोकेऽपि राजकलहकाले देशसञ्चारिणो याचकान् तद्वेषधरचारत्वभ्रान्त्या कारागारे रुन्धन्ति । नहि यतेः भगवदवतारतया स्मृतिसिद्धस्य पाषण्डादिरूपत्वं भवति । अत्र ''भिक्षुरूपं ततो भेजे, भिक्षुरूपप्रतिच्छन्नं, भिक्षुरूपं परित्यज्य'' इति भिक्षुपदान्येव प्रयुक्तानि । ''परिव्राजकरूपधृक्, श्लक्ष्णकाषायसंवीतशिखी छत्री उपानही । वामे चांसेऽवसज्याथ शुभे यष्टिकमण्डलू ।'' इति परिव्राजकयष्टिकमण्डल्वादि पदानि रावणे प्रयुज्यन्ते, न हनूमति । ''मर्यादानां च लोकस्य कर्ता कारयिते'ति प्रशंसितेन श्रीरामरूपभगवताऽत्रिभरद्वाजसुतीक्ष्णागस्त्यविषय इव तत्सहधर्मचारिण्या वैदेह्या रावणमुद्दिश्येव हनुमतः संन्यासित्वे तत्प्रणामादिकं कृतं स्यात्, न तथा ग्रन्थे दृश्यते ।

'विप्राणामि'ति मनुवचनं न यतेः गृहस्थप्रणामविधायकं, येन तत्प्रणामनिषेधवचनानामज्ञगृहस्थविषयता स्यात् । किन्तु विप्राणां ज्ञानहीनापेक्षया ज्ञानिनः श्रैष्ठ्यपरम् । यतेः गृहस्थप्रणामनिषेधकमनुवचनं नास्तीति यतेर्गृहस्थप्रणामस्सिध्यतीति कथनमप्यसङ्गतं,

अथ तीर्थासन्नविष्णवायतनं विविक्षुः "प्रासादं देवदेवीयमाचार्यं पाञ्चरात्रिकम् । अश्वत्थं च वटं धेनुं सत्समूहं गुरोर्गृहम् । दूरात् प्रदक्षिणीकुर्यान्निकटे प्रतिमां विभोः । दण्डवत् प्रणिपातैश्च नमस्कुर्याच्चतुर्दिशम् ।" इत्युक्तरीत्या प्रदक्षिणीकृत्य दण्डवच्चतुर्दिक्षु युग्मान् प्रणामान् कृत्वा, विष्वक्सेनं द्वारपालांश्च प्रणम्यानुज्ञाप्य, भगवन्मन्दिरं प्रविशेत् । ततो भगवन्तमष्टाङ्गादिप्रणामेन यथार्हं प्रणम्य, भगवतः पुरतः शास्त्रोक्त-

---

"स्वधर्मस्थान् यतीन् वृद्धान् देवांश्च प्रणमेद्यतिः । नान्यमाश्रमिणं कञ्चित् प्रशस्तमपि तन्नमेत्" इति यतिधर्मसमुच्चयनवमपर्वोपात्तवसिष्ठ-वचनेन प्रशस्तगृहस्थनमस्कारस्य निषिद्धात् । मनुस्मृतिनिषेधवचनमेवापेक्षितमिति नियमाभावात् । विस्तरस्तु श्रीपरकालस्वाम्यात्रेय वेङ्कटाध्वरिकृतयतिप्रतिवन्दनखण्डनयोरनुसन्धेयः । अतो यतेः गृहस्थवन्दनकथनं श्रीरामायण श्लोक पूर्वोत्तरस्वव्याख्याराजनीति धर्मशास्त्रलोकवृत्तान्तविरुद्धमिति बोध्यम् ।

ततः तीर्थासन्नभगवदालयप्रवेशादिकमाह —अथ तीर्थासन्नेत्यादिना । तदुक्तं– "तीर्थस्नानसमनन्तरं महाभारतोक्तप्रकारेण तीर्थासन्न-विष्णवायतनं च नमस्कुर्या"दित्यादिना, "प्रवेशे निर्गमे चैव विष्वक्सेन नतिं चरेत्" "आचार्यदर्शने भगवन्नामग्रहणे चाञ्जलिबन्धादिकं तत्र तत्रोक्तं ग्राह्यम् । दर्शितश्चायमाचारः सम्भवपर्वणि व्यासप्रस्तावे – "महर्षेः कीर्तनात्तस्य भीष्मः प्राञ्जलिरब्रवी" दित्यादिना । "श्रीशाण्डिल्यस्मृतौ – "निधाय दण्डवद्देहं प्रसार्य चरणौ करौ । बध्वा मुकुलवत्पाणी प्रणामो दण्डसंज्ञिकः। पादौ शिरस्तथा हस्तौ

द्वात्रिंशदपचारादि गन्धरहितो दक्षिणतः स्थित्वा, गुरुपरांपरया भगवन्तं शरणमुपगम्य पावनमनोहरतद्दर्शनानन्दबृंहितसर्वाङ्गस्तादृशशरणागतिफलभूततत्कालोत्पन्नभगवत्प्रेमपरीवाहरूपाणि स्तव्यस्तवप्रियवशीकरणानि स्तोत्राणि पठेत्। तत्र च भगवत्प्रसादलब्ध तुलसीदलपादोदकादिकं यत्किञ्चिदपि प्रणिपातपुरस्सरं सहर्षोत्फुल्लकपोलः शिरसा संभाव्य यथार्हमुपयुञ्जीत। एवं भगवत्सेवया आत्मानं कृतार्थं मन्यमानः भगवदनुज्ञया कञ्चिन्निभृतमुपविश्य जपादिभिरुपासीत। ततः ''चक्रवत् भ्रामयेन्नाङ्गं पृष्ठभागं न दर्शयेत्। पश्चाद्भागेन निर्गच्छेद्देवतासन्निधौ सुधी''रित्युक्तनियमविशिष्टः परिहृतापचारः प्रणम्य विष्वक्सेनादीनप्यनुज्ञाप्य निर्गत्य वारिपूरितं सुवर्णरजतताम्रादिपा

निकुञ्च्य मुकुलाकृती। मनोबुध्यभिमानैश्च प्रणामोऽष्टाङ्गसंज्ञितः। समस्तिष्क-प्रणामस्स्यादञ्जलिं मस्तके न्यसेत्। प्रणामस्संपुटस्स स्यात् हृदयेऽञ्जलिमर्पयेत्। प्रह्वाङ्गस्संपुटं कुर्यात्सा प्रह्वाङ्गनमस्क्रिया। मस्तिष्कं संपुटं चैव प्रह्वाङ्गं च त्रयं बुधैः। कृतयोरनयोः कार्यमन्यथा विकलं भवेत्। श्रीसात्वते – मनोबुध्यभिमानेन सह न्यस्य धरातले। कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम्'' इति। प्रदक्षिणसमेतेन त्वेवंरूपेण सर्वदा। अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतो विभो''रिति ''भगवतीव सम्यक् ज्ञानप्रदातृष्वपि भक्तिप्रकर्षादीदृशाः प्रणामा उपपद्यन्ते। 'भगवद्वन्दनं स्वाद्यं गुरुवन्दनपूर्वकम्। क्षीरं शर्करया युक्तं स्वदते हि विशेषतः। नमस्कारोऽत्र विज्ञेयः प्रणिपातपुरस्सरः।

आचार्यादन्यतो ज्ञेया या केवलनमस्क्रिये''ति श्रीस्तोत्रभाष्यस्थ श्रीसूक्तयोऽनुसन्धेयाः। एतद्विस्तरस्तत्र तत्र श्रीपाञ्चरात्ररक्षायां च द्रष्टव्यः । भगवदपचारभेदप्रमाणानि श्रीपाञ्चरात्ररक्षादौ विस्तरेण प्रदर्शितानि।

''भगवदालयलब्धतुलसीपादोदकादिकं यथार्हमुपयुञ्जीते''ति श्री पाञ्चरात्ररक्षोक्तेरालयलब्धचन्दनकुसुमादिकमुपवासदिने धार्यमिति केषाञ्चिदुक्तिः परास्ता । श्रीपौष्करसप्तत्रिंशाध्यायवचनानि ''ततः प्रदक्षिणीकृत्य द्विचतुस्सङ्ख्यया‌ब्जज। नैकत्रिपञ्चसप्ताख्यगणना विषमं हि यत्। यतस्समो हि भगवान् देवस्सर्वस्य वै स्वयम्। स्मरन्नष्टाक्षरं बुध्या असकृद्वितते क्षितौ। सङ्कटे सति भूभागे भगवत्यग्रतः स्थितः। यथा तु भक्तितः कुर्याद्बध्वा तु करसम्पुट''मित्यन्तानि; पारमेश्वराष्टाध्यायस्थवचनानि च ''द्विधा प्रदक्षिणं कुर्यात् प्रणामं च तथाविधम्। नैकत्रिपञ्चसप्ताख्यगणनाविषमं हि यत्। यतस्समो हि भगवान् देवस्सर्वस्य वै हरिः।'' इत्यादीन्यत्रानुसन्धेयानि।

आचार्यैस्सह भगवदालयगमने आचार्यानुवर्तनमेव कार्यम्। न भगवदनुवर्तनम् । 'आचार्योपासनं शौचम् । देवमिवाचार्यमुपासीते'त्यादिप्रमाणप्रतिपन्नाचार्योपासनस्य प्राचार्यसन्निधौ यथा अपवादोऽस्ति तथापवादाभावात् आचार्यानुशासने सति भगवदनुवर्तनं कार्यं, ''तमिमं सर्वसंपन्नमित्यादिகளில்படியே सर्वपरमाचार्यனான सर्वेश्वरन् सन्निधिயில் आचार्यानुशिष्टமான भगवदनुवर्तनं प्रधानमि'ति श्री प्रधानशतक श्रीसूक्तेः । आचार्यप्राचार्यसमवाये प्राचार्यानुवर्तनविधाय्यपवादशास्त्रादाचार्यानुवर्तनविधायिशास्त्रं तदाचार्यसन्निधान-व्यतिरिक्तविषयम् । तद्वत् आचार्यानुशासनं

त्रमादाय, पाषण्डादिदर्शनालापवर्जितः गृहमागत्य सुप्रक्षालितपाणिपादः स्वयं पूर्वाहृतेन मणिकस्थेन वा वारिणा स्वगृहं सम्प्रोक्ष्य स्वसूत्रोक्तप्रकारेण औपासनाग्निं भगवदात्मकं हुत्वा, स्रक्चन्दनवासोभूषणताम्बूलाद्यलङ्कृतः सुप्रक्षालितपाणिपादो यागगृहं प्रविश्य दूरात् द्वारपालान् प्रणम्यानुज्ञाप्य निकटे गत्वा "कौसल्या सुप्रजाराम पूर्वा सन्ध्या प्रवर्तते । उत्तिष्ठ नरशार्दूल कर्तव्यं दैवमाह्निकम् ॥ वीर सौम्य प्रबुध्यस्व कौसल्यानन्दवर्धन । जगद्धि सर्वं स्वपिति त्वयि सुप्ते नराधिप ॥" "यामिन्यपैति यदुनाथ विमुञ्च निद्रामुन्मेषमृच्छति तवोन्मिषितेन विश्वम् । जातः स्वयं

भगवत्सन्निधावाचार्यानुवर्तनापवादरूपमिति हृदम् । न च श्री पाञ्चरात्ररक्षायां— "अप्रणामस्तदग्रत' इति भगवदग्रे प्रणामाकणस्यापचारत्वावगमात् आचार्यसन्निधौ तदनुशासनाभावेऽपि भगवत् प्रणामादिकं कार्यमिति वाच्यम् । तस्याचार्यासन्निधिविषयत्वस्याङ्गीकार्यत्वात् । भगवदाचार्यकैङ्कर्ययोः युगपदनुष्ठानविरोधे भगवत्कैङ्कर्यत्यागे नाचार्यकैङ्कर्याङ्गीकारस्य "அவ்விரண்டிலும் प्रधानம் आचार्यकैङ्कर्यம். भगवान् பக்கலிலே போலே" इत्यादि "आचार्यकैङ्कर्यத்தைவிட்டு भगवत्कैङ्कर्यादि களிலே இழியக் கடவனல்லன்" इति रहस्यरत्नावलीतद्धृदयप्रतिपादितप्रमाणसहितन्यायस्य भगवदाचार्यप्रणामविषयेऽपि तुल्यत्वात् । तथैव सत्सम्प्रदायस्थाचार्यशिक्षितशिष्टाचारदर्शनाच्च ।

पाषण्डादिदर्शनालापादिवर्जितः गृहमागत्येति । "पाषण्डा-

खलु जगद्धितमेव कर्तुं धर्मप्रवर्द्धनधिया धरणी तलेऽस्मिन् ।। सुखाय सुप्रातमिदं तवास्तु जगत्पते जागृहि नन्दसूनो । अम्भोजमन्तश्शयमञ्जुतारलोलम्बमुन्मीलतु लोचनन्ते'' इत्यादिभिर्भगवन्तं प्रबोध्य, पत्रपुष्पफलादिभिर्देशकालानुगुण्येनार्चयित्वा, अष्टाङ्गेन प्रणम्य भक्तिभारावनमितस्सन् द्वयमुच्चार्य, तदर्थ-

---

वेक्षणादीनि वर्जयेद्यत्नतः पथि । पाषण्डादिभिरालापदर्शनादीनि वर्जये'दिति वङ्गिवंशेशनारायणमुन्युक्तमिहानुसन्धेयम् । यदपरोक्तं– अवैष्णवैः सम्भाषणादिकं न कार्यं, 'सम्प्रश्नासनदानानि न कुर्यादानृशंस्यत' इति भरद्वाजसंहितोक्तेरिति। तन्न - अवैष्णवं न वन्देत नार्चयेद्विधिपूर्वकम् । सम्प्रश्नासनदानानि कुर्याद्वाप्यानृशंस्यतः । अभक्तमच्युतस्यापि नावमन्येत कश्चन । हितं वा बोधयेत्साधोर्दद्याद्वा किञ्चिदीप्सितमि'ति भरद्वाजसंहितावचनानां प्राचीनानेककोशस्थत्वेन हितबोधनेप्सितकिञ्चिद्दानप्रतिपादनात् सम्प्रश्नादेर्विहितत्वात् । 'सम्प्रश्नासनदानानि न कुर्या'दिति तत्र पाठस्याप्रामाणिकत्वात् पूर्वोत्तरविरुद्धत्वाच्च । सुखाय सुप्रातरिति । भगवदालयनिर्गमनगृहागमनाभ्युक्षणस्वसूत्रोक्तस्वाग्निहोत्रादिहोमभगवदाराधन भगवत्प्रपदनादिकं वङ्गिवंशेश्वरादिसम्प्रदायप्रदर्शनपुरस्सरमाचार्यपादैरेव सम्यगनुगृहीतं द्रष्टव्यम् ।

यदपरोक्तं–स्थालीपाकवत् दैवतं सौरी पूर्वाहुतिः प्रातरित्येक इत्यापस्तम्बसूत्रस्वारस्येन प्रातराहुतौ अग्नये स्वाहेति मन्त्रेणाग्नि देवताकाहुतिरेव कर्तव्येति । तन्न, उदाहृतसूत्रे वैकल्पिक देवताभेदावगमेन 'येनास्य पितरो याता' इत्यादिप्रमाणानुसारेण प्राचीनपरिगृहीत वैकल्पिकस्यैव ग्राह्यताया आचार्यपादानुगृहीतत्वात्;

विवरणरूपमितगद्यमनुसन्धाय "सत्यज्ञानान्दस्वरूप अमलवत्सल स्वामिन् सुशील सुलभ सर्वज्ञ सर्वशक्ते परमकारुणिक कृतज्ञ स्थिर परिपूर्ण परमोदार शुद्ध-सत्त्वमयदिव्यमङ्गलविग्रहोपेत श्रीमन्नारायण अत्यन्ता-किञ्चनोऽहमितस्त्वदानुकूल्यमेव करिष्ये, त्वत्प्राति-कूल्यं न करिष्ये, त्वमेवोपायान्तरस्थाने स्थित्वा, एतत्क्षणोत्तर कालीन सायमभिगमन पर्यन्त कैङ्कर्योत्पादनरूपरक्षां एतत्कैङ्कर्याराध्यताभ्युपगमद्वारेण करिष्यसीति सुदृढमध्यवस्यामि, त्वमेवैतद्रक्षां कुरुष्व, देहेन्द्रियादिलक्षणोऽहं मदीयत्वेनाभिमतश्च सर्वस्वामिने श्रीमते नारायणाय तुभ्यमेव न मम, निरुक्त कैङ्कर्योत्पादनरूपरक्षाभर उक्तगुण विशिष्टाय तुभ्यमेव, न मम। एतद्रक्षाफलमपि तादृशाय तुभ्यमेव, न मम। इति प्रपदनं कुर्यात्।

प्रातस्सूर्य-देवताकाहुतेः शिष्टेषु दर्शनात् अग्निदेवताकाहुतेरदर्शनाच्च। यदप्यपरोक्तम्। अभिगमनाराधनाङ्गमग्निमध्ये आसनकल्पनपूर्वक-भगवच्छास्त्र विहितहोमबलिदानादिकं परमैकान्तिकर्तव्यमिति। तदुपेक्ष्यम्। आचार्यपादैः 'स्वसूत्रविधिना स्वाग्निं भगवदात्मकं हुत्वा देवगृहमागत्य दूरात् प्रणमे'दित्यारभ्य वङ्गिवंशेश्वरनारायणमुनि-निबन्धनोदाहरणावसरे इज्याङ्ग होमबलिदानानुक्तेः, तृतीयाधि-कारोपक्रमे भाष्यकारशिष्य-प्रशिष्यग्रन्थ तन्मूलसंहिताद्यनुसारस्य प्रतिज्ञा-तत्वेन सम्प्रदायग्रन्थानुक्तेज्याङ्गहोमादेराचार्यपादानभि-

मतत्वात् । अपराह्निकोदाहृतेज्याङ्गहोमबलिदानप्रमाणान्यालय-विषयाणि दीक्षितविषयाणि चेति सत्पथरक्षायामस्माभिः प्रपञ्चितम्।

यदन्योक्तं–अभिगमने भगवदाराधनमेवाङ्गी, न प्रपदनमिति । तदतिमन्दम् । श्रीनिक्षेपचिन्तामणावाचार्यपाद श्रीसूक्तिमुखेन प्रपदनस्यैवाङ्गित्व समर्थनात् । विस्तरस्तद्ग्रन्थ एव द्रष्टव्यः । यत्तु प्रपत्तिप्रकरणस्थवत्सलशब्दः दोषभोग्यत्वपरः समन्वयाधिकरण-श्रुतप्रकाशिकायां वात्सल्यं दोषेष्वपि गुणत्वबुद्धिः यथा मातुर्वत्सल इति। व्यासार्यकृतबृहद्गद्यभाष्येऽप्येवमेवोक्तम् । गुणत्वबुद्धिः = भोग्यत्वबुद्धिः । दोषेषु भोग्यत्वाभावे तद्बुद्धेः प्रमात्वायोगात् दोषभोग्यत्वसिद्धिरिति कैश्चिदुक्तम् । तदसारम् । उक्तव्यासार्य-वचनमतिवादरूपमित्याचार्यपादकृतपृथुगद्यभाष्येऽभिहितत्वात् 'चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदु'रित्यादावपि शब्दस्यातिवादलिङ्गत्वं सम्प्रतिपन्नम्। गुणत्वबुद्धिरित्यत्र गुणत्वपदस्य यथाश्रुतार्थस्वीकारो नोचितः । दोषेषु गुणत्वाभावेन तद्बुद्धेः भ्रमत्वापत्तेः । न हि सर्वज्ञे भगवति भ्रमाङ्गीकार उचितः । भोग्यत्वं न गुणत्वपदवाच्यम् । रूढौ कोशादिमानाभावात् । योगे व्याकरण-निरुक्त्याद्यभावात् । भगवद्गुणदर्पणे 'वत्सरो वत्सलो वत्सी'त्यत्र तत्पदयोगार्थ एवं वर्णितः – 'वत्सान् स्वोत्सुकान् कामयत इव' वत्सां साभ्यां कामबल इति लच् । स हि चिरपरिचीयमानेष्वपि शरणागतेषु कस्यापि हेतोः सद्यः प्रसूतेष्वपि वत्सेषु सहुङ्कारास्सपयस्संस्र-वत्स्तनवेदनाः किङ्कर्तव्यताकुला धेनव इव सम्भ्राम्यति हि। रावणेऽपि प्रसिद्धं 'विदितस्स हि धर्मज्ञश्शरणागतवत्सलः' तच्छीलभगवदुप-करणा(धिक)द्धि प्रसिद्धस्यापि धर्मस्य ताच्छील्यम् । उदाहृतसूत्रवृत्तिरेवं वैयाकरणप्रदर्शिता । वत्साभ्याङ्कामबले आभ्यां

लज्जा स्यात् यथासंख्यं कामवति बलवति चार्थे वत्सलः अंसल इति। वत्सशब्दस्य तर्णकपरत्वमभिप्रेत्य भगवद्गुणदर्पणे तत्पदं व्याख्यातम्। ततश्च तर्णकविषयकधेनुगतकामसदृशशरणागत-विषयककामनावान् भगवानिति फलितम्। उपमानविशेषप्रदर्शनेन कामः स्नेहरूपः। स च दोषानादरहेतुः फलित इति। उक्तं हि शरण्येन 'दोषो यद्यपि तस्य स्यात् सतामेतदगर्हित'मिति। अत्र गोविन्दराजीयचरमव्याख्यानम्। एतत् दुष्टशरणागतपरिग्रहः, सतां सामान्यविशेषशास्त्रविदां, अगर्हितं गर्हितादन्यत्पूजनीयमित्यर्थः। दुष्टजनपरिग्रहस्य शिष्टगर्हितत्वात् शास्त्रनिन्दितत्वाच्चायुक्तमित्याशङ्क्य सत्यमेतत् दुष्टजनत्याज्यत्ववचनं सामान्यविषयम्। तस्मादपि वध्यं प्रपन्नं न प्रतिप्रयच्छन्तीत्येव-मादिशरणागतापरित्याग विषयशास्त्रस्य सद्भावात् दुष्टस्यापि शरणागतस्य सुरक्षणे शिष्टगर्हा नास्ति। प्रत्युत श्रेय एवेत्याह - सतामेतदगर्हितमिति। भगवद्गुणदर्पणे, 'अविज्ञाता सहस्रांशु' रित्येतद्व्याख्याने 'ननु आश्रितापराधव्यतिरिक्तसर्वज्ञत्वं विप्रतिषिद्धम्। तदपराधेष्वतात्पर्येणोपेक्षाह्यज्ञानं विवक्षितम्। उपेक्षते हि तेषां दोषम्। 'दोषो यद्यपि तस्य स्यात्, अपि चेत्सुदुराचारो भजत' इति भगवतः आश्रितदोषे उपेक्षेत्युक्तम्। एवं च दोषाणां परित्याग हेतुत्वोक्तिः शरणागतव्यतिरिक्तविषयेति विषयव्यवस्थेति गोविन्दराजोक्तेः दोषेष्वपि गुणत्वबुद्धिः परित्यागाहेतुत्वबुद्धिरित्यर्थो ग्राह्यः। परित्यागहेतुत्वेन दोषादराभाव इति फलितम्। श्रीवत्साङ्क श्रीमन्नारायणमुनिकृताष्टश्लोकीव्याख्याने - अत्र सौशील्यादयः पञ्च गुणाः व्यासार्यैः शरणागतिगद्यभाष्ये निरूपिता इत्युक्त्वा 'वात्सल्यन्नाम दोषेष्वपि गुणत्वबुद्धिः यथा सद्यः प्रसूताया धेनोर्वत्स' इति व्यासार्यवाक्यमुदाहृत्योक्तं ''इदं च क्षमाकाष्ठारूप''मिति। ''மாலென்கோ' इति द्रमिडोपनिषद्वाक्यं 'आश्रितवत्सलனென்று

சொல்லுவதே' इति श्रीभाष्यकाराज्ञामूलकद्रमिडोपनिषद्भाष्यषट्-सहस्रिकायां विवृतम्। மால் என்கிற पदं न दोष भोग्यत्वार्थकम्। किन्तु स्नेहार्थकमिति द्रमिडभाषाविदां प्रसिद्धम्। अत एव अन्तरधिकरण-श्रुतप्रकाशिकायां वात्सल्यं दोषानादरहेतुः स्नेहः यथा मातुः पुत्र इत्युक्तम्। वत्सरे कुटजे वत्सस्सुतादौ तर्णके त्रिष्विति नानार्थरत्नमालावाक्यात् वत्सपदं सुतपरमित्यभिप्रेत्य यता मातुः पुत्र इत्युक्तम्। भगवद्गुणदर्पणे "अथैव मुत्सुकीकृतेषु वात्सल्यतोऽप्यानन्त्यं परमतुङ्गमात्मानं परमनिम्नभवपातालात् जीवानारोहयतो महत्यारोहण सोपानपर्वानुपूर्वीकस्येति महाक्रमः। यथा जननी स्तनन्धयमादौ स्तन्यं दाययति। अथ दुग्धं अथाहारं अथ भोगान् गमयती"ति वत्सपदस्य सुतपरत्वे स्नेहकार्यमुदाहृतम्। अतो वात्सल्यं दोषभोग्यत्वमिति कथनममूलकम्। शब्दव्युत्पत्तिसम्प्रदायग्रन्थविरुद्धं चेति बोध्यम्। यदपि परमकारणिकत्वमित्यत्र करुणापरदुःखदुःखितम्, भगवद्गुणदर्पणे "करणं कारणं कर्ता विकर्तेत्येतद्व्याख्याने तथा स्वतन्त्रः कर्ता अधिकारी फली जीवोऽपि हि स्वयं स्वस्य यथा सुखदुःखाभिमानी तथा तदतिशयेन वा तदवस्थाभिमानी हि भगवान्। यथा 'व्यसनेषु मनुष्याणां भृशं भवति दुःखितः। उत्सवेषु च सर्वेषु पितेव परितुष्यति। बहु स्यां प्रजायेयेति च पृथगभिमानित्वे हि न बहुस्यामिति स्यात्। अत एव तत्फलभोगेन हर्षशोकादिभिर्विकुर्वाणः विकर्ता स्वार्थशोकहर्षाद्य-भावेऽपि परार्थं तत्प्रसक्तिरदोषः। अन्यथा परदुःखदुःखित्वदयादि गुणाः कथमस्य स्युरित्युक्तेः। परदुःखदुःखित्वात्मकदयादयो गुणा इति तदर्थ इति। तदसङ्गतम्। उदाहृतभगवद्गुणदर्पणसूक्तिपूर्वापर-वाक्यप्रमाणपूर्वाचार्यश्रीसूक्तिविरुद्धत्वात्। तथा हि परदुःखदुःखित्व-दयादीत्यत्र परदुःखदुःखित्वाय दया परदुःखदुःखित्वदयेत्येवार्थः।

सुखदुःखाभिमानीत्यत्र सुखदुःखाभिनयवानित्यर्थः 'व्यसनेषु मनुष्याणां 'बहुस्या'मिति प्रमाणोदाहरणात् । व्यसनेष्विति श्लोकः गोदिन्दराजीये एवं व्याख्यातः । ''मनुष्याणां = आढ्यदरिद्रद्विजाति-तारतम्यानादरेण मनुष्यजात्याक्रान्तानां व्यसनेषु अल्पानल्पविचार-मन्तरेण व्यसनपदार्थेषु, भृशं व्यसनवतः यादृशं तादृशं न, किन्तु पङ्कमग्नगज इव स्वमाहात्म्यनुगुणं यावत्सत्ताकं च दुःखितो भवति। न तु दिनक्रमेण विस्मरति। इदं दुःखं मत्परिपालन वैगुण्येन खल्वागतमिति नितरां दुःखितो भवति । ह्रीरेषा हि ममातुलेति वक्ष्यति । उत्सवेषु पुत्रजननादिषु सर्वेषु पुत्रीजननाद्यादरविरहेण द्वारि चूतकि सलयमालाबन्धनमुपधीकृत्य प्रवृत्तेष्वित्यर्थः । पितेव पुत्रादीनां पुत्र्याद्युत्सवेषु यः पितुः परितोषो जायते स द्विविधः । पामराणामर्थलाभः लोकिकसहायनिमित्तः, पण्डितानां स्वोत्तारकत्व-निमित्तश्च, एवमुभयविधपरितोषो रामस्यास्ति । ''प्रनृत्यन्ति पितामहाः, यद्येकोऽपि गयां व्रजे''दितिवत् । 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। बहुजन्मसहस्रान्ते दिष्ट्या यस्तु प्रवर्तत' इति प्रत्याशासम्भवात् । अत्र परिशब्दो वीप्सायां वर्तते । अत्रापि भृशमित्यनुवर्तत'' इति। न चात्र मनुष्यपदमुपलक्षणं सर्वभूतविषयेऽपि परदुःखदुःखित्वरूपदयैवात्र विवक्षितेति वाच्यं, 'उत्सवे'ष्वित्यत्रापि सर्वभूतोत्सवेष्वित्यर्थस्य वाच्यतया मनुष्य व्यतिरिक्तानामुत्सवा-भावेनान्वयासङ्गत्यापत्तेः, उत्सवशब्दस्य स्मृतिपुराणभगवच्छास्त्रादिषु देवोत्सवमनुष्योत्सवादितिर्यक् स्थावव्यतिरिक्तकर्तव्यव्यापारविशेष एव प्रयोगनियमेन रूढतया केवलसन्तोषपरत्वस्य लक्षणाप्रसङ्गेना-सम्भवात्, 'पितेव परितुष्यती' त्यस्यासाङ्गत्यापत्तेश्च। पशुपक्ष्यादीनां

पितृत्वनिर्णयायोगेन तद्धेतुकसन्तोषायोगात्। भगवद्गुणदर्पणे - 'पवित्रं मङ्गलं पर'मित्यत्र स्वतन्त्र एवाशेषदोषपरिपन्थिशान्तानन्तापरिमितानुकूलतम स्वयं प्रभा(नन्दा) त्मानुभवनिबन्धननिरङ्कुशानन्दन्यत्कृत निस्तरङ्गस्तिमितामृत महोदधिन्यायया परावस्थयैव निरपेक्षो नित्यतृप्तश्चेति शक्यनिरूपणो भगवान्, न्यरूपि च 'आनन्दमयोऽभ्यासात्, आनन्दादयः प्रधानस्य, अक्षरधियां त्ववरोधः' इत्यादौ'' इत्युक्तम् । अत्र आनन्दमयाधिकरणमुक्तार्थोपष्टम्भकतयोदाहृतम् । तत्र श्रीभाष्यश्रुतप्रकाशिकयोः भगवति दुःखाभाववत्त्वं स्थापितम् । अक्षरध्यधिकरणे अमलत्वं स्थापितम् । पूर्वपक्षोदाहृतभगवद्गुणदर्पणवाक्ये 'स्वार्थशोकहर्षाद्यभावेऽपि परार्थतत्प्रवृत्तिरदोषः' इत्यत्र परार्थे तत्प्रवृत्तिरभिनयमात्रमित्यर्थः; ''सुतन्तुस्तन्तुवर्धनः'' इत्यत्र शोभनोऽनतिलङ्घनीयः, तद्ग्रहण वागुरा तन्तुः कृत्रिमशान्त्यादिरूपो यस्येति सुतन्तु''रिति वाक्यैकार्थ्यात्। 'यतस्सर्वाणि भूतानी'त्येतद्व्याख्याने ''न च जगदुपादानत्वात् भगवति विकारादिदोषप्रसक्तिः, स्वशरीरतया परिगृहीतप्रकृत्याद्येकदेशद्वारकत्वात् परिणामादेरूर्णनाभिदृष्टान्तेनोपपादयन्ती तत्र भवती श्रुतिरेव पर्यहार्षीदि'ति वाक्यात् पूर्वपक्षोदाहृत ''बहुस्यां प्रजायेये'त्यत्र तदवस्थाभिमानीत्युक्तावस्थाविशेषणगतैव न तु विशेष्यगतेति स्पष्टमवगम्यते । कूरकुलाधिपैरेवान्तरधिकरण श्रुतप्रकाशिकायां 'जीवानुप्रवेशेषु शोकादयः जीवगताः, साक्षादवतारेषु अभिनयमात्रमिति 'व्यसनेषु मनुष्याणा'मित्येतदर्थ अभिनयरूप इति सुस्पष्टमुक्तम्। ''ईशन्नपि महायोगी सर्वस्य जगतः प्रभुः । कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः । तेन वञ्चयते लोकान्

दर्पणादिमङ्गलद्रव्यवीक्षणं, ततः "सौरभेयास्सर्वहिताः पवित्राः पुण्यराशयः । प्रतिगृह्णन्तु मे ग्रासं गावस्त्रैलोक्यमातरः ।" इति मन्त्रेण परगवे ग्रासमुष्टिप्रदानं कुर्यात् । ततो गुरूणां वृद्धानां चाभिवादनं, गुरूपासनं, वेदाध्ययन तद्धारण तदर्थविचारण वेदाङ्गावेक्षणादिकं प्रथमयामे कुर्यात् । साङ्गप्रपदनरूपाभिगमनाशक्तौ स्वगुरोः पादारविन्दे स्वभरं न्यसेत् । तस्याप्यसम्भवे करणत्रयैकरूप्येण जपध्यानार्चनस्तोत्र कथन सङ्कीर्तनप्रणामाञ्जलिबन्धादिकं स्वशक्यं कुर्यात् । सूतकाशौचाद्यप्रायत्यकालेऽपि मनसाभिगमनं, भाषाप्रबन्धस्तोत्रादिकं दूरतोऽवस्थाय प्रणामाञ्जलिबन्धादिकं

मायायोगेन केशवः । ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः । कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः । मोहयित्वा जगत्सर्वं गतः स्वं स्थानमुत्तमम् । मनुष्यदेहिनां चेष्टामित्येवमनुवर्तते । लीला जगत्पतेस्तस्य छन्दतस्सम्प्रवर्तते" इति श्री साध्योपायशोधनाधिकारोदाहृतमहर्षि वचनैरवतारेषु दुःखाद्यभिनयमात्रं प्रतीयते । दया परदुःखदुःखित्वमिति श्रीभाष्यादौ क्वापि नोक्तम् । 'दया नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुते'त्युक्तम् । सा च परदुःखनिराकरणेच्छा । श्रुतप्रकाशिकायां शेषत्वविचारे दया नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुतेत्युक्त्वार्थादिकामनया परदुःखशिशमयिषोः परदुःखानुवृत्तिरनिष्टा स्यादिति तद्व्युदासाय स्थार्थानपेक्षशब्द इयुक्तम् । भावान्तराभाववादि सिद्धान्तिमते परदुःख निराकरणेच्छा-

कार्यमेव। भगवानेव + अभिगमनाख्यं कर्म कारितवानिति सात्त्विकत्यागं कृत्वा, कृतञ्च करिष्यामि + अभिगमनेन भगवत्कर्मणा भगवान् प्रीयतां वासुदेव इति भगवति समर्पयेत्।

★ ★ ★

अथोपादानम्।

★ ★ ★

द्वितीययामे "कृतञ्च करिष्यामि + उपादानेन भगवत्कर्मणा भगवन्तं वासुदेवमर्चयिष्यामी"ति सङ्कल्प्य बलमन्त्रं चानुसन्धाय, भगवानेवेति पूर्वोक्तप्रकारेण उपादानाख्यं कर्म कारयतीति सात्त्विकत्यागं कृत्वा, "अह्नोर्द्वितीयभागेन कृष्णाराधनतत्परः ।

परदुःखासहिष्णुताचैकैवेति । गोग्रासप्रदानादिकं तत्तच्छब्दयुक्तकर्मसु भगवदेकाराधनत्वं, व्यासस्मृत्याद्युक्तदेवतानमस्कारोपहारनिवेदनपुष्पादिदानवृद्धाभिवादनगुरूपासनवेदाङ्गावेक्षणादीनि चाचार्यपादैरेवानुगृहीतानि। एवमभिगमनं साङ्गं प्रतिपाद्य सात्त्विकत्यागपूर्वकं भगवति समर्पणप्रकारमाह—भगवानेवेति । एतत्तत्त्वं पूर्वमेव प्रपञ्चितम्।

अभिगमनानन्तरकृत्यं प्रतिजानीते—अथोपादानमिति । मया प्रदर्श्यत इति शेषः । कालप्रदर्शनपूर्वकं सङ्कल्पसात्विकत्यागावाह - द्वितीययामे कृतं च करिष्यामीत्यादिना। प्रातरुत्थायेत्यादिवचनानि श्री सात्वतस्थानि । तदुक्तं - 'श्री सात्वते "प्रातरुत्थाय चिन्वीयात् स्वारामात् स्वयमेवे ही"त्यादि "तदिदं नियमपरिच्छेदानुशिष्टत्वात्

विपर्ययानर्हमवधातव्यं, शक्तमधिकृत्य चात्र स्वारसिकं स्वयं प्रवृत्तत्वादिकमुपदिश्यते, पक्षान्तरस्यापि अन्यत्रानुज्ञानात्। अत्र वैशेषिकार्चनादिषु कदाचित् प्रातश्शब्दस्य मुख्यार्थता। अन्यथात्वभिगमनविधिना प्रातःकालोपरोधात्। अन्येषु च सर्वेषु शास्त्रेषु द्वितीयकाल एव द्रव्यार्जनविधानात् प्रातश्शब्देन सन्निकर्षवशात् त्वरातिशयसिद्ध्यर्थं तदुचितकालो लक्ष्यते। 'सायं प्रातर्द्विजातीनामशनं श्रुतिचोदित' मितिवत्। अत एवात्रत्यमुत्थानं च न स्वप्नानन्तरभावि; अपि तु 'ततः पुष्पफलादीनामुत्थायार्जनमाचरे' दिति जयाख्य-संहितोक्तमभिगमनानन्तरं देवसन्निधेरुत्थानं'' इति। ''सर्वेषामपि पुष्पाणां सहस्रगुणमुत्पलम्। तस्मात्पद्मं तथा राजन् पद्मात्तु शतपत्रकम्। तस्मात्सहस्रपत्रं तु पुण्डरीकमतः परम्। पुण्डरीकसहस्रात्तु तुलसी गुणतोऽधिका। बकपुष्पं ततस्तु स्यात्सौवर्णं तु ततोऽधिकम्। सौवर्णाच्च प्रसूनात्तु मत्प्रियं नास्ति पाण्डवे''त्याचार्यपादोदाहृतानि वचनान्यत्रानुसन्धेयानि।

''पाद्मेत्वेवं विचित्रद्रव्योपार्जनमुक्त''मित्यादिना ''नीत्वोपादानसमयमित्थं तदनुप्रपूजये''दित्यन्तेनोक्तं सर्वमवगन्तव्यम्। ''अस्यां संहितायां संहितान्तरेषु पुष्पप्रकरण हविः प्रकरणादिषु च हेयोपादेय समस्त द्रव्य विभागो द्रष्टव्यः'' इति, ''भोजराजस्त्वेवं पुष्पेषु सात्त्विकराजसतामसादि विभागं पुष्पाङ्कुरपत्रमूलधूप-दीपवस्त्राभरणेषु वर्ज्यावर्ज्यविभागं सञ्जग्राहे''त्यारभ्य ''तदेतन्नाना-संहितापरामर्शसमुद्धृतं सार''मित्यन्तेनानुगृहीतः पुष्पादिनियमो ग्राह्यः। तत्र स्वारामेत्यनेनान्यारामनिषेधः तत्स्थितपुष्पादिग्रहणे तस्करत्वमपि स्यादित्याचार्यपाद श्रीसूक्तेः। पद्मोत्पलादीनां जलजानां दिनद्वयानन्तरं पर्युषितत्वं, 'सद्योहृतानां विहितमम्लानानां

द्रव्याण्याराधनार्थानि शास्त्रीयाणि समार्जयेत्। प्रभूतानि विशुद्धानि शुद्धदेशवोद्भवानि च। अरौद्राण्यनिषिद्धानि संगृहीतानि वैष्णवैः । सुगन्धीनि मनोज्ञानि पुष्पाण्यभिमुखानि च । वासांसि धनधान्यानि चन्दनाद्यनुलेपनम् । अन्यानि हविरर्थानि तानि मूलफलानि च। संक्षालितानि बहुशो देवभोग्यानि यानि च । दधिक्षीराज्यमुख्यानि द्रव्याणि च विशेषतः । उत्तमानुपदंशांश्च मुद्गमाषादिकान्यपि । ताम्बूलादीनि चान्यानि सर्वाण्यादाय सादरम्। यथार्हं तानि संस्कृत्य प्रक्रमेतार्चनं ततः। प्रातरुत्थाय चिन्वीयात् स्वारामात् स्वयमेव हि। पूजार्थमस्त्रमन्त्रेण पुष्पादीन् यत्नतः पथि। यायादरण्यमथ वा निर्बाधं हि तदार्जने । अकण्कद्रुमोत्थाश्च कंटकद्रुमजा अपि। हृद्यास्सुगन्धाः कर्मण्या ग्राह्यास्सर्वे सितादयः । उग्रगन्धाह्यकर्मण्या स्त्वप्रसिद्धास्तथैव च । चतुष्पथशिवावासश्मानाव-निमध्यजाः । क्षता अशनिवाताद्यैः कृमिकीटसमा-वृताः। वर्जनीयाः प्रयत्नेन पत्रपुष्पफलादयः । अम्बुजानि सुगन्धीनि सितरक्तानि कानिचित् । योक्तव्यानि पवित्राणि स्वयमाराधने तु वै। साङ्कुराणि च पत्राणि प्रभूतान्येवमेव हि । विहितान्यर्चने नित्यं यथर्तुप्रभवानि च । न गृहे करवीरोत्थैः कुसुमैरर्चनं हितम्। विशेषतस्सकामस्य सिद्धिभूतियुतस्य च।" इत्यादि शास्त्राणि पर्यालोच्य हेयोपादेयविभागमपि

विविच्य "स्वप्रयत्नकृतं शस्तं मध्यमं वन्यमुच्यते । अधमं तु क्रयक्रीतं याचितं त्वधमाधमम् ।" इत्याद्युक्तोत्तमादिविभागमपि विविच्य, आराधनोपयुक्त द्रव्यमार्जयेत् । समित्पुष्पकुशादीनामस्त्रमन्त्रेणार्जनं कुर्यात् । तत्र स्वारामात् स्वार्जितमुत्तमम् । वन्यं मध्यमम् । क्रयक्रीतमधमम् । प्रतिग्रहलब्धे दातुरेव फलं, कर्तुः किञ्चिद्भवेन्न वा ।

तुलसी ग्रहणे वर्ज्यदिनानि - "आरवारे च शुक्रे च मन्वादिषु युगादिषु । नाहरेत्तुलसीपत्रं मध्याह्नात्परतोऽहनि । सङ्क्रान्त्यां पक्षयोरन्ते द्वाश्यां निशि सन्ध्ययोः । तुलसीं ये विचिन्वन्ति ते कृन्तन्ति हरेश्शिरः" इत्यादीनि । अतः अनिषिद्धदिनेषु "तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये । केशवार्थं लुनामि त्वां वरदा भव शोभने । मोक्षैकहेतो धरणिप्रसूते विष्णोस्समस्तस्य गुरोः प्रिये ते । आराधनार्थं पुरुषोत्तमस्य लुनामि पत्रं तुलसि क्षमस्व । प्रसीद मम देवेशि प्रसीद हरिवल्लभे ।

यथाक्रम' मित्यादिना स्थलजानामेकदिनात्परं पर्युषितत्वं सिद्धं, सूत्रेण ग्रथितं पुष्पमस्नेहाक्तं तथोदनम् । अवालुकायुतं तोयं सर्वं पर्युषितं भवे' दित्याद्यपि द्रष्टव्यम् ।

साङ्कुरां षट्पत्रां चतुः पत्रां वा तुलसीं गृह्णीयादिति । "षट्पत्रां वा चतुःपत्रां तुलसीमञ्जरीं हरे" दिति श्रीवैष्णवधर्मशास्त्रोक्तमिह भाव्यम् । तुलसीग्रहणे वर्ज्यदिनान्यङ्गीकृत्य द्वादशीव्यतिरिक्तदिनेषु तुलसीग्राह्येत्यपरोक्तं न चारु, तथा शिष्टाचारविरहात् । "तुलसीप्रस्ताव

क्षीरोदमथनोद्भूते तुलसि त्वं प्रसीद मे'' इति मन्त्रैः साङ्कुरां चतुःपत्रां षट्पत्रां वा तुलसीं गृह्णीयात्।

कुशाहरणविधिः ।

★ ★ ★

''शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्वोत्तरामुखः । हुङ्कारेणैव मन्त्रेण कुशाः स्पृश्या द्विजोत्तमैः ।'' इत्युक्तरीत्या स्पृष्ट्वा ''विरिञ्चेन सहोत्पन्न परमेष्ठि-निसर्गज । नुद सर्वाणि पापानि दर्भ स्वस्ति-करो(मम)भव'' इति मन्त्रेण दर्भलवनं कुर्यात् ।

इत्युपक्रम्य ''शुष्कं पर्युषितं चार्द्रं काष्ठं वा तुलसीदलम् । अर्चने वासुदेवस्य लक्षकोटिगुणं भवेत् ।'' इति रत्नाकरोदाहृतवचनेन शुष्क तुलस्याद्यभ्यनुज्ञानेन उपचारार्थमुख्यद्रव्याभावे सर्वार्थितोयस्य प्रतिनिधितया भवद्भिरङ्गीकृत्वेन च वर्ज्यदिने तुलसीग्रहण-निर्बन्धस्यावक्तव्यत्वात् । निषिद्धकालेषु फलाश्रवणयुक्ततुलसी-ग्रहणनिषेधवचनानां बहुत्वेन ग्रहणविधायकाल्पवचनस्य भवदाह्निक-स्थत्वेन भूयसां न्यायेन निषेधस्यैव ग्राह्यतया सकामविषयत्व-व्यवस्थापनत्वस्यायुक्तत्वात् । यत्तु 'स्नानं कृत्वा तु ये केचित् पुष्पं गृह्णन्ति वै द्विज। देवतास्तं न गृह्णन्ति तन्न गृह्णन्ति मानुषाः । पितरस्तं न गृह्णन्ति भस्मीभवति काष्ठवदि''ति तन्मध्याह्नस्नानाभिप्रायं, ''स्नानं कृत्वा तु मध्याह्ने पुष्पाणि न समाहरे''दिति रत्नाकरोक्तेः ।

कुशाहरणप्रकारमाह - कुशाहरणविधिरिति । अत्र कालमाह हारीतः - 'माघे नभस्यमावास्या तस्यां दर्भोच्चयो मतः । अयातया-मास्ते दर्भाः नियोज्यास्स्युः पुनः पुनः । वृद्धवसिष्ठः - काशस्तु रौद्रो

''कुलटाषण्ड पतितवैरिभ्यः काकिणीमपि । उद्यतामपि गृह्णीयान्नापद्यपि कदाचन । तस्करात्कितवात् (पतितात्) षण्डात् डम्भलोभमदान्वितात् । मात्रा वित्तं न गृह्णीयादभक्तादपचारतः ।'' इत्यादि भगवच्छास्त्र-

---

विख्यातः कुशो ब्राह्मस्तथा स्मृतः । आर्षोदर्भ इति ख्यातो विश्वामित्रस्तु वैष्णवः । नवभिस्ससप्तभिर्दर्भैः पञ्चभिश्च क्रमात् कृतः । कूर्चः श्रेष्ठो मध्यमश्च कनीयानिति च स्मृतः । स्मृतिरत्ने - अहन्यहनि कर्मार्थं कुशोद्धारः प्रशस्यते । न पूर्वेषूद्धृतकुशा योग्याश्चैवोत्तरेषु च । कुशाः काशास्तथा दूर्वा यवा व्रीहय एव वा(च) । बल्बजाः पुण्डरीकाणि सप्तधा बर्हिरुच्यते ।'' इति रत्नाकरस्थवचनान्यत्र भाव्यानि ।

कुलटादिद्रव्यप्रतिग्रहप्रतिषेधमाह - कुलटेत्यादिना । तदुक्तं - स्मर्यते च ''केशवार्चा गृहे यस्य न तिष्ठति महीपते । तस्यान्नं नैव भोक्तव्यमभक्ष्येण समं हि त''दिति । 'तत्र पक्वमपक्वं वा केशवार्चारूपनित्यधर्मरहिते गृहे न प्रतिग्राह्यम् । उभयत्रान्न-शब्दप्रयोगात्, अन्यथा पक्वान्नमिति विशेषेण प्रयोगानुपपत्तेः । प्रतिग्रहगुणदोषविस्तरश्च धर्मशास्त्रेषु पठितव्यः'' इत्यादि, ''एवं वृत्त्यर्थतयानुज्ञातैरध्यापनयाजनादिभिरपि यथाशास्त्रं प्रयुक्तैः समुचितानि समाराधनोपकरणानि सम्पादयेत् । पूर्वनिष्पन्नसम्पूर्णद्रव्यं तु न प्रतिग्रहादिषु प्रवर्तेत । आपत्स्वनन्तरावृत्तिरिति अनुज्ञातेष्वपि वृत्तिं प्राप्य विरमेदिति स्मरणान्न नित्यं प्रवर्तेत । कृषिवाणिज्ये च स्वयं कृते कुसीदं चैव माद्यमपि गत्यन्तरासम्भवे 'सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः' इत्याद्युक्तनन्दनवनकरणादियतनमपि पुष्पफलादिपूजोप-करणार्थतया उपादानकोटौ निविशते'' इत्यादि । सप्तर्षिसंवादे आकिञ्चन्यञ्चैव राज्यं च तुलायां समतोलयन् । अकिञ्चनत्वमधिकं

धर्मशास्त्रतः प्रतिग्रहनियमस्सम्यगवलोकनीयः । आपद्वशेनासत्परिग्रहे सम्भाविते‍ऽपि "दानं ददद्भिर्यै-रुक्तमच्युतः प्रीयतामिति । प्रतिग्रहीतृभिश्चैव न ते मद्विषयोपगा ।" इति शौनकोपात्तयमोक्तमन्त्र विशेष-मुच्चार्य सदसत्प्रतिग्रहः कार्यः । बलादि-मन्त्रनिष्ठानां बलादिमन्त्रैरपि प्रतिग्रहः कार्यः । तदिह साक्षाद्वा परम्परया वा समाराधनोपकरणभूत शास्त्रीयसमस्त-द्रव्योपयोगेषु स्वशक्येषु ध्यानादि-विरोधिकायक्लेशकर बह्वायासरहितेषु न्यायतः प्रवर्ततेत्युपादानसङ्ग्रहः ।

एवं बाह्योपकरणवदनन्तरभावीज्यानर्हत्वापाद-काष्टादशचण्डाल षड्वृषल संज्ञिकाऽनात्मगुणतिर-स्कारकतया इज्योपयोगित्वात्, परमात्मसंप्रीणनेषु "अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूत-दया पुष्पं क्षमा पुष्पं विशेषतः । ज्ञानं पुष्पं तपः पुष्पं ध्यानं पुष्पं तथैव च । सत्यमष्टविधं पुष्पं विष्णोः प्रीतिकरं भवेत् ।" इत्यादिना प्रधानतमतयोपदेशात् ज्ञानवृद्धि-हेतुभूतसदाचार्य सेवासम्भाषणादिभिः अमानित्वादि-गुणानामान्तराणां सम्पादनमप्युपादानकोटौ निविशते । पूर्वसिद्धबाह्योपकरणस्यापि पुंसः आन्तरोपकरण-संवर्द्धकवेदान्तकालक्षेपस्याप्युपादानरूपतया तत्काले तेन कालयापनं कुर्यात् । एकस्मिन् दिने विष्वयनादि-निमित्तवशेनानेकेज्याप्रसक्तौ "अङ्गगुणविरोधे च तादर्थ्या"दिति न्यायेन उपादानाभिगमनकालसङ्कोचः । तस्मात्समाराधनोपयुक्तं बाह्यमान्तरञ्चोपादद्यादित्यु-

पादानष्कर्षः । अथ भगवानेव + उपादानाख्यं कर्म कारितवानिति सात्त्विक त्यागं कृत्वा, कृतञ्च करिष्यामि - उपादानाख्येन भगवत्कर्मणा भगवान् प्रीयतां वासुदेव इति भगवति समर्पयेत्। इत्युपादानम्।

★★★

अथेज्या निरूप्यते।

अत्र प्रसङ्गात् प्रकृतोपयुक्तं किञ्चिदुच्यते । श्रीपाञ्चरात्ररक्षायां तृतीयाधिकारारम्भे "तत्र भाष्य-कारोक्तनित्यानुष्ठाननिष्ठस्य ब्राह्ममुहूर्तप्राप्तौ यत्कर्तव्यं तत्तावत् तच्छिष्य प्रशिष्यग्रन्थ तन्मूलभूत संहिताद्यनु-

---

राज्यादपि जितात्मनः । यस्य धर्मार्थमर्थेहा तस्यानीहैव शोभना । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर''मिति रत्नाकरस्थवचनान्यनु-सन्धेयानि। शेषं श्रीपाञ्चरात्रादिषु द्रष्टव्यम्।

अथोपादानस्य सात्त्विकत्यागपूर्वकं भगवति समर्पणमाह - अथ भगवानेवेत्यादिना । तृतीय कालकर्तव्येज्या निरूपणं प्रतिजानीते - अथेति। श्री देशिकसम्प्रदायस्थैः कैश्चित् श्रीभाष्यकारनित्यग्रन्थविरुद्ध-मन्त्रोपचारादियुक्तभगवत्समाराधनप्रयोगस्संगृहीतः, तस्याचार्यपाद श्रीसूक्ति विरुद्धत्वात् प्रपन्नैरग्राह्यत्वज्ञापनायोपक्रमते - अत्र प्रसङ्गादिति। इज्यासमान्यज्ञानेन तत्क्रियाविशेषस्योपस्थितत्वरूप-प्रसङ्गसङ्गतेरित्यर्थः । प्रकृतोपयुक्तं किञ्चिदिति । श्रीभाष्यकार-नित्योक्तग्राह्यतानिमित्तं किञ्चिदित्यर्थः । तृतीयाधिकारारम्भ इति । तच्छिष्यौ = श्रीभाष्यकाराव्यवहितशिष्यौ वङ्गिवंशेश्वर श्रवत्साङ्क-मिश्रौ, प्रशिष्यौ = भट्टारकनारायणमुनी, तेषां ग्रन्थाः तद्रचिताभि-

सारेण सङ्गृह्यत'' इत्युक्तत्वात्, ''अथोदानीं मन्त्र-सिद्धान्तोपास्यपररूपविषयां भोगार्चनमयी मिज्यां भाष्यकारोक्तनित्यग्रन्थविवरणमुखेन व्याख्यास्याम'' इतीज्यारम्भे उक्तत्वात्, द्वितीयाधिकारे ''परिपूर्ण-समाराधनोपदेशिभिर्भाष्यकारै''रित्युक्तत्वाच्च

गमनादिक्रियाप्रतिपादकग्रन्थाः, तन्मूलसंहिताः सूत्रनिष्ठपरमैकान्त्यनु गुणवर्णाश्रमादिधर्मयुक्तपाञ्चकालिकधर्मविधायि संहिता इत्यर्थः। अत्र वक्तव्यमस्मत्कृतसत्पथरक्षायामनुसन्धेयम् । अथेदानीं मन्त्र-सिद्धान्तोपास्येति आगमतन्त्रतन्त्रसिद्धान्तव्यावृत्त्यर्थम्। 'नानाव्यूह समेतं च मूर्तिद्वादशकञ्च यत्' इत्याचार्यपादोदाहृत श्रीपौष्करवचनेन 'मन्त्रसिद्धान्तसंज्ञं तज्जाग्रद्व्यूहादिमूर्तिना' इत्यादिभिः 'विभवव्यूह-सूक्ष्माख्यमधिकारं यथाक्रम'मित्यादिभिः 'कर्मणामेवमादीनां विधानं यत्र पुष्कलम् । मन्त्रसिद्धान्तसंज्ञं तत् बहुभेदसमन्वित'मित्यन्तैः पारमेश्वरप्रायश्चित्त्याध्यायवचनैश्च मन्त्रसिद्धान्ते परव्यूहविभवमूर्ती-नामाराध्यत्वावगमेऽपि मुक्तप्राप्यपररूपविषयेज्यैव परमैकान्त्यु-पादेयेत्यभिप्रायेण पररूपविषयामित्युक्तम् । विभवव्यूहसूक्ष्मेषु यथाक्रममधिकारकथनं तत्तदर्वाचीनपदप्राप्तिकामविषयमित्ययमर्थः 'यत्र मधुविद्यादौ वस्वादिपदप्राप्ति पूर्वकब्रह्मप्राप्तिवत् परंपरया वासुदेवप्राप्तिरभिधीयते तत्रापि तत्तदर्वाचीनपर्वव्यवहित-परप्राप्तिकामानामधिकार इति व्यवस्था। तदभिप्रायेणेच्चोक्तं भाष्ये - ''तद्धि वासुदेवाख्यं परं ब्रह्म सम्पूर्णषाड्गुण्यवपुः सूक्ष्मव्यूहविभवभेदभिन्नं यथाधिकारं भक्तैः ज्ञानपूर्वेण कर्मणाभ्यर्चितं सम्यक् प्राप्यते विभवार्चनात् व्यूहं प्राप्य व्यूहार्चनात् परं वासुदेवाख्यं सूक्ष्मं प्राप्यत इति वदती''ति आचार्यपाद श्रीसूक्तिसिद्धिः । ''नित्यं

श्रीभाष्यकारप्रणीतनित्यग्रन्थप्रकारेणैव इज्याऽनुष्ठेया । अत्र वङ्गिवंशेश्वरकारिकायां भूतशुद्धिप्रकरणे 'त्रिर्वाथ पञ्चकृत्वः इत्यारभ्य प्रथमं प्राणायामत्रय पञ्चकपूर्वकं स्वदेहे शोषणादिकमुक्तं, नित्ये प्रथमं पञ्चोपनिषन् मन्त्राणां संहारन्यासमात्रभभिधाय ''प्राणायामेनैकेन दक्षिणेन पाणिना नाभिदेशे मूलमन्त्रं न्यसे''दित्यादिना

नित्याकृतिधरं, नित्यसिद्धे तदाकारे, भक्तानां सर्वविषय-व्यावृत्तदृढचेतसाम् । सर्वेषामादिमूर्तिस्तु मङ्गलं वेदवेदिना''मिति श्रीपौष्करस्त्त्वतशाण्डिल्यस्मृत्यादिवचनैः पररूपस्यैव मुमुक्षू-पास्यत्वावगमात् भाष्यकारैरपि तद्विषयेज्याया एव परमैकान्ति कर्तव्यत्वमभिहितमिति भावः । लयभोगार्चन द्वैविध्यसत्त्वाल्लयार्चन-व्यावृत्त्यर्थं भोगार्चनमयीमित्युक्तम् । ''हृदयादिषु चाङ्गेषु लाञ्छनं कमलादिकम् । भूषणं च किरीटाद्यं लक्ष्म्याद्याश्शक्तयस्तथा । तद्देहसंस्थितास्सर्वे पूजनीयाः क्रमेण तु । परिवारं विना मन्त्रैः स्वैः स्वैः पुष्पानुलेपनैः । लययागोह्ययं विप्र हृदादिष्वनुकीर्तितः । तस्मात् हृत्कर्णिकाधारे मूर्तौ वा यत्र कुत्र चित् । मूलमन्त्रशरीरस्थं परिवारं रजेत्सदा । मन्त्रराट्कर्णिकामध्ये लक्ष्म्याद्याः केसरादिषु ॥ साकाराः केवलास्सर्वे यत्र भोगाभिधस्तु सः'' इति श्रीजयाख्याक्तलय-भोगयागयोः ''लयभोगार्चनங்களில் प्रवृत्तரான परमैकान्तिகளுக்கு'' इति श्रीरहस्यत्रयसार श्रीसूक्त्या परमैकान्त्यधिकारत्वावगमेऽपि श्रीभाष्यकारसम्प्रदायस्थेषु लययागोपदेशानुष्ठानपारम्पर्यासिद्ध्या तत्सम्प्रदायागतभोगार्चनमेवानुगृहीतम् । अतो न तेषु लयार्चनप्रसक्ति-रिति बोध्यम् । उक्तार्थे स्थलान्तरस्थ श्रीसूक्तिसंवादमाह - द्वितीयाधि-

कार इति । भाष्यकारप्रणीतनित्यग्रन्थप्रकारेणैव इज्यानुष्ठेयेति। परमैकान्तिभिरिति शेषः। एवकारः धर्मशास्त्राद्युक्तसामान्यमन्त्रकरण-काराधनं श्रीभाष्यकारानुक्तभगवच्छास्त्रसंहिताराधनं च व्यवच्छिनत्ति। श्री पाञ्चरात्ररक्षायां प्रथमाधिकारे "अत एव हि हौत्रं होतृ शाखोक्तमध्वर्यवोऽपि परिगृह्णन्ति। अतो येषु सूत्रेषु भगवदर्चनादिकं प्रत्यपादि, तन्निष्ठानामपि भगवच्छास्त्रोक्तप्रक्रियया समाराधनादिकं प्रशस्ततमम् । तथा च शिष्टैरनुष्ठीयते" द्वितीयाधिकारे- "अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्य' इत्यारभ्य 'शौनक-व्यासबोधायनादिधर्मशास्त्रानुक्तेन भगवच्छास्त्रोक्तवर्त्मना स्नान-विशेषादिपूर्वकविलक्षणसमाराधनप्रक्रिया प्रतिपादनं कथंभूतमधि-कारिणमधिकृत्य भाष्यकारैः कृतमिति कर्णे तवागतम् । भवतु तच्छक्तमधिकार्यन्तरं प्रतीति चेन्न, प्रपत्त्येकनिष्ठैस्तच्छिष्य-प्रशिष्यादिभिः योग्यैरद्य यावद्यथाशक्ति तदनुष्ठानदर्शनात् अतस्तथाविधप्रपन्न एवात्र परमैकान्ती तमधिकृत्यैव किञ्चित् सिद्धान्तस्थां काञ्चित्संहितां प्रधानीकृत्य समाराधनप्रयोगोऽत्र संगृह्यत इति यथा सम्प्रदायमकामेनापि स्वीकरणीयं" "इदं च भगवत्समाराधनं भगवच्छास्त्रेषु तैस्तैर्व्यापकमन्त्रप्रभृतिभिस्तत्तदधिकारानुरूपं प्रपञ्च्यते। अधिकृतशास्त्रप्रतिपादितस्य पूर्णोपदिष्टस्यैव मुख्यत्वं होतृशाखोक्त हौत्रपरिग्रहन्यायेन सिद्धः", परमतभङ्गे "शौनक-बोधायनादिகள் சொன்ன प्रतिष्ठार्चनादिகள் உண்டாயிருக்க भगवच्छास्त्रத்தாலே अपेक्षै என்னென்னில் होतृशाखोक्त हौत्रपरिग्रह न्यायத்தாலே இது परिग्राह्यतमं", श्री निक्षेपरक्षायां- "इदं च नित्यं भगवदर्चनं शौनकबोधायनाद्युक्तं तावन्मात्राधिकारिणां, विशिष्टाधिकारिणां त्वनन्यभगवच्छास्त्रसिद्धं, तच्च प्रपत्तिगर्भमिति

तदिह परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्य'' इत्यारभ्योक्तं, श्री साध्योपाय शोधनाधिकारे – ''இப் प्रपन्नனுக்கு பூசித்தும் போக்கினேன் போது என்கிற अनन्ये प्रयोजनपूजाविशेषத்தை अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्ये, भगवत्कैङ्कर्यरतिः 'परमैकान्ती भूत्वा' என்று துடங்கி நித்யத்தாலே अत्यर्थप्रियाविरत-विशदतमप्रत्यक्षरूपतापन्नानुध्यानेन ध्यायन्नासीत என்று அருளிச் செய்தார்'' इति श्रीसूक्तिभिः श्रीभाष्यकारनित्याराधनस्य प्रपन्नशिष्ट-परिगृहीतत्वस्यानुगृहीतत्वात्, मुक्तकैङ्कर्यतुल्यस्वयंप्रयोजनोत्तरकैङ्कर्य प्रधानतमभगवदाराधनस्यापि तद्विग्रहविशिष्टविषयत्वौचित्याच्च, श्री यामुनाचार्य स्तोत्रगद्यरूपद्वयानुसन्धानपरीवाहग्रन्थेषु नित्यविग्रह-विशिष्टानुसन्धानावगमात्, श्री द्वयाधिकारे - இவ்விடத்தில் चरणौ என்கிற शब्दं नित्यமான दिव्यमङ्गलविग्रहத்துக்கு उपलक्षकம் श्रियःपतियினுடைய सर्वस्मात्परत्वமும் नित्यविग्रहयोगமும் ज्ञातव्यங்களில் प्रधानம்' इत्यादिना ''चरणौ என்கிறவிடத்தில் नित्यविग्रह योगம் अनुसन्धेयம்'' इत्यन्तेन शणागत्यनुष्ठानसमये नित्यविग्रहविशिष्टस्यानुसन्धेयत्वोक्तेः, यथाक्रतुन्यायेन तद्विग्रह-विशिष्टकैङ्कर्यपर्यन्तब्रह्मानुभवस्यैव प्राप्तिरूपत्वानुशासनात् श्रीभाष्यकारनित्यप्रकारेणैव इज्या अनुष्ठेयेति भावः।

होतृशाखोक्त हौत्रपरिग्रह न्यायश्चेत्थं– तान्त्रिकोक्तः होतृशाखा ऋग्वेदः तदुक्तहौत्रं अध्वर्युभिरुपादेयं न वेति विशये नेति पूर्वपक्षः, कल्पं बहु वा स्वशाखोक्तं ग्राह्यमिति धर्मज्ञसम्मतेः । सिद्धान्तस्तु ऋग्वेदोदितहौत्रमेवाध्वर्युभिरपि ग्राह्यम् । अधिकृतशास्त्रप्रतिपादितस्य साङ्गपूर्णोपदेशयुक्तस्य ग्राह्यतया ऋग्वेदविहितस्य हौत्रस्यैव तथात्वात्।

शोषणदाहने अभिधाय भगवद्दक्षिणपादे मूलमन्त्रेण स्वात्मनः प्रेशमभिधाय ''अपरेण प्राणायामेने'' त्यादिना क्रमव्यत्यासो महीयान् दृश्यते । तथा आधारशक्त्यादिकल्पनेऽपि महीयान् प्रक्रियाभेदो विदुषां स्फुटः । तथा कल्पिते नागभोगे भगवतो ध्यानप्रकरणे, ''वामोरूपरि विन्यस्तदक्षिणाङ्घ्रि-सरोरुहम् प्रसार्याधाय वामाङ्घ्रिं पादपीठाम्बुजान्तरे ।'' इत्यादिना प्रसारितवामपादमाकुञ्चितदक्षिणपादं

यजुर्वेदस्याध्वर्युकर्मण्यधिकृतया हौत्रानधिकृतत्वादिति ।

वङ्गिवंशेश्वराद्युक्तनित्यविग्रहविशिष्टाराधनानां संहिताभेद-मूलकतया वैकल्पिकत्वात् वैकल्पिके पूर्वोपदेशानुष्ठानपरम्परासिद्धस्यैव ग्राह्यतया श्रीभाष्यकारनित्याराधनस्यैव तथाविधतया ग्राह्यत्वसिध्यर्थं तत्तदिज्याप्रक्रियाभेदमाह - अत्रेत्यादिना । श्रीसाध्योपायशोधनाधि-कारे वङ्गिवंशेश्वरनारायणमुन्यादिनित्यप्रस्तावे ''அவற்றிலுள்ள वैषम्यங்கள் அவ்வோ संहिता विशेषங்களில் சொல்லும் விகற்பங்களாலே सङ्गतங்கள்'' इत्यनुगृहीतम् । श्री निक्षेपचिन्तामणौ वङ्गिवंशेश्वरादिनिबन्धनसम्प्रदायस्य उच्छिन्नप्रायत्वमनुगृहीतम् । नित्ये तु कल्पिते नागभोगे इत्यादिनेति । श्री स्तोत्रभाष्ये ''यथोक्तं श्री विष्वक्सेनसंहितायां - वैकुण्ठे तु परे लोके श्रिया सार्द्धं जगत्पतिः । श्री सहायो जगत्पतिः, उभाभ्यां भूमिनीलाभ्यां सेवितः परमेश्वरः । महायोगी जगद्धाता दिव्यसिंहासनोपरि । दिव्यसंस्तरणोपेते

ध्येयरूपमुक्तमिति महान् भेदः। कारिकायां मूलमन्त्रेण ध्यानमुक्तम् । नित्ये तु पञ्चोपनिषन्मन्त्रैर्ध्यानमिति मन्त्रेऽपि भेदः । अतः ''भाष्यकारोक्तनित्यानुष्ठान-निष्ठस्ये'' त्यादिना परमैकान्तिनां श्रीभाष्यकारोक्त-नित्यग्रन्थनिष्ठाया एवाचार्यपादैरुक्तत्वात् ''भाष्य-कारानुक्तमन्त्र न्यासः तच्छिष्याद्युक्तप्रकारेणानुष्ठेय इति ज्ञापनाये'' त्यादिना द्वितीयाधिकारे भाष्यकारा-नुक्तांशस्यापेक्षितस्य तच्छिष्य प्रशिष्याद्युक्त-प्रकारेणोनुष्ठेयतोक्तेश्च नित्यप्रकारेणैव सर्वमनुष्ठेयम् । अनुक्त न्यासादिकन्तु ''न्यासेन देवमन्त्राणां देवतादात्म्यभावनात्। अप्राकृताङ्गकरणात् पूजामर्हति साधकः ।'' इति तृतीयाधिकारोपात्तवचनेन मन्त्र-न्यासादीनामिज्याधिकारार्थत्वावगमेनापेक्षितत्वात् वङ्गिवंशेश्वरोक्तप्रकारेणैवानुष्ठेयम्।

शेषा हि फणिमण्डिते। पञ्चोपनिषदाम्नातदिव्यमङ्गलविग्रहः । अप्राकृततनुर्देवो नित्याकृतिपरो युवा । नित्यातीतो जगद्धाता नित्यैर्मुक्तैश्च सेवितः । बद्धाञ्जलिपुटैर्हृष्टैर्निर्ममैर्निरुपद्रवैः । चतुर्भुजश्श्यामलाङ्गः श्रीभूभ्यां नीलया सह। विमलैर्भूषणैर्नित्यैर्भूषितो नित्यविग्रहः । पञ्चायुधैस्सेव्यमानश्शङ्खचक्रधरो हरिः । सहस्रस्थूण-संयुक्ते मण्डपे परमेश्वरः। विन्यस्य वामबाहुञ्चासने वामपार्श्वके। दक्षिणं जानुके न्यस्तं लम्बयन् जगतां पति' तिरति। एवमेव ध्यानं भाष्यकारैः नित्ये प्रोक्त'मित्यनुगृहीतमिहानुसन्धेयम् । ननु श्रीभाष्यकार-नित्याराधनस्यातिविस्तृततया देशकालावस्थानुगुण्येन संकुचित

धर्मशास्त्रविहितसामान्यमन्त्रकरणकाराधनमपि परमैकान्तिभिः कार्यमिति चेन्न; देकालादिवैगुण्यदशायामपि परमैकान्तिनां श्रीमदष्टाक्षरकरणकसंक्षिप्ताराधनस्य ''श्री पराशरभट्टारकैश्च'' इत्यादिकया ''हरिं प्रणम्यचायम्य प्राणान् प्रणिपतन्गुरून्'' इत्यारभ्य श्रीमदष्टाक्षरमन्त्रस्य ऋषिच्छन्दोदेवताबीज शक्तीः प्रकाश्य भाष्यकारानुक्तो मन्त्रन्यासः तच्छिष्याद्युक्तप्रकारेणोपादेय इति ज्ञापनाय, 'मन्त्रन्यासं ततः कृत्वा मन्त्रार्थमपि चिन्तयेत्' इति सङ्ग्रहेणाभिधाय (पूर्वग्रन्थेष्वनिवेशितमन्त्रार्थमत्यन्तोपयुक्ततया स्वयमेवाभिधाय) 'एवं सञ्चिन्त्य मन्त्रार्थं ततस्तत्पुरुषं परं' इत्यादिना पूर्वैरुक्तं ध्यानं संक्षिप्य, तदनुक्तं पादादिकेशान्तध्यानं प्रपञ्च्य षोडशोपचारक्रमेण समाराधनं विहितम्। उपचारान्तराणामपि सर्वेषां एते षोडशप्रधानतमाः तदनुबन्धेनैवान्यत् सर्वमनुष्ठीयते । देशकालावस्थाद्यनुसारेण संक्षेपविस्तारस्वीकारश्च शास्त्रीयः । अतः पूर्वैरैककण्ठ्यमिहानुसन्धेय''मित्यन्तया द्वितीयाधिकार श्रीसूक्त्या, 'उक्तं च नारदीये श्रीमदष्टाक्षरब्रह्मविद्यायां षोडशोपचारोक्त्यनन्तरं 'एवमष्टाक्षरेणैव सर्वत्रार्चनकर्मणि। उपचारानिमान् कुर्वन् भक्तियुक्तेन चेतसे''ति तृतीयाधिकार श्रीसूक्त्या च स्फुटतरमुपलब्धेः । अतः श्रीभाष्यकार तच्छिष्याचार्यपादसम्प्रदायस्थानां तत् श्रीसूक्तिविश्वास-शालिनां श्रीभाष्यकार नित्यप्रकारेणैव इज्यानुष्ठेया। तद्विरुद्धसामान्य-मन्त्रकरणकाराधनादिप्रयोगरचनानुष्ठानप्रवर्तनान्यनादरणीयानिति प्रघट्टिकाफलितार्थः।

इदं च भगवदाराधनं नित्यं ब्रह्मचर्यप्रभृति । अनुगृहीतं श्रीनिक्षेपरक्षायां— ''वैश्वदेववत् पञ्चमहायज्ञवच्च देवतार्चनं नित्यं, तच्च ब्रह्मचर्यप्रभृति। यथोक्तं मन्वादिभिः। ''स्नात्वा नित्यं शुचिः

कुर्याद्देवर्षिपितृतर्पणम्। देवताभ्यर्चनं चैव समिदाधानमेव च।'' इति भगवदर्चनमेव त्वनन्यानाम्। तत्र 'गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ भिक्षुकः । य इच्छेत्सिद्धिमास्थातुं देवतां कां यजेत सः'' इत्यादिना महाभारतादिसिद्ध'मित्यादिना । श्रीपाञ्चरात्ररक्षायां—नित्यं चैतद्वैश्वदेववद्भगवत्समाराधनं, नित्यमाराधयेद्धरिमिति वचनात् । ''शौनकोऽहं प्रवक्ष्यामि नित्यं विष्णवर्चनं परम्। प्रवः पान्थमन्धसोऽधि इत्यर्धर्चेविधानतः इति सूत्रान्तरानुसारात् । ''स्नात्वा नित्यं शुचिः कुर्याद्देवर्षिपितृतर्पणम् । देवताभ्यर्चनं चैव समिदाधानमेवचे''ति सामान्यतो मनूक्तेश्च। उक्तश्चानुशासनिके श्री पुण्डरीक नारद संवादे– ब्रह्मचारी गृहस्थोऽपि वानप्रस्थोऽथ भिक्षुकः। केशवाराधनं हित्वा नैव याति पराङ्गति''मिति। भरद्वाजसंहितायां–''नित्यं विष्णुपरं कर्म कुरु निन्द्यानि मा कृथाः । सदात्मानं विबुध्यस्व मा कामेषु मनः कृथाः । यजस्व नित्यमात्मेशं मा नंसीरन्यदेवताः'' इति शिष्यकर्तव्योपदेशानन्तरं 'यथोक्तविधिना पूर्वं स्थापितं शुभविग्रहम् । श्रीभूमिनीलासहितं परिवारैस्समन्वितम् । अव्यक्तपरिवारं वा देवं सङ्ग्राह्य याजये''दिति यागसंस्कारो विहितः । एवं च उपनयनप्रभृति सामान्यतो भगवदाराधनस्य विहितत्वात् यागसंस्कारदशायां याजयेदित्याचार्यकर्तृक याजनविधानात् देवर्षितर्पणसमिदाधानवदाराधनं प्रतिपुरुषं कर्तव्यमिति सिद्धम् । न च ''एकपाकेन वसतां पितृदेवद्विजार्चनम्। एकं भवेत् विभक्तानां तदेव स्यात् पृथक् पृथक्'' इति वचनात् अविभक्तेषु एकेनैव भगवदाराधनं कार्यमिति वाच्यम्। तत्र देवार्चनशब्दस्य साङ्केतिक कुल देवताराधनपरतया प्रतिदिनकर्तव्यनित्याराधनविषयत्वाभावात् तद्वचनव्याख्याने विज्ञानेश्वरेण एवमुक्तं -

'पित्रर्चनं प्रातिसंवत्सरिकश्राद्धादिरूपं देवार्चनं साङ्केतिककुलदेवताराधनरूपं द्विजार्चनमतिथिपूजादिरूपमिति । दर्शसङ्क्रमणग्रहण श्राद्धादेरविभक्तदशायामपि प्रत्येकं कर्तव्यत्वात् पित्रर्चनपदं यथा विशेषपरं तथा ब्रह्मचर्यप्रभृतिदेवर्षिपितृतर्पणसमिदाधानसहपठितदेवतार्चनस्यापि अविभक्तदशायामपि कर्तव्यत्वात्, देवार्चनपदं उक्तविशेपरमित्यभिप्रायः। प्रतिपुरुषं देवतार्चनं बहुष्वास्तिकेषु दृश्यते। केषुचित्तदकरणमालस्यमूलं कृत्याकरणमेवेति बोध्यम् । श्रीपाश्चरात्ररक्षायां नित्यव्याख्यानमेकदेशिभिस्तदानीमेवापहृतं लुप्तम् । तत्र प्रातः स्नानप्रकरणे ''वक्ष्यमाणक्रमेण तीर्थावाहनादिपूर्वकं सर्वक्रियामूलभूतं स्नानमाचरे''दिति वाक्यमिज्यायां स्नानप्रपञ्चनमभिप्रेत्य प्रवृत्तम् । ''इज्यां भाष्यकारोक्तनित्यग्रन्थविवरणमुखेन व्याख्यास्याम'' इति नित्यग्रन्थविवरणं प्रतिज्ञाय, ''अथ परमैकान्तिनो भगवदाराधन प्रयोगं वक्ष्ये'' इत्यत्र ''अथ गद्ये यथावत् प्रपत्तिप्रतिपादनानन्तरं, तत एव तन्निष्ठाधिकारिविशेषसिद्धिसमनन्तरं यथावस्थित स्वरूपरूपगुण विभूतिलीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिनेति वक्ष्यमाणानुसाराच्चात्र तथाविधशरणागतिविषयगद्यग्रन्थस्य पूर्ववृत्तत्वं विवक्षितमिति ज्ञायत'' इत्यथ शब्दार्थमुक्त्वा, परमैकान्तिशब्दार्थाधिकारिस्वरूपं प्रतिपाद्यानधिकारापादकदोषविशेषापचारविशेषांश्च उपपाद्य, ''सर्वेषामन्ततो भगवत्प्राप्तिस्समाना। विकलानामपि भागवताना'' मितीज्याग्रन्थोऽवसितो दृश्यते । नित्यकृत्स्नव्याख्या न दृश्यते । ''व्याख्यातमभिगमनं व्याख्यातमुपादानं व्याख्यातः स्वाध्यायः''

इतिवत् ''व्याख्यातेज्ये'ति वाक्यं नास्ति। न हि नित्यग्रन्थविवरणं प्रतिज्ञाय प्रतिज्ञावाक्यमात्रं व्याख्यातमिति वक्तुं शक्यते । एकदेशिपरिगृहीतनित्यव्याख्याने गद्योक्तशरणागत्यनुष्ठात्रधिकारि-कर्तव्येज्याया मप्यनुध्यानानुकूलमनोवृत्तिसिध्यर्थं गद्योक्तशरणागति-कर्तव्यत्व तत्स्थापनपूर्वकं मोक्षार्थशरणागतिस्थापनादिकं 'आर्तोप-च्छन्दनं गद्य'मिति वादिनामेकदेशिनामत्यन्तबाधकमिति नित्य-व्याख्यापहारस्सम्भावितः । आचार्यैस्तत्र तत्राचार्यपादानुगृहीत वाक्यानि वङ्गिवंशेश्वरादिसम्प्रदायग्रन्थवाक्यानि पाञ्चरात्र-प्रमाणान्यनुसृत्य इज्या निरूप्यत इत्यनुसन्धेयम्। यदन्योक्तं– नित्ये 'तत्तन्मन्त्रेण भगवत्पर्यन्ताभिधायिना मूलमन्त्रेणे'त्यादेः, 'श्री वैकुण्ठादिपार्षदान्तं तर्पयित्वे'त्यन्तस्य वाक्यस्य सत्त्वात् व्यापकमन्त्रसहिततत्तन्मन्त्रैरेव मन्त्रप्रोक्षणादिकं परमैकान्त्यनुष्ठेय-मिति। तन्मन्दं– नित्ये सन्ध्याघट्टप्रक्षिप्तत्वस्य श्री निक्षेपचिन्तामणौ व्यवस्थापिततत्वात्। अयमर्थस्सत्पथरक्षायां प्रथमपरिच्छेदेऽस्माभि-रुपपादितः । किञ्च श्री पाञ्चरात्ररक्षायां – ''अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्य' इत्यारभ्य शौनक व्यासबोधायनादिधर्म-शास्त्रानुक्तेन भगवच्छास्त्रोक्तवर्त्मना स्थानविशेषादिपूर्वकविलक्षण-समाराधनप्रक्रियाप्रतिपादनं कथं भूतमधिकारिणमधिकृत्य भाष्यकारैः कृतमिति कर्णे तवागत''मिति श्रीसूक्त्या श्रीभाष्यकारनित्यस्थ-स्नानादिप्रक्रिया भगवच्छास्त्रमूलकेति प्रतीयते। तत्प्रक्रियायाः पठ्यमानाहिर्बुध्न्यसंहितामूलकत्वं स्फुटतरमुपलभ्यते । तत्संहितायामष्टाविंशेऽध्याये ''तीर्थं गत्वा शुचौ देशे मृदमादाय

मन्त्रतः । द्वेधा कृत्वैकभागेन कुर्याद्देहविशोधनम् । स्नात्वाचम्य गृहीत्वान्यं मृद्भागं विन्यसेत्त्रिधा । वामे पाणौ दिशां बन्धं विदध्यादेकभागतः । गात्रलेपं ततः कुर्यादन्येनांशेन नारद । सङ्कल्पयेत्तृतीयांशं तीर्थपीठमतः परम् । गङ्गां तत्र स्मरेद्विष्णोः वामपादविनिस्सृताम् । अर्घ्यमस्या निवेद्याथ ततो हृत्वा जलाञ्जलिम् । स्वमूर्ध्नि सिञ्चेत् त्रिः कृत्वः सप्तकृत्वोऽभिमन्त्रितम् । पीत्वा पुनस्समाचम्य प्रोक्षयेदात्मनस्तनुम् । निमग्नस्तत्र देवस्य पादाब्जन्यस्तमस्तकः । यथाशक्ति जपेन्मन्त्रं तस्य ध्यानपरायणः । तत उत्तीर्य चाचम्य धृत्वा वस्त्रोत्तरीयके । धृतोर्ध्वपुण्ड्रः स्वाचान्तो देवादीनच्युतात्मकान् । ध्यात्वा सन्तर्पयेदन्यदाह्निकं विधिवच्चरेत् । यागभूमिं समागम्य क्षालिताङ्घ्रिकरो वशी । आचम्य वाग्यतो भूत्वा प्रारभेत समर्चनम् । अर्चयामि त्वदीयोऽहं त्वद्दत्तैरौपचारिकैः । सांस्पर्शिकैरिति ब्रूयादेनमाभ्यवहारिकै''रिति वचनानि सन्ति ।

नित्ये 'तीर्थं गत्वा शुचौ देशे' इत्यादिभिः 'शुद्धवस्त्रधरो धृतोत्तरीयः ऊर्ध्वपुण्ड्रान् तत्तन्मन्त्रेण धारयित्वे'त्यन्तवाक्यैः, तीर्थं गत्वा शुचौ देशे' इत्यादिभिः 'तत उत्तीर्य चाचम्य धृत्वा वस्त्रोत्तरीयके । धृतोर्ध्वपुण्ड्र' इत्यन्तैरुदाहृतानिरुद्धसंहितावाक्यैः प्रतिपादितार्थाः प्रत्यभिज्ञायन्ते । उपरि 'यागभूमिं गच्छेदि'त्यादिभिर्वाक्यैः स्वनियाम्येत्यादि सात्त्विकत्यागवाक्ये 'औपचारिकसांस्पर्शिकाभ्यव-हारिकादिसमस्तभोगानि'ति वाक्येन भूतशुद्धिप्रकरणवाक्यैश्च 'यागभूमिं समागम्य क्षालिताङ्घ्रिकरो वशी । आचम्य वाग्यतो भूत्वा प्रारभेत समर्चनम् । अर्चयामि त्वदीयोऽहं त्वद्दत्तैरौपचारिकैः । सांस्पर्शिकैरिति ब्रूयादेनमाभ्यवहारिकैः । संहरेदेव तत्वानि प्रतिसञ्चर

वर्त्मना। ततः स्थूलमिदं देहं शोषयित्वाथ सन्दहेत्। प्राणायामेन चाद्येन मन्त्रं नाभ्यान्तु विन्यसेत् । तदुद्भूतेन नादेन सुषुम्नामध्यवर्तिना । वायुमण्डलमभ्येत्य तदुत्थेनैव वायुना। संशोषयेदिमं देहं स्थूलं सुरमुने ततः । प्राणायामद्वितीयेन हृदये विन्यसेन्मनुम्। मन्त्रोत्थेनाग्निना देहं दहेन्मण्डलवर्तिना। तृतीयेन स्वमात्मानं प्राणायामेन देशिकः । अथो निवेशयेद्विष्णोर्वामपादाम्बुजस्य वै। स्वं तदङ्गुष्ठनिष्ठच्यूतपीयूषाप्लावितं स्मरेत् । पञ्चोपनिषदैर्मन्त्रैः ततस्सञ्जातविग्रहम् । न्यस्ताङ्गो मन्त्रविन्मन्त्रैश्चिन्तयित्वा सुदर्शन''मिति तत्संहितावचन विहितयाग-भूमिगमन सात्विकत्यागभूतशुद्धिप्रकाराः प्रत्यभिज्ञायन्ते । 'देवानृषीन्पितॄन्भगवदात्मकान् ध्यात्वा सन्तर्प्ये'ति वाक्येन 'धृतोर्ध्व पुण्ड्रः स्वाचान्तो देवादीनच्युतात्मकान् । ध्यात्वा सन्तर्पयेदि'ति तत्संहितावचनविहिततर्पणक्रमः स्मारितः । एवं चोर्ध्वपुण्ड्र-धारणानन्तरं भगवदात्मकत्वध्यानपूर्वकं देवर्षिपितृतर्पणस्यैव तत्संहितावचनावगतत्वेन, नित्ये ऊर्ध्वपुण्ड्रधारणकथनानन्तरं ''देवानृषीन् पितॄन् भगवदात्मकान् ध्यात्वा सन्तर्प्ये'ति वाक्यसत्त्व एव पूर्वोपदर्शितस्नानोर्ध्वपुण्ड्रयागगृहगमनाराधनसात्त्विकत्यागभूत-शुद्धिक्रमप्रतिपादकतत्संहितावचनानुगुण्यं भवति । तत्संहितायां 'ध्यात्वा सन्तर्पयेदन्यदाह्निकं विधिवच्चरेदि'त्युक्तेः । तद्विहित-देवादितर्पणं स्नानाङ्गमिति प्रतीयते। तदनन्तरं विधिवदाह्निकविधानं त्रयी धर्मशास्त्रविहितमिति स्वीकार्यम्। तत्संहितायां पञ्चदशेऽध्याये – ''श्रौतस्मार्तक्रियानित्यो नित्यनैमित्तिके रतः। ईदृग्गृहस्थो जिज्ञासुः प्राप्य ज्ञानमनुत्तमम्। प्राप्तवेदान्तविज्ञानः वैष्णवं श्रयते पद''मिति श्रौतस्मार्तक्रियानुष्ठानस्यैव विधानात् व्यापकयोजनप्रमाणादर्शनाच्च ।

'तत्तन्मन्त्रेण भगवत्पर्यन्ताभिधायिने'त्यारभ्य 'श्री वैकुण्ठादि-पार्षदान्तं तर्पयित्वे'त्यन्तं वाक्यं नित्यमूलाहिर्बुध्न्यसंहितानननुगणत्वात् प्रक्षिप्तमेवेति स्वीकार्यम् । वङ्गिवंशेश्वरैः श्रीभाष्यकारोक्त-मूलमन्त्रकरणकस्नानवस्त्रधारणानन्तरं ''धृतोर्ध्वपुण्ड्रो देवर्षिपितॄन् सन्तर्प्य मन्त्रतः । प्रयतः परया भक्त्या स्वकर्माराध्यमच्युतम् । आदित्यमण्डलान्तःस्थं प्रणम्य मनसा स्मरन् । सन्धातृत्वेन सर्वेषां सन्ध्येति परिकीर्तितम् । श्रुतिस्मृत्युदितं कर्म स्ववर्णस्वाश्रमोचितम् । फलाभिसन्धिरहितं परब्रह्मार्चनात्मकम् । न्यस्य कर्तृत्वभोक्तृत्वे स्वामित्वं च परात्मनि । नित्यनैमित्तिकैः काम्यैः कर्मभिश्च समन्वितम् । गायत्रीजपपर्यन्तं मन्त्राचमनपूर्वकम् । सान्ध्यं कर्माखिलं साधु समाप्य च यथाविधि । ततः स्वकर्मभोक्तारमादित्यान्तरवस्थितम् । उपस्थाय स्वकैर्मन्त्रैर्नारायणमतन्द्रितः । ततो माध्यन्दिनं कर्म स्वोदितं श्रुति-चोदितम् । स्नानादिब्रह्मयज्ञान्तं कृत्वाखिलमतन्द्रितः ।'' इत्यूर्ध्वपुण्ड्रदेवर्षितर्पणसामान्यमन्त्रकरणकमाध्यन्दिनसन्ध्योपास-नादिकमुक्तम् । 'श्रुतिस्मृत्युदितं कर्म यावच्छक्ति परात्मनः । आराधनत्वेनापाद्य सोर्ध्वपुण्ड्रश्च तर्पयेत् । आपो हीत्यादिभि-र्मन्त्रैर्वाचकैः परमात्मनः । सम्प्रोक्ष्य मन्त्राचमनं मन्त्रैस्तत् प्रतिपादकैः । आदित्यान्तः स्थितायार्घ्यं वितीर्य परमात्मनः । प्रतिपादिकया विष्णोः सावित्र्या तं जपेद्धरिम् । ध्यायन् जप्त्वोपतिष्ठेत तमेव पुरुषोत्तमम्'' इति भट्टारकनारायणमुनिभिः व्यापकयोजनं विना श्रुतिस्मृतिविहित-सन्ध्योपासनादिकं प्रत्यपादि । श्रीपाञ्चरात्ररक्षायां तत्र तत्र ''श्रीभाष्य-कारोक्तनित्यानुष्ठाननिष्ठस्य ब्राह्ममुहूर्तादिप्राप्तौ यत् कर्तव्यं तत्तावत् तच्छिष्यप्रशिष्यग्रन्थतन्मूलसंहिताद्यनुसारेण संगृह्यत'' इत्युक्त्वा, ''स्वसूत्रविहितमेव सन्ध्योपासनादिकं कर्तुमुचितमि''त्यभिधाय,

अथेज्या।

* * *

तृतीये काले कृतञ्च करिष्यामि + इज्याया भगत्कर्मणा भगवन्तं वासुदेवमर्चयिष्यामि, भगतो बलेन + करिष्यामि, भगवानेव + इज्याख्यं कर्म स्वस्मै स्वप्रीतये स्वयमेव कारयतीत्यनुसन्धाय प्रातःस्नानोक्त-प्रकारेण माध्याह्निकस्नानं सङ्कल्पपूर्वकं देवर्षिपितृ-तर्पणान्तं कुर्यात् । अथवा धर्मशास्त्रोक्त-प्रकारेण मृत्तिकागोमयादिकं गृहीत्वा नद्यादिकं गत्वा

तत्रोदाहृतसम्प्रदायवचनानि प्रमाणत्वेनोदाहृतानि श्रीचरमश्लोकाधिकारे वङ्गिवंशेश्वरादिवचनानां श्रुतिस्मृतिविहितसामान्यमन्त्रकरण-कवर्णाश्रमानुष्ठानपरत्वमेवानुगृहीतम् । तत्सर्वं सत्पथरक्षायां प्रथम-परिच्छदेऽस्माभिः प्रपञ्चितम् । एवं च श्रीभाष्यकारोक्त-नित्यानुष्ठाननिष्ठविषये मूलमन्त्रयोजनं विना श्रुतिस्मृतिसूत्रमात्रविहित सन्ध्यादिनित्यनैमित्तिककर्मानुष्ठेयत्वस्य श्रीभाष्यकारशिष्यप्रशिष्या-चार्यपादनिबन्धनसिद्धत्वात् व्यापकयोजनप्रमाणानां मूलवेदसंस्कृत-पञ्चरात्रदीक्षितोभयविषयत्वस्य प्रमाणसम्प्रदायैः सत्पथरक्षाया-मस्माभिः स्थापितत्वात् । नित्यस्थसन्ध्याघट्टप्रक्षिप्तत्वं सत्त्वस्थैः प्रामाणिकैरङ्गीकार्यम् । अतः आचार्यप्रदर्शितरीत्यैव माध्याह्निकं कार्यमिति सिद्धम्।

अथेज्याप्रयोगमाह—अथेज्येति। इज्यासङ्कल्पसात्त्विकत्यागा-वाह— कृतं च करिष्यामीत्यादिना । माध्याह्निकस्नानमाह— प्रातःस्नानोक्तप्रकारेणेति । अत्र प्रमाणजातं पूर्वमुदाहृतम् ।

सुप्रक्षालितपाणिपादस्तीरं संशोध्य द्विराचम्य त्रिः प्राणानायम्य, श्री गोविन्देत्यादि + भगवत् प्रीत्यर्थं कर्मण्यतासिध्यर्थं नद्यादौ माध्याह्निकस्नानं करिष्य इति सङ्कल्प्य, ''समस्त-जगदाधारे'ति साञ्जलिर्भगवन्त-मनुज्ञाप्य, तीर्थाधिदैवतं श्रीरङ्गनाथादिकमनुज्ञाप्य, दूर्वां, ''अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा । शिरसा धारिता देवि रक्षस्व मां पदे पदे । उद्धृतासि वराहेण + त्वयि सर्वं प्रतिष्ठितम्'' इति मृदश्च गृहीत्वा, तीरं संशोध्य संस्थाप्य, नाभिदघ्नजले सरसि स्नात्वा, मृदं गृहीत्वा, ''अश्वक्रान्त'' इत्यादिसप्तवाक्यान्युच्चार्य, आर्द्रामलक-मात्रया एकया मृदा शिरसि आलिप्य, नाभेरुपरि द्वाभ्यां अथ त्रिभिः षड्भिः पादद्वयञ्चालिप्य, ''गन्धद्वारा'' मिति गोमयमालिप्य स्नात्वा, षडृचं वारुणसूक्तं ''आपो वा इदं सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽमृतमापोऽन्नमाप-स्सम्राडापो विराडापः स्वराडापश्छन्धाꣳ स्यापो-ज्योतीꣳष्यापस्सत्यमापस्सर्वा देवता आपो भूर्भुव-स्सुवराप ओं'' इति यजुः, आपो हिष्ठेति तिस्रः,

---

धर्मशास्त्रोक्त-स्नानप्रकारमाह—अथ वेति । धर्मशास्त्रोक्तस्नानमपि उपदेशपरंपरागतं परमैकान्तिकर्तव्यमिति आचार्यपादश्रीसूक्तिभिः सत्पथरक्षायां प्रथमपरिच्छेदेऽस्माभिः स्थापितम् ।

हारीतः—प्रातःस्नातोऽपि मध्याह्ने पुनः स्नानं समाचरेत् । न भुक्त्वालङ्कृतो वापि मन्त्रैर्वा स्नानमाचरेत् । एतन्मन्त्रस्नानं

हिरण्यवर्णा इति चतस्रः, पवमानानुवाकं च जपित्वा प्रोक्ष्य, सूर्यं प्रणवेन निरीक्ष्य, शिरश्शोधनाद्यूर्ध्व-पुण्ड्रादिकं समाचरेत्। वस्त्रनिष्पीडनमात्रं माध्याह्निक-सन्ध्यानन्तरं कुर्यात्। ततो द्विराचम्य, प्राणानायम्य, माध्याह्निकसन्ध्यामुपासिष्य इति सङ्कल्प्य, आपोहिष्ठेति पूर्ववत् प्रोक्ष्य, परिषिच्य, आपः पुनंत्वित्यनुवाकस्याप ऋषिः, अनुष्टुप् च्छन्दः, ब्रह्मणस्पतिर्देवता, अपां प्राशने विनियोगः, "आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु

प्रातःस्नातस्याप्यशक्तौ द्रष्टव्यम्। "भोगानुपार्ज्य यागार्थं विधिवत् स्नानमाचरेत्। शक्तश्चेदन्यथा रोगात् शाव्या सम्मार्जनं चरे" दिति शाण्डिल्यस्मृतिवचनमिह भाव्यम्। ऊर्ध्वपुण्ड्रादिकं समाचरेदिति। तत् प्रमाणोपपत्त्यादिकं पूर्वं प्रपञ्चितम्। अथ वस्त्रनिष्पीडनस्य माध्याह्निकान्तरकार्यत्वमुक्त्वा माध्याह्निकसन्ध्योपासनमाह— वस्त्रनिष्पीडनमात्रमित्यादिना। अथ शङ्खेनापि प्रातस्सन्ध्यां सनक्षत्रां मध्यमां स्नानकर्मणि। सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधि। जमदग्निश्च — आदित्याभिमुखो मज्जेत् आपो अस्मानिति त्र्यचा। मध्यन्दिने चाचामेन्मन्त्रेणापः पुनंत्विति। अग्निश्च मेति सायाह्ने प्रातस्सूर्यश्च मेति च। अत्र भारद्वाजः - आपः पुनंत्वित्येतस्य ऋषिराप इति स्मृतः। छन्दोऽनुष्टुबिति प्रोक्ता देवता ब्रह्मणस्पतिः। विनियोगः पयःपाने इत्युक्त्वाथ समन्त्रकम्। पीत्वा जलमथाचामेदन्यत् प्रातरिवाखिलम्। अन्यन्मार्जनादिजपान्तं प्रातःकालावत् कर्तव्यमित्यर्तः। स्मृत्यर्थसारे—अर्घ्यमेकं प्रदातव्यं मध्याह्ने भास्करं प्रति। उभयोस्सन्ध्यायोश्चैव अप इत्थं त्रिरुत्क्षिपेत्। यदि स्यात्

माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् । यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहꣳस्वाहा'' इत्यपः प्राश्य, दधिक्राविण्ण इति पूर्ववत् प्रोक्ष्य, एकमर्घ्यं दत्वा, शेषं

क्लिन्नवासा वै वारिमध्यगतो जपेत्। अन्यथा तु शुचौ भूम्यां दर्भेषु सुसमाहितः। विश्वामित्रः—स्वप्रभं सच्चिदानन्दं हृदये मण्डलेऽपि च। ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात्। एतां गायत्रीं, हृदये मण्डलेपि चेत्युभयवासस्थानोक्त्या, 'स यश्चायं पुरुषे । यश्चासावादित्ये। स एक' इति श्रुत्युक्तध्यानार्थो विवक्षितः । अत्र व्यासः — अथोपतिष्ठेदादित्यं क्षिप्त्वा पुष्पाञ्चिताञ्जलिम् । आसत्येत्वीक्षयन्नर्कमुद्वयं तमसस्परि । उदुत्यं चित्रमित्येतत्तच्चक्षुरिति मन्त्रतः । हꣳसश्शुचिषदित्येतत् सावित्र्या च विशेषतः । अन्यैश्च वैदिकैर्मन्त्रैः सौरैः पापप्रणाशनैः । प्रदक्षिणं समावृत्य नमस्कुर्यात्ततः क्षितौ। निष्पीड्य स्नानवस्त्रं हि द्विराचम्यार्चयेद्धरिम्। अत्रोपस्थानमन्त्रेषु यथोपदेशं कार्यम्। पितामहः— आसत्येत्र्यक्षु पूर्वे द्वे त्रिष्टुभौ कवयो विदुः। गायत्री च तृतीया स्याच्चरमा जगती स्मृता। उष्णिक्तच्चक्षुराद्यस्स छन्द इत्युच्यते बुधैः । हिरण्यस्तूप इत्येष ऋषिर्देवोऽत्र भास्करः । भरद्वाजः— अथोपतिष्ठेदादित्यमासत्येनेति मन्त्रतः । आसत्येनेति षड्चां हिरण्यस्तूप इति ऋषिः । पूर्वे द्वे त्रिष्टुभौ पश्चात् गायत्री जगती ततः । उष्णिक्त्रिष्टुबित्युक्तानि छन्दांस्यर्कोऽधिदेवता । वसिष्ठः— ऋक्सामाथर्ववेदोक्तान् जपेन्मन्त्राण्यजूंषि च । जपित्वैवं ततः कुर्याद्देवर्षिपितृतर्पणम्। अत्र प्रातःकाले ब्रह्मयज्ञाकरणे माध्याह्निकानन्तरतर्पणात् प्राक् ब्रह्मयज्ञः कार्यः। सचार्वाक्तर्पणात्कार्यः। 'पश्चाद्वा

पूर्ववत्कुर्यात्। उपस्थाने माध्याह्निकसन्ध्योपस्थानमिति विशेषः । आसत्येनेति षडृचस्य हिरण्यस्तूप ऋषिः, आद्ययोस्त्रिष्टुप्, चतसृणां गायत्री जगत्युष्णिक् त्रिष्टुभश्छन्दांसि, सविता देवता, माध्याह्निकसन्ध्योपस्थाने विनियोगः, आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च । हिरण्ययेन सविता रथेनादेवो याति भुवना विपश्यन् । उद्वयन्तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् । उदुत्यं जातवेदसन्देवं वहन्ति केतवः । दृशे विश्वाय सूर्यम् । चित्रन्देवाना-मुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आ प्रा द्यावा पृथिवी अन्तरिक्षꣳसूर्य आत्मा जगतस्तस्थुषश्च । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदश्शतम् । जीवेम शरदश्शतम् । नन्दाम शरदश्शतम् । मोदाम शरदश्शतम् । भवाम शरदश्शतꣳशृणवाम शरदश्शतम्। प्रब्रवाम शरदश्शतमजीतास्स्याम शरदश्शतं ज्योक्च सूर्यं दृशे, य उददगान्महतोऽर्णवाद्विभ्राजमानस्सरिरस्य मध्यात्समा वृषभो रोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु'' इति आदित्यमुपस्थाय सन्ध्यादिनमस्कारादिकं कुर्यात्। ततो यथाशक्ति मूलमन्त्रजपः । आधारशक्त्यादितर्पणमपि केचित्कुर्वन्ति। श्रीपाञ्चरात्ररक्षायां द्वितीयाधिकारे 'धर्मशास्त्रानुक्तेन भगवच्छास्त्रोक्तेन वर्त्मना स्नानविशेषादिपूर्वकं भगवत्समाराधनप्रयोगो भाष्यकृता सङ्गृहीत' इत्यभिधानात् परमैकान्तिनां श्रीभाष्यकार नित्यानुष्ठाननिष्ठानां नित्यप्रकारेणैव माध्याह्निकस्नानं कर्तव्यम्।

प्रातराहुतेः। वैश्वदेवावसाने वा नान्यदत्र निमित्ततः''इति रत्नकारस्थ-वचनजातान्यत्र भाव्यानि। मध्याह्नसन्ध्यायामेकार्घ्यविधानादाचाराच्च काले एकार्घ्यम्। कालातिक्रमे प्रायश्चित्तार्घ्यश्च कर्तव्यम्। केषाञ्चित् कालेऽप्यनेकार्घ्यदानकथनमविमर्शकृतम्। अपरोक्तः मध्याह्ने गायत्रीजपत्यागोऽयुक्तः। अन्योक्तः अष्टाक्षरसंपुटितगायत्रीजपश्च दीक्षितविषयः। श्रीभाष्यकारसंम्प्रदायस्थैः तथा नानुष्ठेय इति सत्पथरक्षायामस्माभिः प्रमाणाचार्यश्रीसूक्त्यादिभिः स्थापितः। किञ्च श्री पाञ्चरात्ररक्षायां प्रातस्सन्ध्योपास्तिविचारे 'स्वसूत्रविहितमेव सन्ध्योपासनादिकं कर्तुमुचितम्।' सायं सन्ध्याप्रकरणे ''यथासूत्रं सायं सन्ध्योपासन''मिति चानुगृहीतम्। आपस्तम्बसूत्रे सन्ध्योपास्त्य-दर्शनात् बोधायनसूत्रविहितसन्ध्योपासनमेव स्वसूत्रविहितमिति 'स्वसूत्रे विद्यमानेऽपि परसूत्रेण वर्तते। बोधायनमतं कृत्वा स्वसूत्रफलभाग्भवेदि''ति शास्त्रादवगम्यते। बोधायनीयधर्मद्वितीय-प्रपाठके 'अथ हस्तौ प्रक्षाल्ये'त्यादिना ''अन्तर्जलगतोऽघमर्षणेन त्रीन् प्राणायामान् धारयित्वे''त्यन्तेन माध्याह्निकस्नानं विधाय, वस्त्रपरिधानविधानानन्तरम् अप आचम्य दर्भेष्वासीनो दर्भान् धारयमाणः प्राङ्मुखस्सावित्रीं सहस्रकृत्व आवर्तयेत्। शतकृत्व अपरिमितिकृत्वो वा दशावरामिति। अथादित्यमुपतिष्ठते'' इति मध्याह्नसन्ध्योपास्तौ गायत्रीजपो विहितः। मध्याह्नसन्ध्योपास्तौ गायत्रीजपविधायकं 'सावित्रीं च यथाशक्ती'त्यादि श्री वैष्णवधर्मशास्त्रवचनं सत्पथरक्षायां तद्विचारावसरेऽस्मदुपात्तम्। विस्तरेण तत्र गायत्रीजपकर्तव्यता स्थापिता। अतः प्रमाणाचार्यपाद-श्रीसूक्तिविरुद्धो मध्याह्नसन्ध्यागायत्रीजपत्यागवाद इति बोध्यम्। ''तस्मादष्टाक्षरं मन्त्रं मद्भक्तैर्वीत-कल्मषैः। सन्ध्याकालेषु

अथेज्याप्रयोगः ।

★ ★ ★

सुप्रक्षालितपाणिपादः स्वाचान्तः तत्तत् क्षेत्राधीशं श्रीरङ्गनाथादिकं भगवन्तमभ्यर्च्य,

---

जप्तव्य''मिति श्री वैष्णवधर्मशास्त्रमनुसृत्याह — ततो यथाशक्ति मूलमन्त्रजप इति । वासिष्ठसंहितादावनुक्तत्वात् नित्ये सन्ध्याघट्टप्रक्षिप्तत्वस्य श्री निक्षेपचिन्तामणौ स्थापितत्वात् वंगिवंशेश्वरैः प्रातःकाल इव मध्याह्ने अनुक्तेः, प्रत्युत 'ततो माध्यन्दिनं कर्म स्वोदितं श्रुतिचोदितम् । स्नानादिब्रह्मयज्ञान्तं कृत्वाखिल-मतन्द्रितः। इज्याकाले तु सम्प्राप्ते हृष्टो देवगृहं गतः' इति ब्रह्मयज्ञान्तकथनानन्तरं विधिवद्भगवद्यागकथनात् अनुष्ठानपारम्पर्या-भावाच्च मध्याह्ने आधारशक्त्यादितर्पणं न कार्यमित्यभिप्रायेणाह— आधारशक्त्यादितर्पणमपि केचित्कुर्वन्तीति । श्रीभाष्यकार-नित्यानुष्ठाननिष्ठानां नित्योक्तप्रकारेणैव माध्याह्निकस्नानकर्तव्यत्वं सोपपत्तिकमाह— श्रीपाञ्चरात्ररक्षायामित्यादिना।

इज्यानुष्ठानप्रकारमाह— अथेति । इयं चेज्यापररूपविषयेति श्रीपाञ्चरात्ररक्षायामनुगृहीतम्। अथ मन्त्रसिद्धान्तोपास्यपररूपविषयां भोगार्चनमयीमिज्या''मित्यादिना । यदन्योक्तं— ''मन्त्रसिद्धान्ते परिवारभेदस्तु गुणीभूतमूर्त्यन्तरयोः वैकल्पिकः'' इत्याचार्यपाद श्रीसूक्तेः परिवाराणां मूर्तिमत्त्वतदभावरूपो भेदः परिवारभेदः, गुणीभूतमूर्त्यन्तरयोरिति सप्तमी । ते तु मूर्त्यन्तरे श्रीभूमिरूपे, ततश्च एकस्या एव भगवन्मूर्तेः प्राधान्यं । श्री भूम्योः गौणतयावश्यं सत्त्वं

भूषणायुधादि परिवाराणां विद्यमानत्वमविद्यमान्त्वं वा एतदुभयमपि मुख्यगौणभेदेन भोगभेदकमिति भाव इति । तदयुक्तं—गुणीभूत-मूर्त्यन्तरयोरिति पदस्य षष्ठ्यन्तस्य भगवन्मूर्तिपरत्वेन श्रीभूमि-परत्वासम्भवात् । ''नानाव्यूहसमेतं च मूर्तिद्वादशकं च यत् । तथा मूर्त्यन्तरयुतं प्रादुर्भावगणं हि यत् । प्रादुर्भावान्तरयुतं धृतं हृत्पद्मपूर्वके । लक्ष्म्यादि शङ्खचक्राद्यै''रित्याचार्यपादोदाहृतपौष्करसंहितावचनैः, ''सङ्क्रान्तमन्त्रसिद्धान्तं भेदभिन्नमनेकधा । यत्र शान्ततरं व्यूहं शान्तोदितमनन्तरम् । सुषुप्तिसंज्ञं स्वप्नाख्यं जाग्रद्व्यूहं यथोदितम् । मूर्त्यन्तरं केशवाद्यं प्रादुर्भावं तथान्तरम् । हृत्पद्मपद्मपीठादौ लक्ष्यं पुष्ट्यादिशक्तिभिः । लाञ्छनैश्शङ्खचक्राद्यैः गरुडप्रमुखैरपि । ऋते सिद्धादिभिश्शास्त्रपर्यन्तैर्यजनं हितम् । विश्वामित्रनृसिंहस्य दीक्षापूर्वं तथा परम् । विभवव्यूहसूक्ष्माख्यमधिकारं यथाक्रम''मित्यादिभिः पारमेश्वरप्रायश्चित्ताध्यायवचनैश्च मन्त्रसिद्धान्तेऽनेकमूर्त्याराधन-विधानात्, ''एकैव मूर्तिराराध्या प्राधान्येनोत्तराः पुनः । देव्यः श्रियादयश्चापि संपूज्याः परिवारवत् । आयुधैश्शङ्खचक्राद्यैः श्रीवत्साद्यैश्च भूषणैः । मूर्तिमद्भिः परिवृताः केवलं वाम्बुजासन । कथ्यते यत्र तत् प्रोक्तं मन्त्रसिद्धान्तमग्रिम''मिति श्रीपाञ्चरात्ररक्षोदाहृत श्रीपौष्करवचनैः एकस्या भगवन्मूर्तेः प्राधान्येनाराध्यत्वमितरासां भगवन्मूर्तीनां श्रियादीनां च परिवारवदाराध्यत्वावगमात्, ''गुणीभूत-मूर्त्यन्तरयो'' रित्यत्र प्रधानाराध्यभगवन्मूर्तितदतिरिक्तभगवन्मूर्त्योः परिवारभेदः वैकल्पिक इत्यर्थस्य स्वीकार्यत्वात् । उदाहृतपाद्मवचनैः 'यथोक्तविधिना पूर्वं स्थापितं शुभविग्रहम् । श्रीभूमिनीलासहितं परिवारैस्समन्वितम् । अव्यक्तपरिवारं वा देवं सङ्ग्राह्य याजयेत्'' इति भरद्वाजसंहितावचनतश्चापि श्री भूमिनीला नामवश्यसत्त्वस्यैव प्रतीतेः

श्री भूम्योः गौणतया सत्त्वमिति कथनमप्रामाणिकमेव। इयञ्च इज्या अष्टाङ्गा। ''अन्तःकरणयागादियावदात्मनिवेदनम्। तदाद्यमङ्गं यागस्य नाम्नाभिगमनं महत्। पूजनञ्चार्घ्यपुष्पाद्यैः भोगैर्यदखिलं मुने। बाह्योपाचारैस्तद्विद्धि भोगसंज्ञं तु नारद। मध्वाज्याक्तेन दध्ना वै पूजा च पशुना सह। तत्तृतीयं हि यागाङ्गं तुर्यमन्त्रेन पूजनम्। निवेदितस्य यद्दानं पूर्वोक्तविधिना मुने। सम्प्रदानन्तु तन्नाम यागाङ्गं पञ्चमं स्मृतम्। वह्निसन्तर्पणं षष्ठं पितृयागन्तु सप्तमम्। प्राणाग्निहवनं नाम्ना त्वनुयागं तदष्टमम्।'' इति श्रीपाञ्चरात्ररक्षोदाहृतजयाख्यसंहितावचनैरवगम्यते। एतत्तत्त्वं उत्तरत्र निपुणतरमुपपादयिष्यते।

आराधनोपक्रमादौ संस्कृतां घण्टां नादयेत्। तथा जयाख्यसंहितायां— ''पूजितां धूपितां लिप्तां मन्त्रविन्यस्तविग्रहाम्। एकीकृत्य स्वशब्देन हृद्गतेनान्तरात्मना। सञ्चालयेत्ततस्सम्यक्सशब्दां चक्रचिह्निताम्। त्रैलोक्यद्राविणीं घण्टां सर्वदुःखनिबर्हिणीम्। एषा दूती हि मन्त्राणां सुप्तानां च प्रबोधिनी। वारणी सर्वविघ्नानां सर्वमन्त्र-प्रसादिनी। प्रणवान्तर्ध्वनिर्घोषा शब्दशक्तौ लयं गता। वर्णदेहा स्मृता मन्त्रा मन्त्रदेहास्तु देवताः। घण्टास्तनितमूलास्ते प्रबुद्धाः कर्म-सिद्धिदाः।'' इत्यादिभिः, ''घण्टाशब्दगतं सर्वं तस्मात्तां चालयेत्पुरा। आवाहनेऽर्घ्ये धूपे च दीपे नैवेद्यजोषणे। नित्यमेव प्रयुञ्जीत सम्यक् मन्त्रार्थसिद्धये। पूजाकालं विनान्यत्र हितं नास्याः प्रचालनम्। नानया तु विना कार्यं पूजनं सिद्धिमिच्छता।'' इत्यन्तैर्वच नैर्घण्टाचालन-विधानात्। पारमेश्वरे षष्ठेऽध्याये घण्टास्वरूपमाहात्म्यादिकं विस्तरेण प्रतिपाद्य ''घण्टाशब्दगतं सर्वं तस्मात्तां चालयेत्पुरा। स्वेषु चोक्तेषु

कालेषु तांस्तु मे गदतश्शृणु । गणेशपीठद्वारस्थदेवानामर्चने ततः । आहूतिकाले मन्त्राणां धूपदाने विशेतः । दीपदानेऽर्घ्यदाने च तथा नैवेद्यजोषणे। जपस्तुत्यवसानाभ्यां प्रवृत्तेश्चाग्नितर्पणे। प्राणाहुति प्रदाने च मन्त्राणान्तु विसर्जने । विष्वक्सेनार्चने चैव तत्पूजाप्रतिपादने । बलिप्रदानकाले तु देवतानां विशेषतः । नातोऽन्यदा स्याद्विहितं चालनं सिद्धिमिच्छता ।'' इति वचनैः घण्टाचालनमुक्तम् । पाद्मे क्रियापादे एकत्रिंशेऽध्याये —''एवं तु संस्कृतां घण्टां चालयेत्सर्वकर्मसु। उद्घाटने कवाटस्य प्रस्तुते पूजने तथा। आवाहनेऽर्घ्ये स्तपने धूपदीपे च दित्सिते। नीराजने यवनिकासमुत्थाने निवेदने । होमे भूतबलौ कर्मण्युद्वासे चालयेन्मणिम् । उच्चाटनं पिशाचादेः प्रीणनं च हरेः परम् । सन्निधानममर्त्यानां घण्टायाश्चलने भवेत् । असंस्कृतायाश्चलने ग्रामादेश्चलनं भवेत्। अन्यथा निष्फला पूजा परस्य परमात्मनः ।'' इति घण्टाचालनसमयो दर्शितः। श्री सात्त्वते —''गृष्टधूपसमायुक्तं गुग्गुलं धूपयेच्छुभम्। सहघण्टारवैरम्यैश्चाल्यमानेन बाहुना। श्रीकरसंहितायां —''निर्धूमैः स्फुरदङ्गारैर्निर्ज्वालैश्च निरिन्धनैः । धूपं दद्यात्स्वयं किञ्चित् घण्टां वामेन नादयन्'' इति । अत्र धूपशब्दः पूर्वोदाहृतवचनावगतदीपादि-प्रदर्शनपरः । अत्र स्ववामबाहुना घण्टानादविधानात्, आराधकेन घण्टानादो न कार्यः वामबाहुना न कार्य इति कस्यचिदुक्तिः प्रत्युक्ता । स्फुटत्वाद्विवादाभावाच्च श्रीभाष्यकाराणां घण्टानादानुक्तिः । तदभिप्रायविद्भिर्वङ्गि-वंशेश्वरैरुक्तोघण्टानादः । ''घण्टानादसनाथौ तु धूपदीपौ निवेदयेत् । तन्नादसंयुतावेतौ दुष्टसत्वनिबर्हणौ । भगवत् प्रीतिजननौ शृण्वतां

पूजागृहाद्बहिर्दूरतोऽवस्थाय, चण्डादीन् द्वारपालान् प्रणम्य गन्धादिभिरभ्यर्च्य, आत्मप्रवेशनं याचयित्वा, तैरनुज्ञातो द्वारपार्श्वेऽवस्थाय, अस्त्रमन्त्राभिमन्त्रितं पुष्पं दुष्टजन्तुपलायनार्थं देवगृहान्तःप्रास्य तत्र दक्षिणपादं प्रथमं विन्यस्य, तदन्तः प्रविश्य भगवन्तमष्टाङ्गेन प्रणम्य प्रदक्षिणीकृत्य पूजाप्रदेशं संमार्ज्य गोमयेनालिप्य रङ्गवल्ल्यादिभिरलङ्कृत्य, साक्षतपुष्पाणि प्रकीर्य कर्पूरागरुचन्दनैर्धूपयित्वा, निश्शब्दे प्रदेशे भुवं सङ्गृह्य, दार्भं दारुमयं वा आसनं आत्मनो देवस्य

पापनाशनौ ।'' इति । अत्र धूपदीपशब्दः पूर्वोदाहृतवचनावगतक-वाटोद्घाटनादिप्रदर्शनपरः । आचार्यैः श्रीभाष्य कारानुक्तांशस्या-पेक्षितस्य तच्छिष्यप्रशिष्याद्युक्तप्रकारेणानुष्ठेयतोक्तेश्चेति वाक्येन श्रीभाष्यकारानुक्तविषयव्यवस्थाया अनुगृहीतत्वात् ग्रन्थगौरवभयाच्च विशिष्य घण्टानादानुक्तिः । एवमेव विशिष्यानुक्तविषये व्यवस्थानु-सन्धेया ।

सुप्रक्षालितपाणिपादः स्वाचान्त इत्यादि । ''इज्याकाले तु सम्प्राप्ते हृष्टो देवगृहं गतः । प्रक्षाल्य पादौ पाणी च समाचम्य हरिं स्मरन् । तत् क्षेत्राधीशमभ्यर्च्य तन्मन्त्रेणाच्युतं प्रभुम् । देवपूजागृहद्वारात् स्थित्वा बहिरदूरतः । चण्डप्रचण्डप्रमुखान् द्वारस्थानधिपानपि । प्रणम्याभ्यर्च्य गन्धाद्यैर्याचयित्वा प्रवेशनम् । दत्ताभ्यनुज्ञस्तैश्चापि सदयैरवलोकनैः । प्रविशन् द्वारपार्श्वस्थः स्वास्त्रमन्त्राभिमन्त्रितम्। पुष्पं देवगृहस्यान्तः प्रास्य दक्षिणपाणिना । तद्भयादपयातेषु दुष्टसत्वेषु तद्गृहात् । प्रथमं दक्षिणं

पुरस्ताद्दक्षिणतस्संस्तीर्य, तां शोषणादिभिर्विशोध्य सच्छोटेनास्त्रमन्त्रेणाभिवीक्ष्य, आसनमन्त्रस्य पृथिव्या

पादं विन्यस्यान्तः प्रविश्य च । प्रणिनंसुः परात्मानं भक्तिनिघ्नेन चेतसा । मनोबुध्यभिमानेन सह न्यस्य धरातले कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् । प्रदक्षिणसमेतेन त्वेवंरूपेण याजकः । अष्टाङ्गेन प्रणामेन प्रणमेत्पुरुषोत्तमम् । ततस्सम्मार्ज्य तं देशं गोमयेनावलिप्य च । साक्षतानि च पुष्पाणि प्रकीर्य च समन्ततः । धूपयित्वा बहुविधैः कर्पूरागरुचन्दनैः । पुरस्ताद्देवदेवस्य संस्तीर्यासनमात्मनः । दार्भं काष्ठमयं वापि सास्त्रच्छोटाभिवीक्षितम् । तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः । प्रवेश्योभयजान्वन्तः स्वपादाङ्गुष्ठयोर्युगम् । दक्षिणोत्तरमासीनः स्वस्तिकेनासनेन तु । पद्मादिष्वासनेष्वेकमवलम्ब्येच्छयाथवे''ति वङ्गिवंशेश्वरवचनान्यत्र भाव्यानि । पद्मासनलक्षणन्तु— ''कृत्वोत्तानौ कृतौ पादौ तत्रैवोरू द्वयं समम् । पदद्वयं समं सम्यगङ्गमूरुद्वयोरपि । कृतं पद्मासनं ह्येतत् श्रेष्ठं सर्वेषु कर्मस्वि'त्यगस्त्यसंहितोक्तं द्रष्टव्यम् ।

दार्भं दारुमयं वाऽऽसनमात्मनः देवस्य पुरस्तात् दक्षिणतस्संस्तीर्येति । विहगेश्वरसंहितायां— ''देवस्य दक्षिणे पार्श्वे पूजकस्य स्थितिर्भवेत्'' अनिरुद्धसंहितायां— ''उदग्दिक्पूर्ववदने दक्षिणाभिमुखश्चरेत् । पश्चिमे द्वारके विप्र तथा कुर्याद्विचक्षणः । ''भगवति पूर्वदिगभिमुखे उदङ्मुखः पूजयेत् । पश्चिमाभिमुखे सति दक्षिणाभिमुखः पूजयेदित्यर्थः । एवं च क्वचिद्वामपार्श्वावस्थानविधानं वैकल्पिकमिति तत्र पूर्वपरिग्रहानुसारेण 'दक्षिणतः संस्तीर्ये'त्युक्तम् ।

मेरुपृष्ठ ऋषिः । सुतलं छन्दः, श्री कूर्मो देवता, आसने विनियोगः, "पृथ्वि त्वया + आसन"मिति सामान्यतः प्राप्तमन्त्रेण पद्मासन-स्वस्तिकासनादिष्वेकमवलम्ब्यासीनो गुरुपरम्परया भगवन्तं शरणमुपगम्य तमेव प्राप्यत्वेन प्रापकत्वेना-निष्टनिवर्तकत्वेन यथावस्थित स्वरूपरूपगुणविभूति-

---

शोषणादिभिर्विशोध्येत्यत्र यं वायवे नम इत्यादिभिर्मन्त्रैरित्यभिप्रेतम् । 'आदावेव जपे कुर्यात् शोषणं दहनं प्लुतिम् । वाय्वग्निवरुणैर्बीजैर्ध्यात्वा तन्मण्डले हरि'मिति तन्त्रसारवचनस्यात्रानुसर्तव्यत्वात् । आसन मन्त्रस्य पृथिव्या इत्यादि । 'सामान्यतः प्राप्तमन्त्रेणे'त्युक्तरीत्यात्रापि सामान्यप्राप्तमन्त्रग्रहणौचित्यात् । गुरुपरंपरया परमगुरुं भगवन्तं शरणमुपगम्येत्यादि । "सुप्रक्षालितपाणिपादः स्वाचान्तः शुचौ देशे मनोहरे निश्शब्दे भुवं संगृह्य शोषणादिभिर्विशोध्य गुरुपरम्परया परमगुरुं भगवन्तमुपगम्य तमेव प्राप्यत्वेन प्रापकत्वेनानिष्टनिवारकत्वेन च यथावस्थित स्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिना । एवं शरणमुपगम्य तत् प्रसादोपबृंहितमनोवृत्तिः तमेव भगवन्तं सर्वेश्वरमात्मनः स्वामित्वेन सुहृत्त्वेनानुसन्धाय अत्यर्थप्रियाविरतविशदतमप्रत्यक्षरूपानुध्यानेन ध्यायन्नासीत । तत स्तदनुभवजनितातिमात्रप्रीतिकारितपरिपूर्ण कैङ्कर्यरूपपूजामारभेते'ति नित्येऽनुगृहितमिह भाव्यम् । गुरुपरम्परया परमगुरुं भगवन्तं शरणमुपगम्येति । तदुक्तं—"अत्र गुरुपरम्पराप्रपदनपूर्वकमिदं ध्यानं विवक्षितं, 'गुरून् प्रपद्य प्रथमं तद्गुरूंश्च ततो हरि'मिति तस्मिन्नवसरे नित्यान्तरोक्तेः । उक्तं च

लीलोपकरणविस्तारमनुसन्धाय, करिष्यमाण भगवदाराधनपर्यन्तातिमात्र प्रीतिजनकानुभव जनकात्यर्थप्रियाविरतविशदतम प्रत्यक्षरूपानुध्यानानुकूलमनोवृत्तिसिद्ध्यर्थं द्वयोच्चारणपूर्वकं, 'अखिलहेये'त्यादि 'अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये' इत्यन्तं बृहद्द्वयमनुसन्धाय, साङ्गप्रपदनमनुष्ठाय, तज्जनितभगवत्प्रसादोपबृंहितमनोवृत्तिस्तमेव भगवन्तमात्मनः स्वामित्वेनानुसन्धाय, अत्यर्थ प्रियाविरत विशदतमप्रत्यक्षरूपानुध्यानेन ध्यायन्नासीत । ततस्तदनुभवजनितातिमात्रप्रीतिकारितपरिपूर्णकैङ्कर्यरूप-

---

श्रीसात्त्वते अपररात्रयोगारम्भे— 'गुरं देवं नमस्कृत्य ह्युपविश्याजिनासन'' इत्यादि, ''सर्वत्र च शास्त्रीय सर्वकर्मारम्भे भगवत् पर्यन्त गुरुपङ्क्ति प्रपदनं निश्रेयसाय भवति । उक्तं च रहस्याम्नायब्राह्मणे - 'स चाचार्यवंशो ज्ञेयो भवति । आचार्याणामसावसावित्याभगवत्त इति'ति ।

तमेव शरणमुपगच्छेदखिलेत्यादिनेति । तदुक्तम्— ''बृहद्द्वयन्तु समाराधनकाले विशेषतोऽनुसन्धेयानां स्वरूपरूपगुणविभूतिदेवीभूषायुधपरिजनपरिच्छदद्वारपालपार्षदादीनां यथावदनुसन्धानहेतुतया 'यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारमनुसन्धाय तमेव शरणमुपगच्छेदखिलेत्यादिने'ति समाराधनादावन्ते च श्रीभाष्यकारैरेव विनियुक्त''मिति । श्रीनिक्षेपरक्षायां – 'तत्र स्वतन्त्राङ्गप्रपत्त्योर्वाचिकविशेषाभावात् अखिलेत्यादिकं सप्रकारानुसन्धानं

पूजामारभेत। अष्टाविंशतिकृत्वो मनसावर्तितेन मूल-मन्त्रेण त्रिः प्राणानायम्य, धर्मशास्त्रोक्तप्रकारेण वा त्रिः प्राणानायम्य कृतश्चेत्याराधनं सङ्कल्प्य, भगवानेव स्वनियाम्यस्वरूपस्थिति प्रवृत्तिस्वशेषतैकरसेनात्मना

मनोवृत्त्युपसंहारार्थतया विनियुक्तम्। एवं तत्राह — यथावस्थित-स्वरूपरूपगुणविभूति लीलोपकरणविस्तारमनुसन्धाय 'तमेव शरण-मुपगच्छेदखिलेत्यादिने'ति । अनन्तरमप्याह—'एवं शरणमुपगम्य तत्प्रसादोपबृंहितमनोवृत्तिरिति'' इति।

अष्टाविंशतिकृत्वो मनसाऽऽवर्तितेनेति । वैकुण्ठदीक्षितीये पराशरः—'अष्टाविंशतिवारं तु प्राणायामे जपेन्मनुम्। पूरके कुम्भके चैव रेचके च विशेषतः। प्राणायाममिदं प्राहुरुत्तमं मुनिसत्तमाः। मध्यमं मुनिभिः प्रोक्तं मुने द्वादशसङ्ख्यया। षड्वारन्तु कनिष्ठं स्यादधमन्तु त्रिभिः स्मृतम्। वृद्धहारीतस्मृतौ — प्राणायामत्रयं कृत्वा पश्चान्न्यासं समाचरेत्। प्राणायामत्रयं कृत्वा पश्चाध्यानं यथोक्तवत्'' इत्यादिकमिह भाव्यम् । धर्मस्त्रोक्तप्रकारेण वेति । माध्याह्निक स्नानविषये श्रीभाष्यकारोक्तस्नानविशेषमुक्त्वा अथवेत्यादिधर्मशास्त्रोक्तस्नानं प्रपञ्च्य परमैकान्तिनां श्रीभाष्यकारनित्यप्रकारेणैव माध्याह्निकस्नानं कर्तव्यमित्युक्तरीत्याष्टाक्षरेणैव श्रीभाष्यकार तच्छिष्यप्रशिष्यैः भगवत्समाराधनप्रयोगकरणात् परमैकान्तिभिरष्टाक्षरेणैव प्राणायामः कार्य इत्यभिप्राय इत्यङ्गीकार्यम्।

कृतश्चेत्याराधनं सङ्कल्प्येति। बलमन्त्रोच्चारणं तत्प्रमाणं च पूर्वं प्रदर्शितम्। भगवानेवेति श्रीभाष्यकारनित्यवाक्यम्। अनेन 'न्यासेन देवमन्त्राणां देवतादात्म्यभावना'दित्याचार्यपादोपात्तवचनावगत-

स्वकीयैश्चोपकरणैः स्वकीयैश्च देहेन्द्रियान्तःकरणैः स्वकीयकल्याणतमद्रव्यमयैः औपचारिक-सांस्पर्शिकाभ्यवहारिकादि समस्त भोगानतिप्रभूतानति प्रियतमानतिसमग्रानत्यन्तभक्तिकृतान् अखिल-परिजनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादयितुमुपक्रमत इत्यनुसन्धाय, ओं लान्नमःपराय सर्वात्मने नमः, इति पादयोर्न्यासं कुर्वन् पृथिवीं गन्धतन्मात्रे विलापयामि, गन्धतन्मात्रमप्सुविलापया-मीति चिन्तयेत्। ओं वान्नमः पराय निवृत्त्यात्मने नमः, इति गुह्ये न्यस्यन्, अपो रसतन्मात्रे विलापयामि, रसतन्मात्रं तेजसि विलापयामीति चिन्तयेत् । ओं रान्नमः पराय विश्वात्मने नमः, इति हृदये न्यस्यन्तेजो रूपतन्मात्रे विलापयामि, रूपतन्मात्रं वायौ विलापयामीति चिन्तयेत्। ओं यान्नमः पराय पुरुषात्मने नमः, इति नासाग्रे न्यस्यन् वायुं स्पर्शतन्मात्रे

देवतादात्म्यभावनासिद्धिः । तदुक्तमपरारात्रयोगविचारे 'अत एव हि तथाविधभावनयाप्यनन्तरं योग्यतापादनमात्रमुक्तम् । 'न्यासेन देवमन्त्राणां देवतादात्म्यभावनात् । अप्राकृताङ्गकरणात्पूजामर्हति साधक' इत्यादि । तदभिप्रायेण स्वनियाम्येत्यादिकं वक्ष्यति श्रीभाष्यकार' इत्यन्तम्। अप्राकृतविग्रहयुक्तस्य भगवतः प्राकृतशरीर-युक्तस्याराधनानर्हत्वात् तदाराधन योग्यत्वाय 'अप्राकृताङ्गकरणात् पूजामर्हति साधक' इत्युक्ताप्राकृताङ्गकरणार्थं भूतशुद्धिप्रकारमाह— ओं लान्नमः परायेत्यादिना । तथानुगृहीतं नित्ये — स्वदेहे

विलापयामि, स्पर्शतन्मात्रमाकाशे विलापयामीति चिन्तयेत् । ओं षौन्नमःपराय परमेष्ठ्यात्मने नम इति मूर्ध्नि न्यस्यन् आकाशं शब्दतन्मात्रे विलापयामि, शब्दतन्मात्रमिन्द्रियाणि चाहङ्कारे विलापयामि, अहङ्कारं महति विलापयामि, महान्तं प्रकृतौ विलापयामि, प्रकृतिं तमसि विलापयामि, तमस्सजीवं परमात्मन्येकी-भावयामीति तत्त्वानां संहारं चिन्तयेत् । ततः प्राणायामेनैकेन मूलमन्त्रं दक्षिणेन पाणिना नाभिदेशे न्यस्य मन्त्रोद्भूतचण्डवाय्वाप्यायितनाभिदेशस्थवायुना शरीरमन्तर्बहिश्च सर्वं तत्त्वक्रमेण शोषयामीति विशोष्य, पुनरपि प्राणायामेनैकेन मूलमन्त्रं दक्षिणेन पाणिना हृदये न्यस्य, मन्त्रोद्भूत चक्राग्निज्वालोपबृंहित जाठराग्निना तत्तत्समष्टिप्रलीनसर्वतत्त्वसर्वकिल्बिष-सर्वाज्ञान तद्वासनं स्वदेहं दाहयामीति दग्ध्वा, दग्धतत्तत्समष्टिप्रलीनसर्वतत्त्वसर्वकिल्बिषसर्वाज्ञानत

पञ्चोपनिषपन्मन्त्रान् संहारक्रमेण न्यस्येत्यादिना । पादादिमूर्धान्त-न्यासः संहारन्यासः । अत्राहिर्बुध्न्यसंहितावचनानि माध्याह्निकप्रकरणे प्रदर्शितान्यनुसन्धेयानि । उभयतो नमःपदयुक्ताः श्रीविष्वक्सेन-संहितायां द्वादशोऽध्याये आचार्यप्रप्रदर्शितरीत्यैव पञ्चोपनिषन्मन्त्राः पठिताः । शेषसंहितायां पञ्चदशोऽध्याये—"पञ्चोपनिषदां न्यासं कुर्यात्सृष्टिक्रमेण च । सर्वमन्त्रप्रसिद्ध्यर्थं मोक्षज्ञानार्थसिद्धये । ओं षौन्नमश्शिरःस्थाने परायेति पदं ततः । परमेष्ठ्यात्मने पश्चान्नमोन्तं मन्त्रविन्न्यसेत् । ओं यान्नमः पराय पदं वक्त्रे पुरुषात्मने नमः । ओं

रान्नमःपराय हृदि न्यसेत्सर्वात्मने नमः । ओं वान्नमः परायेति गुह्ये निवृत्त्यात्मने नमः । ओं लान्नमः परायेति पदोस्सर्वात्मने नमः । जपपूजासु होमेषु न्यस्येदिदमतन्द्रितः'' इति । वृद्धहारीतस्मृतौ चतुर्थेऽध्याये— ''पञ्चोपनिषदां न्यासं कुर्यात्सर्वत्र कर्मसु। ओं षौन्नमः परायेति परमेष्ठ्यात्मने नमः । ओं यान्नमः परायेति ततः पुरुषात्मने नमः । ओं रान्नमः परायेति ततो विश्वात्मने नमः । ओं वान्नमः परायेति ततो निवृत्त्यात्मने नमः । ओं लान्नमः परायेति ततस्सर्वात्मने नमः । शिरो नासाग्रहृदयगुह्यपादेषु विन्यसेत् ।' इति । वराहसूरिविरचितक्रियाकैरवचन्द्रिकायामष्टादशे प्रतिष्ठापरिच्छेदे एकविंशपरिच्छिदे स्नपनविधौ च उदाहृतशेषसंहितावृद्धहारीतवचनोक्त प्रकारेणैव पञ्चोपनिषन्मन्त्राणां कर्मसु विनियोगः प्रादर्शि । सप्तत्रिंशपरिच्छेदात्मके तद्ग्रन्थे उक्तपरिच्छेदद्वयव्यतिरिक्तपरिच्छेदेषु बहवो मन्त्राः नमःपदद्वययुक्ताः तत्तत्कर्माङ्गमन्त्राः प्रदर्शिताः । ननु वृद्धहारीतस्मृतेः क्वाप्यनुदाहरणात् विरुद्धाचरणदर्शनाच्चाप्रामाण्यं शङ्क्यमिति न वाच्यं; आचार्य श्रीजयन्तीनिर्णये 'परमवैष्णवधर्म शास्त्रतया प्रसिद्धायां वृद्धहारीतस्मृतौ पञ्चमाध्याये' इत्यादिना तत्स्मृतिवचनान्युदाहृत्य 'न च तस्या अविश्वसनीयत्वमिति वाच्यं; महाचार्यैरतिप्राचीनैरुपात्तत्वात् पूर्वकालेऽप्येतदाचारज्ञापकत्वाच्चे' त्यनुगृहीतत्वात्, विरुद्धाचार दर्शनस्याधिकारिविशेषे व्यवस्थितता वा श्रीभाष्यकारसम्प्रदायस्थेषु अननुष्ठानपराहततया वा निर्वाह्यत्वात् । पञ्चोपनिषन्मन्त्रपाठविषये प्रमाणविरोधादर्शनेन पूर्वोदाहृतपञ्चरात्र वचनानुगुण्येन च नमः पदद्वययुक्तोपदर्शितमन्त्रपाठस्यैवादरणीय-त्वात् । श्रीपाञ्चरात्ररक्षायां— ''स च प्रार्थनामन्त्रः त्वय्याराधन-

कामोयमित्यादिकः यथान्यायं देशिकसकाशादधीत्यात्रान्वहं प्रयोक्तव्यः। एवमेव सर्वेषां मन्त्राणां समाधिः। विपर्यये हि नैष्फल्यम्। दृष्टादृष्टप्रत्यवायश्च तेषु तेषु शास्त्रेषु पठ्यते। 'यदृच्छया श्रुतो मन्त्रः छन्नेनाथ छलेन वा। पत्रेक्षितो वा व्यर्थस्स्यात् प्रत्युतानर्थदो भवेदिती' ति सदाचार्योपदेशलब्धमन्त्रप्रयोग एव कार्य इत्यनुगृहीतम्। श्रीस्तोत्रभाष्ये— ''नमो नमो वाङ्मनसातिभूमय'' इति श्लोकस्थनमश्शब्दद्वयविषये ''श्रुत्यादिषु चैवं वीप्सादिकं दृश्यते'' इत्यनुगृहीतम्। तैत्तरीय चतुर्थकाण्डविद्यारण्यभाष्ये — ''नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमो नमः'' इत्यादौ ''एकमितरस्य विशेषणं, केचिदुभयतो नमस्काराः, केचिदन्यतरतो नमस्काराः। इत्यर्थमुक्तं ते हैते घोरा रुद्राः ये उभयतो नमस्काराः, अथैते शान्ततराः ये अन्यतर नमस्कारा इति शतपथब्राह्मणं''। नमो हिरण्यबाहव इत्यत्र तद्भाष्ये- ''अत्र नमस्कारादि नमस्कारान्तमेकैकं यजुः। एवमनन्तरानुवाकेपि''। नमो भवायेत्यनुवाकभाष्यारम्भे— ''गता उभयतो नमस्काराः इति'' इति नमः पदद्वयुक्ता मन्त्राः प्रदर्शिताः। ''अथैतानि परस्परापकर्षवचनान्यसङ्कीर्णबहुकोशपाठादाप्तभाषितानीति मन्येमह'' इति तद्ग्रन्थप्रथमाधिकार श्रीसूक्त्यनुगृहीतन्यायेनासङ्कीर्ण श्री नित्याह्निकबहुकोशेषु उदाहृतप्रमाणानुगुणः पञ्चोपनिषन्मन्त्रपाठो दृश्यते। अतः प्रदर्शितप्रमाणतद्ग्रन्थपाठोपदेशपारंपर्यानुसारेणाचार्यदर्शित नमः पदद्वययुक्त तन्मन्त्रपाठ एव शिष्टैः क्रियते। एतेन पञ्चोपनिषन्मन्त्रेषु द्वितीय नमः पदमशुद्धमिति साहसिकवाक्यं निरस्तमिति बोध्यम्। यत्तु कैश्चिदुदाहृतमन्त्रेषु व्योममन्त्रे वासुदेवायेति पदं वायुमन्त्रे सङ्कर्षणायेति मन्त्रं तेजोमन्त्रे प्रद्युम्नायेति पदं आप्यमन्त्रे अनिरुद्धायेति पदं, पार्थिवमन्त्रे

द्वासनो भूत्वा, भगवद्दक्षिण पादाङ्गुष्ठे मूलमन्त्रेण स्वात्मानं प्रवेशयेत्। अपरेण प्राणायामेन भगवत्प्रसादेन

नारायणायेति पदं च संयोज्य पञ्चोपनिषन्मन्त्राः पठिताः । तत्पूर्वोदाहृतप्रमाणावगतानुपूर्वीविरुद्धत्वादश्रद्धेयम् । किञ्च नारदीय-संहितायां पञ्चदशोऽध्याये - शान्तेऽनन्ते परे व्योम्नि निष्क्रिये ज्ञानविक्रिये। तं ध्यायेत्परमानन्दे संस्थितं शान्तविग्रहम्। यस्मान्नव्यन्तु तं पीतं संस्था यत्तत्वरूपकम् । परस्य ब्रह्मणश्शक्तिं विदुस्तत्परमेष्ठिनम्। स वासुदेवो विज्ञेयः सर्वात्मा सर्वकृत् प्रभुः । परापरविकल्पैकस्वरूपज्ञानहेतुकः । तां स्वामव्यापिनीं मायामधिष्ठाय सिसृक्षया । नादात्मा जनयन्मूर्तिं पौरुषीं स्वर्गसंज्ञिताम्। सङ्कर्षणस्स विज्ञेयः पुरुषश्चेति कथ्यते। स पुराणाकृतिर्मायां क्षोभयित्वा जगत्पतिः। वीर्यतेजोमयं रूपं प्रद्युम्नमसृजत् प्रभुः । पुनस्तेजोमयीं तासां प्रकृतिः परिशोध्यते । विश्वाह्लादकरैश्शान्तैः रसमात्राभिरीश्वरः । निवृत्तिसंज्ञमपरमकरोदम्मयीतनुम्। विमुक्तमनिरुद्धाख्यं जलोदयशयं हरिम्। पुनरप्याकृतिं मायां विक्षोभ्य जगदीश्वरः। गन्धमात्रात्मकं देवं सर्वात्मानं प्रजापतिम्। पञ्चैताश्शक्तयः प्रोक्ताः परस्य परमात्मनः । अशेषजगदाधारे पदे देवे व्यवस्थिताः ।'' इति पञ्चोपनिषदां क्रमेण वासुदेवसङ्कर्षणादयो वाच्या इत्युच्यन्ते, मन्त्रेष्वेव वासुदेवादिपदसत्त्वे 'वासुदेवस्स विज्ञेयः,'' सङ्कर्षणस्स विज्ञेयः'' इत्यादिभिर्वासु-देवादीनां तत्तन्मन्त्रवाच्यत्वज्ञापनमसङ्गतं स्यात्। अतः आचार्यपठिता एव पञ्चोपनिषन्मन्त्राः प्रामाणिकपरिग्राह्याः ।

भगवद्दक्षिणपादाङ्गुष्ठे मूलमन्त्रेण स्वात्मानं प्रवेशयेदित्यादि। तस्मिन् पञ्चोपनिषन्मन्त्रान् सृष्टिक्रमेण न्यसेदित्यन्तं नित्यवाक्यम् ।

भगवत्किङ्करतायोग्यतामापाद्य तस्मादादाय तद्वाम-पादाङ्गुष्ठनखशीतांशुमण्डल गलद्दिव्यामृतरसेनात्मानमभिषिच्य, भगवत्प्रसादेन तदमृतमयं सर्वकैङ्कर्यमनोहरं सर्वकैङ्कर्ययोग्यं शरीरं लब्ध्वा, तस्मिन् पञ्चोपनिषन् मन्त्रान् सृष्टिक्रमेण न्यसेत्। तत् प्रकारः – ओं षौन्नमः पराय परमेष्ठ्यात्मने नम इति मूर्ध्नि न्यस्यन्, परमात्मनस्तम उत्पादयामि, तमसः प्रकृतिमुत्पादयामि, प्रकृतेर्महान्तमुत्पादयामि, महतोऽहङ्कारमुत्पादयामि, अहङ्कारादिन्द्रियाणि शब्दतन्मात्रञ्चोत्पादयामि, शब्दतन्मात्रदाकाशमुत्पादयामीति चिन्तयेत् । ओं यान्नमः पराय पुरुषात्मने नम इति नासाग्रे न्यस्यन्, आकाशात् स्पर्शतन्मात्रमुत्पादयामि, स्पर्शतन्मात्राद्वायुमुत्पादयामीति चिन्तयेत् । ओं रान्नमः पराय विश्वात्मने नम इति हृदये न्यस्यन् वायो रूपतन्मात्रमुत्पादयामि, रूपतन्मात्रात्तेज उत्पादयामीति चिन्तयेत्। ओं वान्नमः पराय निवृत्त्यात्मने नम इति गुह्ये न्यस्यन् तेजसो रसतन्मात्रमुत्पादयामि, रसतन्मात्रादप उत्पादयामीति चिन्तयेत्। ओं लान्नमः पराय सर्वात्मने नम इति पादयोः न्यस्यन् अद्भ्यो गन्धतन्मात्रमुत्पादयामि, गन्धतन्मात्रात् पृथिवीमुत्पा-

---

उक्तं च वङ्गिवंशेश्वरैः - ततो विमुक्तमात्मानं विमुक्तं तत्त्वपञ्जरात्। विमुक्तं मेघपटलाद्दिवाकरमिवोज्ज्वलम्। ततः प्रकृतिसंसर्गादनादेरशुचेः स्वतः । अशुद्धं शुद्धतां नेतुं शुभाश्रयवशेन तु । भगवद्दक्षिणाङ्घ्र्यब्जशुभाङ्गुष्ठं प्रवेशये''दिति । प्रकृतिसम्बन्धत्यागेन

दयामीति चिन्तयेत् । एवमुद्भूतपरिशुद्धदेहं ध्यात्वा, पुनरपि प्राणायामेनैकेन भगवद्वामपादाङ्गुष्ठ विनिस्सृतामृतधारया आत्मानमभिषिच्य, कृतलाञ्छनो धृतोर्ध्वपुण्ड्रः, अस्य श्रीमदष्टाक्षरमहामन्त्रस्येत्यादिपूर्वोक्तप्रकारेण ऋष्यादि न्यासमङ्गन्यासं च कुर्यात् । आराधनार्थे विनियोग इति भेदः । अत्र श्रीभाष्यकारैः वङ्गिवंशेश्वरैश्च जपस्यानुक्तत्वादाराधनयोग्यतार्थं न्यासमात्रं कर्तव्यम् । पाद्मादिषु तु जपोऽप्युक्तः । ततो यागमारभेत । भगवानेवेत्यादि + कारयतीति पूर्ववत्

भगवत्कैङ्कर्ययोग्यतासम्पादनेऽपि शरीराभावे आराधनासम्भवात् भगवत् प्रसादलब्ध कैङ्कर्ययोग्यशरीरलाभकथनम्। अप्राकृत चतुर्विंशति तत्त्वात्मकं शुद्धसत्वमयं शरीरं लब्ध्वेत्यर्थो बोध्यः । तस्य शरीरस्य स्थूलावस्थासिध्यर्थं तस्मिन् पञ्चोपनिषन्मन्त्राणां सृष्टिक्रमेण न्यासः । मूर्ध्वादि पादान्त न्यासः सृष्टिन्यासः। एवमुद्भूतपरिशुद्धदेहं ध्यात्वेति। 'एवं न्यासं कुर्वन् तत्तच्छक्तिमयमुद्भूतदेहं ध्याये'दिति नित्येऽनुगृहीतम्। शरीरतया स्थूलदशापन्नमित्यर्थः । पूर्वदेहत्यागपूर्वकशरीरान्तरविशिष्टस्य तत्क्षणोत्पन्नवत् कैङ्कर्यानर्हत्वात् तद्योग्यत्वाय स्नानाङ्कनोर्ध्वपुण्ड्रधारणान्याह - एव मित्यादिना। इदं च नित्यश्रीसूक्ति सिद्धम् । अथ 'न्यासेन देवमन्त्राणा'मित्याचार्यपादोपात्तमन्त्र न्यासप्रकारमाह - अस्य श्रीमदष्टाक्षरमन्त्रस्येत्यादि। तन्यासप्रकारः पूर्वं प्रपञ्चितः । पाद्मादिषु तु जपोऽप्युक्त इति । तस्य संहिताभेदनिबन्धनवैकल्पिकधर्मतया श्रीभाष्यकारनित्यष्ठानां जपावश्यकर्तव्यत्वं नास्तीति भावः । पूर्वोक्ताराधनार्हतासिध्यनन्तरमाराधनारम्भं

ध्यात्वा हृदयकमलमधोमुखमूर्ध्वमुखमुन्नमय्य, बाह्यतो वक्ष्यमाणाधारशक्त्यादि कल्पन क्रमेण योगपीठान्तं कल्पयित्वा, पर्यङ्कं नागराजं च परिकल्प्य तस्य पीठस्य दक्षिणपार्श्वतः स्वात्मानमासीनं च विचिन्त्य, तत्पीठस्योपरि सव्यं पादमिति वक्ष्यमाक्रमेण सपरिवारं भगवन्तं विचिन्त्य ध्यात्वा मानसैरतिमानुषैः सांस्पर्शिकौपचारिकाभ्यवहारिकैः भोगैरभ्यर्च्य भगवन्तं प्रणम्य प्रसाद्य, ''भगवन् पुण्डरीकाक्ष हृद्यागन्तु मया कृतम् । आत्मसात्कुरु देवेश बाह्यैस्त्वां सम्यगर्चये । विभो सकललोकेश प्रणतार्ति-हराच्युत । त्वां भक्त्या पूजयाम्यद्य भोगैरर्घ्यादिभिः क्रमा''दिति बाह्ययागं

विदधाति - तत इत्यादिना। 'ततो भगवद्यागमारभेत। भगवानेव + सर्वं कारयतीति पूर्ववत् ध्याये''दिति नित्येऽनुगृहीतम्। अथ अष्टाङ्गाराधने 'अन्तःकरणयागादि यावदात्मनिवेदनम् । तदाद्यमङ्गं यागस्य नाम्नाऽभिगमनं भवेत्' इत्युक्तमादिमाङ्गं हृद्यागं कृत्वेति नित्येऽनुगृहीतं प्रतिपादयितुमुपक्रमते — हृदयकमलमित्यादिना । मूलमन्त्रेण स्वात्मानं देवाय विनिवेदयेदित्यन्तमाद्याङ्गमिति बोध्यम् । अयं च हृद्यागः नान्तर्याम्यवतारविषयः । 'अष्टाङ्गयोगसिद्धानां हृद्याग-निरतात्मनाम् । योगिनामधिकारस्स्यादेकस्मिन् हृदयेशय'' इति श्री पाञ्चरात्ररक्षोदाहृत श्री सात्वतवचनेन तदाराधनस्य योग सिद्धविषयत्वावगमात् । किन्तु कल्पिताकारविषयः, ''अथार्चितुं य इच्छेत्तु विशेषव्यक्तिलक्षणम् । सङ्कल्पितं स्वबुध्या तु तत्काल समनन्तरम् । विभोस्सामर्थ्यशक्तिर्वै स्पन्दतामेति च स्वयम् ।

भगवते निवेद्य, तदनुज्ञातश्चण्डादिद्वारपालान् गन्धादिभिरभ्यर्च्य सम्भारान् संभृत्यात्मनो वामपार्श्वे

सूतेऽग्निकणवन्मन्त्रं यत्र मन्त्री कृतास्पदः । तमागतमिवाकाशादागतं कर्णिकान्तरे । भावयेदथ तन्मध्यादाराध्य मुदितं स्मरेत् । आदिमूर्तिस्वरूपेण चतुर्मूर्तिमयेन वा । पृथक्त्वेन चतुर्मूर्तेरेकैका-कृतिनाप्यथ। अथवा वैभवीयेन नानाकृत्यात्मना तु वा। अङ्ग सङ्ख(सर्वं) तदीयं च न्यसेत्पद्मदलाश्रितम्। परिवारं बहिः पद्मात् स्वकं यो यस्य विद्यते । सशक्तिकस्य मन्त्रस्य दिक्क्रमेण हृदादि यत् । न्यसेत्केसरजालस्थं पत्रमध्ये तु शक्तयः । निश्शक्तिको निरङ्गो यो मन्त्रनाथस्तु केवलः । शब्दमात्रेण तं भूयो दलजालगतं यजेत् । इत्येवमन्तर्यागस्तु देवस्य चतुरात्मनः । समासेनोदितस्सम्यगथ मूर्तौ बहिर्यजेत्'' इति श्रीसात्वतपञ्चमपरिच्छेदवचनैस्तथानुशिष्टत्वात् । बाह्यपूजाप्रकारेण हृद्यागः कार्य इत्यभिप्रायेण नित्ये हृद्यागं कृत्वेति सामान्येनानुगृहीतम् । केषुचित् वङ्गिवंश्वरनित्यकोशेषु— 'हृद्यागं कर्तुमुद्युक्तः कुर्यादेवमतन्द्रितः । हृत्पुण्डरीकमध्ये तु योगपीठं यथा बहिः । कुर्यादाधारशक्त्यादिनागराजान्तमुज्ज्वलमि' ति सार्ध-श्लोकोऽस्ति । अन्याह्निकोदाहृतश्च । अत आचार्योक्तप्रकारेणैव हृद्यागानुष्ठानं कार्यम् । 'एवं ध्यात्वाऽथ तं देवं मानसैरतिमानुषैः । सांस्पर्शिकैश्च गन्धाद्यैः छत्राद्यैरौपचारिकैः । शुद्धैर्हविरपूपाद्यै-श्शुभैराभ्यवहारिकैः । उपचारैश्चतुष्षष्ठिसङ्ख्यैरावाहनादिभिः । अभ्यर्च्य हृदये देवं दिव्यै र्भावमयैश्शुभैः । पत्नीपरिजनोपेतं प्रणम्याभिप्रसाद्य च। निवेद्य च बहिर्यागमेवं भक्त्या समाहितः ।' इति वङ्गिवंशेश्वरैः हृद्यागः प्रपञ्चितः ।

अथ बाह्ययागानुष्ठानप्रकारमाह — तदनुज्ञातश्चण्डादीन् द्वारपालान् प्रणम्येत्यादिना ।

जलभाजने तोयमुत्पूर्य गन्धपुष्पयुतं कृत्वा, सप्तकृत्वोऽभिमन्त्र्य, विशोष्य दग्ध्वा दिव्यामृतमयं

सम्भारान् संभृत्येत्यादि। 'सम्भारान् सम्भृत्यात्मनो वामपार्श्वे जलभाजने तोयमुत्पूर्य गन्धपुष्पयुतं कृत्वा सप्तकृत्वोऽभिमन्त्र्य विशोष्य दग्ध्वा दिव्यामृतमयं तोयमुत्पाद्य अस्त्रमन्त्रेण रक्षां कृत्वे'ति नित्येऽनुगृहीतम् । सम्भाराणामुपादानकालसम्भृतत्वेऽपि पुत्र-शिष्याद्यानीतानां प्राप्ताप्राप्तावेक्षणाय तत्काले तद्देशानयनमत्रोच्यते।

सप्तकृत्वोऽभिमन्त्र्येति । मूलमन्त्रेणेत्यभिप्रेतम् । एवं शोषणादावपि बोध्यम्। नित्ये "मूलमन्त्रेण स्वात्मानं देवाय निवेद्ये'ति 'मूलमन्त्रेण पुष्पं प्रदाये'ति चानुगृहीतत्वात्, श्री पाञ्चरात्ररक्षायां— "अत एव श्रीभाष्यकाराणां शिष्याः प्रशिष्याश्च श्रीमदष्टाक्षरेण समाराधनं प्रपञ्चयन्तः" इत्यादिना, हरिं प्रणम्य चायम्य प्राणान् प्रणिपतन् गुरून्" इत्यारभ्य श्रीमदष्टाक्षरमन्त्रस्य ऋषिच्छन्दोदेवता-बीजशक्तीः प्रकाश्य, "श्रीभाष्यकारानुक्तो मन्त्रन्यासस्तच्छिष्याद्युक्त प्रकारेणोपादेय इति ज्ञापनाय, 'मन्त्रन्यासं ततः कृत्वा मन्त्रार्थमपि चिन्तये'दिति सङ्ग्रहेणाभिधाय, (पूर्वग्रन्थेष्वनिवेशितमन्त्रार्थ-मत्यन्तोपयुक्ततया स्वयमेवाभिधाय) 'एवं सञ्चिन्त्य मन्त्रार्थं ततस्तं पुरुषं पर"मित्यादिना पूर्वैरुक्तं ध्यानं संक्षिप्ये"त्यन्तेन श्रीभाष्य-कारशिष्यप्रशिष्यग्रन्थेषु श्रीभाष्यकारानुगृहीताष्टाक्षरकरणकाराधनस्य प्रदर्शितत्वावगमात्। तत्रैव "अथ परमैकान्तिनो भगवदाराधनप्रयोगं वक्ष्य" इत्यारभ्य, "शौनक व्यास बोधायनादिधर्मशास्त्रानुक्तेन भगवच्छास्त्रोक्तेन वर्त्मना स्नानविशेषादिपूर्वकविलक्षणसमाराधन-प्रक्रियाप्रतिपादनं कथंभूत मधिकारिणमधिकृत्य श्रीभाष्यकारैः

तोयमुत्पाद्यास्त्रमन्त्रेण रक्षां कृत्वा सुरभिमुद्रां प्रदर्श्य, अन्यानि पूजाद्रव्याण्यात्मनो दक्षिणापार्श्वे निधाय मूलमन्त्रेण शोषण दाहनप्लावनै र्योग्यतामापाद्य पुरतः

कृतमिति कर्णे तवागत''मिति श्रीसूक्त्यापि मूलमन्त्रकरणकस्नानादि प्रतिपादकनित्याराधनस्य मूलमन्त्रकरणकत्वावगमाच्च ।

सुरभिमुद्रां प्रदर्श्येति । 'अङ्गुष्ठे द्वे कनिष्ठे द्वे तथा स्यात्तर्जनीद्वयोः । श्लिष्टं प्रसारयेद्ब्रह्मन्नङ्गुलीनिकरद्वये । मध्यमां दक्षिणकरेऽनामिकां च तथेतरे । संहृत्य प्रहरेच्छेषं करयोरुभयोरपि । ज्ञेया सुरभिमुद्रा सा यागद्रव्यविशोधिनी'ति पाद्मद्वाविंशवचनोक्तप्रकारेण सुरभिमुद्रा कार्या ।

अन्यानि पूजाद्रव्याणि स्वात्मनो दक्षिणपार्श्वे निधायेत्यादि । ''अन्यानि पूजाद्रव्याणि आत्मनो दक्षिणपार्श्वे निधाये''ति नित्यवाक्यमनुसृत्य दक्षिणपार्श्वे इत्युक्तम् । ''आत्मनो दक्षिणे पार्श्वे वासितैः पावनैर्जलैः । पूरितं विन्यसेत्पात्रं मूलमन्त्रेण मन्त्रवित् । वामपार्श्वे तथा सर्वं विन्यसेत्साधनान्तर''मित्यहिर्बुध्न्यसंहितोक्तं संहिताभेदनिबन्धनं वैकल्पिकम् । ''पूजाद्रव्याणि सर्वाणि क्षालयित्वाम्बु पूरिताम् । दक्षिणे वामपार्श्वे तु विनिवेश्य गलन्तिकाम् । गालितेनाम्बुना पूर्णं स्वाहृतेनाम्बुना सह । स्वोत्तरे वर्मणा स्थाप्य कुम्भं सर्वोपयोगि यत् । उपार्जितं पुरा यद्वै यागोपकरणं महत् । तत्सर्वं दक्षिणे कृत्वा मध्ये भद्रासनं न्यसेत्'' इति पाद्मपारमेश्वरवचन-पूर्वाचार्याचारानुसारेण वामपार्श्वे जलभाजनस्थापनं दक्षिणपार्श्वे यागोपकरणस्थापनं च नित्येऽनुगृहीतमिति बोध्यम् । आत्मनः पुरतः

स्वास्तीर्णे पीठे क्रमेणाग्नेयादिकोणेषु अर्घ्यपाद्या-चमनीयस्नानीयपात्राणि मध्ये शुद्धोदकपात्रं च निधाय, मूलमन्त्रेणास्त्रमन्त्रेण वा प्रक्षाल्य, शोषणादिना विशोष्य, संस्कृततोयेन तानि पूरयित्वा, अर्घ्यपात्रे, सिद्धार्थमक्षतश्चैव कुशाग्रं तिलमेव च । यवं गन्धं फलं पुष्पं अर्घ्ये द्रव्याणि निक्षिपेत् । पाद्ये । दूर्वां विष्णुपर्णीं श्यामाकं पद्ममक्षतम् । तिलश्च । आचमनीये, एलालवङ्गतक्कोलजातीकर्पूरचन्दनम् । लामज्जपुष्पाणि च, स्नानीये, गन्धसर्वौषधीरत्नफलबीजकुशानि च । तिलानि चाक्षतं चैव दधि क्षीरं घृतं तथा। रजनी द्वादशैतानि स्नानीय द्रव्यमुच्यते । गन्धसर्वौषधीत्यत्र "कोष्ठं मांसि हरिद्रे द्वे मुराशैलेयचम्पकाः ।

स्वास्तीर्णे पीठ इत्यादि । "आत्मनः पुरतः स्वास्तीर्णे" इत्यादिनित्यवाक्यमिहानुसन्धेयम् । मूलमन्त्रेणास्त्रमन्त्रेण वा प्रक्षाल्येति। नित्यानुसारेण मूलमन्त्रेणेति। "प्रक्षाल्यास्त्रेण विधिवत् स्थापयेत् पुरतो हरेः" इति वङ्गिवंशेश्वरवाक्यानुसारेणास्त्रमन्त्रेण वेत्युक्तम् । यदत्र नित्यान्तरे पात्रस्थापनभेदादिकथनं तत्सर्वं संहिताभेदनिबन्धनवैकल्पिकम्।

तोयस्य सौगन्ध्यादिसिध्यर्थं नित्यवाक्यपाद्मादिसंहिता-वचनान्यनुसृत्य निधेयद्रव्याण्याह— अर्घ्यपात्रे सिद्धार्थमक्षतं चैवेत्यादिना । द्रव्यालाभ इति । "स्वमन्त्रेण विनिक्षिप्य तदलाभे हरिप्रियाम् । तुलसीमेव निक्षिप्ये"ति वङ्गिवंशेश्वरोक्तं ग्राह्यम् ।

वचाकचोरुमुस्ताश्च सर्वौषध्यः प्रकीर्तिता'' इत्युक्त तत्तद्द्रव्याणि तत्तत्पात्रे निक्षिप्य, द्रव्यालाभे तुलसीं वा निक्षिपेत्। अन्यस्मिन्पात्रे सर्वार्थतोयमुत्पूर्य परिकल्प्य, अर्घ्यादिपात्राणि पाणिना मलमन्त्रेणाभिमन्त्र्य, ओं नमो भगवते अर्घ्यं परिकल्पयामीत्यर्घ्यादिकं क्रमेण परिकल्पयेत्, ततः अर्घ्यपात्राज्जलमन्येन पात्रेणादाय, यागभूमिं सर्वाणि यागद्रव्याणि आत्मानं च सम्प्रोक्ष्यासनं परिकल्पयेत्।

ओं आधारशक्त्यै नमः, ओं प्रकृत्यै नमः, ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः, ओं अनन्ताय नागराजाय नमः, ओं भूं भूम्यै नमः, इति यथास्थानमुपर्युपरि ध्यात्वा प्रणम्य, ओं श्री वैकुण्ठाय दिव्यलोकाय नम इति श्री वैकुण्ठदिव्यलोकं ध्यात्वा प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यजनपदाय नम इति दिव्यजनपदं ध्यात्वा प्रणम्य, ओं श्रीवैकुण्ठाय दिव्यनगराय नम इति दिव्यनगरं ध्यात्वा प्रणम्य, ओं श्री वैकुण्ठाय दिव्यविमानाय नम इति दिव्यविमानं ध्यात्वा प्रणम्य, ओं आनन्दमयाय दिव्यमण्टपरत्नाय

ततोऽर्घ्यपात्रं पाणिना मूलमन्त्रेणेति। ''ततोऽर्घ्यादिपात्राणि पाणिना मूलमन्त्रेणाभिमन्त्र्ये''त्यादि नित्यवाक्यमिहानुसन्धेयम्।

आसनं परिकल्पयेत् । ओं आधारशक्त्यै नम इत्यादि । श्रीनित्योक्तप्रकारेणैव आधारशक्त्यादि पीठपरिकल्पनमनुगृहीतम् ।

नम इति दिव्यमण्डपं ध्यात्वा प्रणम्य, ओं आस्तरणरूपायानन्ताय नागराजाय नम इति आस्तरणं ध्यात्वा प्रणम्य, ओं धर्माय पीठपादाय नम इति आग्नेयां, ओं ज्ञानाय + नम इति नैऋत्यां, ओं वैराग्याय + नम इति वायव्यां, ओं ऐश्वर्याय + नम इति ऐशान्यां पीठपादान् न्यस्य ध्यात्वा, प्रणम्य, ओं अधर्माय पीठगात्राय नम इति प्राच्यां, ओं अज्ञानाय + नम इति दक्षिणस्यां, ओं अवैराग्याय + नम इति प्रतीच्यां, ओं अनैश्वर्याय + नम इति उत्तरस्यां च क्रमेण पीठगात्राणि विन्यस्य ध्यात्वा प्रणम्य, ओं एभिः परिच्छिन्नतनवे पीठभृते सदात्मकायानन्ताय नागराजाय नम इति सदात्मकं सर्वकार्योन्मुखं विभुमनन्तं विन्यस्य, तदुपरि, ओं अष्टदलपद्माय नम इति अष्टदलपद्मं विन्यस्य, पूर्वाद्यष्टसु दलेषु क्रमेण ओं विमलायै चामरहस्तायै नमः, ओं उत्कर्षिण्यै चा + मः, ओं ज्ञानायै चा + मः, ओं क्रियायै + चा + मः, ओं प्रभ्व्यै चा + मः, ओं सत्यायै + चा + मः, ओं ईशानायै चा + मः, इति विमलाद्या हरेर्मुखमीक्षमाणाः, करेणैकेन चामराणि दधतीः स्वलङ्कृताः इतरैकहस्तेन शिरो-निहितेन नमस्यन्तीरष्टौ ध्यात्वा प्रणम्य, गन्धाद्यै-रभ्यर्च्य, कर्णिकापूर्वभागे, ओं अनुग्रहायै चा + नम इति पूर्वोक्तरूपामनुग्रहां चामरहस्तां विन्यस्य ध्यात्वा प्रणम्य, ओं जगत्प्रकृतये दिव्ययोगपीठाय नम इति जगत्प्रकृतिभूतं आधारशक्त्याद्यखिलदेवतामयमद्भुतं

योगपीठं विन्यस्य प्रणम्याभ्यर्च्य, ओं दिव्ययोगपर्यङ्काय नम इति योगपर्यङ्कं विन्यस्य, ओं सहस्रफणामणिमण्डितायानन्ताय नागराजाय नम इति मध्ये कुण्डलीकृतविग्रहं रजताद्रिनिभं उन्मिषत्पद्मपत्रा-रुणेक्षणं शैत्यसौगन्ध्यसौकुमार्यादिगुणाकरं वितानमिव फणामणिसहस्रं वितत्यासीनमनन्तं नागराजं विन्यस्य ध्यात्वाभ्यर्च्य, ओं पादपीठात्मने अनन्ताय नागराजाय नम इति पुरतः पादपीठं विन्यस्य, सर्वपरिवाराणां पुरतः पार्श्वतः पश्चादपि सर्वतः, ओं पद्मासनेभ्यो नम इति पद्मासनानि विन्यस्य, योगपीठस्य पश्चात्पुरतः प्रागुत्तरे च क्रमेणानन्तगरुडविष्वक्सेनानां, ओं सपीठक-पद्मासनेभ्यो नम इति सपीठपद्मासनानि विन्यस्य, सर्वतः पुष्पाक्षतानि विकीर्य, धूपैर्धूपयित्वा, योगपीठस्य पश्चिमोत्तरदिग्भागे समीपतः ओं अस्मद्गुरुभ्यो नमः इति रहस्यत्रयगायत्रीप्रदातॄन् तदर्थोपदेष्टॄन् इज्याप्रयोग-शिक्षकान् भरसमर्पणकर्तॄन् च सर्वान् गुरून् तदीयान् गुरूंश्च ध्यात्वा प्रणम्य, गन्धाद्यैरभ्यर्च्याभिवाद्य प्रसाद्य "गुरुवस्तदीयगुरवो दिशन्तु मम साध्वनुग्रहम् । "युष्मदुपजनितशक्तिमतिरहं हरिमर्चयामि गतभीः

अस्मद्गुरुभ्यो नम इति । सर्वगुरुसङ्ग्राहकत्वमाह—रहस्यत्रयगायत्री प्रदातॄनित्यादिना । "पश्चिमोत्तरदिग्भागे योगपीठसमीपतः" इत्युपक्रम्य "गुरवस्तदीयगुरवः" इति वङ्गिवंशेश्वरोक्तेः स्वगुरून् विशिष्य ध्यात्वा, तद्गुरुत्वेन प्राचार्यप्रभृतयो गुरवो ध्येयाः ।

प्रसीदत'' इति प्रणम्यानुज्ञाप्य, भगवद्यागमारभेत।

कल्पितनागभोगे आसीनं भगवन्तं नारायणं पुण्डरीकदलामलायतेक्षणं, किरीटमकुटहारकेयूर-कटकादिसर्वभूषणैर्भूषितं आकुञ्चितदक्षिणपादं प्रसारित वामपादं, दक्षिणजानुन्यस्तप्रसारितदक्षिणभुजं नाग-भोगे विन्यस्तवामभुजं ऊर्ध्वभुजद्वयेन शङ्खचक्रधरं, सर्वेषां सृष्टिस्थितिप्रलयहेतुभूतमञ्जनाभं ''चकासतम्'' ''विराजमान'' ''उदग्र'' ''प्रबुद्ध''

पूर्वप्रदर्शितविष्वक्सेनसंहितोक्तपररूपध्यानमाह—कल्पित इति। तत्संहितोक्तं दिव्यसिंहासनस्थित्याद्यभिप्रेत्योक्तम्। नागभोग इति। ''परमेश्वरो जगद्धाता'' इत्युक्तमाह—भगवन्तं नारायणमिति। भगवच्छब्दस्य रूढत्वेऽपि भगवन्नारायणेत्यत्रैव निर्वचनप्रसिद्धयोगार्थ-विवक्षया न पौनरुक्त्यम्। ''दिव्यमङ्गलविग्रह'' इत्युक्तदिव्यत्व-मङ्गलत्वादिकमयवयवप्रधाननयनशोभावर्णनेन प्रकटयति—पुण्डरीकेति। ''तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी, यः स्मरेत् पुण्डरीकाक्षं, जितन्ते पुण्डरीकाक्षे''त्यादिकमत्रानुसन्धेयम्। ''विन्यस्य वामबाहुं चे''त्याद्युक्त विग्रहसन्निवेशमाह—आकुञ्चितेत्यादिना वेदान्तभगवच्छास्त्रसिद्धजगत्कारणत्वादिक-माह— सर्वेषां सृष्टीत्यादिना। ''श्यामलाङ्ग'' इत्युक्तं विवृणोति— अञ्जनाभमिति। 'चकासतं ज्याकिणकर्कशैश्शुभैरिति श्री स्तोत्रमाह — चकासतमिति। ''आदित्यवर्णं, तस्य भासा सर्वमिदं विभाति, दिवि सूर्यसहस्रस्ये''त्यादिप्रतिपादित स्वतस्सिद्धदीप्तिमाह — विराजमानमिति। उदग्रेत्यादि। उदग्रः उन्नतः, उच्चप्रांशून्नतो-

''स्फुरत्'' ''अपूर्व'' ''अचिन्त्य'' परमसत्त्वपञ्च-

दग्रोच्छ्रिता इत्यमरः। श्रीस्तोत्रभाष्ये ''उदग्रपीनांसेत्यत्र ''उदग्रमुन्नत' मित्यनुगृहीतम्। तत्रैव ''परात्परं ब्रह्म च ते विभूतय' इत्यत्र 'अत्र ब्रह्म शब्दोपचारनिमित्ते लोकोत्तरबृहत्त्वबृंहणत्वे'' इति । अचिन्त्य-दिव्याद्भुतेत्यत्र ''निरतिशयभोग्यमहत्तराकारत्वमभिप्रेत्यामृतो-दधित्वोपचार'' इति, चानुगृहीतं मूर्तं ब्रह्मेत्यत्र चतुश्लोकीभाष्ये 'अत्र ब्रह्मशब्देन दिव्यविग्रहस्यातिमहत्त्वं स्वाश्रितानां धीविकासहेतुत्वं च विवक्षितमि'त्यनुगृहीतम् । एतेन उदग्रः उत्कृष्टः लक्षणशास्त्रोक्त-यावल्लक्षणलक्षित इति यावदित्यन्योक्तं निरस्तम्। प्रबुद्धः स्वयं प्रकाश इत्यर्थः । स्फुरच्छब्दस्य प्रत्यक्षग्राह्यतत्तदवयवसंस्थानविशेष इत्यर्थः । अपूर्वेत्यनेन देवीनित्यमुक्तैस्सदानुभूयमानोऽपि अपूर्ववत् विस्मयावह इति बोध्यते। अचिन्त्यः 'समस्ताश्शक्तयश्चैता नृप यत्र प्रतिष्ठिताः। तद्विश्वरूपवैरूप्यं रूपमन्यद्धरेर्महत्' इत्याद्युक्तातिमहत्त्वाश्रयतया योगिभिरप्यपरिच्छेद्यः, कुतर्कैः प्रतिक्षेप्तुमशक्यश्च । 'अचिन्त्य-दिव्याद्भुते'ति स्तोत्रभाष्ये अचिन्त्यपदमेवमेव व्याख्यातम् । ''पञ्चोपनिषदाम्नातदिव्यमङ्गलविग्रहः। अप्राकृततनुर्देवः'' इत्याद्यभि-प्रेत्य परमसत्त्वपञ्चशक्तिमयविग्रहमिति । परमसत्त्वं प्राकृतमिश्र-सत्त्वव्यवच्छेदकत्वं पञ्चशक्तिमयत्वं 'शान्तेऽनन्ते परे व्योम्नी'त्यारभ्य 'पञ्चैताश्शक्तयः प्रोक्ताः परस्य परमात्मनः। अशेषे जगदाधारे परे देवे व्यवस्थिताः' इत्यन्तैः पूर्वोदाहृतनारदीयसंहितावचनैः प्रतिपादितं परमेष्ठिपुरुषविश्वनिवृत्तिसर्वशब्दवाच्यविग्रहमयत्वम्। एतेन अप्राकृत-पञ्चभूतात्मकत्वं पञ्चशक्तिमयत्वं इत्यन्योक्तं निरस्तम् । उपात्तविशेषणानां नारायणशब्दार्थे विशेष्येन्वयः ।

पञ्चोपनिषदैर्ध्यात्वेति। पञ्चोपनिषदाम्नातपञ्चशक्तिमयदिव्यमङ्गलविग्रहवत्त्वात् तन्मन्त्रैरेव ध्यानं विहितमिति बोध्यम्।

अथाप्राकृतलोकवर्तिनः पररूपस्याप्राकृतत्वस्य प्रमाणसिद्धत्वेऽपि प्राकृतलोकस्थायाश्शैललोहादिरूपायाः अर्चायाः कथमप्राकृतत्वं, प्रत्यक्षविरोधादति चेन्न; “बिम्बाकृत्यात्मना बिम्बे समागत्यावतिष्ठते। अर्चापि लौकिकी या सा भगवद्भावितात्मनाम्। मन्त्र मन्त्रेश्वरन्यासात् सापि षाड्गुण्यविग्रहा। सर्वातिशयषाड्गुण्यं संस्थितं मन्त्रबिम्बयोः। विशत्यपास्तदोषस्तु तामेव ब्रह्मरूपिणीम्। यो गुरौ मानुषं भावं मन्यते हि नराधमः। यो देवे लोहजं भावमुभौ नरकपातिनौ।” इत्यादिप्रमाणैः, “अर्चावतारமாவது :- परव्यूहादिलक्षणங்களோடே கூட स्वयं व्यक्तादिप्रक्रियैயாலே देशकालादिविप्रकर्ष மற்று मांस चक्षुस्सुக்களுக்கும் अनुभविக்கும்படி தோற்றா நிற்கும் நிலை. இங்கே यथा युवानं राजानं, मानं, सर्वातिशायिषाड्गुण्यं, अर्च्यस्सर्वसहिष्णुः’ इत्यादिश्लोकங்களையும் अभिमानसंसारपरिणामानुप्रवेशाभिमुख्यादि विशेषங்களையும் கண்டு கொள்வது” इति श्री तत्वत्रयचुलकादि श्रीसूक्तिभिश्चार्यायाः नीरक्षीरवदप्राकृतविग्रहसंसृष्टत्वावगमेनादोषात्। श्री न्याससिद्धाञ्जने “स्वयं व्यक्त दैवार्षादयस्त्वर्चावतारभेदाः। दैवादिष्वपि विशिष्टप्रतिष्ठानन्तरं प्रसादोन्मुखेश्वरसङ्कल्पाधीनमप्राकृतत्वमनुसन्धेयम्। प्राकृताप्राकृतसंसर्गोऽपि नानुपपन्नः। कथमन्यथा प्राकृतलोकेषु भगवदवताराः स्युः। परमपदेऽप्यर्चिरादिमार्गेण सूक्ष्मशरीरस्य वैदिकपुत्रादेर्गमनं वा कथं घटेत। हृत्पद्मकर्णिका-

गतस्यान्तर्यामिणः परस्य विशेषतः सूक्ष्मान्तर्याम्यवतारः'' इत्यादिना विशिष्टप्रतिष्ठानन्तरं भगवत्सङ्कल्पाधीनमर्चायामप्राकृतत्वं, प्राकृता-प्राकृतसंसर्गेऽनुपपत्तिपरिहरणं च व्यक्तमुक्तम् । यदन्योक्तं—अर्चिरादिव्यतिरिक्तमार्गेण वैदिकपुत्राणां सूक्ष्मशरीरेणैव वैकुण्ठगमनं प्रतिपाद्यते श्रीभागवते दशमस्कन्धे — इति; तदयुक्तं—तत्र तेषां सूक्ष्मशरीरेण वैकुण्ठगमनानुक्तेः, वैदिकपुत्राणां यावत् भूलोकप्राप्ति तच्छरीरेणैवावस्थातव्यत्वात्, कथमन्यथा तेनैव शरीरेण पुनरानयनं घटेत, 'तथैव दृश्यते — भागवतादिषु' इत्युत्तरस्ववाक्यविरुद्धत्वाच्च। ''इत्यादिष्टौ भगवता तौ कृष्णौ परमेष्ठिना । ओमित्यानम्य भूमानमादाय द्विजदारकान्। न्यवर्तेतां स्वकं धाम सम्प्रहृष्टौ यथागतम्। विप्राय ददतुः पुत्रान् यथारूपांस्तथा प्रभू।'' इति दशमस्कन्धवचनतः जननकालिकरूपविशिष्टानामेव पुत्राणामानयनप्रदानावगमात् 'வைதிகன் பிள்ளைகளை உடலொடுங்கொண்டு கொடுத்தவனைப் பற்றி' इति द्रमिडोपनिषद्वाक्यषट्सहस्रिकाभाष्ये – ''श्री वैकुण्ठத்திலே இருந்த वैदिकன் பிள்ளைகளை அவ்வுடலோடுங் கொண்டு கொடுத்தவனைப் பற்றி' इति व्याख्या दृश्यते । परकालस्वामि कृताष्टादशसहस्रिकायाम् 'वैदिகன் पुत्रர்களை முன்னிவன் பிறந்த அந்த शरीरத்தோடே கொண்டுவந்து கொடுத்தவனைப் பற்றி, एतदेवोक्तं अघटितघटनादिति । அங்கு போனவர்க்கு மிங்கு மீள்வதுண்டோவென்ன; இங்கே अर्चिरादिमार्गத்தாலே देशविशेषसम्बन्धं வாராமையாலே இவரை மீட்டது विरुद्धமன்றென்று श्रीमद्वेदान्तदेशिகன் அருளிச் செய்தார்' इत्युक्तम् । यदप्यन्योक्तं—परमपदसोपाने अर्चिरादि-पर्वान्ते विरजाया दिव्यलोकसीमन्ततया दिव्यजनपदसीमान्ततया च पक्षद्वमुक्त्वा अनन्तरपक्षस्य श्रुत्युक्तत्वाभिधानात्, गतिचिन्तनाधि-

कारे मुक्तस्य दिव्यलोकगमनानन्तरं विरजातरणोपदेशाच्च द्वितीयपक्ष एवाचार्यपक्ष इत्यवगम्यते । यत्तु — प्रथमपक्षाश्रयणेन अर्चिरादीत्यस्यात्र नान्वयः, परमपदसोपाने वैदिकपुत्राणां अर्चिरादौ गमनाभावादेव पुनरावृत्तिप्रतिपादनात् ''परमपदशब्दोऽत्र विरजानद्यभिप्रायः । विद्यामाहात्म्यानुवृत्तसूक्ष्मशरीरस्य विरजावगाहनानन्तरं निवृत्तिप्रतिपादनात्, विरजायाश्च शुद्धसत्त्वमयत्वात् प्राकृताप्राकृतसंसर्ग इत्यर्थः । न तु वैकुण्ठलोकाभिप्रायः । सूक्ष्मशरीरस्य तत्र गमनाभावात्'' इति रङ्गरामानजीयव्याख्यानं, तत्तु मन्दमेव; प्रथमपक्षस्यैवोक्तविधयार्यमिश्रानभिमतत्वात्, तदनुपपत्तेश्च । न हि वैदिकपुत्राणां यावद्ब्रह्मलोकप्राप्ति सूक्ष्मशरीरेण विरजायामवस्थितिर्वक्तुं शक्या । तत्स्पर्शमात्रेण सूक्ष्मशरीरनिवृत्तेस्तैरेव प्रतिपादनात् — इति । एतदत्यन्तभ्रममूलम् — प्रथमपक्षरीत्या मुक्तानां वैदिकपुत्राणां च शुद्धसत्वमयविरजायामेव प्राकृताप्राकृतसंसर्गस्योपपादितत्वात् । 'विद्यामाहात्म्यानुवृत्तसूक्ष्मशरीरस्य विरजायां निवृत्तिप्रतिपादनात्' इति तत्रानुगृहीततया वैदिकपुत्राणां सूक्ष्मशरीरगमनाप्रतिपादनात् तेषां सूक्ष्मशरीरेण गमनं नास्ति, स्थूलशरीरेणैव गमनमित्युपपादितम् । उपकारसंग्रहे – 'आतिवाहिकரைக் கொண்டு சூழ்ந்தகன்றாழ்ந்துயர்ந்த முடிவில் பெரும்பாழைக் கடத்துமதுவும் विरजै என்கிற अमृतनदिயைக் கிட்டிவைத்து आकरத்தில் நின்றுமெடுத்த ரத்நத்தின் அழுக்குக் கழற்றுமாப் போலே आत्माவை अनुबन्धिத்துக் கொண்டு கிடக்கிற सूक्ष्माचित्தைக் கழித்து ஒளிகொண்ட சோதியுமாயென்னும்படி பண்ணுமதுவும், இப்பாலுள்ள உபகாரங்கள், அக்கரையில் दिव्यलोकदिव्यजनपददिव्यनगरदिव्यविमान दिव्यस्थाने''त्यादिना विरजाया दिव्यलोक सीमान्तत्वपक्षोऽप्यङ्गीकृतः । द्वितीयपक्षे दिव्यजनपददिव्यनगरेत्यादेर्वक्तव्यत्वेन दिव्यलोकपदप्रयोगस्यायुक्तत्वात् ।

समाराधनाभिमुखो भवे''ति प्रार्थ्य मूलमन्त्रेण दण्डवत् प्रणम्योत्थाय, ''ब्रह्माद्यास्सकला देवा यं न स्मर्तुमपीश्वराः। स एष भगवानद्य मम प्रत्यक्षतां गतः। स्वागतं भगवन्नद्य मां तारयितुमागतः । धन्योऽस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ।'' इति स्वागतं निवेद्य, ''सान्निध्यं कुरु देवेश सर्वदा सर्वकामद । द्रव्यमन्त्रक्रियाभक्तिश्रद्धाहानिं सह प्रभो'' इति सान्निध्ययाचनं कुर्यात् । अन्यत्र स्वाभिमते देशे पूजाचेदेवमावाहन''मित्युपक्रम्य, ''मन्त्रयोगस्समाह्वानं करपुष्पोदपर्शनम् । बिम्बोपवेशनश्चैव योगविग्रहचिन्तनम् । प्रणामश्च समुत्थानं स्वागतं पुष्पमेव

पक्षद्वयेऽपि विरजायामेव वैदिकपुत्रावस्थानं श्रीभागवते उक्तं— 'ततः प्रविष्टस्सलिलं न भस्वता बलीयसैजत् बृहदूर्मिभूषणम् । तत्राद्भुतं वै भवनं द्युमत्तमम्' इत्यादिना ''द्विजात्मजामेव युवयोर्दिदृक्षुणा मयोपनीता भुवि धर्मगुप्तये' इत्यादिना च विरजामध्यस्थदिव्यभवनगतसहस्रस्तम्भमण्टपान्तर्वर्ति शेषासनस्थभगवत्समीपवर्तित्वावगमात्तेषाम् । अतः श्रीरङ्गरामानुजमहादेशिकव्याख्यान दूषणमयुक्तम् । यथा 'अर्चिरादिने' त्यस्य वैदिकपुत्रादेरित्यत्र नान्वयः, तथा सूक्ष्मशरीरस्येत्यत्रापि नान्वयः । किं तु मुक्तस्येत्यध्याहृतपदार्थ एवान्वयः ।

भगवन् समाराधनाभिमुखो भवेति प्रार्थ्येति । 'समाराधनाभिमुखो भवे'ति नित्यवाक्यमिह भाव्यम् । 'अथान्यत्र स्वाभिमत' इत्यादि नित्यवाक्यार्थं विवक्षुस्तद्वाक्यमुपादत्त अन्यत्रेति ।

च। सान्निध्ययाचनश्चेति मन्त्राह्वानस्य सत्क्रियाः। ततो भगवन्तं प्रणम्य दक्षिणतः ओं श्रीं श्रियै नम इति गोरोचनवर्णां भगवन्नारायणेत्यादिगद्योक्त गुणसंपन्नां श्रियमावाह्य प्रणम्य, वामे, ओं भूं भूम्यै नम इति श्यामां भूमिं, तत्रैव, ओं नीं नीलायै नम इति हरितवर्णां नीलां, ओं सर्वाभ्यो भगवद्दिव्यमहिषीभ्यो नम इति सर्वा भगवन्महिषीः समन्ततः प्रणम्य," इति नित्यग्रन्थरीतिः । अत्र केचित् अन्यत्रेत्यस्य पूर्वं ध्येयतयोक्तपरवासुदेवमूर्त्यतिरिक्तमूर्त्यन्तरे पूजा-चेदेवमावाहनमित्येवार्थः । पूजायामावाहनस्थानानी त्यादिना परमव्योमव्यतिरिक्तानां स्थानानामावाहन-स्थानतया वक्ष्यमाणत्वात् तथैव बहुग्रन्थदर्शनाच्च इति वर्णयन्ति । वस्तुतस्तु अन्यत्र - कल्पितनाग-भोगव्यतिरिक्तदेशे, पूजाचेदित्येव स्वरसतः प्रतीयते ।

अन्यत्रेत्यादेरर्थमाह— अत्र केचिदिति । अन्यत्रेत्यस्येति । अन्यादिपदस्य पूर्वप्रस्तुतार्थभिन्नवाचकत्वस्य व्युत्पत्तिसिद्धत्वात् परवासुदेवमूर्तेः पूर्वं प्रस्तुतत्वात् तद्व्यतिरिक्तपरमन्यपदमिति भावः । ननु परमपदस्याप्यावाहनस्थानत्वात् तद्वृत्तिपरवासुदेवव्यतिरिक्त-परत्ववर्णन मयुक्तमित्यत्राह - पूजायामावाहनस्थानानीत्यादि। उत्तरत्र "पूजायामावाहनस्थानानि क्षीरार्णवादित्यहृदयानी"ति बहुग्रन्थ-पाठदर्शनात् "परमव्योमक्षीरार्णवे"त्यादि काचित्कपाठो न श्रद्धेय इति भावः । अस्मिन्पक्षे 'भगवन् मूर्त्यन्तरे देश' इति सामान्याशब्द-प्रयोगस्यानुचितत्वमभिप्रेत्य पक्षान्तरमाह — वस्तुतस्त्विति ।

अतः उक्तरीत्या आधारशक्त्यादिपीठकल्पनमन्तरेणापि प्रकारान्तरेण पूजास्तीति गम्यते। तथा सत्येव हि अन्यत्र स्वाभिमते देशे इत्यस्य स्वारस्यम्। (अथ वा ज्योतिष्टोमप्रकरणे द्वादशोपसत्त्ववत् गृहार्चनप्रयोग-

---

आधारशक्त्यादिपीठकल्पनामन्तरेण प्रकारान्तरेण पूजास्तीति गम्यत इति। देकालावस्थानगुण्येन सङ्क्रहषोडशोपचारसहित-भट्टारकाद्युक्ताराधनस्याचार्यपादप्रदर्शितस्य पूर्वमुपपादितत्वात् तदाराधनविषयं, 'ईषच्छक्तौ तु सङ्कुचितयजनं, एकोपचारमारभ्य तत्तच्छक्त्याद्यनुसारेण सहस्रोपचारान्तविधानादि'ति 'अत्र तत्तत्क्रियामिति सामान्यनिर्देशाद्यथाधिकारं साक्षात्समाराधन-परैस्तत्प्रवर्तनं, समाराधनापेक्षितप्रदानेन शुश्रूषणमित्यादिकं सर्वं सङ्गृहीतं' इति, 'उक्तन्यायेन न्यूनाधिकोपचारादिकमपि सर्वमुपपादितं मन्तव्यमि'ति च श्री पाञ्चरात्ररक्षोदाहृतविषयं च प्रकृतवाक्यमिति भावः। यथा वा द्वात्रिंशच्चतुष्षष्ठ्यष्टोत्तरशतोपचारादीनामशक्तविषये षोडशोपचारादिविधायकशास्त्रविहितसङ्कुचितयजनव्यतिरिक्तविषयकत्वं, एवं, 'तत आधारशक्त्यादिविष्वक्सेनान्तमर्चन'मिति श्रीपौष्क-राद्युक्तमशक्ताधिकारिकसङ्कुचितयजनव्यतिरिक्तविषयमेव। एते-नान्योक्तमाधारशक्त्यादिकल्पनमन्तरा प्रकारान्तरेण पूजास्तीति कथनमयुक्तमिति दूषणं परास्तं; आधारशक्त्यादिकल्पनमन्तरापि पुंसूक्तादि युक्ताराधनक्रमस्यापि पाद्मादौ दर्शनात् शिष्टाचाराच्च। सर्वसारभूतमुदाहृतवाक्यार्थमाह — ज्योतिष्टोमप्रकरण इति। ''तिस्र एव साह्नस्योपसदो द्वादशाहीनस्ये''ति तैत्तरीयश्रुतज्योतिष्टोमे उपसत्त्रयविधानसमये उपसत्प्रसङ्गादहीनसबन्धिद्वादशोपसद्विधानवत्

'परमैकान्तिनो भगवत्समाराधनप्रयोगं वक्ष्ये' इत्युपक्रमे गृहार्चनप्रयोगस्य प्रतिज्ञातत्वात्, पूर्वप्रकृतभिन्नार्थकान्यशब्दस्य गृहार्चाव्यतिरिक्तालयादिपरत्वस्य युक्तत्वादिति भावः। अन्यत्र + देशे आलयादाविति । आदिपदेन वेद्यादिसङ्ग्रहः । पाद्मे चर्यापादे तृतीयेऽध्याये— 'आवाहनपदं पात्रं प्रक्षालितमथाम्बुभिः । पुरयेन्मूलमन्त्रेण हस्ताभ्यां च समुद्धरेत् । ललाटसममेतस्मिन्नन्तरा-बाह्यकेशवम् । मूलबिम्बाद्यथा दीपं दीपादधिकृतं तथा । चतुरुच्चारयेन्मन्त्रमागच्छ पदसंयुतम्। तेन तोयेन कर्मार्चां सिञ्चेत्कूर्चेन मूर्धनि। प्रणम्य किञ्चिदुत्थाय स्वागतोक्तेरनन्तरम्। दर्शयेत्प्रतिमामुद्रां कल्पयित्वा च सन्निधिम्। यागावसानिकीं तत्र प्रार्थयेत हरेः स्थितिम्। सन्मुखीकरणं कुर्यात्पुण्डरीकाक्षविद्यया । दद्याच्च मूलमन्त्रेण सपर्यासनमादितः।'' इति वचनैर्मूलबेरात् कर्मार्चायामावाहनं प्रतीयते, अत्र फलाश्रवणात् सकामकर्तृकाराधनविषयत्वं न सम्भवतीति स्वीकार्यम् । मूलबेरकर्मार्चादिकमालय एवास्ति । नारदीये पञ्चविंशेऽध्याये— 'न गृहे बलिभिः कार्यं नित्यनैमित्तिकादिकम् । एकदेवस्य यजनमन्यथा दोषदं भवेत्।' इति गृहे एकदेवयजनोक्तेः, अत्रार्चायां प्रतिष्ठयैव भगवत्सान्निध्यसत्त्वेनावाहनानपेक्षणात्।

यदन्योक्तं—यदन्यत्रेति बिम्बादन्यत्र वेद्यादि वृत्तिस्थान इत्यर्थः, 'बिम्बं विनान्यत्र आधार' इत्यादिवचनैर्बिम्बव्यतिरक्ति एवाष्टाङ्गावाहनविधानात्, अतो गोपालार्यनित्यव्याख्योक्तपक्षा मूलसंहिताविरुद्धाः — इति; तदसङ्गतम्—प्रतियोगिवाचकपदा समभिव्याहृतान्यपदस्य पूर्ववाक्यतात्पर्यविषयातिरिक्तार्थपरत्व-व्युत्पत्तेः, बिम्बस्य पूर्वमप्रस्तुतत्वेन तदन्यार्थपरत्ववर्णनस्यायु-

कर्तृभिः श्रीभाष्यकारैरन्यत्र स्वाभिमते देश इत्यालयादावाहनक्रम उपदिष्ट इत्येव सर्वसार इति दिक्।

क्तत्वात्। बिम्बादिसर्वव्यक्तिसाधारण्यस्य स्वाङ्गीकृतत्वेन 'अन्यत्रे' ति पदेन बिम्बान्यत्वमात्रबोधवर्णनस्यासङ्गतत्वात्, पूर्वोदाहृतपाद्म-संहितावचनैर्बिम्बेऽप्यष्टाङ्गावाहनस्य विहिततया अन्यत्रेत्यस्य बिम्बा-दन्यत्रेत्यर्थवर्णनस्यायुक्तत्वात्, सामान्यतः 'बिम्बं विनान्यत्राधार' इत्यस्य नावाहयेदेकबेर' इत्यादिवचनानुसारेण पूर्वोदाहृतपाद्मवचनानु-सारेण च मूलबेरव्यतिरिक्तपरत्वस्यैव स्वीकार्यतयाष्टाङ्गावाहनस्या-नेकबेर युक्तालयविषयत्वस्य सुवचत्वात्। आचार्यपक्षे वेद्यादावष्टाङ्गा-वाहनविरोधाभावात् तृतीयपक्षस्यैव सिद्धान्तत्वेन पूर्वपक्षद्वय-स्यानभिमतत्वेन तत्र दोषकथनस्यानुचितत्वाच्च।

यदपरोक्तं—अन्यत्र वैकुण्ठतयाध्यातस्वगृहव्यतिरिक्तस्थले, गृहस्य वैकुण्ठतया ध्यानविधानेन तथा ध्यानाभावे स्वगृहेऽष्टाङ्गावाहनं कार्यमित्यर्थः - इति। तदयुक्तं। नित्यग्रन्थे पूर्वं वैकुण्ठत्वेन स्वगृहध्यानानुक्त्या अन्यत्रेत्यस्य तथा ध्यातव्यतिरिक्तार्थकत्वस्य व्युत्पत्तिविरुद्धत्वात्। पूर्वोदाहृतपाद्मवचनैर्मूलबेरकर्मार्चादि-स्थलेष्वष्टाङ्गावाहनस्य विहितत्वेन प्रतिष्ठाधीनभगवत्सान्निध्ययुक्त-गृहगतैकबेरेऽष्टाङ्गावगाहनवर्णनस्य प्रमाणविरुद्धत्वात्। इति दिक् इत्यनेन प्रकरणोदाहृतप्रमार्थौचित्यानुष्ठानादिकं परामर्शनीयमित्यर्थो लभ्यते।

मन्त्रयोगादौ पक्षभेदेन प्रयोगभेदं प्रदर्शयितुमाह — अत्रेति। लोके गृहार्चायां सालग्रावाराधनस्यैव प्रायिकत्वात् वेद्याराधनोप-

अत्र मन्त्रयोगादिक्रमे पक्षभेदास्तु दृश्यन्ते तत्र प्रथममाचार्यगुणादर्शे श्रीमन्नारायण मुनिभिः प्रदर्शितः प्रकारो लिख्यते । उद्धरिण्यार्घ्यजलमादाय पुष्पद्वयं निक्षिप्य मूलमन्त्रं चतुरावर्त्य धारणविधारणे कृत्वा, भगवद्विग्रहचिन्तनं मन्त्रयोगः पञ्चोपनिषन्मन्त्रेष्वाद्येन व्योममन्त्रेण उद्योगध्यानं द्वितीयेन वायव्यमन्त्रेण पात्रे प्रवेशध्यानं च समाह्वानं, तृतीयेनाग्नेयमन्त्रेण पात्रं बिम्बस्य दर्शयित्वा, पुरतो निधाय, एकं पुष्पं सजलं सतेजो हस्तेनादाय देवस्य दर्शनं करपुष्पोपदर्शनम् । तुरीयेणाप्यमन्त्रेण भगवन्मूर्ध्वप्रभृति पादान्तं पुष्प-जलाभ्यामभिषिच्य प्रवेशध्यानं बिम्बोपवेशनं द्वितीयं पुष्पमादाय पञ्चमेन पार्थिवमन्त्रेण प्रणवेन च ब्रह्मरन्ध्रं पिधाय शिरःप्रभृति पञ्चोपनिषन्न्यासः मूलमन्त्रे न्यासश्च योगविग्रहचिन्तनम् । मूलमन्त्रेण प्रणामोत्थाने। ''ब्रह्माद्यास्सकला देवा'' इति मन्त्रेण स्वागतम् । पुष्पं नाम मूलमन्त्रेण पादयोः पुष्पप्रदानं सान्निध्ययाचनं नाम ''भगवन्यावदाराधनपरिसमाप्ति सन्निधत्स्वेह विग्रह'' इति सान्निध्यप्रार्थ्यना । तत्तन्मन्त्रेण श्रिय भूमिं नीलाश्चावाहयेत् ।

देशानुष्ठानपारम्पर्यासिद्धेर्नास्माकं मन्त्रयोगादिस्वरूपविचारापेक्षेति बोध्यम् । सालग्रावशिलायां विशेषमाह — सालग्रावशिलायां त्विति । भारद्वाजे परिशिष्टे- ''अर्च्योऽर्चायां हरिर्नित्यं तदभावे तु कुत्रचित् ।

नित्य व्याख्यानादौ तु उक्तप्रक्रियाया एव किञ्चिदधिकतया विस्तररूपेणावाहनप्रक्रियाभेदः प्रदर्शितः। तथा हि - मन्त्रयोगो नाम - उद्धरिण्यार्घ्य-जलमादाय तत्र पुष्पद्वयं निक्षिप्य उरस्स्थं कृत्वा धारणविधारणे कृत्वा मूलमन्त्रचतुरावृत्तिपूर्वकमावाह्य भगवद्विग्रहचिन्तनं समाह्वानन्तु - ओं परधामावस्थित मदनुग्रहाभियोगोद्यतावतार एह्येह्यभिमतसिद्धिद मन्त्र-शरीर ओं नमो नमः ओं षौन्नमः पराय परमेष्ठ्यात्मने वासुदेवाय नम इति उद्योगध्यानं, ओं यान्नमः पराय पुरुषात्मने सङ्कर्षणाय नम इति करस्थपात्रजले प्रवेशध्यानञ्च। करपुष्पोपदर्शनं नाम - ओं रान्नमः पराय विश्वात्मने प्रद्युम्नाय नम इति पात्रं भगवन्मुखे दर्शयित्वा पुरतो निधाय एकं पुष्पं सजलं सतेजो हस्तेनादाय देवस्य मुखे दर्शनम्। बिम्बोपवेशनं नाम "आवाहयामि लक्ष्मीशम् परमात्मानमव्ययम्। आतिष्ठतामिमां मूर्तिं मदनुग्रहकाम्यया। श्रिया सार्द्धं जगन्नाथो देवो नारायणः प्रभुः' इति ध्यात्वा ओं वान्नमः पराय निवृत्त्यात्मने अनिरुद्धाय नमः इति शिरः प्रभृतिपादान्तं पुष्पजलाभ्यामभिषिच्य प्रवेशनं, योगविग्रहचिन्तनं नाम - अन्यत्पुष्पमादाय ओं लान्नमः पराय सर्वात्मने नारायणाय नम इति ब्रह्मरन्ध्रं पिधाय शेषं निरस्य मूलमन्त्रेण भगवद्विग्रहध्यानं, भगवतश्शिरः प्रभृति पादान्तं पञ्चोपनिषन्मन्त्राणां सृष्टि क्रमेण न्यासः,

मूलमन्त्रस्य व्यापकन्यासः, मूलमन्त्राक्षराणां ओं ओं ओं नमित्यादिक्रमेण मूर्ध्नि नेत्रयोः मुखे हृदये नाभौ गुह्ये जान्वोः पादयोश्च तत्तदङ्गुल्या सृष्टिन्यासः। नाभ्यादि-हृदयपर्यन्तं स्थितिन्यासश्च। ततः मूलमन्त्रेण प्रमाण-समुत्थाने ब्रह्माद्यास्सकला देवा इति मन्त्रेण स्वागतम्। अथ पादयोः मूलमन्त्रेण पुष्पप्रदानं पुष्पम्। सान्निध्ययाचनं नाम- ओं ओं ज्ञानाय हृदयाय नमः, भगवन् सन्निधत्स्वेह विग्रहे इति भगवन्मूर्ध्नि पुष्पेण जलं प्रदाय शेषं प्रतिग्रहपात्रे निक्षिप्य, पुनरपि ओं नां बलाय कवचाय हुं भगवन् सन्निधत्स्वेह विग्रह इति भगवन्मूर्ध्नि पुष्पेण जलं प्रदाय शेषं प्रतिग्रहपात्रे निक्षिप्य पुनरपि ओं यं तेजसे नेत्राभ्यां वौषट् भगवन्यावदाराधनपरिसमाप्ति सन्निधत्स्वेह विग्रह इति भगवन्मूर्ध्नि पुष्पेणार्घ्यजलं प्रदाय शेषं प्रतिग्रहपात्रे निक्षिप्य, "सान्निध्यं कुरु + प्रभो" इत्यर्घ्यत्रयपुरस्सरं सान्निध्ययाचनं कुर्यात्। अथ भगवद्वक्षसि दक्षिण भागमारभ्य क्रमेण तत्तन्मन्त्रेण श्री भूमिनीलानां न्यासः दक्षिणे तत्तन्मन्त्रेण श्री भूमिनीलानां न्यासः। दक्षिणेतरहस्तेषु पद्मगदाचक्र शङ्खानां प्रणवादि नमोऽन्तन्यासः, एवं किरीट श्रीवत्सकौस्तुभवनमालानां शिरोवक्षो दक्षिण भाग-मध्योभयपार्श्वेषु न्यासः। श्री पुष्टिसरस्वती निद्राकान्ति-पृथ्वीगरुडानां तत्तत्स्थानेषु न्यासः। तेषां चतुरुपचारैरर्चनं चक्रमुद्रा मूलमुद्रा च। एवं श्री

भूग्यादिबिम्बे सति ओं श्रीं श्रियै नमः इति चतुरावृत्त्यादिबिम्बोपवेशनान्तं कृत्वा ओं षौन्नम इति इत्यादि योगविग्रहचिन्तनकाले पञ्चोपनिषदां सृष्टिन्यासं कृत्वा ओं श्रीं श्रियै नम इति श्रीमन्त्रेण व्यापकन्यासं कुर्यात्। ओं श्रां ज्ञानाय हृदयाय नमः ओं श्रीं ऐश्वर्याय शिरसे स्वाहा, ओं श्रूं शक्त्यै शिखायै वौषट्, ओं श्रैं बलाय कवचाय हुं ओं श्रौं तेजसे नेत्राभ्यां वौषट्, ओं श्रः वीर्यायास्त्रायभट्, इति षडङ्गन्यासं कृत्वा श्रीमन्त्रेण प्रणामोत्थाने कृत्वा स्वागतं निवेद्य श्री मन्त्रेण पुष्पं दत्वा ओं ओं ज्ञानाय हृदयाय नमः भगवति श्रीः सन्निधत्स्वेह विग्रहे इत्याद्यर्घ्यत्रयं मूर्ध्नि दद्यात्। एवं भूं भूम्यै नम इति चतुरावृत्त्यादि, ओं भां ज्ञानाय हृदयाय नम इत्यादिक्रमेण भूम्यावाहनम्। ओं नीं नीलायै नम इत्यादि नीलावाहनम्।

सालग्रावशिलायां तु आवाहनं विना सान्निध्यया चनमात्रं कुर्यात्।

पुष्पेणार्घ्येन हविषा स्तुत्वा नत्वापि वा परम्। सालग्रावशिलायां तु पूजनं स्नपनादिकम्। सा हि दिव्या हरेर्मूर्तिर्दर्शनादेव सिद्धिकृत्।

पाद्मे च—''न प्रतिष्ठा विधातव्या न चैवावाहनादिकम्। सालग्रावशिलादीनां पूजालोपो न दूषणम्। तथैवाशुद्धिसंस्पर्शे क्षालयित्वार्चयेत् पुनः। न च स्नानं न च ध्यानं न चैवावाहनादिकम्। सालग्रावशिलाबिम्बे स्नपनेनैव पूजये''दित्यादिकमिह भाव्यम्।

ततः किरीटाय मकुटाधिपतये नम इति भगवतः पश्चिमपार्श्वे चतुर्बाहुं चतुर्वक्त्रं कृताञ्जलिपुटं मूर्ध्नि भगवत्किरीटं धारयन्तं किरीटाख्यदिव्यपुरुषं प्रणम्य, ओं किरीटमालायै आपीडात्मने नम इति स्वमौलिना देवापीडं बिभ्रतमापीडात्मानं भगवतः पुरतो ध्यात्वा प्रणम्य ओं दक्षिणकुण्डलाय मकरात्मने नमः, ओं वामकुण्डलाय मकरात्मने नम इति भगवतो दक्षिण वामपार्श्वयोर्यथाक्रमं स्वमौलिना भगवच्छ्रवणभूषणं दधतं मकरकुण्डलाख्यं सूरिद्वयं प्रणम्य, ओं वैजयन्त्यै वनमालायै नम इति पञ्चवर्णां मृदुतनुं पञ्चभूताधारभूतां भूतमालाख्यां मूर्तिमतीं श्रियमिव स्थितां भगवतः पुरतः प्रणम्य, ओं श्रीमत्तुलस्यै नम इति पुरतः वैजयन्तीपार्श्वे श्यामाङ्कमलपत्राक्षीं गोविन्दचरणप्रियाम् । प्रियां श्रियमिवानन्यां हरेर्नित्यविभूषणं'' प्रणम्य, ओं वत्साय श्रीनिवासाय नमः इति पुरतः प्रधानतत्त्वाधारभूतं हेमप्रभं श्रीवत्सं प्रणम्य, ओं हाराय सर्वाभरणाधिपतये नम इति हारात्मानं पुरतः प्रणम्य, ओं श्री कौस्तुभाय सर्वरत्नाधिपतये नम इति पुरतः जीवतत्त्वाधारभूतं भास्वरवपुषं कौस्तुभात्मानं प्रणम्य, ओं काञ्चीगुणोज्ज्वलाय दिव्य-पीताम्बराय नम इति पुरतः पीताम्बरं प्रणम्य, ओं सर्वेभ्यो भगवद्दिव्यभूषणेभ्यो नम इति तत्तदङ्गसमुत्थानि तेजांसीव परात्मनः । सुसाराणि सुगन्धीनि सुकुमाराकृतीनि च । मनोनयनहारीणि देवस्यापि निजैर्गुणैः । स्वैरेव धार्यमाणानि रूपैर्बहुविधैश्शुभैः । यथावर्णं यथास्थानं यथारूपं

यथाक्रमम् । प्रणम्य चिन्तयेद्भक्त्या स्वैर्मन्त्रै : पुरतो हरेः ।'' इत्यादिक्रमेण भगवतः पुरत एव नूपुरादीनि सर्वाणि भूषणानि ध्यात्वा प्रणम्य, ओं सुदर्शनाय हेतिराजाय नम इति सुदर्शनात्मानं रक्तवर्णं रक्तनेत्रं द्विभुजं कृताञ्जलिपुटं भगवन्तमालोकयन्तं तद्दर्शनानन्द-बृंहितमुखं मूर्ध्नि भगवच्चक्रं धारयन्तं दक्षिणतः प्रणम्य, ओं नन्दकाय खड्गाधिपतये नम इति तत्रैव ज्ञानतत्त्वाधिदैवतं मूर्ध्नि भगवत् खड्गं धारयन्तं दिव्यपुरुषं प्रणम्य, तत्रैव ओं पद्माय नमः इति शिरसि पद्मं धारयन्तं शैत्यसौगन्ध्यसौन्दर्यमार्दवादिगुणं लीलापद्मं ध्यात्वा प्रणम्य, वामतः ओं पाञ्चजन्याय शङ्खाधिपतये नम इति शङ्खात्मानं सितवर्णं रक्तनेत्रं द्विभुजं कृताञ्जलिपुटं शङ्खनादबृंहितमुखं मूर्ध्नि भगवच्छङ्खं धारयन्तं प्रणम्य, ओं कौमोदक्यै गदाधिपत्न्यै नम इति गदान्देवीं बुद्धि तत्त्वाधारभूतां भगवद्गदां शिरसा दधतीं प्रणम्य, तत्रैव ओं शार्ङ्गाय चापाधिपतये नम इति त्रिणतं शिरसा भगवद्धनुर्दधतं तत्तदाकृतिशरतूणीरद्वयसमेतं शार्ङ्गात्मानं प्रणम्य, ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नम इति सर्वाणि भगवदायुधानि स्वशिरोधृतस्वस्वरूपायुधानि प्रणम्य, ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नम इति भगवत्पादारविन्द संवाहिनीस्समन्ततः प्रणम्य, ओं अनन्ताय नागराजाय नम इति पृष्ठतोऽनन्तं नागराजं चतुर्बाहुं हलमुसलधरं कृताञ्जलिपुटं फणामणिसहस्र मण्डितोत्तमाङ्गं वारुणीकान्तिभ्यां पत्नीभ्यां समेतं

भगवन्तमालोकयन्तं तद्दर्शनानन्दबृह्मितसर्वाङ्गं ध्यात्वा प्रणम्य, ओं सर्वेभ्यो भगवत्परिजनेभ्यो नम इत्यनुक्तान सङ्ख्येयान् परिजनान् सर्वतः प्रणम्य, ओं भगत्पादुकाभ्यां नम इति पुरतः पादुके प्रणम्य, ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नम इति सर्वान् परिच्छदान् सर्वतः प्रणम्य, अग्रतः ओं वैं वैनतेयाय नम इति वैनतेयं समासीनं द्विभुजं कृताञ्जलिपुटं भगवन्तमालोकयन्तं रुद्रासुकीर्तिभ्यां समेतं ध्यात्वा प्रणम्य, भगवतः प्रागुत्तरे, ओं भगवते विष्वक्सेनाय नम इति दक्षिणामुखं चतुर्भुजं कृताञ्जलिपुटं शङ्खचक्रधरं नीलमेघनिभं सूत्रवत्या समेतं ध्यात्वा प्रणम्य, ओं गं गजाननाय नमः, ओं जं जयत्सेनाय नमः, ओं हं हरिवक्त्राय नमः, ओं कं कालप्रकृसंज्ञिकाय नमः, ओं सर्वेभ्यो विष्वक्सेन-परिजनेभ्यो नमः इति विष्वक्सेनपरिजनान् तस्य समन्ततः प्रणम्य, ओं चण्डाय द्वारपालाय नमः, ओं प्रचण्डाय + नम इति पूर्वद्वारपार्श्वयोः शङ्खचक्रगदाज्ञा मुद्राधर चतुर्हस्तौ चण्डप्रचण्डौ प्रणम्य, ओं भद्राय + नमः, ओं सुभद्राय + नमः, इति दक्षिण द्वारपार्श्वयोः पूर्वोक्तलक्षणौ भद्रसुभद्रौ प्रणम्य, ओं जयाय + नमः, ओं विजयाय + नम इति पश्चिमद्वारपार्श्वयोः पूर्वोक्तलक्षणौ जयविजयौ प्रणम्य, ओं धात्रे + नमः, ओं विधात्रे + नम इत्युत्तर द्वारपार्श्वयोः पूर्वोक्तलक्षणौ धातृविधातारौ प्रणम्य, ओं सर्वेभ्यो द्वारपालेभ्यो नम इति सर्वान् द्वारपालान् सर्वतः प्रणम्य, ओं कुमुदाय गणाधिपतये सवाहनपरिवार

प्रहरणाय नमः, ओं कुमुदाक्षाय + नमः, ओं पुण्डरीकाय + नमः, ओं वामनाय + नमः, ओं शङ्कुकर्णाय + नमः, ओं सर्व(र्प)नेत्राय + नमः, ओं सुमुखाय + नमः, ओं सुप्रतिष्ठिताय + नमः, इति भगवतः प्रागादिक्रमेणाष्टसु दिक्षु कुमुदादीन् शङ्खचक्रगदाधरान् सवाहनपरिवारप्रहरणान् ध्यात्वा प्रणम्य, ओं सर्वेभ्यो भगवत्पार्षदेभ्यो नम इति पूर्वोक्तलक्षणान् सर्वान् पारिषदान् समन्ततः प्रणम्य, गन्धाद्यैरभ्यर्चयेत् ।

पूजायामावाहनस्थानानि क्षीरार्णवादित्यमण्डल-हृदयानि, मधुरायोध्यादि दिव्यावतारस्थानान्यन्यानि पौराणिकानि श्रीरङ्गादीनि यथारुचि ।

एवं भगवन्तं नारायणं देवीभूषायुधपरिजनपरिच्छद-

पूर्वं श्रीभूमिनीलानां ध्यानं प्रतिपादितम् । प्रासङ्गिकमन्त्र-योगादिनिरूपणानन्तरं किरीटादिध्यानादिकमाह– ततः किरीटाये-त्यादिना । सर्वेभ्यो भगवत्पारिषदेभ्यो नम इति पूर्वोक्तलक्षणान् सर्वान् पारिषदान् समन्ततः प्रणम्य गन्धाद्यैरभ्यर्चयेदित्यन्तेन ।

पूर्वं, ''अन्यत्र स्वाभिमते देशे'' इत्यादिना नित्योक्तमन्त्र-योगादिविषये नित्योक्तावाहनस्थानान्याह–पूजायामित्यादिना । अथ मूलमन्त्रद्वयोत्तरखण्डचतुर्थ्यन्तपदाभिप्रेतं सर्वप्रकारविशिष्ट भगवतः कैङ्कर्योद्देश्यत्वमभिप्रेत्य तथाविधविषयध्यानमाह – एवमिति । उभयलिङ्गत्वमाह– भगवन्तमिति । सर्वप्रकारवाचि नाम निर्दिशति – नारायणमिति । पूर्वोक्तदेव्यादिवैशिष्ट्यमाह – देवीभूषेत्यादिना ।

द्वारपालपार्षदैस्सेव्यामानं स्वाधीनत्रिविधचेतनाचेतन-स्वरूपस्थिति प्रवृत्तिभेदं क्लेशकर्माद्यशेषदोषासंस्पृष्टं स्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यतेजःप्रभृत्य-सङ्ख्येयकल्याणगुणगणौघमहार्णवं ध्यात्वा प्रणम्य, मूलमन्त्रेण स्वात्मानं भगवते निवेद्य, प्रणम्यानुज्ञाप्य, पूजामारभेत।

बाह्ययागे भोगसमर्पणप्रकारः।

''प्रदर्शनं प्रदानञ्च क्षापणं प्रीणनं तथा। आदौ मध्येऽवसाने च प्रतिभोगं समाचरेत्। अवलोकय देवेद-मित्यावेद्य स्वसंज्ञया। प्राप्तं प्राप्तं क्रमाद्भोगं दर्शयेदास-नादिकम्। प्रदर्शितममुं भोगं गृह्णीष्व भगवन्निति। ब्रुवन्

नारायणशब्दनिर्वचनसिद्धाकारानाह — स्वाधीनेत्यादिना। तथाविधस्य ध्यानादिकमाह – ध्यात्वा प्रणम्येति। 'अथान्तः करणयागादियावदात्मनिवेदनम्। तदाद्यमङ्गं यागस्य नाम्नाभिगमनं भवेदि' ति श्री जयाख्योक्त यागाद्याङ्गसमापनमाह – मूलमन्त्रेणेति। प्रणम्यानुज्ञाप्य पूजामारभेतेति। बाह्यपूजामारभेतेत्यर्थः। बाह्ययागे भोगसमर्पणप्रकारमाह बाह्येति। मन्त्रासनमभ्यर्च्य पादुके प्रदायेति। ''विनिवेद्यासनवरं समाहूतस्य वै विभोः। पादपीठं तु सामान्यं मन्त्रास्तरणभूषितम्। संपूर्णमीश्वरार्हं तत् भावनीयमशेषतः। मृद्वास्तरणसंस्तीर्णमादावासनमुत्तमम्'' इति सात्त्वतलक्ष्मीतन्त्रवच-नानुसारेण पुनर्मन्त्रासनं कूर्चेन मार्जयित्वा, ''ततो निवेद्य प्रणतः प्रथमासनमादरात्'' इति श्री नित्यवह्निवंशेश्वरवाक्यानुसारेण च प्रथमं

प्रणम्य प्रयतः प्रदद्यात्परमात्मने। अथापराधानखिलान् दत्तभोगानुबन्धितः। क्षमस्व देवदेवेति क्षापयेत्प्रणमन् पुनः। देवपादौ स्वहस्ताभ्यां गृहीत्वा शिरसा नमन्। प्रीणयेद्दत्तभोगेन प्रीयतां भगवानिति। भोगदानविधावेवं सावधानस्सदा स्मरन्।'' इति वङ्गिवंशेश्वरोक्तरीत्योपचारान् दद्यात्। अत्र मूलमन्त्रेणैव सर्वोपचारान् दद्यात्।

इज्याकालस्तृतीयोऽयमह्नोंशस्समुपागतः। संभृताश्चैव संभाराः कल्पितान्यासनानि च। स्नानाद्यर्थानि देवेश तवेच्छा वर्तते यदि। अवलोकनदानेन तत्सर्वं सफलं कुरु। तदर्थं सह देवीभ्यां सानुगैस्सचिवैस्सह। मदनुग्रहाय कृपया अत्रागन्तुं त्वमर्हसि।'' इति विज्ञाप्य, मन्त्रासनमभ्यर्च्य, पादुके प्रदाय, तत्रोपविष्टे भगवति, उद्धरिण्या पूर्वस्थापितादर्घ्यपात्रादर्घ्यजलमादाय, पाणिभ्यां घ्राणसममुद्धृत्य, तिष्ठन् अवनताननस्सन्, मत्पूजां प्रतिगृह्णीष्वेति चिन्तयन् मुखे

मन्त्रासनन्यसनादिकमुक्तम्। अथार्घ्यदानमाह – उद्धरिण्या पूर्वस्थापितादर्घ्यपात्रादित्यादिना। ''पात्रेण पूर्वस्थापितादर्घ्य पात्रादर्घ्यजलमादाय पाणिभ्यां घ्राणसममुद्धृत्य 'भगवन्! मत्पूजां प्रतिगृह्णीष्वे'ति चिन्तयन् भगवन्मुखे दर्शयित्वा भगवद्दक्षिणहस्ते किञ्चित् प्रदाय शेषमर्घ्यप्रतिग्रहपात्रे प्रक्षिपे''दिति नित्यवाक्यमिह भाव्यम्। अर्घ्यादौ घण्टानादप्रमाणानि पूर्वं प्रदर्शितानि। हस्तशाटिकां प्रदायेति। नित्ये स्नाने शाटिकाप्रदानस्यानुगृहीतत्वात्, अर्घ्यजलस्पृष्टहस्त-

दर्शयित्वा, भगवद्दक्षिणहस्ते किञ्चित्प्रदाय शेषमर्घ्यप्रतिग्रहपात्रे प्रक्षिपेत् । हस्तशाटिकां प्रदाय, स्वहस्तौ प्रक्षाल्य पादयोः पुष्पाणि दत्वा, ततः स्वहस्तद्वयं प्रसार्य ''अकृत्रिमप्रेमरसनिर्भरैः स्वकराम्बुजैः । शुद्धैः स्वभावसुभगैः सुखस्पर्शैस्सुगन्धिभिः । संवाह्यमानम निशं शेषशेषाशनादिभिः । असत्यस्यातिनीचस्य भक्तिहीनस्य दुर्मतेः । ममापि करयोरद्य स्वयैव कृपया हरे । निधेहि चरणद्वन्द्वं त्वामस्मि शरणं गतः'' इति सम्प्रार्थ्य पाद्यपात्राज्जलमादाय मूलमन्त्रेण भगवन्निदं पाद्यमित्यावेदनादि पूर्ववत्कृत्वा पादयोः किञ्चिद्दत्वा, मनसा पादौ प्रक्षाल्य, पाद्यप्रतिग्रहपात्रे प्रक्षिपेत् । पादौ वस्त्रेण संमृज्य, गन्धपुष्पाणि दत्वा, आचमनीयपात्रादाचमनीयमादाय, पूर्ववद्दक्षिणहस्ते किञ्चिद्दत्वाऽऽचामन्तं ध्यात्वा, शेषमाचमनप्रतिग्रहपात्रे प्रक्षिपेत् ।

विशोधनार्थं शाटिकादानम् । स्वहस्तौ प्रक्षाल्य पादयोः पुष्पाणि दत्वेति । 'हस्तौ प्रक्षाल्य देयानि पुष्पाणि प्रयतावपी''ति श्री वाराहवचनमिहानुसन्धेयम् । एतेन – ''अर्घ्यप्रदाने मनसेत्यनुषज्य भगवद्दक्षिणहस्ते किञ्चित् प्रदाय मनसा हस्तौ प्रक्षाल्येत्यर्थः, स्वहस्तौ प्रक्षाल्येति व्याख्यानं मन्दं, मानाभावादिति–उक्तं परास्तम् । पुष्पप्रदानाय स्वहस्तप्रक्षाळनस्योदाहृतवचनसिद्धततया नित्यश्रीसूक्तेः स्वरसार्थपरित्यागेन क्लिष्टार्थकल्पनस्यायुक्तत्वात् ।

अथ पाद्यदानप्रकारमाह–ततः स्वहस्तौ प्रसार्येत्यादिना । एवमाचमनीयदानमपि प्रतिपादितम् । उभयमपि नित्य श्रीसूक्तिसिद्धम् ।

तत्र गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलादि दत्वा, प्रणम्य, आत्मात्मीयं सर्वं भगवन्नित्यकिङ्करत्वाय स्वीकुर्विति भगवते निवेदयेत्।

तत्र गन्धपुष्पधूपदीपाचमनमुखवासताम्बूलानि दत्वेति। गन्धपुष्पदानं वङ्गिवंशेश्वरोक्तं प्रसिद्धम्। "ततो गग्गुलुकर्पूरचन्दनागरुभिः कृतम्। धूपात् सौगन्ध्यमादाय देवाय विनिवेदयत्। ततः कर्पूरचूर्णाढ्य-घृतार्द्रानववर्तिजात्। ज्वलिताद्रुचिराद्दीपादुत्थिताच्चतुरङ्गलम्। सुगन्धिदृष्टिसुखदमौष्ण्येन परिवर्जितम्। आलोकमात्रमादाय स्वेन दक्षिणपाणिना। घण्टानिनादसहितौ धूपदीपौ निवेदयेत्। तन्नादसहितावेतौ दुष्टसत्त्वनिबर्हणौ। सदेवीकाय देवाय स्वमन्त्रेण निवेदयेत्। शुद्धैः कर्पूरजैस्तैलैस्सिक्तं कुसुमवासितम्। प्रभूतं क्रमुकं दद्यात् श्वेतताम्बूलसंयुतम्।" इति वङ्गिवंश्वरोक्तानि धूपदीपमुख-वासताम्बूलानि ग्राह्याणि। घृष्टधूपसमायुक्तं गुग्गुलं धूपयेच्छुभम्। सहघण्टारवैरम्यैश्चाल्यमानेन बाहुना। निर्धूमैः स्फुरदङ्गारैर्निर्ज्वालैश्च निरिन्धनैः। धूपं दद्यात् स्वयं किञ्चित् घण्टां वामेन नादयन्। क्रमुकस्य फलं भिन्नमपक्कं पक्कमेव वा। कर्पूरतैलसंसिक्तमसिक्तं वा मुनीश्वर। ताम्बूलवल्लिपत्रैश्च सहितं क्षालितं तथा। एलातक्कोलजातीभिः कर्पूरसहितं तथा। मातुलङ्गफलैर्युक्तं नालिकेरफलान्वितम्। शिलाचूर्णैश्च संसिक्तं कर्पूरसहितेन च। संस्कृतं प्रणवेनैव मुखवासं प्रदापये'दिति श्री सात्त्वत श्रीकरकपिञ्जलवचनान्यत्र भाव्यानि। "दीपार्थं गोघृतं श्रेष्ठं मध्यमं तिलतैलकम्। अधमं वृक्षतैलं तु ऐरण्डादीनि

अर्घ्यादिस्नानान्तव्यतिरिक्तानामुपचाराणां मुख्य-द्रव्यालाभे सर्वार्थतोयेनैव दानं, सर्वार्थतोयमिति संज्ञा-बलात्, सर्वार्थतोयस्य कार्यविशेषाकथनाच्च । केचित्तु अर्घ्यादेव सर्वोपचारसमर्पणं, सर्वार्थतोयस्य क्षालनं प्रयोजनमिति वदन्ति। तत्रौचित्यं नातीवेति द्रष्टव्यम्।

वर्जये''दिति वैखानसवचनं, ''पुन्नागैरण्डतैलैश्च पिचिमन्दैश्च कुन्दजैः । तैलैश्च मधुकोद्भूतैर्नालिकेरोद्भवैरपि । काष्ठजैस्तिलजैर्दीपै-र्नित्यनीराजनेऽपि च। सन्ध्यादीपे विशेषेण वर्जयेत्तु प्रयत्नतः ।'' इति पारमेश्वरवचनञ्चात्र भाव्यम् । तिलजैरिति काष्ठजैरित्येतद्विशेषणं, काष्ठजैस्तैलैरित्यर्थः । ''सर्पिषा तिलतैलेन दीपारोपणमाचरेत् । नान्यैरैरण्डतैलाद्यैर्नाजाविमहिषादिभिः । स्नेहैरारोपणं कुर्यान्न च प्राण्यङ्गसम्भवै''रिति पाद्मवचनेन तिलतैलाभ्यनुज्ञानेन तदैकार्थ्यात्।

उपचाराणां मुख्य द्रव्यालाभे प्रतिनिधिदानमाह–अर्घ्यादी-त्यादिना। सर्वार्थतोयेनैवेति । तथौचित्यादिति भावः । मतान्तरं खण्डयति केचित्त्विति । यदन्योक्तं–उपचाराणां मुख्यद्रव्यालाभे मानसैरेवोपचारः कार्यः, उदकस्य सन्न्यासिनामेव भोगप्रतिनिधित्वं नान्येषामिति सर्वार्थतोयेनासम्भवद्रव्योपचारकथनमयुक्तं–इति । तन्मन्दं–नारदीये द्वाविंशेऽध्याये ''अलाभे सर्वभोगानां तोयं प्रतिनिधिःस्मृतम् । मुख्याभावे यथेच्छातः सर्वाभावे तु मानसम् । जलाभावे तु मनसा कल्पयेन्नित्यकर्मणि'' इति वचनेन, ''अलाभे सर्वभोगानामुदकेनाभिपूजितः । प्रयच्छत्यमलं लोकं भक्ति-

ततः स्नानासनमानीय, गन्धादिभिरभ्यर्च्य, प्रणम्य, ''स्नानकालस्त्वयं प्राप्तस्तवेच्छा वर्तते यदि । अभ्यञ्जयित्वा देवेश सुस्नानं कर्तुमर्हसि । स्फुटीकृतं मया देव इदं स्नानासनं परम् । सपादपीठं परममिदं स्नानासनं महत् । आसादयाशु स्नानार्थं मदनुग्रह-काम्यया।'' इति विज्ञाप्य, पादुके प्रदाय, तत्रोपविष्टे मालावस्त्र-भूषणान्यपनीय, विष्वक्सेनाय दत्वा, स्नान-शाटिकां प्रदाय पाद्याचमनपादपीठप्रदानदन्तकाष्ठ-जिह्वानिर्लेहनगण्डूषमुखप्रक्षालनाचमनादर्शहस्तप्रक्षा-लनमुखवासताम्बूलतैलाभ्यङ्गोद्वर्तनामलकतोय प्रदान-कङ्कतप्लोत देहशोधन शाटिकाप्रदान हरिद्रालेपन-प्रक्षालनवस्त्रोत्तरीयोपवीत पाद्याचमन पवित्र प्रदान-गन्धपुष्पधूपदीपाचमन नृत्तगीतवाद्यादि सर्वमङ्गल-

---

पूतान्तरात्मनामि''ति श्री पाञ्चरात्ररक्षातृतीयाधिकारस्थ वचनेन च उदकप्रतिनिधित्वस्य उदकाभावे मानसप्रतिनिधित्वस्य च प्रतीतेः । यतिधर्मसमुच्चये फलपुष्पोत्पाटने प्रायश्चित्तविधानात् ''अद्भिः कर्तव्यमन्याहृतैर्वे''ति यतेः पूजोपकरणमुक्तम्।

अथ स्नानासनकर्तव्योपचारमाह–ततः स्नानासनमानीयेति । स्नानासनोक्तोपचारकलापः श्री नित्यानुगृहीत एवात्राभिहितः । कूर्चप्रसारणं प्रथमासनमार्जनार्थं, ''पुनर्मन्त्रसनं कूर्चेन मार्जयित्वे''ति नित्योक्तेः ।

युक्ताभिषेकप्रदान नीराजनाचमन देहशोधनप्लोत-वस्त्रोत्तरीयाचमन कूर्चप्रसारणानि कुर्यात्।

ततोऽलङ्कारासनमानीय गन्धादिभिरभ्यर्च्य "संपन्नं देव सद्वस्त्रभूषास्रक्चन्दनादिकम् । अलङ्कारासनं भद्रमधितिष्ठ तृतीयकम्।" इति विज्ञाप्य, पादुके प्रदाय तत्रोपविष्टे पूर्ववत् स्नानीयवर्जमर्घ्यादि कल्पयित्वा अर्घ्य-पाद्याचमनीयानि दत्वा, गन्धसंमर्दनवस्त्रोत्तरीय-भूषणोपवीताचमनीयानि दत्वा, देव्यादिपरिवाराणां स्नानवस्त्र-भूषणान्तं कृत्वा, गन्धपुष्पादीनि देवानन्तरं सर्वपरिवाराणां प्रत्येकं प्रदाय धूपदीपाचमनीयानि दद्यात्। अथवा सर्वपरिवाराणां गन्धादीनेव दद्यात् । पुष्पप्रदानालङ्काराञ्जनोर्ध्वपुण्ड्रा दर्शधूपदीपाचमन-ध्वजच्छत्र वाहनशङ्खचिह्नकाहलभेर्यादिसकलवाद्यनृत्त गीतादिभिरभ्यर्च्य, मूलमन्त्रेण प्रत्यक्षरं पुष्पं प्रदाय द्वादशाक्षरेण विष्णुगायत्र्या पञ्चोपनिषन्मन्त्रैः पुरुष-

अथालङ्कारासनकर्तव्यमाह—तत इत्यादिना। नित्योक्तप्रक्रियै-वात्रानुगृहीतेति बोद्धयम् । देव्यादिपरिवाराणां स्नानवस्त्रभूषणान्तं कृत्वेति । देव्यादिपरिवाराणां स्नानादिदीपान्तः गन्धादिदीपान्तः उपचार इति पक्षद्वयं भगवच्छास्त्रप्रसिद्धम्। पाद्मे 'एकैव मूर्तिराराध्या प्राधान्येनेतराः पुनः। देव्यः श्रियादयश्चापि संपूज्याः परिवारवत्'' इति एकभगवन्मूर्तेरेव सर्वोपचारयुक्ताराधनं, अन्यभगवन्मूर्तीनां श्र्यादिदेवीनां परिवारवदाराध्यत्वं प्रतिपाद्य "चतुर्भिरेव गन्धाद्यैः परिवारार्चनं मतमि''ति तत्रैवोक्तेः। द्वितीयपक्ष एव नित्येऽनुगृहीतः।

सूक्त ऋग्भिरन्यैश्च भगवन्मन्त्रैश्शक्तश्चेत्पुष्पं प्रदाय प्रणम्य, प्रतिदिशं प्रदक्षिणप्रणामपूर्वकं भगवते पुष्पाञ्जलिं दत्वा, पुरतः प्रणम्य श्रुतिसुखैः स्तोत्रैः

श्रुतिसुखैः स्तोत्रैः स्तुत्वेति । नित्येऽनुगृहीतमिहोक्तम् । "सदागमादिकान् सर्वान् वेदान्वै वेदघोषणम् । इतिहासं पुराणं च तथा दैवं च मानुषम् । वेदोपबृहणं त्वन्यत् संस्कृतं प्राकृतं तु वा । भाषान्तरगतं वापि यथा श्रद्धानुरूपतः । ऋग्वेदं च यजुर्वेदं सामवेदमथर्वणम् । तथोपनिषदं सम्यग्वेदान्तं क्रमशो वदेत् । मीमांसां ज्योतिषं सम्यक् धर्मशास्त्रं च सात्विकम् । पुराणं च तथा सम्यगितिहासं तथागमम् । भाषागानं विष्णुभक्तैः कृतं वेदान्तनिर्णयम् । महावाद्यं तथा गीतं नृत्यादीन् श्रावयेत् क्रमात् । तदा तद्देवदेवस्य नित्यार्चायां च पूजकः । अलङ्कारासने सम्यगेतद्वेदादिकं क्रमात् ।" इति पारमेश्वरपराशरसंहितावचनविहितक्रमानुसारेण वेदवेदान्तधर्मशास्त्रेतिहास पुराण संस्कृतवेदान्तोपबृंहणरूपस्तुतिवाक्यानन्तरं वेदान्तोपबृंहण भाषागानपठनं न्याय्यम् । श्रीरङ्गनाथसन्निधौ नित्योत्सवेषु विशेषोत्सवेषु चाराधनकालोऽलङ्कारासने उदाहृतक्रमेणैव स्तोत्रवाक्यानि पठ्यन्ते । 'भाषागान'मित्युक्त्या "भाषा गीतिः प्रशस्ता भगवति वचनात् राजवच्चोपचारा'दित्याचार्यपाद श्रीसूक्त्या च तद्व्याख्यावाक्यपठनमनावश्यकमिति प्रतीयते । मार्ग शीर्षोत्सवादौ व्याख्यापाठस्तु न प्रामाणिकः, किं तु सभ्यानुरञ्जनार्थ इति बोध्यम् । अतः पूर्वोक्त प्रमाणप्रतिपन्न क्रमविरुद्धस्तोत्रक्रमोऽविमर्शकृत इति ।

स्वात्मानं नित्यकिङ्करत्वेन निवेद्येत्यादि अर्घ्यं प्रदायेत्यन्तं

स्तुत्वा, स्वात्मानं नित्यकिङ्करत्वेन निवेद्य तथैव ध्यात्वा, यथाशक्ति मूलमन्त्रं जपित्वा, सर्वभोगप्रपूर्णीं शालितण्डुलनिर्मितां मात्रां दत्वा, ''भोगापवर्गफलदान्भुङ्क्ष्व भोगान् जगद्गुरो। सतामप्यसतामेषामस्तु ते परिपूर्णता'' इति प्रार्थ्य, मुखवासताम्बूलादि प्रदाय, अर्घ्यं प्रदाय, भोज्यासनं समर्प्याभ्यर्च्य प्रणम्य, ''प्राप्यं तु प्रापणे काले पतत्यानीत एष ते। मृष्टमेध्यस्थिरान्नानि भक्ष्यभोज्यान्यनेकशः । संपन्नानि जगन्नाथ भोज्यासनमुपाश्रय'' इति विज्ञाप्य पादुके प्रदाय अत्रोपविष्टे, पाद्याचमनीयार्हणीयानि दत्वा, गुडं माक्षिकं सर्पिर्दधिक्षीरं चेति पात्रे निक्षिप्य, शोषणादिभिर्विशोध्य, अर्घ्यजलेन प्रोक्ष्यावनतशिराः हर्षोत्फुल्लनयनः हृष्टमानसो भूत्वा प्रदायाचमनीयं दद्यात्। यद्द्रव्यं भगवते दीयते तत्सर्वं शोषणादिभिर्विशोध्यार्घ्यजलेन सम्प्रोक्ष्यास्त्रमन्त्रेण रक्षां

नित्योक्तमिह निवेशितम्। अनन्तरम् ''मध्वाज्याक्तेन दध्ना वै पूजा च पशुना सह । तत्तृतीयं हि यागाङ्गं तुर्यमन्त्रेन पूजनम्'' इति वचनावगततृतीयाङ्गं मधुपर्कं तुर्याङ्गमन्त्रादिनिवेदनं च प्रतिपादयति— भोज्यासनमभ्यर्च्येति । एवं नित्येऽनुगृहीतम् । प्राप्यंत्विति । प्रणम्यानुज्ञाप्य पादुके प्रदायेत्यादि गां सुवर्णं रत्नानि च दद्यादित्यन्तं नित्येऽनुगृहीतम्।

कृत्वा दद्यात्। ततश्च गां सुवर्णं रत्नानि च दद्यात्। ततः ''सुसंस्कृतान्नमाज्याढ्यं दधिक्षीरमधूनि च। फलमूलव्यञ्जनानि मोदकांश्च निवेदयेत्'' अन्यानि लोके प्रियतमानि आत्मनश्श्रेष्ठानि संभृत्य शोषणादिभिर्विशोध्यार्घ्यजलेन प्रोक्ष्यास्त्रमन्त्रेण रक्षां कृत्वा सुरभिमुद्रां प्रदर्श्य देवस्य पुरतो निधाय, कृताञ्जलिस्सभयस्तिष्ठन्,

---

अर्हणीयानि दत्वेति। अर्हणीयदानमुपस्तरणार्थं भगवद्धस्ते उदकदानम्। पाद्मे ''प्रोक्षणश्चास्त्रमन्त्रेण परिषिच्य च वर्मणा। प्रणवेनार्हणे दत्त' इति, वङ्गिवंशेश्वरीये—'परिषेकोपस्तरणक्रियायै प्रोक्षणार्घ्यतः' इति। अर्चनानवनीते ''शीतलोदकसंपूर्णमेलाकर्पूरसंयुतम्। मन्दोष्णं वासनायुक्तमर्हणाम्बु इति स्मृतमि''ति। गुडमाक्षिकमित्यादि मधुपर्कद्रव्याणि। मधुपर्कं मधुयुतं दधि दद्यात् घृतप्लुतम्। ''ततो दधि मधु न्यस्य सर्पिषा मध्वलाभतः'' इति वङ्गिवंशेश्वरोक्तम्। शाण्डिल्यः 'अवश्यं मधुपर्केण मध्वाज्यदधियोगिना। अर्चयेदुदकेनापि क्वथितेन फलादिभिः। मध्वाज्यं दधि संयोज्य योयजेत जनार्दनम्। अयं संसृज्यते तेन श्रीमता मधुपर्कवत्। मधुराणां च संपर्को मधुपर्कः प्रकीर्तितः'' इति।

हविर्निवेदनप्रकारमाह—ततः सुसंस्कृतान्नमित्यादिना। भगवन्निवेदनीयानिवेदनीयप्रमाणानि पाद्मविष्वक्सेनादिसंहितासु धर्मशास्त्रनिबन्धनेषु आहारनियमगाथा तद्व्याख्यादौ च विस्तरेण द्रष्टव्यानि। शास्त्राविरुद्धानीति। इदं नित्यानुगृहीतम्। जात्याश्रयनिमित्तादुष्टानीत्यर्थः। जातिदुष्टानि कोद्रवादीनि, आश्रयदुष्टानि

“असत्यमशुचिन्नीचमपराधैकभाजनम् । अल्पशक्तिमचैतन्यमनर्हं त्वत्क्रियास्वपि ।

ताम्रपात्रस्थितं गव्यं, आयस पात्रस्थानि व्यञ्जनादीनि कुलटाषण्डपतितवैर्यभिशस्तादिस्वामिकानि च । निमित्तदुष्टानि कृमिकेशादस्पृष्टानि शास्त्राविरुद्धानामेव निवेदनीयत्वं शास्त्रनिषिद्धानां च निवेदने प्रायश्चित्तं च भगवच्छास्त्रादिसिद्धम् । आपदादौ स्वस्य निषिद्धान्नग्रहणे न तन्निवेदनीयं, अविरुद्धं पत्रपुष्पजलादिकं निवेदनीयं, “यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः” इत्येतदपि शास्त्राविरुद्धविषयमिति बोध्यम्। “तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः” इति श्री गीताश्लोकतात्पर्यचन्द्रिकायां– “अश्नामीत्युपभोगमात्रलक्षणा तेन निवेद्याभावे पत्रादिकमपि निवेद्यं स्यात्”– इत्यनुगृहीतम् । श्री सच्चरित्ररक्षायां “ततोऽन्नमभ्युद्यम्ये”त्यादिना “कपित्थस्य फलं चैव यथा कुञ्जरभक्षितम् । तस्य सारं च गृह्णीयात् तथा हविरसं प्रभुरित्यादिना च निवेदनदशायामन्नादेः सूक्ष्मांशग्रहणं, “आचार्यादिमुखेन तस्यैव प्रत्यक्षयोग्यस्थूलांशग्रहण”मित्यादिना च निवेदनप्रकारश्चानुगृहीतः । वह्निवंशेश्वरैः “जलं गृहीत्वा देवस्य प्रदद्यादृक्षिणे करे । अथादाय रसं सर्वं हविषः स्वेन पाणिना । स्वयं वा भोजयेद्देवं प्रयतः परया मुदा । दद्याद्वा दक्षिणे हस्ते देवस्य ग्रासमुद्रये”ति निवेदनप्रकारोऽभिहितः । लक्ष्मीतन्त्रे “ग्रथितौ द्वौ करौ कृत्वा सुश्लिष्टौ चाप्यधोमुखौ । मध्यमाङ्गुलियुग्मं त्वन्योन्यकरपृष्ठतः । विक्षिप्यानामिकायुग्मं तर्जनीयुगलं तथा । मुद्रैषा कामधेन्वाख्या सर्वभोगप्रपूरणी”ति सुरभिमुद्रा प्रदर्शिता । “पञ्चाङ्गुलीनामग्रं तु संयोज्य कमलासन । अन्वारब्धेन वामेन पाणिना दक्षिणेन च ।

मामनादृत्य दुर्बुद्धिं स्वयैव कृपया विभो । अतिप्रभूतमत्यन्तभक्तिस्नेहोपपादितम् । शुद्धं सर्वगुणोपेतं सर्वदोषविवर्जितम्। स्वानुरूपं विशेषेण स्वदेव्योस्सदृशं गुणैः । त्वमेवेदं हविः कृत्वा स्वीकुरुष्व सुरेश्वर । पायसान्नं गुडान्नं च मुद्गान्नं शुद्धमोदनम् । दधिक्षीराज्यसंमिश्रं नानापूपफलान्वितम्। यतीन्द्र यामुनेयाद्यैः पराङ्कुशमुखैरपि। निवेद्यमानं नैवेद्यं स्वीकुरुष्व सुरेश्वर" इति सम्प्राथ्यर्हिणपूर्वकं हविर्निवेदयेत् । अतिप्रभूतमतिप्रियतममतिसमग्रमत्यन्तभक्तिकृतमिदंस्वीकुर्विति

निवेद्यपरमान्नादि मुद्रा सा ग्राससंज्ञिता" इति पाद्मे ग्रासमुद्रा प्रदर्शिता। अति प्रभूतमतिसमग्रमिदमित्यादि नित्येऽनुगृहीतम् । पुरुषाशनप्रमाणान्न्यूनमेव निवेदनीयम्। वैशेषिकार्चनेऽधिकम्। यथोक्तं पौष्करे "पुरुषाशनमात्रन्तु व्यञ्जनेन समन्वितम् । प्रापणं परमान्नाद्यमन्नाद्यमतिभूतये" इति। "विहितं शुद्धशाल्यन्नं तद्वदेव तु पौष्कर। भक्ष्याणां लेह्यपेयाख्यशोष्या खाद्याभिधायिनाम्। विधिवत् षड्रसोत्थानां पावनानामतोऽर्थतः । भक्तिश्रद्धावशाच्चैव प्रत्येकस्य त्वनेकथा। विशेषयागे विहितं नित्ये वा सति संभवे" इति। यदपरोक्तं– दिवाक्षीरनिषेधस्स कामविषय इति नित्ये क्षीरग्रहणेन सिद्धम्– इति। तदयुक्तं– भगवति क्षीरनिवेदनकथनमात्रेण दिवाक्षीरनिषेधस्य सकामविषयत्वासम्भवात् । तथा सति एकादश्याद्युपवासदिनेषु सप्ताङ्गयजनस्य श्री पाञ्चरात्ररक्षानुगृहीतत्वेन चतुर्थाङ्गस्यान्नपूजनरूपतया तदुपवासस्य सकामविषयत्वापातात्। ननु एकादश्यां भोजने प्रत्यवायश्रवणात् नित्योपवा सेऽपि भोजननिषेधसिद्धिरिति चेत्; तर्हि

प्रणामपूर्वक मत्यन्तसाध्वसविनयावनतः परिषेकोपस्तरणार्थं देवस्य दक्षिणहस्तेऽर्हणांम्बु दत्वा ग्रासमुद्रया दद्यात्।

ततश्चानुपानतर्पणे प्रदाय हस्तप्रक्षालनाचमनसंमार्जनचन्दनमुखवासताम्बूलादि दत्वा, प्रणम्य, देव्यादीनामपि हविर्निवेदनमिति वङ्गिवंशेश्वरादिपक्षे भगवदर्थादन्यध्दविर्निवेदयेत्।

दिवाक्षीरनिषेधस्य फलार्थिविषयत्वाश्रुतेः निष्कामविषयत्वं वक्तव्यमिति तुल्यम्।

ततश्चानुपानतर्पणे प्रदायेति । अनुपानं हविर्भोगसमनन्तरं नालिकेरोदकपानकादिभोगः । यथोक्तं पारमेश्वरे ''सव्येन पाणिनास्पृश्य प्रकोष्ठं दक्षिणस्य तु । तेन दक्षिणहस्तेन अग्रसङ्कुचितेन तु । निवेदयेत्ततो विप्र शिरसावनतेन तु'' इति निवेदनोक्त्यनन्तरं ''पावनैः पानकैः स्वच्छैः शीतलैर्मधुरादिकैः । त्वगेलाद्यन्वितैर्मृष्टधूपकर्पूरवासितैः । नालिकेरोदकोपेतैस्तर्पणीयमनन्तर''मिति । श्री सात्वते ''पानकानि पवित्राणि त्वत्रापि मधुपर्कवदि''ति। तर्पणं तृप्त्यर्थं हस्ते उदकदानम्। यतोक्तं लक्ष्मीतन्त्रे — ''तर्पणं तर्पणीयाभिस्ततो निष्पुंसनं कर इति। हस्तप्रक्षालनेत्यादि प्रणमेदित्यन्तं नित्यगतमेव । देव्यादीनामपि हविर्निवेदनमिति वङ्गिवंशेश्वरादिपक्षे भगवदर्थान्यद्यद्धविर्निवेदयेदिति । नित्ये देवीनिवेदनमनुक्तम् । ''अथ मन्त्रसिद्धान्तोपास्यपररूपविषया''मित्याचार्य पादानुगृहीतप्रकारेण नित्याराधनस्य मन्त्रसिद्धान्तसिद्धत्वावगमात्, तत्सिद्धान्ते

''एकैकमूर्तिराराध्या प्राधान्येनेतराः पुनः। देव्यः श्रियादयश्चापि सम्पूज्याः परिवारवदि''ति पाद्मवचनेन भगवन्मूर्त्यन्तर श्र्चादीनां ''चतुर्भिरेव गन्ध्याद्यैः परिवारार्चननं मत''मिति तत्संहितावचनोक्त-गन्धादिचतुरुपचारयुक्तार्चनस्य ''अथ वा सर्वपरिवाराणां गन्धादीनेव दद्या''दिति नित्येऽनुगृहीतत्वात्, श्री सच्चरित्ररक्षातृतीयाधिकारे भगवन्निवेदितस्य भोज्यत्वे तेनान्तर्यामिनिवेदनवैश्वदेव प्राणाद्याहुति-करणे निवेदितनिवेदनाख्यदोषमाक्षिप्य वचनबलात्तत्सिद्धेस्समर्थि-तत्वात् लक्ष्मीभगवतोरुभयोः युगपदेकान्ननिवेदने तेनान्तर्यामिनिवेदन वैश्वदेवादिकरणं न सम्भवति, पूर्वोक्तदोष प्रसङ्गात् मानाभावाच्च। वङ्गिवंशेश्वरोक्तभगवत्समाराधनस्य संहिताविशेषमूलकवैकल्पिकत्वं पूर्वोदाहृत श्रीसाध्योपायशोधनाधिकारवाक्यसिद्धम्। वङ्गिवंशेश्वरैरपि - ''ततो भुक्तवति प्रीत्या तद्धविः पुरुषोत्तमे। देवीभ्यां च हविश्शुद्धं घृतं भक्ष्यं निवेदितम्। प्रभूतं सुबहु स्वादु धृतं भक्त्या निवेदयेत्। भुक्तवत्योस्तयोश्चापि पत्न्योर्देवस्य चोभयोः। अनुपानं बहुविधं विनिवेद्य यथोदितम्। प्रोक्षणार्घ्याद्गृहीत्वाम्भः सर्वेभ्यस्तु पृथक् पृथक्। करेषु तर्पणार्थाय प्रदद्याच्चषकादिने''ति भगवन्निवेदितादन्यदेव श्रीभूम्योर्निवेदनीयमित्युक्तमिति प्रतीयते; उत्तरत्र ''भगवद्धस्त-संस्पर्शलब्धसौगन्ध्यनिर्भरम्। भगवद्वीक्षणावाप्तशुध्याधिक्य-विभूषितम्। सर्वशुद्धिकरं सर्वभोक्तृपापविनाशनम्। चतुर्द्धा संविभज्यैतत् षोढा वा स्वेन पाणिना। विष्वक्सेनार्चनार्थाय न्यस्यैकं भागमग्रतः। प्राङ्निवेदितमेतत्तु नैवेद्यमवशेषितम्। प्रयच्छेत् पात्रभूतेभ्यो वैष्णवेभ्यो विभज्य तत्। आत्मार्थं शिरसा स्वेन स्वीकुर्याच्च स्वयं च तदि''ति श्लोकैः भगवन्मात्रनिवेदितस्य विभागः विष्वक्सेनार्थमेकांश स्थापनं, अन्यभागांशानां वैष्णवेभ्यः प्रदानं स्वार्थं

भगवन्निवेदितग्रहणं चोक्तम् । स्वेनेति अन्यदीयपाणिनिषेधकम् । पाणिनेति दर्व्यादिनिषेधकम्। एतेन मनसा विभज्य विष्वक्सेननिवेदनं कार्यं - इति कस्यचिदुक्तिः परास्ता; अन्तर्यामिनिवेदनप्राणाहुत्यादौ विष्वक्सेननिवेदितस्यानुपयोगेन पृथगुद्धृत्यैव तन्निवेदनस्य कार्यत्वात्। भगवन्निवेदितेनैव विष्वक्सेनयजनं, तस्य शेषाशनसंज्ञा, स्वार्थभागेनैवान्तर्याम्याराधनादिकं श्री सच्चरित्ररक्षा श्री सूक्तिसिद्धम्। श्री विशिष्टस्य निवेदने तत्सर्वं न सिध्यति, प्रमाणं च नास्तीति पूर्वमुक्तम् । अतो ''वह्निवंशेश्वरादिपक्षे देव्यादिभ्यो भगवदर्था-दन्यद्धविर्निवेदयेदि'' त्युनुगृहीतम्।

यदुक्तं कैश्चित्— ''तदन्तर्भावात्त्वां न पृथगभिधत्ते श्रुतिरपि'' என்கிற வழிகளும் கண்டுகொள்வது எம்பெருமானைச் சொன்னவிடத்திலே பிராட்டியையுஞ் சொல்லித் தாம் என்று துடங்கி உடையவர் அருளிச் செய்த வார்த்தையை ஆச்சான் பக்கலிலே கேட்டு நஞ்ஜீயர் ஸங்க்ரஹித்தார் + लय-भोगार्चनங்களிலே प्रवृत्तராய் अनन्यप्रयोजनரான मुमुक्षुக்களுக்கும்'' इति श्री सिद्धोपायशोधनाधिकार श्री सूक्त्याद्यनुसारेण वक्षःस्थलस्थ श्री विशिष्टभगवत एव हविर्निवेदनादिकं कार्यं, न केवलं भगवतः—इति। तदयुक्तं—प्रमाणाचार्य श्री सूक्तिविरुद्धत्वात्; सर्वरक्षण-दीक्षितனைவன் ''लक्ष्म्या सह हृषीकेशो देव्या कारुण्यरूपया । रक्षकस्सर्वसिद्धान्ते वेदान्तेऽपि च गीयते'' इत्यादिகள்படியே सपत्नीकனை सिद्धனயிருக்கையாலே இங்கே प्रमाणसिद्धोप-योगविशेषமான पत्नीसम्बन्धமார்த்ம்'' इति श्री मूलमन्त्राधिकारादि श्रीसूक्तिभिः सर्वविद्यासु प्रमाणसिद्धपत्नीसम्बन्धस्य सन्नियोग-

शिष्टन्यायसिद्धत्वावगमात्, "இங்கு उपायदशैயிலும் प्रमाणங்கள் नित्ययोगத்தைச் சொல்லுகையாலும், अतोऽनन्यपरानेक श्रुति-स्मृत्यनुसारतः । पत्नीविशिष्ट एकैकः प्रपत्तव्य इहोदितः" इति श्री द्वयचरमश्लोकाधिकार श्री सूक्तिसिद्धं श्री वैशिष्ट्यं प्रमाणबला-दङ्गीकार्यमिति ज्ञायते, द्वयाख्यशरणागतिमन्त्रे लक्ष्मीसम्बन्धस्य वाचनिकत्वेन मूलमन्त्र स्वरूपोपाय फलपरयोजनासु लक्ष्मी-सम्बन्धस्यावश्यापेक्षितत्वाच्च लक्ष्मीसम्बन्धस्यार्थसिद्धत्वमवश्या-श्रयणीयम् । भगवच्छास्त्रवचनैः श्रीभाष्यकारतच्छिष्यप्रशिष्य-वाक्यैश्चाराधने मूलमन्त्रस्य करणत्वावगमनेन तन्मन्त्रेण भगवदाराधनमात्रत्वावगमात्, मन्त्रसिद्धान्तोपास्याराधने श्रियः परिवारवदर्चनस्य "देव्यः श्रियादयश्चापि सम्पूज्याः परिवारवत् । चतुर्भिरेव गन्धाद्यैः परिवारार्चनं मत" मिति वचनसिद्धतया वचनविरोधे न्यायानवतारस्याचार्यपादबहुश्रीसूक्तिसिद्धत्वात्, श्री विशिष्टोद्देशेन निवेदनस्य वक्तुमशक्यत्वात् । श्रीभाष्यकारनित्यस्य भोगार्चनविषयतया "दक्षिणतः श्रीं श्रियै नमः इति श्रियमावाह्य प्रणमे" दिति भगवद्दक्षिणपार्श्वे लक्ष्मीध्यानार्चनकथनेन तदाराधनमध्ये उपदेशानुष्ठानपारम्पर्यरहितलययागप्रक्रियया वक्षःस्थलस्थलक्ष्मी-विशिष्टोद्देशेन हविर्निवेदनकथनस्यात्यन्तविरोधात्, अन्तर्यामिनिवेद-नाद्यनुपपत्ति प्रसङ्गाच्च । श्रीमद्गोपालार्यमहादेशिकैः श्रीदेशिकसहस्र-नामस्तोत्र "विष्णुनैवेद्यैकसाध्यवैश्वदेवविधिप्रियः । विष्णुनैवेद्यैक-साध्यप्राणाग्निहवनक्रियः । वैश्वदेवेज्योपयुक्तभोज्यतावाक्यशोधकः । विष्णुनैवेद्यहार्दानिवेद्याशननिषेधकः" इति भगवन्मात्रनिवेदिते-नान्तर्यामिनिवेदनादिकमनुगृहीतम् ॥ "शठकोपादिनैवेद्यसार्थ-

पुनर्मन्त्रासनं कूर्चेन मार्जयित्वाभ्यर्च्य प्रदाय

प्राणाग्नि होत्रकः'' इत्येतत् प्राणाहुत्यनन्तरं शठकोपादिनिवेदितप्राशने पूर्वकृतपाणाग्निहोत्रस्य सप्रयोजनत्वकथनेन शठकोपादिनिवेदित-भोजनस्तुतिपरं, न तु शठकोपादिनिवेदितस्य प्राणाग्नि होत्रसाध-नत्वपरं, तथा सति श्री सच्चरित्ररक्षाद्याचार्यपाद श्री सूक्त्यनुपदोदा-हृतश्लोक विरुद्धत्वात् मानाभावाच्च । अत एव वैश्वदेवाग्निनिर्णये भगवन्मात्रनिवेदितेनान्तर्यामिनिवेदन वैश्वदेव प्राणाहुतिकरणं प्रतिपाद्य, लक्ष्मीमात्रनिवेदितान्नलाभे तेन प्राणाहुतिकरणे मानाभावात् स्वार्चाराधन कालिकभगवन्मात्रनिवेदितपत्रपुष्पादिभिः वैश्वदेव प्राणाहुत्यादिकं लक्ष्मीनिवेदितस्य पश्चात् भोजनं चानुगृहीतं सङ्गच्छते।

''भगवन्निवेदितात् चतुर्थांशं षष्ठांशं वा गृहीत्वा, एकं सेनेशाय निक्षिप्य, एकं वैश्वदेव देव यज्ञातिथिप्राणाहुतिभ्यो निक्षिप्य उद्धृतान्यद्धविः श्रीभूमिनीलानां निवेद्ये''त्येकोक्तं, ''भगवन्निवेदितं षोडा विभज्य, वैश्वदेवार्थमेकं भागं निक्षिप्य, एकं श्रियै, एकं भूमिनीलाभ्यां, एकमनन्ताय, एकं वैनतेयाय, एकं दिव्यभूषणायुध-पादुकापरिजनपरिच्छदेभ्यो निवेद्य, श्री निवेदितं भागं विष्वक्सेनादिशठकोप स्वाचार्यपर्यन्तं निवेद्य''ति परोक्तं च भगवच्छास्त्रवंगिवंश्वरकारिकासच्चरित्ररक्षाद्यनुक्तं तद्विरुद्धं चेति सम्प्रदायग्रन्थाभिज्ञैरनादरणीयम् । भगवन्निवेदितस्य श्रियादिनिवेदने मानाभावात् भगवन्निवेदितमात्रेण विष्वक्सेनयागस्य प्रमाणसम्प्रदाय-सिद्धतया श्री निवेदितेन विष्वक्सेनादिनिवेदनस्याप्रामाणिकत्वात् । अत आचार्योक्तनिवेदनप्रकार एव साधीयान्।

ततो मन्त्रसनतदुपचारादिकमाह—पुनर्मन्त्रासनमिति ।

तत्रोपविष्टे पाद्याचमने दत्वा माल्यभूषणादीन्यपनीय सेनेशाय दत्वा पाद्याचमनगन्धपुष्पधूपदीपाचमनापूप-फलाचमनमुखवास ताम्बूलादिभिरभ्यर्च्य प्रदक्षिणी-कृत्य, प्रणम्य, पर्यङ्कासनमभ्यर्च्य प्रणम्य, पादुके प्रदाय तत्रोपविष्टे पाद्याचमने दत्वा, माल्यभूषणवस्त्राणि विसृज्य, विष्वक्सेनाय दत्वा सुखशयनोचितं सुखस्पर्शं वासः तदुचितानि भूषणानि उपवीतं च प्रदाय, आचमनं दत्वा, गन्धपुष्पधूपदीप मुखवास ताम्बूलादिभिरभ्यर्च्य, श्रुतिसुखैः स्तोत्रैरभिष्टूय भगवानेव + स्वयमेव

प्रथमासनत्वज्ञापनार्थः पुनश्शब्दः। वङ्गिवंशेश्वरैरुक्तं—''ततो निवेद्य प्रणतः प्रथमासनमादरात्। प्रदाय पादुकायुग्मं शनकैश्नकैर्नयेत्'' इति। प्रथमासने प्राकृतोपचारदशालग्नपुष्पादिशेषापनोदाय तन्मार्जन-कथनम्। मन्त्रासनकर्तव्योपचारानुक्त्वा सुखशयनोचितमासनान्तर-माह पर्यङ्कासनमभ्यर्च्येति। तत्रासनद्वये कर्तव्यं सर्वं नित्येऽनुगृहीतम्।

श्रुतिसुखैः स्तोत्रैरभिष्टूयेति । अलङ्कारासनोपदर्शितप्रमाणा-चारानुसारेण वेदवेदान्तधर्मशास्त्रेतिहासपुराण श्रीयामुनेयस्तोत्र श्रीभाष्य श्रीरहस्यत्रयसारयतिराजसप्तति सप्ततिरत्नमालिकान्तसंस्कृत-स्तुत्यनन्तरं श्री गोदाशठकोपमुन्यादिकृत द्रामिडगाधास्तोत्राणि कार्याणीति बोध्यम्। आराधनान्ते नित्यानुगृहीतसात्विकत्यागमाह-स्वनियाम्येति । ''स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकर-सेनानेनात्मना स्वकीयैश्चोपकरणैः स्वकीयैश्च देहन्द्रियान्तःकरणैः स्वकीयकल्याणतम द्रव्यमयानौपचारिक सांस्पर्शिकाभ्यवहारिकादि

प्रतिपादितवानित्यनुसन्धाय, भगवन्विष्वक्सेनाराधनाय मामनुजानीहीति भगवन्तमनुज्ञाप्य, भगवन्निवेदिताद्धविश्शेषाद्विष्वक्सेनाय किञ्चिदुद्धृत्य निक्षिप्यान्यत्सर्वं त्रेधा विभज्यात्मार्थमेकमवस्थाप्य, एकं कारिभ्यो दत्वा, एकं स्वाचार्यवैष्णवेभ्यो निवेदयेत्।

समस्तभोगान् अतिप्रभूतान् अतिप्रियानतिसमग्रान् अत्यन्तभक्तिकृतानखिलपरिजनपरिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादितवानि''ति नित्यानुगृहीतं वाक्यम्। ततो विष्वक्सेनविशेषपूजामाह—भगवन्नित्यादिना। ''भगवन्तमनुज्ञाप्ये''त्यादिकं नित्येऽनुगृहीतम्। एकं कारिभ्यो दत्वा एकं स्वाचार्यप्रमुखेभ्यो वैष्णवेभ्यो निवेदयेदिति। ''निवेदयीत स्वात्मानं, निवेदयत मां क्षिप्रं, मूलमन्त्रेण स्वात्मानं देवाय विनिवेद्य'' इत्यादाविवात्र निवेदनं समर्पणं, तच्च सम्प्रदानमेव। अत एव नित्ये 'स्वाचार्यप्रमुखेभ्यो वैष्णवेभ्यः प्रदाये''त्यनुगृहीतम्। श्री सच्चरित्ररक्षातृतीयाधिकारेऽप्येवमेव प्रपञ्चितम्। एतेन—''वैष्णवेभ्यो निवेदयेदि''त्याराधनान्तर्गत हविर्यजनपरमिति केषांचिदुक्तिः परास्ता, श्री नित्यवङ्गिवंशेश्वराचार्यपाद श्रीसूक्तिविरुद्धत्वात्, तत्र तेभ्यः स्थूलान्नादिसम्प्रदानोक्तेः। नित्ये विष्वक्सेनभागातिरिक्तस्य सम्प्रदानोक्तिः वह्निसन्तर्पणपितृयागापेक्षितान्नव्यतिरिक्तविषया। ''अत एवानुयागस्यानियतत्व व्यञ्जनाय भाष्यकाराणां तदनुक्तिरि'' त्याचार्यपाद श्रीसूक्त्या सप्ताङ्गनैयत्यावगमेन वह्निसन्तर्पणाद्यर्थं हविःस्थापनाङ्गीकारस्य वाच्यत्वात्। अत्र श्रीसच्चरित्ररक्षातृतीयाधिकारानुगृहीतालयविषयवचनेषु भगवन्निवेदि-

तस्य चतुर्धा विभागः कारिभ्य एकं एकं सम्प्रदानार्थमित्यवगमादत्र तथाऽनुगृहीतम्। गृहार्चायां कार्याचार्यादिवैष्णवप्रदानासम्भवेन द्विधैव भगवन्निवेदितविभागः कार्यः। यथोक्तं तदधिकारे "तथेश्वरसंहितायां समाराधनाध्याये—दत्तशिष्टमथादाय संविभज्य द्विधा तु तत्। पूजितस्यार्घ्यपुष्पाद्यैः विष्वक्सेनस्य वै विभोः। प्रतिपाद्यामराणां च तृप्तये विघ्नशान्तये। द्वितीयमनुयागादौ प्राशनं बान्धवैस्सह। तन्निश्शेषं च भोक्तव्यं हृन्मन्त्रं संस्मरन् हृदि' 'अमराणां चे'ति विष्वक्सेनभक्तानां तन्निवेदितं प्रतिपाद्येत्यर्थः। पारमेश्वरे—'विष्वक्सेनं यजेत् साङ्गं तर्पयेत्तदनन्तरम्। समाहृत्याखिलं पश्चात् कृते चैतद्विसर्जने। यद्यन्निवेदितं तस्य ह्यगाधेऽम्भसि निक्षिपेत्। तच्चापि क्ष्मातले कूपे तटाकादिषु चोक्तिरेत्' लक्ष्मीतन्त्रे— 'प्रागेव विभजेदन्नं प्रापणार्थं प्रदानतः। तेनान्नेन यजेत्सम्यक् विष्वक्सेनं चतुर्भुजम्। विष्वक्सेनार्चितं सम्यगगाधेऽम्भसि निक्षिपेत्' पाद्मे—निवेदितानां तुर्यांशं विष्वक्सेनाय कल्पयेत्। तच्चागाधजले क्षेप्यं तद्भक्ता न्वापि भोजयेत्। तेनैव पार्षदास्तृप्ता भवेयुर्भूततृप्तये" इति। दीक्षितशब्दवाच्य सात्त्वतानां विष्वक्सेननिवेदितं त्याज्यम्। विष्वक्सेननिवेदिते च विकल्पभेदाः तत्तत्संहितानुसारेण प्रयोगपद्धति रत्नावल्यादिषु भोजराजादिभिः स्थापिता द्रष्टव्याः" इत्याचार्यपादानुगृहीतम्। विष्वक्सेनस्यात्मदाचार्यकोटिप्रविष्टत्वात् तन्निवेदितमस्माभि-र्भोज्यमिति वङ्गिवंशेश्वरैरुक्तम्—"ततस्तद्भूततृप्त्यर्थं विशुद्धेऽम्भसि निक्षिपेत्। तद्गणानुचरो भूत्वा भुञ्जीत स्वयमप्यदः। तदाश्रितानां भूतानां पातालतलवासिनाम्। स्वेन भुक्तोज्झितं सर्वं तेन दत्तं महात्मना। एवमभ्यर्च्य सेनान्यं सपत्नीकं समन्त्रिण"मिति।

भगवद्यागावशिष्टैर्जलैर्विष्वक्सेनमभ्यर्च्य पूर्वोद्धृतं हविश्च दत्वा तदर्चनं परिसमाप्य, भगवन्तमष्टाङ्गेन प्रणम्य, इज्यामध्ये सम्भावित बुद्धि पूर्वकापचाराङ्ग वैकल्यादि परिहारार्थं शरणमुपगच्छेत्। "मनोबुध्यभि-मानेन सह न्यस्य धरातले । कूर्मवच्छतुरः पादान् शिरस्तत्रैव पञ्चमम्। प्रदक्षिणसमेतेन ह्येवंभूतेन सर्वदा। अष्टाङ्गेन प्रणामेन ह्युपविश्याग्रतो विभोः" इत्युक्तोऽष्टाङ्गप्रणामः । शरणागतिप्रकारश्च पूर्वोक्तः इति नित्योक्तम्।

ततोऽर्घ्यजलं प्रदाय "अनुयागादिकं चाथ चिकीर्षन्नाह्निकं विधिम् । दत्तानुज्ञः परेणापि

तद्गणानुचरः विष्वक्सेनभक्तगणानुसारी तद्भक्तिमान् भूत्वा, स्वयमपि आराधकोऽपि, अदः विष्वक्सेननिवेदितं, भुञ्जीतेत्यर्थः।

विष्वक्सेनयागप्रकारमाह—भगवद्यागावशिष्टैर्जलैरित्यादिना । इज्यान्ते प्रणामं विदधाति–भगवन्तमित्यादिना । श्री सात्त्वत-संहितोक्तमष्टाङ्गप्रणाममाह–अष्टाङ्गेन प्रणम्येति । इज्यामध्ये सम्भावितबुद्धिपूर्वापराधादिपरिहाराय शरणवरणमाह– इज्यामध्य इति। उक्ताष्टाङ्गप्रणामः शरणागति प्रकारश्च नित्योक्त इत्याह— मनोबुद्धीत्यादिना । "विसर्जनेऽर्घ्यदानन्तु" इत्युक्त्वार्घ्यदानमाह - ततोऽर्घ्यजलं प्रदायेति। "ततोऽर्घ्यजलं प्रदाय भगवन्तमनुज्ञाप्य पूजां समापयेदि"ति नित्येऽनुगृहीतम् । वङ्गिवंशेश्वरोक्तं भगवदनुज्ञापन

गमनायात्मनो बहिः । निर्गन्तुकामो निक्षिप्य देवं दौवारिकादिषु । सभयस्सानुतापश्च चण्डादिद्वार-पालकान् । कुमुदादीन् गणेशांश्च चक्रादीन्यायुधान्यपि । गरुडं च विशेषेण शेषं शेषाशनं तथा । प्रणम्य धारयेद्देवं सस्नेहादरसाध्वसम् । निक्षिपन् जीवितमिव न्यस्यन्निव महानिधिम् । निधित्सन्निव चक्षुस्स्वमर्पयन्निव कल्पकम् । सर्वे भवन्तस्सगणास्सन्नद्धास्सर्वदिक्ष्वपि । सावधानाश्च तिष्ठन्तु निक्षिपामि भवत्स्वहम् । मम नाथं मम गुरुं पितरं मातरं च मे । हरिं श्रियं भुवं चापि तान् पालयत सर्वतः । यथा निक्षिप्तरूपं मे सन्दर्शयत सर्वदा । भवतश्शरणं लब्ध्वा व्रजामि गतसाध्वसः । इति विज्ञाप्य पुरतः प्रार्थयेत हरिं गिरा । ननु देव त्वमेवैकः सस्थावरचरं जगत् । ब्रह्मादिस्थावरान्तं च परिपासि बिभर्षि च । संहरिष्यसि चाप्यन्ते रूपैस्तैस्तैर्यथेप्सितैः । केन त्वं पाल्यसे देव केन वा त्वं हि सेव्यसे । अतस्त्वमेव त्वां देव्यौ चण्डादीन् द्वारपालानपि । मां च मामकमत्ये-तत्सर्वं गृहमशेषतः । पालयित्वा स्वसंकल्पमात्रेण मधुसूदन । त्वां मया त्वयि निक्षिप्तं विश्वस्तेनार्थि-कल्पकम् । आगताय यथाकालं सर्वं मे दातुमर्हसि ।''

प्रकारमाह— अनुयागादिकमित्यादिना । आगताय यथाकालं सर्वं मे दातुमर्हसीति विज्ञाप्येत्यन्तेन । श्री सच्चरित्ररक्षायां भगवन्निवेदितस्यैव भोज्यत्वं तदनिवेदितस्याभोज्यत्वं सामान्येन

भगवत्स्नानोदकपादोदकादिपानं मन्त्रपूर्वं निवेदितस्य स्त्रीशूद्रनिषिद्धेभ्यः प्रदाने प्रायश्चित्तादिकं च सप्रमाणोपपत्तिकमनुगृहीतम्।

आराधकेन तीर्थं प्रथमं पातव्यमिति वैखानसे— ''सालग्रामशिलातीर्थं विष्णुपादोदकैर्युतम् । अर्चकोऽर्चावसाने तु पीत्वान्येभ्यः प्रदापयेत्'' इत्यादिवचनानि सन्ति । श्रीपाञ्चरात्रे तु आचार्यादिदीक्षितेभ्यस्तीर्थं दत्वा स्वयं तीर्थं गृह्णीतेति विधिरस्ति गृहे पाञ्चरात्रिकप्रसङ्गाभावादाचाराच्चाराधकः तीर्थं प्रथमं गृहीत्वान्येभ्यो दद्यादिति युक्तम् । विष्णुरहस्ये ''प्राश्नीयाद्विष्णुपादाम्बुतुलसीदलमिश्रितम् । उपवासेषु सर्वेषु एकादश्यां विशेषतः'' वृद्धहारीतः—''उपवासदिने यस्तु तीर्थं श्री तुलसीश्रितम् । न प्राश्नीयाद्विमूढात्मा रौरवं नरकं व्रजेत्'' यत्र कुत्रापि एकादश्यां तुलसी मिश्रित तीर्थपाननिषेधः आवृत्तिविषयः 'असकृज्जलपानाच्च सकृत्ताम्बूलचर्वणात्। उपवासं प्रणश्येत' इति धर्मशास्त्रवचनात्।

अथ वैश्वदेवादिकमाह — स्वार्थभागेनेति। ''वह्निसन्तर्पणं षष्ठं पितृयागन्तु सप्तममि'ति श्रीजयाख्यवचनादग्निमध्ये आसनकल्पनपूर्वकेज्याङ्गहोमः वासुदेवसङ्कर्षणादिपदयुक्तपितृयागश्च परमैकान्तिभिः कार्यः' इति अपराह्निकेऽन्येषु च ग्रन्थेषूक्तोऽयुक्तः । तादृशहोमपितृगायौ पञ्चरात्रविहितचक्राब्जमण्डलादिदीक्षायुक्तैरालये गृहे वा कर्तव्यं, न तद्भिन्नैः सूत्रविहितसंस्कारादिविशिष्टैः प्रपन्नैः, तदधिकारिणां वैश्वदेवयज्ञ एव वह्निसन्तर्पणं, सूत्रविहितपितृयज्ञ एव पितृयागः, तत एवेज्याषष्ठसप्तमाङ्गानुष्ठानसिद्धिरिति सत्पथरक्षायां परपक्षप्रतिक्षेपपुरस्सरं प्रमाणसम्प्रदायोपपत्तिभिरस्माभिः स्थापितं

इति विज्ञाप्य, स्वार्थभागेन वैश्वदेवं पञ्चमहायज्ञांश्च यथासूत्रं यथासम्प्रदायं च कुर्यात् । प्रातः कृतब्रह्म-यज्ञश्चेत्तन्न कुर्यात्। ततश्च वैश्वदेवं लौकिकाग्नौ पाके तत्र कुर्यात्, वैदिके तत्र कृत्वा शेषं द्वावेव दम्पती भुञ्जीयाताम्।

द्रष्टव्यम् । वैश्वदेवस्य पाकाग्निनैयत्यानुगुणमग्निविशेष नियममाह— ततश्च वैश्वदेवमिति। ''शालाग्नौ वा पचेदन्नं लौकिके वापि नित्यशः । यस्मिन्नग्नौ पचेदन्नं तस्मिन् होमो विधीयते'' इत्यादि प्रमाणपरामर्शेन वैश्वदेवप्रारम्भदिवसगृहीताग्निनियतपाकहोमादिकं कार्यम्। कस्मिंश्चि-दग्नौ वैश्वदेवारम्भपाकहोमौ पश्चादग्न्यन्तरे पाकहोमौ न कार्याविति श्रीमद्गोपालार्य महादेशिकैर्वैश्वदेवाग्निनिर्णये सम्यक् विचार्य स्थापितम्।

अत्र केचित्—''ये भूताः प्रचरन्ति नक्तं बलिमिच्छन्त' इति मन्त्रपाठात्, 'नक्तमेवोत्तमेन वैहायस''मिति आपस्तम्बोक्तेः, 'ये भूताः' इति मन्त्रकरणकबलीरात्रावेव, न दिवा । एवकारस्य भिन्नक्रमत्वामाश्रित्य नक्तमुत्तमेनैव बलिरिति व्याख्याय बल्यन्तर-निवृत्तिकथनमसङ्गतम् । रात्रौ कृत्स्नबल्यननुष्ठानेन पाकयज्ञलोप-प्रायश्चित्तं प्रसज्येतेति रत्नाकरोक्तेः, दिवा न वैहायसबलिः, रात्रौ कृत्स्नबलिः—इति वदन्ति। तदयुक्तम्। रत्नाकर एव ''नक्तं चारिभ्यो दिवाचारिभ्यः' इति आश्वलायने भेदेनाम्नानात् दिवापि शिष्टा आचरन्तीत्युक्तेर्दिवा वैहायसबल्यावश्यकत्वात् । एवं चाश्वलायन-सूत्रानुसारेणापस्तम्ब सूत्रगतैवकारस्य भिन्नक्रमत्वस्यावश्या-श्रयणीयतया रात्रावुत्तमव्यतिरिक्तबल्यन्तरनिवृत्तेश्शास्त्रीयत्वात्। यथा

कदाचिदिज्यायाः क्षीणवृत्तितया कलहादिवशेन वा तृतीयकाले करणाशक्तौ यत्र क्वचिदवसरे भोजनात्पूर्वं कुर्यात्। एकस्मिन्नेव दिने श्रवणजन्मर्क्ष सम्क्रान्त्युपराग द्वादशीपर्वद्वय गुरुजन्मर्क्ष्यादिनिमित्तवशेनानेक भगवदाराधनेप्राप्तेऽभि गमनोपादानादिसङ्कोचेन निमित्त क्रमेण कुर्यात्।

ततो गोदोहनमात्रमतिथिं दिदृक्षुस्स्थित्वा

''सावित्राणि जुहोति प्रसूत्यै चतुर्गृहीतेन जुहोती''ति तैत्तरीयके चतुर्गृहीतविधानेऽपि वाजसनेयकेऽष्टगृहीतोक्तेः मन्त्र सम सङ्ख्यौ चित्यात् जुह्वामष्टगृहीतं गृहीत्वा 'युञ्जानः प्रथमं मनः' इति ऋग्भिः यजुरष्टाभिः एकामाहुतिं जुहोतीति आपस्तम्बेनाष्टगृहीतहोमविधानं कृतं; तथाश्वलायनसूत्रानुसरणं न्याय्यमेव । एवं मन्त्रभाष्यो-ज्ज्वलाह्निककाण्डेषु बलिहरणप्रकारो निर्णीतः । एवं च रात्रौ विहितोत्तमबलिमात्रस्य शास्यत्वात्पाकयज्ञलोपाभावेन न प्रायश्चित्त-प्रसक्तिरिति बोध्यम्।

अथेज्यायाः स्वकालानुष्ठानोपरोधे तत्कर्तव्यकालमाह– कदा चिदिति । एकदिवसेऽनेकनिमित्ताधीनानेकाराधनप्राप्तौ कर्तव्यमाह– एकस्मिन्नेवेति। उक्तार्थद्वयमपि श्रीपाञ्चरात्ररक्षा श्रीसूक्ति-सिद्धम्।

''भिक्षां च भिक्षवे दद्यात् विधिवत् ब्रह्मचारिणे। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ। तयोरन्नमदत्वा तु भुत्वा चान्द्रायणं चरेत्'' इति मनुविहितभिक्षादानं गृहिभिः कार्यम् । अथातिथि प्रतीक्षादिकमाह— ततो गोदाहनमात्रमिति । शङ्काः ''गोदोहमात्रमं

अतिथिकुमारादीन् प्रथमं भोजयित्वा, सुप्रक्षा

कणेऽतिथिं प्रतीक्षमाण आसीत, पुराणे 'नाडिकायाश्चतुर्भागं गोदोहं ब्रुवते बुधाः'' स्मृत्यन्तरे —'सुवासिनीं कुमारांश्च रोगिणो गर्भिणीं तथा। अतिथिभ्योऽग्र एवैतान् भोजयेदविचारयन्। एकरात्रन्तु निवसन्नतिथिर्ब्राह्मणः स्मृतः। अनित्याहि तिथि र्यस्मात्तस्मादतिथि-रुच्यते। अभ्यागतो ज्ञातपूर्वस्त्वज्ञातोऽतिथिरुच्यते। मान्यावेतौ गृहस्थस्य ब्रह्मलोकमभीप्सतः। यतिहस्ते जलं दद्यात् भैक्षं दद्यात् पुर्नजलम्। तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपम्। यतिर्यस्य गृहे भुङ्क्ते तस्य भुङ्क्ते हरिस्स्वयम्। हरिर्यस्य गृहेभुङ्क्ते तस्य भुङ्क्ते जगत्त्रयम्। वैश्वदेवकृतं पापं भिक्षुरेको व्यपोहति। न भिक्षुणा कृतं पापं वैश्वदेवो व्यपोहति'' ततश्च वैश्वदेवात् प्रागेव भिक्षौ समागते भिक्षैव देया। वैश्वदेवाकरणे न दोष इति भावः। एतदेकभाण्डपकविषयम्। पृथक्पाके वैश्वदेवः कार्यः। मनुः— 'प्रोषितस्य दरिद्रस्य कुटुम्बात् प्रच्युतस्य च। अध्वानं वा प्रपन्नस्य भिक्षाचर्या विधीयते'' तदेवं 'यतये काञ्चनं दद्यात् तण्डुलं ब्रह्मचारिणे। पकान्नं तु गृहस्थाय दाता दुर्गाणि गच्छती'त्युक्तदोषो नास्तीति भावः। चन्द्रिकायां — ''माधूकरं य आदाय ब्राह्मणेभ्यः प्रयच्छति। दाता तु नरकं याति भोक्ता भुञ्जीत किल्बिषं'' अतो नान्यार्थं भिक्षेत। ब्रह्मचारी यतिर्वा नाधिकमाहरेदिति प्राह यमः—'आहारमात्रादधिकं न किञ्चित् भैक्षमाचरेत्। युज्यते स्तेयदोषेण कामतोऽधिकमाचरन्। तस्मान्नोपहरेद्भैक्षमतिरिक्तं यतिर्व्रती' व्रती=वर्णी, कामत इत्युक्तेः अकामतो न दोषः'' इत्यादीनि रत्नाकरोदाहृतवचनान्यत्र भाव्यानि। वैष्णवेभ्यः मन्त्रपूर्वं भगवन्निवेदितं देयं, अन्येभ्योऽतिथ्यादिभ्योऽनवेदितमेव देयमिति

लितपाणिपादो द्विराचम्य प्रणवेन गोमयजलेन च चतुरश्रं मण्डलं कृत्वा, शास्त्रोक्त पात्रं निधाय,

---

निष्कर्षः । मन्त्रपूर्वं निवेदितस्यावैष्णस्त्रीशूद्रादिभ्यो दाने प्रायश्चित्तविशेषस्य श्री सच्चरित्ररक्षा श्रीसूक्तिसिद्धत्वात्।

अथ "प्राणाग्निहवनन्त्रामत्वनुयागं तदष्टम"मित्युक्तानुयागं वक्तुमुपक्रमते—सुप्रक्षालितेति। 'ततः प्रक्षल्य पादौ च पाण्यास्यानि द्विजोत्तमः । प्राङ्मुखोदङ्मुखो वापि भुञ्जीत नियमैस्सहे'ति वासिष्ठसंहितावचनं, आपस्तम्बः– 'भोक्ष्यमाणस्तु प्रयत्नोपि द्विराचामेत्' स्मृत्यन्तरे–'यस्तु भोजन शालायां भोक्तुकाम उपस्पृशेत्। आसनस्थो न चान्यत्र स विप्रः पङ्क्तिदूषकः। भोक्तुकामो यदा विप्रः अचान्तोऽप्यासने स्थितः । अभिवादं करोत्यस्य पुनराचमनं चरे'दित्यादिरत्नाकरस्थवचनजातं द्रष्टव्यम्।

प्रणवेन गोमयजलेन चतुरश्रं मण्डलं कृत्वेति । बोधायनः— 'मन्त्रेणैव द्विराचम्य गोमये नोपलेपिते। भस्मना वारिणा वापि मण्डलं कारयेत्ततः' इति । मन्त्रः प्रणव इति स्मृतिरत्ने" इत्याह्निक-काण्डस्थवाक्यमिहानुसन्धेयम् । वृद्धात्रेयः —"चतुरश्रं ब्राह्मणस्य त्रिकोणं क्षत्रियस्य च। वर्तुलं चैव वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् । यातुधानाः पिशाचाश्च असुरा राक्षसा अपि । घ्नन्ति वै बलमन्नस्य मण्डलेन विवर्जिम् । पिशाचा यातुधानाद्या अन्नादास्स्युरमण्डले। पात्रावस्थानतो न्यूनमधिकं वा न कारये'दित्यादि रत्नाकर-वचनान्यनुसन्धेयानि । शास्त्रोक्तपत्रं निधायेति । स्मृतिमाधवीये— प्रशस्तशुद्धपात्रेषु भुञ्जीताकुपितो द्विजः । सौवर्णे राजते कांस्ये

प्राङ्मुखादिनियमयुक्तः वर्तुलपवित्रधारी पत्न्यादिभिर्दर्व्यादिना परिविष्टं अन्नं दृष्ट्वा प्राञ्जलिः ''अस्माकं नित्यमस्त्वेतत्'' इत्युक्त्वा, पाद्येन शुद्धजलेन वा व्याहृतिभिः प्रोक्ष्य, शोषणादिभिर्विशोध्य, व्याहृतिभिर

पद्मपत्रपलाशयोः । भोजने भोजने चैव त्रिरात्रफलमश्नुते । ब्रह्मपत्रे तु यो भुङ्क्ते मासमेकं निरन्तरम् । त्रिभिश्चान्द्रायणैस्तुल्यं महापातकनाशनम् । ब्रह्मपत्रं पिशाचोदुम्बरम् । *(பேத்தி)* । स्मृत्यन्तरे— पनसाम्रनालिकेरकदलीबिल्वपत्रके । उद्दीनाकुक्षिपत्रे च चान्द्रायणफलं लभेत् । मनुः—''वटाश्वत्थार्कपत्रेषु कुम्भीतिन्दुकपत्रयोः । कोविदारकरञ्जेषु भुक्त्वा चान्द्रायणं चरेत् । व्यासः—पलाशपद्मपत्रेषु गृही भुक्त्वैन्दवं चरेत् । यतिश्च ब्रह्मचारी च लभते चैन्दवं फलम् । अत्र माधवीये पलाशपद्मपत्रयोः व्यवस्था दर्शिता । वल्लीपलाशपत्रे च स्थलजे पौष्करे तथा । गृहस्थश्चेत्समश्नीयाच्छुध्यै चान्द्रायणं चरेत् । स्मृतिरत्ने— कदलीगर्भपत्रे च पद्मपत्रे जलास्पृशि । वल्लीपलाशपत्रे च भुक्त्वा चान्द्रायणं चरेत् । ततश्च तद्व्यतिरिक्तपलाशपत्रविषयो विधिः द्रष्टव्यः । सर्वत्रापवादपरिहारेण उत्सर्गप्रवृत्तेरिति रत्नाकरवचनान्यत्र भाव्यानि ।

प्राङ्मुखादिनियमयुक्त इति । अत्रिः– प्राङ्मुखोऽन्नानि भुञ्जीतेति । नियमविधिरयं, अन्यस्तु काम्य इत्यादिकं रत्नकरोक्तमिहानुसन्धेयम् । वर्तुलपवित्रधारीति । 'भोजने वर्तुलं प्रोक्त'मिति पवित्रप्रकरणोदाहृताह्निककाण्डस्थवचनमनुसन्धेयम् । पत्न्यादिभिः दर्व्यादिना परिविष्टमन्नं दृष्ट्वेति । सुमन्तुः— 'अन्नं निधाप्य दर्व्या तु न हस्तेन कदाचन ।

पूजयित्वा तदन्नं चापोशनं तु समन्त्रकं' इति रत्नाकरस्थवचनं, 'अन्नमादौ नमस्कृत्य प्रहृष्टेनान्तरात्मना' इति हारीतस्मृति-चतुर्थ्याध्यायवचनं, 'पत्न्यादिभिर्दत्तमन्नं वासुदेवार्पितं शुभं' इति वैकुण्ठदीक्षितीयस्थवचनं चात्र भाव्यम् । पाद्येन शुद्धजलेन वा व्याहृतिभिः प्रोक्ष्येति । शाण्डिल्यः— ''नावश्यं भोजने मौनं कुटम्बाश्रमवासिनाम् । वाचोपचारः कर्तव्यो भुञ्जतां सह भोजने । भगवत्पादतोयेन प्रोक्षयित्वामृतौदनम् । ध्यायन्नन्नगतं देवं जपेन्मन्त्रं चतुर्गुणम् । अर्घ्येण परिषिच्यान्नं कर्मारम्भेण मन्त्रवित् । इदमन्नं जपेन्मन्त्रं स्पृष्ट्वा भोज्यमनाकुलम् । धातारं हृदयान्तःस्थं ध्यात्वा पादाम्बुपूर्वकम् । तदास्ये जुहुयादन्नं तत्तन्मन्त्रैस्समाहितः । ध्यायन्नेव परं ब्रह्म भोक्तारं हृदये स्थितम् । अश्नीयादत्वरो मन्त्री भोज्यं सर्वमकुत्सयन् । विशिष्टभोज्यमायातमनिवेदितमन्तरा । अर्चापयेदने-नान्तस्सुतशिष्यादिभिःपरम् । क्षुद्रं वस्तु समायातं मनसा तन्निवेद्य च । अश्नीयान्मिश्रितं कृत्वा साक्षात्पूर्वन्निवेदितैः । निष्कल्मषो भवेत् भक्तः एवं शुद्धान्नभोजनात् । प्रसीदन्तीन्द्रियाण्याशु सत्त्वं च परिवर्द्धते । अन्नशुध्यैव वत्स्वस्य विवृद्धिस्सर्वदेहिनाम् । सत्त्ववृद्ध्यैव सत्कर्मनिरतो वर्जयत्यसत् । आरोग्यं रूपवत्ता च कीर्तिः श्री ज्ञानमेव च । शान्तिस्सत्कर्मणि श्रद्धा शुद्धान्नेन भवन्ति हि । कामः क्रोधस्तथा लोभः परहिंसारुचिस्तथा । निद्रलस्यादयो दोषा अमेध्यान्ननिषेवणात् । अशुद्धान्नाशनात्पुंसां रोगा बाह्यास्तथान्तराः । शत्रुपीडागृहद्रोह तामसी गतिरेव च । परदारपरद्रव्यसंसक्तिर्दुष्टभोजानात् । कार्यबुद्ध्यैव कालेन क्रियन्ते तैः कुनीतिभिः । शनैश्शनैः क्रियासाध्वी विगलत्यवशादिह । अत्यन्तामेध्यभोज्यानि भोक्तुं मृगयते नरः । पथ्यं मितं च शुद्धं च रस्यं

न्यैश्च पावनमन्त्रैरभिमन्त्र्य, अन्तर्यामिणे निवेद्य, परगृह

हृदयनन्दनम् । स्निग्धं दृष्टिप्रियं कोष्णमन्नं भोज्यं मनीषिभिः । भगवद्यागयोग्यं यत्तदेवाशनकर्मणि । भोजनार्हमिदं देव यागाङ्गमिति नेष्यते । न भर्त्स्यर्यन् बालवृद्धान् विवदन्न च भार्यया । अन्येभ्यो दापयेत् द्रव्याण्यश्नीयात् बान्धवैस्सह । अद्यादाद्यन्तयोरार्द्रं मध्येस्विन्नमिवौदनम् । अन्नोपदंशपानीयैस्त्रिभागमुदरं भवेत् । भोजनं भगवत्कर्म यद्यपि स्यान्मनीषिभिः । न कार्यं भगवद्देहे विशेषाद्देव-सन्निधौ'' इति ।

अन्तर्यामिणे निवेद्येति । श्री सच्चरित्ररक्षातृतीयाधिकारे ''नन्वन्तरात्मनिवेदनमन्तरेण न भोक्तव्यं, तत्र बहिर्वृत्त्यादिवृत्ति-स्थानावस्थितस्य भगवतो निवेदितमन्तरात्मतया हृदयावस्थितस्य तस्यैव निवेदनीयं चेत् निवेदितनिवेदनाख्यो दोषस्स्यात् । एकस्मिन् समाराधने निवेदितानां सर्वेषामपि भोगानामपि शेषेण समाराधनान्तरेऽपि निवेदनप्रसङ्गः'' इत्यादिना ''श्री पौष्करे च स्थिराणामेव समाराधनान्तरेऽनुवृत्तिः । अस्थिराणां तु परित्याग एवेति स्फुटमुक्तं, तथा हि श्राद्धाध्याये 'दर्भतिलोदकादीनां द्रव्याणां प्रतिकर्मणि । 'जायते च प्रविष्टानामुपशान्तिश्च तैजसी । अत एवोपयुक्तानां भोगानां कमलोद्भव । विरुद्धस्सङ्ग्रहो भूयस्त्वन्यस्मिन् हि क्रियान्तरे' इत्यादिना च भगवन्निवेदितस्यान्तर्यामिनिवेदनमाक्षिप्य ''यदि पुनरस्थिरस्यापि विधिबलात् क्वचिदभ्युपगमः तदन्यत्रापि तुल्यम् । अस्ति च विधिः यथा रहस्याम्नाये— कर्मावर्तप्रकरणे' इत्यादिना महता ग्रन्थेन बहिर्यागनिवेदितस्यान्तर्यामिनिवेदनं व्यवस्थापितम् । तत्रैव ''हृदि ध्यायन् हरिं तस्मै निवेद्यान्नं समाहितः'

चेत् स्वाचार्याय निवेद्य, पुनश्च स्वान्तर्यामिणे निवेद्य, व्याहृतिभिः परिषिच्य, सम्प्रदायोऽस्ति चेत् सर्षिच्छन्दो देवतादिप्राणाग्निहोत्रमन्त्रक्रियाप्रकार-

---

इत्यादीनि भगवद्यामुनेयोपात्तानि कर्मकाण्डस्थव्यासवचनान्युदाहृतानि। भोजनमध्ये समागतानां दधिक्षीरादीनां पूर्वमनिवेदितानां मनसा निवेद्यैव भोजनं रहस्याम्नायभगवच्छास्त्रसिद्धमित्यनुगृहीतं, अतो भगवन्निवेदितस्यान्तर्यामिनिवेदनं शास्त्रसिद्धम्। एतद्व्यतिरिक्तविषयं 'निवेदितस्य हविषो भूयश्चापि निवेदनम्। स्नानपूर्वार्चनं मूलमन्त्रस्यापि जपस्तथा'' इति वचनमिति हृदयम्।

परगृहे चेत् स्वाचार्याय निवेद्येति। शाण्डिल्यः—प्रापणं भगवद्भुक्तं लब्धं भागवतेन तु। पुनरिष्ट्वैव भोक्तव्यं दानं तस्य न चेष्यते। इदं मानसिकाभिप्रायम्। तथा तेनैवोक्तं 'मूर्त्यन्तरेण सम्भुक्तमयत्नेन समागतम्। स्वमन्त्रमूर्त्यै सञ्चिन्त्य मनसा तत्समर्पयेत्। अनर्चितं भगवते स्वाराध्याय स्वमन्त्रतः। यद्भुक्त्वा कुरुते कर्म तत् द्रव्यं यस्य तस्य तत्। कर्मणा मनसा वाचा यथाकालं यथा बलम्। स्वाराध्याय निवेद्यैव सर्वं भुञ्जीत बुद्धिमा''निति वैकुण्ठदीक्षितीयोक्तमिह ग्राह्यम्।

व्याहृतिभिः परिषिच्येति। बोधायनः—'महाव्याहृदिभिः प्रदक्षिणमन्नमुदकं परिषिच्य सव्येनामुञ्चन्निति सव्येन हस्तेन अमुञ्चन् पात्रं स्पृशन्नित्यर्थ इति रत्नाकरस्थवाक्यमनुसन्धेयम्। सम्प्रदायोऽस्ति चेत् सर्षिच्छन्दो देवतादिप्राणाग्नि होत्रप्रक्रियामप्यनुष्ठायेति। अत्र प्राणाग्नि होत्रमन्त्रा ऋषिश्छन्दो देवताश्च सदुपदेशतो लभ्या इति नात्र

मप्यनुष्ठाय भार्यादिदत्तेनार्घ्यजलेन सत्यं त्वर्तेन परिषिञ्चामीति पुनः परिषिच्य, पादाभ्यां पादेन वा भूमिं स्पृष्ट्वा वामहस्ताङ्गुष्ठतर्जनीमध्यमाभिर्वामभागे पात्रं स्पृष्ट्वा, परदत्तेन पाद्येन अमृतोपस्तरणमसीत्यापोशनं

विलिख्यन्ते' इति रत्नाकरोक्तम्। अतो यथोपदेश मनुष्ठानमिति भावः। भार्यादिदत्तेनार्घ्यजलेनेति। 'अर्घ्येन परिषिच्यान्न'मिति शाण्डिल्य-वचनं पूर्वमुदाहृतम्। पराशरश्च 'ततो महाव्याहृतिभिः पात्रं तत्परिषिच्य च। सत्यंत्वर्तेन चाद्भिश्च हस्तं प्रक्षालयेत्ततः' इति रत्नाकरस्थवचनं, 'विष्णुपादोदकेनैव कुर्यादापोशनं ततः। आपोशनं न कुर्वीत विष्णुपादोदकं विना। अन्योदकेन यः कुर्यात् विष्णुपादोदकं विना। त्यक्त्वा स तु महापापी पतत्येव न संशयः। विष्णुपादोदकेनैव कुर्यादापोशनद्वय'मिति वासिष्ठसंहितावचनं चात्र भाव्यम्।

पादाभ्यां पादेन वा भूमिं स्पृष्ट्वेति। 'पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा पुनः। अन्नं पूर्वं नमस्कुर्यात् प्रहृष्टेनान्तरात्मने'ति श्री वैष्णव धर्मशास्त्रवचनं, उशना अपि— सत्यंत्वर्तेनेत्यनेन उदकं परिषिच्यामृतोपस्तरणमसीति प्राशयेदिति, स्मृत्यर्थसारे—'आपोशनं वामभागे सुरापानसमं भवेत्। तदेव दक्षिणे भागे सोमपानसमं भवेत्। मार्कण्डेयः - 'आपोशनं सोमपानं यावदन्नं न लङ्घितम्। हस्तेन लङ्घितं चान्नमभोज्यं मनुरब्रवीत्' चिन्तामणौ—अङ्गुष्ठस्तर्जनी चैव मध्यमा च तृतीयका। तिस्रो नामाङ्गुलीचैव प्रशस्ताः पात्रधारणे' शाण्डिल्यः - भोजनाद्यन्तयोर्दिव्यपादाब्वेकं समन्त्रकम्। पिबेदवश्यं सद्भक्तो मिश्रितं वार्हणादिभिः' आपस्तम्बः—नापजिहीतापजिहीतवा इति।

कृत्वा, साङ्गुष्ठमध्यमानामिकाभ्यां ओं प्राणाय स्वाहेत्यादिभिः सप्रणवैः पञ्चप्राणाहुतीर्हुत्वा, मनसा

'आभोजनान्तं वामेन पात्रं स्पृशन् भुञ्जीत । न पात्रं मुञ्चेत् । प्राणाहुत्यूर्ध्वं त्यजेद्वा, स्मृत्यर्थसारे—प्राणाहुतिषु सर्वासु हुतास्वेवं त्यजेद्गृही । पात्रस्य धारणं मौनं यावत्सिद्धिर्भवेद्द्विजैः । आस्येवान्नस्य निक्षेपो मन्त्रैः प्राणादिसंज्ञकैः । तदेव भोजनं ज्ञेयं तत्रैव नियमाः स्मृताः । अतोऽवश्यं पात्रस्पर्शः कर्तव्यः । समुत्थितस्तु यो भुङ्क्ते यो भुङ्क्ते मुक्तभाजने । एवं वैवस्वतः प्राह भुक्त्वा सान्तपनं चरेदिति प्रायश्चित्तस्मृतेः । मुक्तभाजने वामहस्तेनेति शेषः । समुत्थितः उत्तरापोशनमकृत्वा मध्ये चोत्थाय पुनरुपविश्य यो भुङ्क्त इत्यर्थः । स्मृत्यन्तरे— कार्ये हस्तमपोशाने प्रक्षाल्यैव समन्त्रकम् । जलं पीत्वा ततः पञ्च हुत्वा भुञ्जीत चाहुतिः । आश्वमेधिके — कुर्यात् प्राणाहुतीः पञ्च समादाय समन्तत इति । आगमप्रामाण्ये— हृदि ध्यायन् हरिं तस्मै निवेद्यान्नं समाहितः । मध्यमानामिकाङ्गुष्ठैः जुहुयादाहुतीः क्रमात् । इदं सर्वाश्रमसाधारणं, आपोशनेनोपरिष्टादधस्ताच्चैव भुञ्जता । अनग्र ममृतं चैव कार्यमन्नं द्विजन्मना इति भुञ्जता कर्तव्यत्वविधानात् द्विजन्मत्वानपायादेषु वचनेषु अधिकारि-विशेषानुक्तेश्च । सुमन्तुः— पञ्चप्राणाहुतीः कुर्यात् शुद्धान्नैरभिघारितैः । उच्छिष्टे न घृतं दद्यात् प्राग्घुते र्लवणान्वितम् । प्राणाहुतेः पश्चादेव लवणान्वितं व्यञ्जनादिकं दद्यादित्यर्थः । प्राणाहुतिस्तु शुद्धान्नेनैव कार्येत्यादिरत्नाकर-वाक्यान्यत्रानुसन्धेयानि । आह्निककाण्डेक्षीरं लवणसंमिश्रमुच्छिष्टेपि च यद्धृतम् । रजस्वलामुखास्वादः सुरापानसमं त्रयम् । इदं प्राग्घृता

प्राणायेदं नममेत्युद्देश्यत्यागमपि तदा तदा कृत्वा, वामहस्तं प्रक्षाल्य प्रतिकबलं गोविन्दं स्मरन् शास्त्रानुमतव्यञ्जनोपदंशसहितं शास्त्रोक्तनियम-युक्तस्सन् भुक्त्वामृतापिधानमसीति मन्त्रेण परदत्त-भगवत्पादोदकं सशेषं पीत्वा शेषं 'रौरवेऽपुण्य निलये पद्मार्बुदनिवासिनाम्। अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठ तु' इति मन्त्रेण भोजनपात्रस्य वामतः देव तीर्थेन भुवि

भावविषयम्। यतस्स एव 'प्राणाहुतौ घृताभावे पश्चाद्भुञ्जीत नो घृतम्। प्राग्घुतेर्घृतसद्भावे भुक्तिमध्ये न दुष्यति। इति उच्छिष्टघृतव्यवस्था प्रदर्शिता ज्ञेया। भोज्याभोज्यवस्तुव्यवस्था भोजननियमादिकं रत्नाकरादौ विस्तरेणाभिहितं द्रष्टव्यम्।

श्रीभाष्यकारशिष्यपरम्पराप्रविष्टपरमैकान्तिनां प्राणापानादि-मन्त्रैरेवाहुतिकर्तव्यत्वं व्यापकमन्त्रादिकरणकान्नाहुत्यादेः पञ्चरात्र-विहित चक्राब्जमण्डलादिदीक्षितविषयत्वं च प्रमाणाचार्य श्री सूक्तिसम्प्रदायैः सत्पथरक्षायामस्माभिः परपक्षप्रतिक्षेपपुरस्सरं स्थापितं द्रष्टव्यम्।

मनसा प्राणायेदन्न ममेति उद्देश्यत्यागमपि तदा तदा कृत्वेति। पूर्वोदाहृतैः पञ्चप्राणाहुतिमन्त्रव्यतिरिक्तविषये मौनविधानात् मनसा उद्देश्यत्यागोक्तिः। श्री पाञ्चरात्ररक्षायां—'भुञ्जंश्चिन्तय गोविन्द' मित्यनुगृहीतमिह भाव्यम्।

श्रीगीतायां—आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहारास्सात्त्विकप्रियाः। तत्र भाष्यं—

निःस्राव्य, पवित्रं विसृज्य, भूमौ निरस्य उत्थाय, त्रीन् गण्डूषान् कृत्वा, माषादिचूर्णैः मृद्भिर्वा हस्तं संशोध्य, पुनश्च त्रयोदशगण्डूषान् दन्तशोधनञ्च कुर्यात् । अथवा पूर्वमेव षोडश गण्डूषान् कृत्वा मृद्धर्षणादिभिर्हस्त-प्रक्षालनं कृत्वा, ततो मुखप्रक्षालनं कुर्यात् ॥

''सत्त्वगुणोपेतस्य सत्त्वमया आहाराः प्रिया भवन्ति' इत्यादि 'रस्याः मधुररसोपेताः' स्निग्धा स्नेहयुक्ताः' । श्री तात्पर्यचन्द्रिकायां— ''रस्यन्त इति वा रस्याः तत्र मधुररसोपेता इति कारणोक्तिः । माधुर्यं हि रसान्तरेभ्यः शरीरस्थितौ विशेषेण हेतुर्भवति । यथोक्तं बाहटेन 'रसाः स्वाद्वम्ललवणतिक्ततीक्ष्णकषायकाः । षट् द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः' इति, भोजनं च स्वस्थस्य मधुररसप्रायतया नियम्यते । षड्रसान्मधुरप्रायान्नाति द्रुतविलम्बितमिति + एवं स्नेहयुक्ताहारोऽपि रौक्ष्यविरोधीरूक्षेण वायुना शरीरस्यापि विशारारुतां वारय तीत्यप्यायुर्वेदावसितम्'' 'कट्वम्लवणात्युष्णतीक्ष्णरूक्षविदाहिनः । आहारा राजसस्येष्टा दुःखशोकामयप्रदाः । तत्र भाष्यं— कटुरसाः, अम्लरसाः, लवणोत्कटाः, अत्युष्णाः अतितीक्ष्णाः रूक्षाः विदाहिन-श्चेति । 'कट्वाम्लवणात्युष्णतीक्ष्णरूपविदाहिनः । अतिशैत्याति-तैक्ष्ण्यादिना दुरुपयोगाः तीक्ष्णाः, शोषकराः रूक्षाः, तापकराः विदाहिनः, एवंविधा आहाराः रासजस्येष्टाः' इत्यादि

''यातयामं गतरसं पूतिपर्युषितं च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥

इत्यादि । ''अतो हितैषिभिस्सत्त्वविवृद्धये सात्त्विकाहार-

ततः पादौ प्रक्षाल्य द्विराचम्य, ''प्राणानां ग्रन्थिरसि रुद्रो माविशान्तकस्तेनान्नेनाप्यायस्व'' इति हृदयमालभ्य, ''अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठश्च समाश्रितः। ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक्' इति दक्षिण पादाङ्गुष्ठे ऊर्ध्वदक्षिणहस्तेन जलं निस्राव्य, ''श्रद्धायां

स्सेव्यः'' इति 'युक्ताहारविहारस्ये'त्यत्र तात्पर्यचन्द्रिका । 'यद्ध्यात्मसम्मितमन्नं तदवति तन्न हिनस्ति तद्यत्कनीयो न तदवतीति। स्मरन्ति च —उरस्यार्धमन्नस्य तृतीयमुदकस्य तु। वायोस्सञ्चरणार्थन्तु चतुर्थमवशेषये'दिति । व्यासः—'पात्रशिष्टन्तु यत्तोयं पाने पादावनेजने। भूमौ तदम्बु निस्राव्य शेषं तत्पातुमर्हति । अत्रिः— आस्येन न पिबेत्तोयं तिष्ठन्नाञ्जलिना पिबेत्। वामहस्तेन शय्यायां तथैवान्यकरेण वा। तोयं पाणिनखस्पृष्टं ब्राह्मणो न पिबेत् कचित्। वामहस्तेन यो भुङ्क्ते योपः पिबति वा द्विजः । सुरापानेन तुल्यं स्यादित्येवं मनुरब्रवीत् । अत्र वामहस्तभोजननिषेधः दक्षिणहस्तशक्यत्वे। नालिकेरोदकं कांस्ये ताम्रपात्रे स्थितं मधु। गव्यं च ताम्रपात्रस्थं मद्यतुल्यं घृतं विना । हस्तेन न पिबेत्तोयं भुक्तौ तु द्विजसत्तमः । अन्येन कांस्यपात्रेण पिबेदन्यैश्च साधनैः । भुक्तिग्रहणादन्यत्र पाणिना पाने न दोषः। अखण्डादर्शे—अन्नस्य वा निषेधार्थमुपदंशस्य वा पुनः। धर्मार्थी विसृजेद्वाचं नासद्वाचं कदाचन। अत्रिः—शब्देना पोशनं कृत्वा शब्देन घृतपायसम्। शब्देनाचमनं कृत्वा सुरापानसमं भवेत्। और्वः—अश्नीयात्तन्मयो भूत्वा पूर्वं च मधुरं रसम्। लवणाम्लौ तथा मध्ये कटुतिक्तादिचान्ततः । प्राक् द्रवं

प्राणे निविश्यांमृतꣳहुतं प्राणमन्त्रेनाप्यायस्व । अपाने निविश्यामृतꣳहुतमपानमन्त्रेनाप्यायस्व । व्याने निविश्यामृतꣳहुतं व्यानमन्त्रेनाप्यायस्व । उदाने निविश्यामृतꣳहुतमुदानमन्त्रेनाप्यायस्व । समाने निविश्यामृतꣳहुतꣳसमानमन्त्रेनाप्यायस्व ब्रह्मणिम आत्मामृतत्वाय'' इति हुतमभिमन्त्र्य, सूर्यमभिवीक्षेत रात्रौ दीपमवलोकयेत् । ''उदुत्यं + सूर्य'' मित्यादित्यमुपतिष्ठेत । ततः ''विष्णुस्ता तथैवान्नं परिणामश्च वै सदा । सत्येन तेन मे भुक्तं जीर्यत्वन्नमिदं ततः'' इत्युचार्य, उदरं परिमृज्य, ओं इति ब्रह्मणि

पुरुषोऽश्नन्वै मध्ये तु कठिनाशनः । अन्ते पुनर्द्रवा शीतु बलारोग्येन मुञ्चति । ग्रहणन्तु भवेदिन्दोः प्रथमादधियामतः । भुञ्जीतावर्तनात्पूर्वं प्रथमे प्रथमादधः । प्रथमे यामे ग्रहणे दिवा प्रथमयामादधो भुञ्जीत । अन्यत्रावर्तनादधः - व्यासः–नाद्यात्सूर्यग्रहात्पूर्वं सायाह्नेन शशिग्रहात् । ग्रहकाले तु नाश्नीयात् स्नात्वाश्नीयात्तु भोजने । मुक्ते शशिनि भुञ्जीत यदि न स्यान्महानिशा । अमुक्तयोरस्तगयोरद्याद्दृष्ट्वापरेऽहनि । तथा वृद्धगौतमः–चन्द्रसूर्यग्रहे नाद्यात्तस्मिन्नहनि पूर्वतः । राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनम् । ग्रस्तास्तमये काल द्वये न भुञ्जीतेति भावः । विष्णुधर्मोत्तरे—अहोरात्रं न भुञ्जीत चन्द्रसूर्यग्रहेऽस्तगे । मुक्तिं दृष्ट्वा तु भोक्तव्यं स्नानं कृत्वा ततः परम् । वैकुण्ठदीक्षितीये देवलः–पित्रोर्मृताहपूर्वेद्युः भानुवारे च संक्रमे । तता चतुर्दश्यष्टम्योर्व्रतेषु च महोत्सवे । श्रोत्रिये मरणं प्राप्ते गुरूणां

दुःखसम्भवे। पितरि व्याधिना ग्रस्ते महाराजनिपातने। उक्तेष्वेतेषु सर्वेष्वन्येषु व्रतपर्वसु। न द्विवारं समश्नीयाद्विप्रो धर्मपरायणः। सङ्ग्रहे—अर्कद्विपर्वरात्रीषु चतुर्दश्यष्टमी दिवा। एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेत्। हेमाद्रौ—शम्भोर्निवेदितं भक्तं तत्तीर्थं शाकमेव वा। विप्रः कदा न भुञ्जीत भुक्त्वा तप्तं समाचरेत्। व्यासः—निहन्त्यन्नं मनः प्राणान् चक्षुः श्रोत्रे तथैव च। स्मृतिं मेधां धृतिं शुक्रं पारक्यं योऽन्नमश्नुते। परपाकान्नपुष्टस्य सततं गृहमेधिनः। इष्टं सत्तं तपोऽधीतं यस्यान्नं तस्य तद्भवेत्। स्मृतिदीपिकायां—यो भुङ्क्तेऽनुपनीतेन यो भुङ्क्ते च स्त्रिया सह। यो भुङ्क्ते कन्यया सार्धं द्विजश्चान्द्रायणं चरेत्। दक्षः—किल्बिषं हि मनुष्याणामन्नमाश्रित्य तिष्ठति। यो यस्यान्नं समश्नाति स तस्याश्नाति दुष्कृतम्। शिष्टान्नं भोज्यमेव। तथा व्यासः—सदाचारस्य विप्रस्य तथा वेदान्तवेदिनः। भुक्त्वान्नं मुच्यते पापात् पावनं नात्र संशयः। तथान्यत्र च—महापातकसंप्राप्तौ श्रोत्रियस्य गृहं व्रजेत्। याचयेदन्नममृतं तदभावे जलं बिपेत्। माघमाहात्म्ये श्री कुलदूतसंवादे—प्रार्थयेत् वैष्णवस्यान्नं प्रयत्नेन विचक्षणः। सर्वपापविशुद्ध्यर्थं तदभावे जलं पिबेत्। आपस्तम्बः—अष्टौ ग्रासा मुनेर्भोज्याष्षोडशारण्यवासिनः। द्वात्रिंशच्च गृहस्थस्ये ह्यमितं ब्रह्मचारिणः। भरद्वाजः—भुक्त्वामृतापिधानमसीति च निपीयकम्। आचान्तः पुनराचामेत् यावन्मण्डलशोधनम्। भुक्त्वा ग्रन्थिं विमुच्याथ तेन पीत्वा जलं सह। तत्पवित्रं त्यजेद्भूमावथ मन्त्रेण जातुचित्। विस्मृत्य भुवि पात्रे तु पवित्रं विसृजेद्यदि। प्रायश्चित्तं चरेत्कृच्छ्रं तत्किल्बिषविशुद्धये। मार्कण्डेयः—गण्डूषकरणाद्यस्तु हस्तं प्रक्षालयेद्द्विजः।

हरं दैवं च पित्र्यं ह्यात्मानं चोपघातयेत् । गण्डूषमत्र उत्तरापोशनम्। यतस्स एवाह—अर्धं पिबति गण्डूषमर्धं त्यजति भूतले। प्रीणन्ति पितरस्सर्वे ये चान्ये भूमिदेवताः । गण्डूषाद् त्यागमन्त्रमाह स एव—रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् । अर्थिनामुदकं दत्तमक्षय्यमुपतिष्ठतु। इति। पवित्रग्रन्थिमुत्सृज्य मण्डले भुवि निक्षिपेत्। पात्रे च निक्षिपेद्यस्तु स विप्रः पङ्क्तिदूषकः । शाण्डिल्यः—माषादिचूर्णैर्मृद्भिर्वा प्रक्षाल्य करयोर्युगम् । प्रक्षाल्य जानुपादौ च काष्ठैर्दन्तान्विशोधयेत्। स्मृत्यन्तरे—मूत्रे पुरीषे भुक्त्यन्ते तथैवाभोज्य भक्षणे। चतुरष्टद्विषड् द्व्यष्टगण्डूषैस्तु विशुध्यति। विप्रस्य दक्षिणे भागे देवास्तिष्ठन्ति सर्वदा। आसीन एव गण्डूषान् वामपर्श्वे विसर्जयेत्। बोधायनः—आसीन एव गण्डूषान् वामभागे विसर्जयेत्। आसीनस्त्रिराचामेत् । सङ्ग्रहे—भुक्त्वोच्छिष्टस्त्वनाचान्तः शूद्रादीन्यदि पश्यति। ज्ञानतोऽज्ञानतोवापि तैस्सार्धं भुक्तवानसौ । कुत्सः— आचान्तो नाभिदेशन्तु प्राणानां ग्रन्थिरसीति । विमृश्यादित्यमीक्षेत रात्रौ दीपमुखं ततः । व्यासः— अमृतापिधानमसीत्युपरिष्टादपः पिबेत्। आचम्याङ्गुष्ठमात्रेति पादाङ्गुष्ठे तु दक्षिणे । निस्रावयेद्धस्त-जलमूर्ध्वहस्तस्समाहितः । हुतानुमन्त्रणं कुर्यात् श्रद्धायामिति मन्त्रतः । अथाक्षरेण स्वात्मानं योजयेत् ब्रह्मणीतिही'ति । अक्षरेण एतस्यवाक्षरस्येत्याम्नातेन ब्रह्मणि म आत्मामृतत्वायेति योजयेत्। विष्णुरत्ता तथैवान्नं परिणामश्च वै यतः। सत्वेन तेन मे भुक्तं जीर्यत्वन्नमिदं ततः। इत्युच्चार्य स्वहस्तेन परिमृज्य तथोदरम्। लिखितः—भुक्त्वोपस्थाय मार्तण्डं पुराणानि सदा पठेत्। भावशुध्या हरौ भक्तिः पुराणश्रवणाद्भवेत्। संग्रहकारः —भुक्त्वा तु

सुखमासीनस्ताम्बूलेनास्य शोधनम् । शुण्ठ्या-मलकधातूनामेकेनापि विशोधनम् । तथान्यत्र—सुपूगं च सुपत्रं च सुधया च समन्वितम् । प्रदद्याद्द्विजदेवेभ्यस्ताम्बूलं भक्षयेद्बुधः । एकं पूगं सदारोग्यं द्विपूगं निष्पलं भवेत् । अतिश्रेष्ठं त्रिपूगं च अधिकं नैव दुष्यति । पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः । पूर्णपत्रं हरत्यायुस्सिरा बुद्धिविनाशिनी । तस्मादग्रं च मूलं च सिराश्चैव विशेषतः । चूर्णपर्णं वर्जयित्वा ताम्बूलं खादयेद्द्विजः । अखण्डितं च क्रमुकं पत्रमक्षालितं तथा । अशोधितं च यच्चूर्णं भक्षयन् सर्वदोषभाक् । अनिधाय मुखे पत्रं पूगं खादति यो नरः । सप्तजन्मदरिद्रस्स्यात् नरकेषु निमज्जति' इत्यादिरत्नाकरवाक्यान्यत्रानुसन्धेयानि ।

उत्तरापोशनं कुर्यात् विष्णुपादोदकेन तु । तत उत्थाय सम्मृज्य पत्रं चासं स्पृशन् द्विजः । शोधयेन्मुखहस्तौ च मृद्भिस्सङ्घर्षणैरपि । द्विरष्टवारं गण्डूषं भोजनान्ते समाचरेदिति वासिष्ठसंहितावचनानुसारेण षोडशगण्डूषक्रम उक्तः ।

वैकुण्ठदीक्षितीये गौतमः—अमाश्राद्धादिकालेषु यस्ताम्बूलादि खादयेत् । तस्य दोषविशुद्ध्यर्थं जपेदष्टोत्तवरं बुधः । हेमाद्रौ—अमायां श्राद्धदिवसे तीर्थयात्रासु सर्वदा । क्षयाशौचे बन्धुमृतौ पर्वद्वये हरेर्दिने । अनिशं मार्गमध्ये च सन्ध्ययोरुभयोरपि । देवालये सभास्थाने तथा कर्मसु भाषणे । दुःखोद्धते बहुजने तथैवोत्पातदर्शने । राजभागप्रजादक्ष-गुरुदेवार्चनेषु च । व्रताचरणकाले तु पुराणश्रवणे तथा । ताम्बूलं भक्षयेद्यस्तु विष्ठासममिदं भवेदिति वचनजातमत्र भाव्यम् । अत्र भक्ष्या-भक्ष्यभक्षणप्रायश्चित्तप्रमाणादिकं रत्नाकरादौ विस्तरेणोक्तं द्रष्टव्यम् ।

स्वात्मानं योजयेत् । अथ ताम्बूलशोधितास्यः भगवानेव + इज्याख्यं कर्म + कारितवानिति सात्त्विकत्यागं कृत्वा, कृतश्च करिष्यामि + इज्यया भगवत् मर्कणा भगवान् प्रीयतां वासुदेव इतीज्यां समापयेत् ।

अथ स्वाध्यायः ।

ततश्चतुर्थे काले कृतश्च करिष्यामि + स्वाध्यायेन भगवत्कर्मणा भगवन्तं वासुदेवमर्चयिष्यामि, भगवतो बलेन + करिष्यामि, इति सङ्कल्प्य, भगवानेव + स्वाध्यायाख्यं कर्म + कारायतीत्यनुसन्धाय, उपबृंहणसापेक्षाधिकारी इतिहासपुराण निगमान्तद्वयपरिचयं

अथेज्यान्ते सात्त्विकत्यागमाह—भगवानेवेत्यादिना । इज्याकाले भगवत्परिचर्यायाः भगवति समन्त्रकसमर्पणप्रकारामह–कृतश्च करिष्यामीत्यादिना ।

अथ चतुर्थकालकर्तव्यस्वाध्यायानुष्ठानप्रकारं सङ्कल्पसात्त्विकत्यागपूर्वकं प्रतिपादयति—ततश्चतुर्थकाल इत्यादिना । स्वाध्यायकालः अहस्तृतीययामप्रभृति रात्रिप्रथमयामान्तम् । यदुक्तमन्याह्निके– अत्र जयाख्यपाञ्चव्यासदक्षादिमते सर्वस्मिन्नप्यस्तमयप्राग्भाव्येव स्वाध्यायकालः । तृतीयेऽधिकारे शमदमाद्युपयुक्तशब्दशीलनं कुर्यादिति स्वाध्यायसारः' इति स्वाध्यायं परिसमाप्य, ''अथ लोहितायतिभास्करे'' इत्यादिना दिनान्तादितया योगकाल उपक्रम्यते । न च सायं सन्ध्यावन्दनहोमभगवदाराधनभोजनस्वाध्यायान्निरूप्य ''व्याख्यातः स्वाध्यायः, अथ योगं व्याख्यास्यामः'' इत्युक्तेः कथं

योगस्य दिनावसानादित्वमिति वाच्यम्। "दिनावसाने सम्प्राप्ते पूजां कृत्वा समभ्यसेत् । योग"मित्यादिना दिनन्तभाविपूजान्तकर्मणो योगकालान्तर्गतत्वाविरोधात्, भोजनस्यानुयागरूपस्य इज्यान्तर्गतत्वात्, योगप्रतिज्ञानन्तरभाविस्वाध्यायग्रन्थस्य "एतौ स्वाध्याय-योगौ आह्निकानुयागात् पूर्वं केषुचित् संहिताविशेषेषु समाहृत्य उपदिश्येते" इत्यादेः स्वाध्याययोगगताधिकांशपरिहारात्मकत्वात्—इति । तदसारम्—प्रमाणाचार्यपाद श्रीसूक्तिविरुद्धत्वात् ।

"दिनावसाने सम्प्राप्ते पूजां कृत्वा समभ्यसेत्। योगं निशावसाने तु विश्रमैरन्तरीकृतम्। पञ्चमो योगसंज्ञोऽसौ कालांशो ब्रह्मसिद्धिदः" इत्याचार्यपादोदाहृतजयाख्यसंहितावचननेन रात्रिपूजानन्तरं त्वाश्रुत्या योगो विहितः। अत्र पूजाशब्दोऽनुयागपर्यन्त इति सर्वैरङ्गीकरणीयं, "स एव कालः योगसंज्ञितः" इत्युक्तम्। लक्ष्मीतन्त्रेऽष्टाविंशेऽध्याये– स्वाध्यायमाचरेत्सम्यगपराह्णे विचक्षणः। दिव्यशास्त्राण्यधीयीत निगमांश्चैव वैदिकान् । सर्वाननुचरेत्सम्यक्सिद्धान्तानात्मशुद्धये" इत्यारभ्य "ततस्सन्ध्यामुपासीत पश्चिमां सार्धभास्कराम्। विधायाग्र्यर्थ कार्यं तु योगं युञ्जीत वै ततः" इत्यन्तवचनैः सायं सन्ध्योपासन होमाराधनानन्तरं योगानुष्ठानं श्रौतक्रमसिद्धं प्रतीयते । पारमेश्वरे दशमेऽध्याये—"तश्चतुर्थप्रहरे शास्त्राध्यनमाचरेत्। चिन्तनं श्रवणोपेतं व्याख्यानं स्वधियेच्छया। अस्तंगते दिनकरे आसाद्याराधनालयम्। कुर्यान्मन्त्रार्चनं सम्यग्जपध्यानसमन्वितम् । असाद्य शयनं पश्चात् स्मरन्मन्त्रेश्वरं हृदि। अपयित्वा निशांशं तु उत्थाय शयनात्ततः। योगं युञ्जीत वै मान्त्रं प्राग्वद्धृत्कमलोदरे" इति वचनैः रात्र्याराधनाद्यनन्तरं योगविधेः अनुयागान्तं स्वाध्यायकाल इति प्रतीयते । श्री

शाण्डिल्यस्मृतौ—"स्वाध्यायमपि सङ्कल्प्य यथाशक्ति जपेन्मनु"मित्यारभ्य शास्त्राध्ययनादिकं विस्तरेण प्रतिपाद्य, "यामिन्यां योगकाले तु यत्कार्यं योगिभिर्नरैः । अधिवृक्ष प्रमाणेन दृश्यमाने दिवाकरे। विहाय देहसंशुद्धिं वासो विपरिधाय च" इत्यारभ्य "प्रोक्षणाचमने कृत्वा दद्यादर्घ्यं च पूर्ववत् । ध्यायन्नेव परं ब्रह्म यावन्नक्षत्रदर्शनम् । जपेत् ब्रह्म पवित्रं वा मानसं मौनमाश्रितः । अभिगम्य यथा पूर्वमर्चयित्वा यथा विधि। भुक्त्वा जप्त्वा तथा स्तुत्वा योगं कुर्यादतन्द्रितः " इति वचनैः सायंसंध्यादि भोजनजपस्तोत्रानन्तरं यामिन्यां योगोविहितः । नारदीयसंहितायां त्रिंशोऽध्याये—यदा भागवतश्रेष्ठो योगं युञ्जीत योगवित् । स योगकालो विज्ञेयः श्रुणु योगमतः परमि"ति योगानुष्ठानकालस्य योगकालत्वं प्रतिपादितम् । श्री पाञ्चरात्ररक्षायां द्वितीयाधिकारे—"समाराधनानन्तरभावि-स्वाध्यायश्च श्रुतिस्मृतीतिहासपुराणमन्त्रजप सत्संवादाध्यात्मशास्त्र श्रवणप्रवचनाद्यात्मा यथा सम्भवं भगवच्छास्त्रधर्मशास्त्रादिषु अनन्तर-भावियोगोपकारकज्ञानसन्धुक्षण प्रयोजनः प्रतिपाद्यत इति + एवं योगोऽपि द्वयार्थानुसन्धानैकाग्र्यरूपः सर्वव्यापारोपरतिसुभगनिद्रा-पूर्वापरकालयो स्तत्पूर्वापररात्रेषु युत्जान इत्याद्युक्तावसर-युक्तयत्नलभ्यः "व्यासस्मृतिविचारे "रात्रिभोजनवचनेन तदनन्तरं योगोऽपि दिवाभोजनानन्तरोक्तः स्वयमेवागच्छतीति तदनुक्तिः" दक्षस्मृतिविचारे "यत्तु पश्चादुक्तम्। प्रदोषपश्चिमौ यामौ वेदाभ्यासेन यापयेत् । यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते । इति । अत्र योगासमर्थस्य तच्छेषभूतः स्वाध्यायः समर्थस्य योग एवेति न समानकालतदुभयविधायक शास्त्रद्वयविरोधः" इत्याचार्यपाद-

श्रीसूक्त्यनुसारेण योगसमर्थाधिकारिविषयत्वस्याभ्युपगन्तव्यत्वात् योगासमर्थानामस्माकं रात्रिप्रथम-प्रहरान्तं स्वाध्याय एवोचित इति तावानेव कालः स्वाध्यायकाल इत्यभ्युपेतव्यम् । तदुक्तं—"अथ स्वाध्यायं व्याख्यास्यामः । चतुर्थकाले सम्प्राप्ते स्वावगतवेद-वाक्यार्थव्यक्तीकरणाय विदितसकलवेदतदर्थानां स्वयोगमहिम साक्षात्कृतपरावरतत्त्व याथात्म्यानां मनुपराशरपाराशर्यशुक-शौनकादीनां महर्षीणां वेदोपबृह्मणानि श्रवणमननजपादिभिरभ्यसे दिदमुक्तं व्यासेन तत्कालकृत्यं—इतिहास पुराणाभ्यां वेदं समुपबृंहयेदिति । दक्षेण तु, इतिहास पुराणाभ्यां षष्ठं सप्तममभ्यसेत् । इति एवं भुक्त्वोपस्थाय चादित्यं पुरणानि सदा पठेदित्यादिकं द्रष्टव्यम् । उपब्रह्मणनिरपेक्षस्य उपबृह्मणीय वेदभागजप एव युक्तः । तत्रापि साक्षात् भगवत् प्रतिपादक एव भागो जप्य इति श्री शाण्डिल्यस्मृत्यादिषूक्तम् । सङ्ग्रहरुचीनां महामन्त्रसक्तानां च सर्वसारभूतव्यापकमन्त्रजपोपदेशः" इत्यादि । "शिष्यगुरु स ब्रह्मचारि श्रेयोऽर्थिभिरनसूयुभिः वीतरागैस्सह वादः "बोधयन्तः परस्पर' मित्याद्युक्त संवादोऽपि तत्त्वनिर्णयफलत्वाविशेषादितिहासादिवत् स्वाध्यायकाल एव प्रवर्तनीयः" इत्यादि "तदिह भगवत् प्रीणनस्वचित्तरञ्जकेतिहासपुराणस्तोत्रनिगमान्तद्वय व्यापक-मन्त्रादीनां श्रवणमननप्रवचनजपादयो वादसंवादादयश्च यौगिक-ज्ञानप्रदीपस्नेहायमानाः 'पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः । अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधमि'त्यादिनिदर्शित विविध-वाचिकपापोदय प्रतिबन्धिनश्च सर्वे व्यापारा यथायथं सम्भूय पृथग्भूय वा स्वाध्या (योभवति) यी भवन्ति । शमाद्युपयुक्तशब्दशीलनं कुर्यादिति

स्वाध्यायसारः'' इत्यादि च। ''सूर्यास्तमयर्पन्तं स्वाध्याय-कालः। अथ सायं सन्ध्योपासनप्रभृति रात्रिद्वितीययामान्तं योगकाल इति सायं सन्ध्योपासनादेरपि योगान्तर्भावः' इति कैश्चिदुक्तं प्रमाणाचार्यपाद श्री सूक्तिविरुद्धमित्यभिप्रेत्य पूर्वोक्तरीत्या सायं सन्ध्योपासनप्रभृति-रात्रिप्रथम प्रहर कर्तव्यकर्मजातस्य स्वाध्यायान्तर्भावाभिसन्ध्या सायं सन्ध्योपासनादिकमाह—

अथ लोहितायति सूर्ये इति।

* * *

इति श्री श्रीनिवासमहादेशिकचरणारविन्दमधुव्रतैः
मतिमन्थाननिर्मथितवेदान्तद्वयपञ्चरात्रस्मृतीतिहासाचार्यपादश्रीसूक्ति
न्यायादिदुग्धार्णवसमु द्धृतसारार्थामृतरसैः
गुरुपङ्क्तिभक्तिमतां प्रथमोदाहरणभूतैः
श्री रङ्गनाथनित्य सेवाकृतार्थैः श्रीमुनित्रयसिद्धान्तस्थापनाचार्यतल्लजैः
श्रीमत्पादुकासेवक रामानुजमुनीन्द्र महादेशिकैः
अनुगृहीता
श्रीमद्गोपालार्य
महादेशिकानुगृहीत
श्रीमदाह्निकव्याख्यारूपा
श्रीमदाह्निकार्थप्रकाशिका समाप्ता ।।

श्रीमते पादुकासेवकरामानुजमहादेशिकाय नमः।

* * *

कुर्यात् । तन्निरपेक्षाधिकारी स्वचित्तरञ्जकान् यौगिक-ज्ञान प्रदीपायमानान् वाङ्मयपापप्रतिबन्धकान् व्यापक मन्त्रादीनां श्रवणमननप्रवचन जपादीन् सत्संवादांश्च कुर्यात् । शमदमाद्युपयुक्तशब्दसंशीलनं कुर्यात् । इति स्वाध्यायसारः ।

अक लोहितायति सूर्ये, वस्त्रपरिवृत्तिपूर्वकं यथासूत्रं सायं सन्ध्यामुपासीत । तत्र अग्निश्चेति मन्त्रस्य सूर्य ऋषिः, देवी गायत्री छन्दः, अग्निर्देवता, अपां प्राशने विनियोगः । 'अग्निश्रच मामन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु । यत्किञ्च दुरितं मयि । इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा'' उपस्थानकाले इमं म इति पञ्चर्चस्य देवरात ऋषिः, गायत्री जगतीत्रिष्टुभश्छन्दांसि, सविता देवता। ''इमं मे वरुण श्रुधीहवमद्या च मृडय । त्वा मवस्युराचके । तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणेह बोध्युरुशꣳसमान आयुः प्रमोषीः । यच्चिद्धिते विशो यथा प्रदेव वरुणव्रतं । मिनीमसि द्यवि द्यवि यत्किञ्चेदं वरुणदैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि । अचित्तीयत्तव धर्मायुयोपिम मानस्तस्मादेनसो देव रीरिषः । कितवासो यद्रिरुपुर्नदिवि यद्वाघा सत्यमुत यन्न विद्म । सर्वा ता विष्य शिथिरेव देवाथातेस्याम वरुणप्रियासः'' इति

भेदः । अन्यत्सर्वं पूर्ववत् । प्रदोषरहितरात्रौ आशौचादिरहितः श्रीमदष्टारजपमपि यथाशक्ति जपित्वा, आचम्य, सोदपात्रो गृहमागत्य, सायं होमं कृत्वा, पूर्व-वद्भगवन्तमभिगम्य, हविर्निवेद्य, वैश्वदेवं बलिहरणवर्जं पञ्चमहायज्ञवर्जञ्च कृत्वा वैहायसबलि मात्रञ्च कृत्वा, पूर्ववद्भोजनं कुर्यात् । केचित् रात्रावपि बलिहरणादि कुर्वन्ति । केनचिन्निमित्तेन विलुप्तेऽपि भोजने प्राणाग्नि-होत्रमन्त्रजपं कुर्यात् । ततो रात्रियोग्य वेदाभ्यासं कुर्यात्। भगवानेव + स्वाध्यायाख्यं कर्म कारितवानिति सात्त्विकत्यागं कृत्वा, कृतञ्च करिष्यामि + स्वाध्यायेन भगवत्कर्मणा भगवान् प्रीयतां वासुदेव इति समापयेत् ॥

॥ अथ योगः ॥

सुप्रक्षालितपाणिपादः स्वाचान्तः शुचौ देशे आसीनः त्रिः प्राणानायम्य, कृतञ्च करिष्यामि + योगेन भगवत्कर्मणा भगवन्तं वासुदेवमर्चयिष्यामि, भगवतो बलेन भगवतो वीर्येण + करिष्यामि भगवानेव + योगाख्यं कर्म +कारयतीत्यनुसन्धाय, द्वयमनु सन्धाय, अखिलहेयप्रत्यनीकेत्यादिपूर्वोक्तप्रकारेणानु-सन्धाय, चतुर्दशभुवनात्मकमण्डमित्यारभ्य समग्रं श्री वैकुण्ठगद्यमनुसन्दधीत । तदशक्तौ भगवद्ध्यानसोपानं वानुसन्दधीत । ततो निद्राप्रसक्तौ ''संहारक्रममाश्रित्य तत्त्वान्यात्मनि संहरेत् । आत्मानं चापि हृत्पद्मे

परमात्मनि निष्ठिते । संहारेदुत्थितो योगात् स्वापं क्लेशापहं व्रजेत्'' इत्युक्तत्वात् आराधनारम्भोक्तरीत्या पृथ्व्यादिक्रमेण तत्त्वानि प्रकृतिपर्यन्तानि स्वस्वकारणे संहृत्य, प्रकृतिं तमसि संहृत्य, तमः जीवे उपसंहरामीति तमस्तत्त्वमात्मन्युपसंहृत्य, आत्मानं परमात्मन्युपसंहरामीत्युपसंहृत्य, योगादुत्थितः भगवानेव + पूर्वरात्रियोगं कारितवानित्यनुसन्धाय, निद्रां च करिष्यमाणकैङ्कर्योपकरणेन्द्रियवर्गविश्रान्तिनिमित्ततया कैङ्कर्यत्वेनानुसन्धाय, प्रासादखट्वापर्यङ्कन्यायेन नाडीपुरीतद्ब्रह्मणि स्वात्मनश्शयनमनुसन्धाय, लक्ष्मीपरिष्वङ्गव्यञ्जकेन माधवशब्देन भगवन्तं कीर्तयन् स्वस्य परमात्मनि परिष्वङ्गविशेषं परिमृश्य, संशुद्धशुष्कपादः, शास्त्रोक्ते समुचिते स्थाने शास्त्रीय शयने चोदितदिक्छिराः शुद्धत्वानग्नत्वादि नियमयुक्तः स्वाराध्यस्य भगवतश्चरणारविन्दयोर्विन्यस्तशिरस्कः तमेव हृदि ध्यायन् कीर्तयन् शयानो निद्राच्छेदे प्रसक्ते पुनरानिद्रागमात् तमेव ध्यायेत् कीर्तयेच्च ॥

एवं वर्तमानस्य सर्वः कालोऽपि अवन्ध्यो भवति, सर्वे व्यापाराः कैङ्कर्यरूपा भवन्ति, सर्वोऽप्यानुषङ्गिको भोगः क्रीडाशुकक्षीरास्वादन्यायेन स्वामिभोगशेषभूतो भवति, इति भगवत्कैङ्कर्यैकरतेः परमैकान्तिनोऽ-नादिमायानिशावसाने अनन्तमोक्षवासरप्रारम्भे च प्रत्यूषवदवस्थितोऽयमायुश्शेषकाल इति सर्वं निरवद्यम् ।

श्रीमद्गोपालार्य महादेशिकैरनुगृहीतम्

आह्निकं सम्पूर्णम् ।

* * *

श्रीमते गोपालार्यमहादेशिकाय नमः ।

श्रीमते निगमान्तमहादेशिकाय नमः ।

॥ श्रीः ॥

श्रीमते श्रीनिवासमहादेशिकाय नमः ।

श्री रामभद्राचार्यविरचितः

आह्निकशेषः

* * *

श्रीवासयोगीश्वरदेशिकेन्द्रं नत्वा रमेशञ्च जगन्निदानम् ।
श्रीरामभद्रेण विलिख्यतेऽयं ग्रन्थो महानाह्निकशेषनामा ॥

* * *

परिभाषा

पञ्चकालपरायणैः वैष्णवोत्तमैः ब्राह्मान्मुहूर्तादारभ्य कर्तव्यकर्मविशेषाणां क्रम आह्निके उक्तः, तत्र तत्र वक्तव्यविशेषो बहुस्मृतिबन्धनानुसारेणात्रोच्यते । अत्र तावत् प्रथमं परिभाषोच्यते । यत्र कर्मणि हस्तो नोक्तस्तत्र दक्षिणो ग्राह्यः, यत्र दिगनुक्ता तत्र प्राच्युदीची वा । आसनानुक्तावासीनः कुर्यात् - जपादौ सङ्ख्यानुक्तौ सहस्रपरमा दशावरा ग्राह्या - होमद्रव्यानुक्तौ घृतं, तच्च गव्यं तदलाभे माहिषं - तस्याप्यलाभे आज्यं - तदलाभे तैलं ग्राह्यं - उक्तकालात्पूर्वं करणे स्वकाले पुनःकरणं - मुख्यकालातिक्रमे प्रायश्चित्तम् । मुख्यकालातिक्रमे गौणकालोपि तादृशः, मुख्यद्रव्यापेक्षया मुख्यकालं न लङ्घयेत । गौणेनापि द्रव्येण मुख्यकाल एव कुर्यात् । कालानुक्तौ पूर्वाह्नः । दिनानुक्तौ शुद्धदिनं । पक्षानुक्तौ शुक्लपक्षः । मासानुक्तौ पितृमास चतुष्टयव्यतिरिक्तः । ऋत्वनुक्तौ वसन्तादिः ।

अयनानुक्तावुत्तरायणम्। प्रधानाकरणे साङ्गं पुनः कर्तव्यं। अङ्गाकरणे पुनः नाङ्गचङ्गान्यपि, कर्ममध्ये विस्मृताङ्गज्ञाने कृष्णानुस्मरणं। कर्मण्यारब्धे मध्ये मोहेनान्यथाकरणे स्खलनं यत्र तदारभ्य पुनः कुर्यात्, मन्त्राज्ञाने तिस्रो व्याहृतयः प्रणवो वा, देवताज्ञाने प्रजापतिः, सर्वत्र कर्मणि। सशिखाबन्धोपवीतकटिसूत्रः सोर्ध्वपुण्ड्रः सपवित्रपाणिः, सर्वत्र गुरुपरम्परानुसन्धान पूर्वकमेव कर्म सङ्कल्पयेत्; आदौ कृतं च मन्त्रं बलमन्त्रश्चानुसन्दध्यात्, सर्वकर्मणामादावन्ते च स्वशेषभूतेनेति पद्येन वा भगवानेवेति गद्येन वा सात्विकत्यागं कुर्यात्।

परिभाषा समाप्ता

* * *

—अथ कालविभागः—

प्रातस्सङ्गव मध्याह्नापराह्न सायाह्न भेदेन अहर्मान घटिकास्तुल्यतया पञ्चधा विभजेत्, अह्नस्त्रिंशत् घटिकात्वे सूर्योदयप्रभृति षट् घटिकाः प्रातःकालः, ततो द्वादशघटिकापर्यन्तं सङ्गवकालः, ततोऽष्टादश घटिकापर्यन्तं मध्याह्नकालः, ततः चतुर्विंशतिघटिकापर्यन्तं अपराह्नः, ततः अस्तमयपर्यन्तं सायाह्नः, दिवार्धीभूत पञ्चदश-घटिकावसानक्षणः आवर्तनमुच्यते, अहर्मानस्य पञ्चदशधाविभागे सति अष्टमभागे अन्त्यघटिका कुतपकालः। एवं च आवर्तनाव्यवहितोत्तरघटिका कुतपकाल इत्यर्थः, घटिकाद्वयात्मकः कालो मुहूर्तः, अह्नो वा रात्रेर्वा चतुर्थाविभागे सत्येकैको भागः याम इत्युच्यते, रात्रेराद्यन्तयामार्धकालः दिवाशेष इत्युच्यते, अरुणोदयानन्तरं आसूर्योदयं अस्तमयानन्तरं आतमःप्रादुर्भावं च सन्ध्याकाल इत्युच्यते, रात्रावष्टमभागभूतपञ्चदशषोडशघटिकात्मक

एको मुहूर्तो महानिशेत्युच्यते, सूर्योदयात्पूर्वं मुहूर्तद्वयात्मकः कालः अरुणोदय उच्यते, मुहूर्तत्रयात्मकस्तु ब्राह्ममुहूर्त इत्युच्यते, एवं रौहिणादि कालविभागोपि तत्र तत्र ज्ञेयः। इति कालविभागः।

* * *

—अथ नित्यकर्मविभागः—

अभिगमनोपादानेज्यास्वाध्याययोगभेदेन पूर्वाचार्यैः पञ्चधा नित्यकर्माणि विभक्तानि । तत्रारुणोदये मलमूत्रोत्सर्जन प्रभृति भागवताभिवादनपर्यन्तं अभिगमनम्। एतस्य प्रातःकालो मुख्यः। ततः परं गौणः। ततः परं भगवदाराधनोपयुक्तद्रव्यार्जनमुपादानम्। एतस्य सङ्गवकालो मुख्यः । ततो गौणः । ततःपरं माध्याह्निकस्नानप्रभृति भोजनोत्तरमाध्याह्निकताम्बूलचर्वणान्तं इज्याख्यं कर्म । एतस्य मध्याह्नकालो मुख्यः । ततः परङ्गौणः । तत इतिहास पुराणादिपठन रात्रिभोजनावसानपर्यन्तं स्वाध्यायाख्यं कर्म। तस्य अपराह्न सायाह्न रात्रि प्रथमयामपर्यन्तं मुख्यकालः। ततः परङ्गौणः। ततः परं क्रियमाणं भगवद्दिव्यमङ्गलविग्रहध्यान निर्वेदन सात्त्विकधृत्यवलम्बनपर्यन्तं कर्म योग इत्युच्यते । एवं नित्यकर्मविभागः । धर्मशास्त्रेषु कालकर्मणोः प्रकारान्तरेणापि विभागे सति अस्मदाचार्याभिमत विभागस्त्वयमेव, एवं कालकर्मविभाग उक्तः।

अथ शिखाबन्ध उपवीतानां लक्षणमुच्यते।

शिखां वामपाणितले प्रदक्षिणमावृत्य अग्रमन्तरितं कृत्वा मध्यभागेन मध्ये बन्धनं कुर्यात्।

—अथोपवीतक्रमः—

चतुरङ्गुलमानेन षण्णवतिसङ्ख्यया त्रिगुणीकृतं शुद्धदिने त्रिभिः पुरुषैर्घर्षीकृत्य ततो द्वाभ्यां द्विगुणीकृत्य विवर्तितं यत् कार्पाससूत्रं तत्त्रिवलयात्मना आवेष्ट्याग्रद्वयेन एकत्र द्वितीयतृतीय वलयसंयोजनरूपावान्तरवेष्टनपूर्वकं वलयत्रयं बध्वा ब्रह्मग्रन्थिपरिष्कृतं चेद्यज्ञोपवीतमुच्यते, तद्यथाविधि प्रतिष्ठाप्य धार्यं, यतिब्रह्मचारिणोरेकम् । गृहस्थस्य द्वयं त्रयं वा । श्रौतस्मार्तरूप नित्यकर्मानुष्ठान योग्यतासिध्यर्थं यज्ञोपवीतधारणं करिष्य इति वा यज्ञोपवीतधारणं करिष्य इति केवलं वा सङ्कल्प्य, यज्ञोपवीतधारणमन्त्रस्य - ब्रह्मा ऋषिः - त्रिष्टुप्छन्दः - त्रयी विद्या देवता - यज्ञोपवीतधारणे विनियोगः - इति ऋषिछन्दोदेवता विन्यासपूर्वकं कुक्कुटासन संस्थितः अवासीनेन वामपाणिना सूत्राधोभागं ऊर्ध्वमुखेन दक्षिणपाणिना सूत्रोर्ध्वभागं च धृत्वा, ''यज्ञोपवीतं परमं'' इति मन्त्रमुच्चार्य धारयेत्, प्रत्युपवीतं आचमनमन्त्रोच्चारणे त्वावश्यके । प्राणायामादिकं नास्ति । ग्रन्थिर्यथोन्मुखस्स्यात्तथा धार्यम् । सर्वेषां नाभिसमं धारणं - एवं नूतनानि धृत्वा आचम्य पुरातनानि कण्ठादादाय त्यजेत् । एवं क्षौराशौचादिनिमित्ते नूतनानि धार्याणि, यज्ञोपवीतेषु यस्य कस्य वा तन्तोः छेदश्लथनादौ जातेऽपि सर्वाणि त्यक्त्वा नूतनानि धार्याणि, भुजकूर्परमणिबन्धेषूपवीते गते त्रीन् षट् द्वादश च प्राणायामान् कुर्यात्। उपवीतनाशे तल्लाभपर्यन्तं परिमण्डलितं वस्त्रं दर्भोपवीतं वा धारयेत्, एकरात्रमप्युपवीतं विना शूद्रो भवति । अस्मिन्नुपवीतविषये वक्तव्यविशेषः कण्ठभूषणादावन्यत्र द्रष्टव्यः ।

* * *

—कटिसूत्रम्—

कटिसूत्रं तु - यतिब्रह्मचारिणोः कौपीनधारणार्थं एकमेव, गृहस्थवनिनोः कौपीनधारणार्थमेकं कर्माङ्गमेकं एतत् बहिर्वस्त्रोपरिधार्यम्। अस्मिन् कच्छो न धार्यः । अनेन वस्त्रबन्धनं अस्य वस्त्रेणाच्छादनं च न कुर्यात्। विवर्तितस्य कटिसूत्रस्य रौद्रत्वाद्वैष्णवैर्न धार्यम् । विवर्तितैः युग्मायुग्मरूपैः पञ्चभिः सूत्रैः व्यतिस्यूतं वैष्णवं कटिसूत्रम् । आशौचाद्युपघाते सति कर्माङ्गसूत्रं देहादुन्मुच्य सम्यक् प्रक्षाल्य पुनर्धार्यम्। तन्तुछेदादि विपर्यासे सति तत्त्यक्त्वा अन्यद्धार्यम्। आन्तरकटिसूत्रन्तु अन्यसूत्रधारणानन्तरमेव त्याज्यम् । क्षणमात्रमपि तत्सूत्राभावे नग्नत्वापत्तेः ।

* * *

—अथ पवित्रलक्षणम्—

पवित्रं तु - चतुर्भिर्दर्भैर्द्वाभ्यां वा कृत्वा धार्यं पितृकर्मणि तु त्रिभिः, प्रेतकर्मणि एकेन, दर्भाग्रे वामपाणिना पुरतो धृत्वा - दर्भद्वयमूलं दक्षिणतर्जन्यामङ्गुष्ठेनासकृदनुवर्त्य मध्येन द्विगुणीकृत्य मूलमग्रं च संयोज्य वलयार्थं द्व्यङ्गुलं विहाय तदुपरि वामकरज्ञानमुद्रया संयुक्तं भागमवलम्ब्य तदूर्ध्वभागेन दक्षिणपाणिना सकृत् प्रदक्षिणमावेष्ट्य ज्ञानमुद्रास्थाने प्रणवेन ग्रन्धिं कुर्यात्, अयं पवित्रग्रन्धिः, एवं च वलयं द्व्यङ्गुलं - ग्रन्धिरेकाङ्गुलं - अग्रं चतुरङ्गुलं भवति, अनामिकामूल मध्यपर्वणोर्मध्ये पवित्रं धार्यं, आचमनकाले तु वामकरे पवित्रं न धार्यं, तथा ब्रह्मग्रन्धिना आचमनं न कार्यं, तद्भिन्नपवित्रहस्तेन कर्मान्तर्गताचमने कृतेऽपि पवित्रस्य नोच्छिष्टदोषः

- तत् कर्मावसाने ग्रन्धिं विस्रस्य प्रक्षिपेत्, कर्मानन्तर्गत नैमित्तिकाद्याचमनं सपवित्रकरो न कुर्यात्, कृते पुनराचमनं तत्पवित्रत्यागश्च, ब्रह्मयज्ञजपहोमाः ब्रह्मग्रन्धिपवित्रेण कार्याः, इतराणि कर्माणि सपवित्रेण सकुशेन वा कार्याणि, ग्रन्धिहीनकुशाभ्यां कर्मकरणे भोजनकाले ताभ्यां वलयपवित्रं कृत्वा तदनामिकया धृत्वा भोक्तव्यम्। भोजनान्ते तद्विसृज्य भुक्तिमण्डले क्षिपेत्, न भुक्तिपात्रे। अन्येन धृतं पवित्रमन्यो न धारयेत्, - एवं भूमौ पतितं दक्षिणकर्णव्यतिरिक्त देहनिक्षिप्तञ्च त्यजेत्, ग्रन्धिं विस्रस्यैव कूर्चपवित्रे त्याज्ये, तयोः सग्रन्धित्यागे एकदिनमुपवासः, कूर्चोपि षोडशभिः - नवभिः - सप्तभिः - दर्भैः कार्यः । ब्रह्मकूर्चस्तु ? द्वात्रिंशत् दर्भैः विंशत्यङ्गुलदीर्घेषु मूलादारभ्य द्वादशाङ्गुल दण्डाकारं विहाय तदूर्ध्वं ब्रह्मग्रन्धिं उक्तद्व्यङ्गुलं कृत्वा पवित्रवदग्रं चतुरङ्गुलं कुर्यात्, स्वर्णपवित्रमपि षोडशाङ्गुलदीर्घाभ्यां स्वर्णशलाकाभ्यां दर्भपवित्रवत्कर्तव्यं । अग्रभागन्तु ग्रन्थिस्थाने आवेष्ट्य द्वेधा वलयं सन्दध्याद्वा स्वर्णपवित्र मप्यनामिकायामेव धार्यं, तर्जन्या रौप्यधारणं कनिष्ठिकया खड्गवलयधारणञ्चाचाराभावादुपेक्षितम्। सुवर्णादिपवित्रं जीवपितृकेन न धार्यमिति वदन्ति। दर्भपवित्रात् स्वर्णपवित्रस्योत्कृष्टत्वं तत्र तत्रोच्यते । तावता धृतस्वर्णपवित्रस्य दर्भपवित्रधारणं नावश्यकमिति नार्थः । किन्तु ? उभयोर्द्धारणे विशेषः । कचन समये दर्भालाभे स्वर्णपवित्रमेवालमित्येव वा तदर्थः, सर्वत्र कुशहस्तस्यैव, प्राशस्त्यस्य प्रतिपादनात् । कुशकनकादिरूपं किमपि पवित्रं धृत्वा स्वस्य अन्यस्य वा पादप्रक्षालनं न कार्यम् । ब्राह्मणगुदस्य स्त्रीकुचमण्डलस्य शङ्खस्य पवित्रकूर्चयो स्ताम्बूलवल्लीदलस्य च भूमिस्पर्शे महान् दोषः - तथा सपवित्रेण करेण भगवत्तीर्थ प्राशनादिकं

गन्धगोमयादिग्रहणं अशुद्धवस्तुस्पर्शश्च त्यजेत् । तत्सम्बन्धे सति तत्पवित्रं त्याज्यम् । दर्भाः अङ्गुष्ठमानेन षोडशाङ्गुलदीर्घाः विंशत्यङ्गुलिदीर्घा वा ग्राह्याः । अन्तर्गर्भिताः छिन्नाग्राः दग्धाः अशुद्धस्थलीयाश्च दर्भास्त्याज्याः, दर्भालाभे काशा ग्राह्याः । काशानान्तु तत्तत्कालं शुद्धिरित्यलं विस्तरात्, ''शुद्धिप्रसङ्गात् सर्वेषां शुद्धिरुच्यते ।

* * *

—इन्द्रियशुद्धिः—

तत्रेंद्रियशुद्धिरुच्यते । भगवद्भागवताचार्यनिन्दनतामसशास्त्र-श्रवणवर्जनपूर्वकम् भगवद्भागवताचार्य माहात्म्य सच्छास्त्रश्रवणं श्रोत्रशुद्धिः । परस्त्रीपतिताद्यंङ्गस्पर्शवर्जनपूर्वकं महातीर्थस्नानं महद्दिव्याङ्गसम्बन्धजन्यानन्दशालिता त्वक्शुद्धिः । परस्त्रीपाषण्डाद्य वेक्षणवर्जं भगवद्भागवताचार्यदर्शनं दृक्शुद्धिः । जात्याश्रयनिमित्त दुष्टवस्त्वशनवर्जं भगवत्तीर्थप्रसादास्वादनं जिह्वाशुद्धिः । मद्यमांसपुरीषादिगन्धाघ्राणवर्जं भगत्पुष्पतुलस्यादि गन्धाघ्राणं घ्राणशुद्धिः । परापवादपैशुन्यादिवादासच्छास्त्रपठनादिवर्जं भगवन्नाम-सङ्कीर्तन सच्छास्त्रपठनादिकं वाक् शुद्धिः । परदाराङ्गस्पर्शवृथातृणच्छेद बालताडनादिवर्जं भगवन्मन्दिर संमार्जन संशोधनालङ्करण तुलस्याहरणादिकं हस्तशुद्धिः । भगद्भागवताचार्याभिमुख-प्रसारणादिवर्जं पुण्यतीर्थ पुण्यक्षेत्रयात्रादिकं पादशुद्धिः । सत्सन्निधावधोवायुविसर्जनवर्जं सर्वदा वस्त्रेणाच्छादनं पायुशुद्धिः । अन्ययोषिद्विषये अकालेचोल्बणवर्जं स्वस्त्रीविषये उल्बणं उपस्थशुद्धिः । परस्वापहारादि चिन्तनवर्जं भगवद्ध्याननिरतत्वं मनश्शुद्धिः । शुष्क-

तर्ककेवलकाव्यालापादिविषयीकरणवर्जं तत्वहितोपायविषयीकरणं बुद्धिशुद्धिः । मलापकर्षणस्नानमलमूत्रादिशौचमृत्तिकास्नान नासिका-कर्णनेत्रमलविसर्जनादिभिः नैर्मल्यं कायशुद्धिः । धार्मिकराजाधिष्ठानं म्लेच्छपाषण्डपतित सिंहव्याघ्रादि दुष्टमृगवर्जनं - जीवनदीदेवखात-सारङ्गाश्रयणं तृणकाष्ठजल भागवतसमृद्ध्यादिमत्वं देशशुद्धिः । सङ्क्रमणोपरागादिवर्जं पुण्यतिथिनक्षत्रादियोगः कालशुद्धिः । मदमोहाद्यनुत्पादकं ज्ञानवृद्धिकरं सात्विकत्वमेव द्रव्यशुद्धिः ।

अथ पात्रादिशुद्धिरुच्यते

स्वर्णरत्नमयपात्राणां अलेपानां केवलवारिणा शुद्धिः - सलेपानां शर्कराम्भसा गोमूत्रेण भस्मना च । रौप्यमयानान्तु सुधांभसा । कांस्यस्य होमभस्मना - मृदा - आम्लेन वारीत्यादीनां मृदा । ताम्रस्य आम्लेन । त्रप्वयस्सीसानां गोमयांभसा । एतेषां साधारणाशुद्धिस्त्रिवारं - शूद्रोपघातादि निमित्ते निमित्तगौरव लाघवानुगुणं चतुर्विंतिद्वादशवारं मृदाम्लभस्मोदकैः शुद्धिः, सूतकाशौचाद्युपघाते दासितः शुद्धिः, कांस्यस्य न दाह इति केचित् । लोहान्तरसंसृष्टपात्रस्य प्रधानलोहशुद्ध्यैव शुद्धिः, दारुमयानां स्रुक् स्रुवादिपात्राणां उष्णांभसा तेषां सलेपत्वे गोमूत्रेण, शङ्खस्य वारिणा, शिलामयपात्रस्य घर्षणात् शुद्धिः, मृण्मयपात्रस्य वारिणा, एतयोः शूद्राद्युपघाते त्याग एव । पुंसा कांस्यपात्रेण स्त्रिया ताम्रपात्रेण गण्डूष पादप्रक्षालने कृते तयोष्षण्मासं भूमौ निक्षेपतश्शुद्धिः । चालनाद्यशक्यानान्तु पात्राणां सकृत्क्षालनात् प्रोक्षणात् शुद्धिः । कृत्रिमलोहस्य न केनापि शुद्धिः, लेपनपुण्याह-जलप्रोक्षणदाहैर्निमित्तानुगुणं भूशुद्धिः । गृहस्य संमार्जनलेपनप्रोक्षण-पूर्वकं ब्रह्मवित्पादस्पर्शात् शुद्धिः । गृहैकदेशदाहेपि सर्वङ्गृहमशु

प्रोक्षणतश्शुध्येत्। दाहदेशस्थितधान्यानां त्याग एव, तत्र भूनिक्षिप्तानां न दोषः । कोद्रवयावनालक प्रभृतिक्षुद्रधान्यानि भगवदनिवेद्यानि । धान्यानां चण्डालादि स्पृष्टानामपि प्रोक्षणतश्शुद्धिः । तेषां खरसूकराद्युच्छिष्टोपघाते अल्पस्य त्यागः महतां उच्छिष्टादिसम्बन्धिस्थलीय किञ्चिदंशस्य त्यागः, तण्डुलानां द्विदलसूपानां च प्रोक्षणतश्शुद्धिः । व्रीहियवानां वत्सरम् । आढकादीनां षण्मासं । तण्डुलस्य मासं शुद्धिः । तेषां चण्डालादिस्पर्शो वर्जनीयः, तेषां पूर्वोक्ताच्छिष्टाद्युपघाते पूर्वोक्तैव युक्तिः । तण्डुलाद्याश्रयपात्राणां मृण्मयानां पुरातनानामपि कर्मकालव्यतिरिक्तकालस्पर्शे न दोषः । नूतनानान्तु तेषां कदापि न दोषः । तैलादीनां क्षीरादीनां च शूद्रपात्रस्पर्शेपि न दोषः । तेषु कृमिकीटकेशादि सम्बन्धे तैलादेः किञ्चित्पाकेन शुद्धिः । क्षीरादेरग्निशिखा सम्बन्धात् शुद्धिः । तेषामुच्छिष्टसम्बन्धे तैलादेरल्पस्य त्यागः । महतः किञ्चिदंशत्यागः । क्षीरादेः सर्वस्यापि त्यागः । एतेषु मूषिकादिजन्तुपतने सद्योदर्शने जन्तुमपोद्य पूर्वोक्तरीत्या शुद्धिः । तत्र जन्तुनाशे सर्वस्यापि त्यागः - तैलाद्याश्रयपात्राणां मृण्मयानामपि कर्मकालव्यतिरिक्तकालस्पर्शे न दोषः । (स च कालो भोजनात्परमित्यवगन्तव्यम्) तैलानां षण्मासं शुद्धिः । घृतस्य पक्षं शुद्धिः । पत्रशाकफलानां क्षालनतश्शुद्धिः । नागवल्लीदलानि रात्रौ न क्षालयेत्, इक्षुकांडङ्कदापि न क्षालयेत् - इक्षुजलस्य हिमजलस्य च शूद्राहृतत्वेपि न दोषः । इक्षुरसहरिद्रा क्रमुकानां शूद्रपक्वानामपि न दोषः । अज्ञातनामरूपाणि धान्यपत्रशाकफलकन्दादीनि कदापि न ग्राह्याणि । कार्पासवस्त्राणामेकरात्रं शुद्धिः । ततः परं क्षालनाच्छुद्धिः - त्वाचक्षौमरोममयानां तु पुरातनानामपि शूद्रादिस्पर्शेपि प्रोक्षणाच्छुद्धिः । एतेषु पुरीषोच्छिष्टादि

सम्बन्धे तावन्मात्रदेशक्षालनाच्छुद्धिः । अहतस्य नूतनवाससो यावदुपभोगं शुद्धिः, रागरञ्जितं नीलादिवस्त्रं च न धार्यम् । पट्टवस्त्रे नीलतन्तु सम्बन्धेपि न दोषः, धौतस्य शुष्कस्य शुद्धस्य कार्पासवस्त्रस्यैव सर्वकर्मानुष्ठानार्हत्वं - केचन क्षौमादिकं धृत्वा सन्ध्यावन्दनादिकमनुतिष्ठन्ति । क्षौमादिकं धृत्वा भगवदाराधनाद्यनुष्ठानं गौणमेव । स्त्री वा पुमान्वा अन्यवस्त्रन्नधारयेत् । तेन कृतं कर्म निष्फलं । तूलिकोपधानशय्यादिकानां यवनिकायाश्च सूतकाद्युपघातेपि प्रोक्षणतश्शुद्धिः, तेषां पतितचण्डालखरशवाद्युपघातादिनिमित्ते सति निमित्ततारतम्यानुगुणं यथामनस्समाधानं क्षालनं त्यागो वा कार्यः ।

अथ पुरुषशुद्धिः

उपनीतस्य कृतपञ्चसंस्कारस्यातीतद्वादशवयसः परिशुद्धचरित्रस्य पुंसस्सर्वकर्मार्हिता ।

अथ स्त्रीशुद्धिः

चक्रादिलाञ्छितायाः ऊढायाः प्राप्तरजसः शुद्धचरित्राया स्त्रियस्सर्वकर्मार्हिता ।

अथ जलशुद्धिः

गङ्गादिपुण्यतीर्थव्यतिरिक्तजलस्य दिनान्तरे अशुद्धिः, निरुदकप्रदेशे तु निक्षिप्तकुशस्य संरक्षितस्य जलस्य दिनद्वयं शुद्धिः शूद्रादिवापीकूपादिजलं न ग्राह्यं, जलान्तराभावे तत्र किञ्चिन्मृदमुद्धृत्य बहिः क्षिप्त्वा ग्राह्यं, वापी कूपतटाकानामशुद्धिश्चेत् घटशतजलोद्धारे शुद्धिः, अशुद्ध्याधिक्ये पुण्याहजलेन पञ्चगव्येन च शुद्धिः । क्षुद्रकूप शूद्रादिस्पर्शं वर्जयेत्, एकस्मिन् क्षुद्रकूपे शूद्रैस्सहजलन्नाहरेत्, अलाभे

स्थलभेदेन रज्जुभेदेन वा आहरेत्, वाहनशकटादि धृतं जलन्नपेयं, तथा पीतशेषं पादक्षालनशेषश्च न पिबेत् । स्वपीतशेषन्तु किञ्चिन्निस्राव्य पिबेत्, रथ्याकर्दमतोयस्य वातातपशुद्धत्वात् तत्स्पर्शेपि न दोषः । पादक्षालनपात्रस्य पानीयपात्रस्य पाकपात्रस्य भगवत्पूजापात्रस्य चान्योन्यसंसर्गन्न कारयेत् । पादक्षालनपात्रेण अन्येन वा अशुद्धेन वस्तुना तेषां संसर्गे षोडशवारं तेषां शुद्धिः कर्तव्या - पानीयपात्रेण तयोस्संसर्गे षड्वारं शुद्धिः, पाकपात्रेण भगवत्पात्रस्य संसर्गे तस्य सकृच्छुद्धिः । केशवादिनामभिः व्यूहनामभिः अन्यैर्वा भगवन्नाम्नि्निर्गणनं कृत्वा शुद्धिः कर्तव्या । स्त्री वा पुमान्वा स्वीयव्यतिरिक्तपात्रेण जलन्न पिबेत्, अज्ञानात्पाने पात्रतारतम्यानुगुण्येन घृतेन भगवत्तीर्थेन पञ्चगव्येन वा शुध्येत् । मुसलोलूखलादीनां क्षालनतश्शुद्धिः, शूर्पपिटकचालिन्यादीनां प्रोक्षणतश्शुद्धिः, पात्राणां शुद्ध्यर्थं आम्लादिद्रव्यं वस्त्रेण धृत्वा शुद्धदेशे निक्षिप्य तेन शुद्धिं कुर्यात् । आम्लादेरशुद्धपात्रसंस्पर्शन्न कारयेत् । तथा कृते तेनाम्लादिना शुद्धिर्न स्यात्, शुद्धि काले तु ? स्वपरनिर्वाहकतया न बाधः, प्रतिशुद्धि करक्षालनं कुर्यात्, अन्यथा शुद्धिर्न स्यात् ।

* * *

—अथ अग्निशुद्धिः—

पतितपाषण्ड चण्डालचिताग्निं कदाचिदपि नाहरेत् । श्रोत्रियाग्निं ब्राह्मणाग्निं वा आहरेत् । आपदि शूद्राग्निमाहरेत् । मथनशिलाघर्षणाद्युत्पन्नोऽग्निः मुख्यः ।

* * *

—अथ अन्नशुद्धिः—

अन्नव्यञ्जनादेर्यामातीतत्वे पर्युषितत्वदोषः, अन्नस्य शुद्धजलनिक्षेपे एकरात्रं शुद्धिः। तथा स्नेहादिसम्भारसंस्कृतस्य चान्नस्य एकरात्रं शुद्धिः। गोधूमविकारादिभक्ष्याणा मनेकदिनातीतत्वेपि न दोषः। शूक्तादिरसान्तरोत्पादे तु मधुघृतादिभिस्संस्कृत्य भोज्यानि। अत्यन्तशूक्तोत्पत्तौ तु त्याज्यानि - भगवन्निवेदितशेषान्नव्यञ्जनानि न पुनर्भगवते निवेदयेत्। मधुदधिघृत वटकोपदंशानान्तु न तद्दोषः। शूद्ररजस्वलादि भुक्तशिष्टन्न भुञ्ज्यात् - अबन्धुस्पृष्टमन्नव्यञ्जन भक्ष्यगुधाचूर्णादिकन्नाद्यात् शिवादिनिवेदितं शिवनिर्माल्यपुष्पादिकञ्च त्यजेत्।

* * *

अथ समित्पुष्पादिशुद्धिः—

पुष्पाणां क्षालनात् शुद्धिः, आहृतस्य पुष्पस्यैकरात्रं 'शुद्धिः' पुष्पतुलस्यादिकं बालाशुचिस्त्रीहृतं मध्याह्नात्परमाहृतं हस्त - वस्त्र - एरण्डपत्राहृतं च त्याज्यं। तुलसीं भार्गवकुजार्कवारेषु पर्वकाले संक्रमणोपरागयोः षष्ठ्यष्टमीद्वादशी चतुर्दशीषु व्यतीपाते च नाहरेत्। शुद्धिदिने पूर्वाह्णे *''तुलस्यमृतजन्मासी''ति मन्त्रेण शुचिना गृहीतायास्तुलस्याः यावत्सत्त्वं शुद्धिः, नभसि नभस्ये माघे वा मासि पर्वकाले चतुर्दश्यां वा पूर्वाह्णे शुचिना प्राङ्मुखेनोदङ्मुखेन वा शुद्धायुधेन ''विरिञ्चेन सहोत्पन्न परमेष्ठिनिसर्गज। नुद सर्वाणि पापानि दर्भ स्वस्तिकरो भव''ति मन्त्रेण दर्भग्रहणं कर्तव्यं। तस्य संवत्सरं शुद्धिः। इतरकाले गृहीतस्य तत्तत्कालमात्रं शुद्धिः। उच्छिष्टाद्युपहतानां

कर्मान्तरोपयुक्तानाञ्च त्याग एव। मन्दवारगृहीतानां समिधां वत्सरं शुद्धिः। ''समिधः पावनाः पूज्याः पर्वयुक्ताः पुरः पराः - युष्मान् हरामि होमार्थमस्मान्रक्षन्तु सर्वदा'' इति मन्त्रेण समिधो ग्राह्याः। पलाशसमिध आर्द्रा एव ग्राह्याः। सत्वकाः कृमिकीटाद्यदष्टाः ग्राह्याः। अश्वत्थसमिधश्शुष्काः स्वयं पतिता ग्राह्याः - पालाशाश्वत्थसमिधां वत्सरं शुद्धिः। तासामुच्छिष्टाद्युपघाते कर्मान्तरोपयुक्तत्वे च त्याज्याः, अलाभे खादिरोदुम्बरापामार्गसमिधो ग्राह्याः, तासां तत्तत्कालं शुद्धिः, दशाङ्गुलिदीर्घास्समिधः, करद्विदीर्घाः परिधयः, ब्रह्मचारिणामाकेशमुन्नतो दण्डः, तन्न्यूनस्त्याज्यः, होमार्थपलाशपत्राणां समिद्वदेव ग्रहणशुध्यादिकं, पलाशपत्रालाभे चूतपत्रेण पनसपत्रेण होमः कार्यः, एवमन्येषामपि शुद्धिर्द्रष्टव्या - एवं मन्वाद्यनेकस्मृत्यनुरोधेन शुद्धिरुक्ता।

इत्थं सर्वेषां वस्तूनां शुद्धिमुक्त्वा मलमूत्रोत्सर्जन प्रभृति क्रियमाण नित्यकर्मसु वक्तव्यविशेष उच्यते। सोपानत्पदो मलमूत्रोत्सर्गं न कुर्यात्। स्वमलदर्शने सूर्यं ब्राह्मणं वा पश्येत्। आर्द्र वाससा मलमूत्रोत्सर्गे कृते स्नानं कुर्यात्, मलमूत्रोत्सर्जनानन्तरं श्वादिस्पृष्टश्चेत् सचेलं स्नात्वा गायत्री सहस्रं जपेत्, मलमूत्रोत्सर्गकाले गृहीतजलस्य शौचानर्हता। निरुदकदेशे चोराधिष्ठितकाननादिप्रदेशे च मलमूत्रोत्सर्गस्य कर्तव्यत्वे कम्बलभस्त्रिकादिधृतं धौतवस्त्रादिस्नानोपकरणं शिरसि सम्यग्वस्त्रेण बध्वा मलमूत्रोत्सर्गः कार्यः, आप्रक्षालनं तन्न स्पृशेत्, उपवीतिना मलमूत्रोत्सर्गे कृते तत् ब्रह्मसूत्रं त्यक्त्वा नूतनं धरेत्, निवीतेन कृते दश प्राणायामान् - अर्धनिवीते तु विंशति प्राणायामान् कुर्यात्। सद्यश्शौचाय सलिलालाभे सलिले विण्मूत्रकरणे च अन्यत्र जले शौचं कृत्वा सचेलं स्नात्वा गां स्पृशेत्, विद्यमानेपि जले सद्यश्शौचाकरणे

सचेलं स्नात्वैककालमुपवसेत्, शौचमकृत्वा मार्गगमने स्नात्वा व्याहृतित्रयं लौकिकाग्नौ जुहुयात्, कृतविण्मूत्रस्य अकृतशौचस्य जलतरणे सचेलं स्नात्वा घृतप्राशनाच्छुद्धिः, विण्मूत्रोत्सर्ग प्रभृति आगण्डूषं मौनी भवेत् - मध्ये कामतो मौनत्यागे गायत्र्यष्टशतं जपेत्, दैवाच्चेदर्धम् । धृतान्नस्य विण्मूत्रोत्सर्गे तदन्नन्त्याज्यं, निर्जनचोराद्युपद्रववति देशे तु धृतान्नो विण्मूत्रोत्सर्गं कृत्वा तदन्नं भूमौ निक्षिप्य शौचं कृत्वा तदन्नमङ्के निधायाचम्य तस्मिन् किञ्चिदंशं वर्जयित्वा सूर्याय प्रदर्श्य भुञ्ज्यात्, अनुपपत्तिवशात् प्रक्षालनकाले अन्नधरणेपि पूर्ववदेव।

* * *

—अथ आचमनं—

श्वखरशूद्रादीन् पश्यन् जल्पन् तिष्ठन्प्रतीचीदक्षिणाभिमुखो नाचामेत्, तथाचमने कृते पुनराचामेत्। जानुदघ्नजले तु तिष्ठन्नाचामेत्। शिखाकच्छगलने यज्ञोपवीतविपर्यासे शोणितस्त्री गवां स्पर्शे क्षुधष्ठींवनजंभणेष्वाचमनं दक्षिणश्रवणस्पर्शरूपं वा कार्यम् । पूजाहोमादिषु आदौ द्विः अन्ते सकृत्। स्नानभोजनादिषु आदौ सकृत्। अन्ते द्विराचमनं कार्यम्। आह्निके तु स्नानस्यादावपि द्विराचमनमुक्तम्। यथोचितमत्र ग्राह्यम्। फलमूलतिलेक्षुपुष्पतुलसीव्यतिरिक्त भक्षणेप्यन्ते आचमनं जलाभावाद्यसमये दक्षिणश्रवणस्पर्शरूपं वा कार्यम्। यत्र यत्र पादप्रक्षालनं तत्र तत्राचमनं, यत्र यत्राचमनं प्राप्तं तत्र तत्र पादप्रक्षालनञ्च। तर्जन्या न दन्तधावनं कार्यम् । सोपानत्पदस्तैलाभ्यक्तः कृतक्षौरः अनुपवीतश्च न दन्तधावनं कुर्यात्। करणे अहरुपवासः । अशक्तौ गायत्र्यष्टशतं जपेत् । गण्डूषन्तु

सर्वत्रासीन एव वामभागे कुर्यात्, जले पाणौ स्नाने च नगण्डूषान् कुर्यात्।

* * *

—अथ स्नानक्रमः—

प्रथमतः स्नानं षड्विधम्। नित्यं नैमित्तिकं काम्यं मलाकर्षणं क्रियारूपं क्रियाङ्गश्चेति । प्रातःस्नानादिकं नित्य् । जननमरणाशुद्धस्पर्शनादिनिमित्ते क्रियमाणं नैमित्तिकम् । पुष्यस्नानादिकं काम्यम् । तैलोद्वर्तनादिभिः स्नानं मलापकर्षणम् । समुद्रगङ्गादि पुण्यतीर्थस्नानं क्रियारूपम् । श्राद्धहोमपूजाद्यंगतया क्रियमाणं स्नानं क्रियाङ्गम्। सङ्क्रान्त्युपरागस्नानादिकमपि नित्यम् । अकरणे प्रत्यवायश्रवणात् । एतेषु काम्यं स्नानं सकामानामेव । निष्कामैर्नकार्यम्। जननमरणादि निमित्तमन्तरेण निशि न स्नायात्। चन्द्रोपरागे तु निशिस्नानं न बाधकम्। यदि निमित्तान्तरवशात् करणीयं तदा अग्निं प्रज्वाल्य कुर्यात्। चण्डालादिवापीकूपतटाकेषु न स्नायात्। यदि स्नायात् बुद्धिपूर्वे उपवासत्रयेण । अबुद्धिपूर्वे एकोपवासेन । ब्रह्मकूर्चेण वा शुद्धेत्। अन्यनद्यां गङ्गागोदावरीव्यतिरिक्तनदीनाम न कीर्तयेत्। नद्यां सर्वदा प्रवाहाभिमुखं, वाप्यादौ तु दिवा सूर्याभिमुखं, रात्रौ प्रथमयामे प्रत्यङ्मुखं, पश्चिमयामे प्राङ्मुखं, मध्ययामयोः प्राङ्मुखोदङ्मुखं वा स्नायात्। अशक्तानामुष्णोदक स्नाने न दोषः । शक्तानान्तु सप्तदिनोष्णोदकस्नाने प्राजापत्यकृच्छ्रतरशुद्धिः । अशक्तानामप्येकादशी पर्वसङ्क्रान्त्युपराग श्राद्धदिन जननमरणाशुचि स्पर्शादिनिमित्तेषूष्णोदकस्नानं निष्फलम् । आतुराणान्नदोषः । नूतनप्रवाहे नद्यां त्रिरात्रन्न स्नायात्। काले अकाले वा नद्यां नूतनजलस्य

महतः स्नानानर्हता अल्पस्य तु न दोषः, नीराद्दूरजले भ्रमणवशात् गतप्रत्यागतजले च न स्नायात्, स्नानकाले अन्यदा वा आर्द्रवाससा मुखादिकञ्च परिमृजेत्। तथा नाभेरधोभागदेहस्य दक्षिणहस्तेन शोधनं पादेन पादघर्षणञ्च न कुयार्त्। आतुरो न स्नायात्। सुहृद्बन्ध्वादीननुव्रज्य न स्नायात्। मार्गे नदीदर्शने स्नात्वा आचम्य वा तान्नदीं लङ्घयेत्। कटकमासि गङ्गा कृष्णा गोदावरी नर्मदाव्यतिरक्तासु समुद्रगासु नदीषु त्रिदिनं, असमुद्रगासु नदीषु मासं न स्नायात्, एवं स्नात्वा शिखां पृष्ठतो वामभागतो वा अनालम्बयित्वा पुरतो दक्षिणतो वा आलम्बयित्वा तीरं गच्छेत्। धर्मशास्त्रोक्तरीत्या वा पूर्वाचार्योक्त मृत्तिकास्नानरीत्या वा यदवगाहनात्मकं तदेव वारुणं स्नानम्। तदेव मुख्यम्। कापिलादिकं गौणस्नानम्। तत्र मन्त्रस्नानश्चतुर्विधम्। आपोहिष्ठेत्यादिनवभि-स्सप्रणवैः पादशिरो हृदय शिरो हृदय पाद हृदय पाद शिरस्सु च यथाक्रमं प्रोक्षणरूपमेकं। शन्नोदेवी X नः। आपो वा इदं + सुवराप ओम्। द्रुपदादिव X मैनसः। आपोहिष्ठा X यथाचनः, इत्येतैर्मन्त्रैश्शिरसि प्रोक्षणरूपं द्वितीयम्। आपोहिष्ठेति नवभिः पाद शिरो हृदयेषु त्रिवारं पादशः प्रोक्ष्य ततोर्धशः शिरोहृत्पादेषु द्विः प्रोक्ष्य ततः ऋक्त्रयरूपै रापोहिष्ठेत्यादिनवभिः हृदयपादशिरस्सु एकवारं प्रोक्ष्य ततस्समस्तेन तेन शिरसि प्रोक्षणरूपं तृतीयम्। वह्निवंशेश्वरोक्तरीत्या पवित्रमन्त्रजपपूर्वकमूलमन्त्रप्राणायामरूपं चतुर्थं। *। मानसिकस्नानं ''खस्थितं पुण्डरीकाक्ष'मित्याद्याह्निकोक्त भगवद्दिव्यमङ्गल-विग्रहध्यानरूपं। मन्त्रस्नानमानसिकस्नाने तु अवगाहनस्नानवतापि नित्यं कर्तव्ये एव। अशक्त्या उष्णोदकस्नाने कर्तव्ये सङ्कल्पान्तं यथावत् कृत्वा समस्तजगदाधार — निषेवणे इत्यनुज्ञाप्य प्रथमतस्तूष्णीं स्नात्वा देहं सम्यक् प्रक्षाल्य तदुष्णोदकं किञ्चित् कस्मिंश्चित् पात्रे धृत्वा तस्मिन्

भगवद्दिव्यवामपादाङ्गुष्ठगलत् गङ्गासान्निध्यं प्रार्थ्य गङ्गायै मनसा सर्वोपचारान् समर्प्य, तेन जलेन आपोहिष्ठेत्यादिभिर्मूलमन्त्रेण चात्मानं प्रोक्ष्य ततस्तज्जलमिश्रितेन उष्णोदकेन स्नात्वा अन्यतो गत्वा शुद्धजलेनाचम्य शुष्कवस्त्रेण देहं संमार्जयेत्। इत्थं गौणतया मुख्यतया वा यत प्रतिदिनमनुष्ठीयते तन्नित्यं स्नानम्। नैमित्तिकन्तु यन्निमित्ते जाते क्रियमाणं तत्। यत्तु नित्य नैमित्तिकादि स्नानानन्तरं चण्डालादिदर्शने स्नानशाट्या देहपरिमार्जने उभाभ्यां वस्त्रनिष्पीडने आर्द्रवस्त्रन्निष्पीड्य स्कन्धपादनिक्षेपे स्नानवस्त्रमूर्ध्वमनुद्धृत्याधस्तात् त्यागे परित्यक्त स्नानवस्त्रस्य अनाचम्य अप्रोक्ष्य च स्पर्शने च पुनः स्नानं विधीयते तन्न नैमित्तिकं। किन्तु स्नानानन्तरमुक्तनियमातिक्रमे पूर्वकृतस्नानस्यैवा-सिद्धेः पूर्वस्नानस्थानापन्नत्वेन तत्पुनः स्नानमेव। नैमित्तिकस्नानं द्विविधं, सामान्यं सचेलस्नानश्चेति। सामान्यस्नानन्तु नित्यस्नान-वदाचमन प्राणायामसङ्कल्पोत्तरीयक्षालनपूर्वकं जले प्रविश्य सूक्तजपादिपूर्वकं क्रियमाणं। सचेलस्नानन्तु निमित्ते जाते आचमनादिकं कृत्वा प्रथमतो यथावस्थित एव जले निमज्ज्यानन्तर-माचमनाद्यनुष्ठानपूर्वकं क्रियमाणम्। एतत्सचेलस्नानं द्विविधम्। एकस्नानात्मकं स्नानद्वयात्मकञ्चेति। पूर्वन्तु यथावस्थितो जले निर्निमज्ज्याचमनाद्यनुष्ठानपूर्वकं क्रियमाणम्। द्वितीयन्तु ? यथावस्थितो जलं प्रविश्य त्रयोदशवारन्निमज्ज्याङ्गानि संमृज्य आर्द्रवस्त्रं शुष्कीकृत्य परिधाय मृदा जलेन वा पुण्ड्रधारणं कृत्वाचमनप्राणायामपूर्वकं सङ्कल्प्य पुनः क्रियमाणं स्नानम्। सर्वेष्वपि नैमित्तिकस्नानेष्वङ्गभूतं देवर्षिपितृतर्पणं कार्यम्। केचिदेतेष्वघमर्षणपठनदेवर्षिपितृतर्पण-निषेधान्नास्तीति वदन्ति। यथासम्प्रदायमनुष्ठेयम्॥

* * *

—स्नाननिमित्तानि—

नैमित्तिकस्नाने निमित्तान्युच्यन्ते। षण्डपाषण्डपतिता भोज्यान्न, भ्रान्तोन्मत्त, खरोष्ट्र गौलीकृकलासाखुवृक गर्दभवानर, गृध्रकाककुक्कुटसूकर, श्मशानप्रेतधूमचितिकाष्ठचिति, सुरा तत् भाण्ड, लशुनास्थि मांसासृक्, रेतो विण्मूत्रान्यदेवलकनिवृत्तयज्ञीययूपादिसम्बन्धाः। पत्नीप्रसवे सद्यः स्नायात्। भोजनादिकर्मकाले बिडालप्सर्शे स्नायात्। भोजनात्पूर्वं वमनपुरीषोत्सर्जन शोकाश्रुपतनप्रेतसूतिकादर्शन तद्वाक्यश्रवणेषु सचेलं स्नायात्। अस्थिसञ्चयनात्पूर्वं प्रेतबन्धुजनसमाश्वासने स्नायात्। तदूर्ध्वश्चेदाचमनमात्रम्। प्रेतकर्मारम्भात्पूर्वमबन्धुश्चेत्स्नायात्। प्रारब्धे तु समाप्त्यनन्तरमेव। बन्धुजनस्त्वनन्तरमेव। प्रेतानुगमने कृते त्रयोदशवारन्निमज्य पुनः स्नायात्। प्रेतवहने कृते सचेलस्त्रयोदशवारन्निमज्य घृतं दशवारं गायत्र्यभिमन्त्रित चुलकजलं वा पीत्वा पुनःस्नायात्। भोजनात्परन्नाभेरधश्शुना स्पर्शे तद्देशं प्रक्षाल्याग्निना किञ्चित् प्रताप्य पुनः प्रक्षाल्य पादक्षालनपूर्वक माचामेत्, तदूर्ध्वाङ्गस्पर्शे सचेलस्नानम्। नाभेरधश्शुना दंशे आहिताग्नेरेकदिनम्। अनाहिताग्नेर्दिनद्वयम्। ब्रह्मचारिणो दिनत्रयम्। क्षीरपानेनेपवासः। तदूर्ध्वाङ्गदंशे द्विगुणम्। रजस्वलाचण्डालसूतिका प्रसूतिकारयित्रीस्पर्शन मबुद्धिपूर्वकश्चेत् सचेलं स्नात्वा गायत्रीसहस्रं जपेत्। बुद्धिपूर्वे प्राजापत्यम्। तद्भाण्डस्पर्शे सचेलस्त्रयो दशवारन्निमज्य घृतप्राशनं तत्पर्यायं वा कृत्वा पुनः स्नायात्। चण्डालस्य पञ्चाशत्पदानि सूतिकायाष्षट्त्रिंशत्पदानि उदक्याया श्चतुर्विंशतिपदानि पतितम्लेच्छकैवर्त बुरुडरजकमेदोनटभिल्लसुवर्णकांस्यायश्शिला दारुकार ध्वजितैलितन्तुवायक्षुरिप्रभृतीनां द्वादश

पदानि दूरतो गच्छेत्। तन्यूनश्चेत्स्नायात्। पत्तने पथि च तदर्धम्। तृणकाष्ठ समूहकुड्यान्तरितत्वे सामीप्येपि न दोषः। न्यूनपदेस्सन्निकृष्टस्यैव स्नानम्। तत्स्पृष्टस्याचमनतश्शुद्धिः। शूद्रादिस्पृष्टस्य सचेलस्नानम्। तत्स्पृष्टस्य द्वितीयस्य साधारण स्नानम्। तृतीयस्याचमनतश्शुद्धिः। अबुद्धिपूर्वकत्वे द्वितीयस्याप्याचमनमेव। चण्डालादिस्पृष्टस्य कृतक्षौरस्य च सचेलं त्रयोदशनिमज्जनपूर्वकं पुनः स्नानम्। तत्स्पृष्टस्य द्वितीयस्य सचेलस्नानम्। तृतीयस्य साधारणम्। अबुद्धिपूर्वकत्वे तृतीयस्याचमनम्। रोगिणो द्वितीयस्य गौणस्नानम्। चतुर्थस्य बुद्धिपूर्वकत्वेप्याचमनमेव। चण्डालाद्यस्पृश्यच्छायास्पर्शे स्नायात्। तत्र द्वितीयादेर्न दोषः। चत्वारिंशत्पदात्परं छायादोषो नास्ति। शूद्रादयो भारवाहिनश्चेत् तेषां मार्गं दत्वा स्वयमपक्रमेत्। नोचेत्तावेवापक्रामयेत्। न स्वयमपक्रमेत्। स्वयमपक्रमणे स्नायात्। दिवामैथुने पञ्चपर्वमैथुने च सचेलं स्नायात्। बालस्या सप्तममासाद्रजस्वलादिस्पर्शे प्रोक्षणमेव। तदूर्ध्वमा चतुर्थाब्दाज्जलेन मार्जनम्। तदूर्ध्वश्चेत् स्नानम्। रजस्वलाशयनपात्रादिकं स्पृष्ट्वा स्नानमकृत्वा भुञ्जीत चेत् स्नात्वैकदिनमुपवासः। तदुच्छिष्टवस्त्रादिस्पर्शे सचेलं स्नात्वा ब्रह्म कूर्चं पिबेत्। स्नानादिकमकृत्वा भोजने दिनत्रयमुपवासः। रजस्वलासंयोगे सान्तपनकृछ्रम्। "शूद्रान्त्य-स्पर्शसामीप्यादिनिमित्ते अज्ञाते न दोषः। सद्यो ज्ञाने तु स्नायात्। कालान्तरे एतादृशं निमित्तन्तव जातमिति केनाप्युक्ते सति मनसो व्याकुलत्वे स्नायात्। नो चेन्न स्नायात्। अज्ञातत्वावस्थायां कृतस्य कर्मणो न हानिः। तत्स्पृष्टस्यापि न दोषः। विष्णुमन्दिरे शूद्रादिस्पर्शेपि न दोषः। विष्णूत्सवे आलयात् बहिरपि षण्डपाषण्ड पतितचण्डालादिस्पर्शेपि न दोषः। मोहात् स्नाने कृते

भगवत्सन्निधाकपराधक्षापणं कुर्यात् । भगवत्सेवार्थमनागतानां भगवद्वेषिणाञ्च स्पर्शेनासमाहितमनस्कतया स्नाने कृते न दोषः । शूद्रवाटीस्थकर्दमतोयस्य जङ्घाधः प्रदेशसम्बन्धे पादौ प्रक्षाल्य जङ्घयोस्तिस्रः पादयोः प्रत्येकं षण्मृत्तिका देयाः । तदूर्ध्वन्नाभे रधस्सम्बन्धे आकटि स्नायात् । तदूर्ध्वाङ्गसम्बन्धे सचेलं स्नायात् । तदितररथ्याकर्दमतोयस्य नाभेरूर्ध्वसम्बन्ध एव स्नानम् । तदधश्चेत्तत् प्रदेशमात्रं क्षालयेत् । अस्पृश्यतृणादिनिर्मित कटादावस्पृश्यै स्सहस्थित्यादिनिमित्ते सति निमित्तानुगुणं मुख्यं गौणं वा स्नानं कुर्यात्। व्याधिग्रस्तानां नैमित्तिकस्नानप्राप्तौ शक्तः कश्चन स्वयं स्नात्वा रोगिणं स्पृष्ट्वा तस्य धौतवस्त्रं प्रदाय पुनः स्नात्वा तं स्पृष्ट्वा वस्त्रान्तरं प्रदाय पुनः स्नात्वा तं स्पृशेत् एतत् स्पृष्टिस्नानम्। एवं नैमित्तिकस्नानविधिरुक्तः ।

* * *

—काम्यस्नानं—

काम्यस्नानन्तु पुष्यस्नानादिकम् । तत्सकामैरनुष्ठेयम् । तेपि नित्यस्नानं कृत्वा प्रातःकालीनं कर्म कृत्वाचम्य प्राणानायम्य एतदर्थं पुष्यस्नानं करिष्य सति सङ्कल्प्य सात्विकत्यागवर्जं नित्यस्नानवत् स्नानं कुर्युः । निष्कामैरेतन्नानुष्ठेयम्। एतदुष्णोदकेन कृतश्चेन्निष्फलमेव। इति काम्यस्नानक्रमः ।

* * *

—मलापहरणस्नानं—

मलापहरणं त्वभ्यङ्गस्नानादिकम्। एतदपि दीपावलीं विना प्रातर्न कर्तव्यम् । प्रातः कालीनकर्मानन्तरं सङ्गवकाले अमन्त्रकं कर्तव्यम् ।

अभ्यज्य उष्णोदकेनैव स्नायात् । माध्याह्निकस्नानाकरणेतु मलापहरणानन्तरं वस्त्रं धृत्वा शीतेन वोष्णेन वा जलेन सूक्तजपप्रोक्षणादिपूर्वकं स्नात्वा वस्त्रं धृत्वा अङ्गतर्पणमपि कुर्यात् । उपवासव्रत श्राद्धदिनभृगुभौमार्क गुरुवासरश्रवणोत्तरफल्गुनीज्येष्ठार्द्रा-प्रतिपच्चतुर्थी षष्ठ्यष्टमीचतुर्दशीपर्वसु नाभ्यङ्गस्नानं कुर्यात् । क्षौरदिने अभ्यङ्गकरणे प्राजापत्यं निष्कृतिः । रात्रौ मध्याह्नात्परमपि न कुर्यात् । गुरुकुज भृगुभानुवासरेषु क्रमशो दूर्वामृत् गोमय कुसुमानि तैले प्रक्षिप्य वा अभ्यङ्गं कुर्यात् । शिरस्तैलेन निःसृतेननाङ्गलेपनम् । अन्याभ्यक्तशेषेन तैलेन अभ्यंगंच न कुर्यात् । दीपावलीस्नानमभ्यङ्गरूपं अरुणोदये कुर्यात् । एतन्नित्यमिति केचित् । अनिषिद्धकाम्यमिति केचित् । इत्यभ्यङ्गस्नानक्रमः ।

* * *

—धात्रीस्नानं—

धात्रीस्नानमपि द्वितीया सप्तमी नह्मी दशमी चतुर्दशी पर्वसङ्क्रान्ति रविवासरेषु न कर्तव्यं । प्रातः काले न कर्तव्यं । एतत् काम्यमिति नित्यमिति मलापहरणमिति च मतभेदाः । मृत्तिकास्नानमपि भृगुकुजरविवारमातृपितृमृततिथि मखानन्दाकृत्तिकासु च प्रातः काले मध्याह्नात्परश्च न कर्तव्यं, एतदपि पूर्ववदेवेति वदन्ति ।

* * *

—माघस्नानं—

माघस्नानन्तु स्त्रीभिस्सूर्योदयाव्यवहितोत्तरक्षणे कार्यम् । पुरुषैरुदयात्पूर्वमेव कार्यम् । ननूदयात् पूर्वं प्रातःस्नानस्य कर्तव्यतया

तत्प्रभृति सन्ध्यावन्दनजपान्तस्य कर्मणः अविच्छन्नधारतया उदयानन्तरमुपस्थानस्य कर्तव्यतया तदनन्तरं माघस्नानानुष्ठानस्य निष्प्रयोजनतया अरुणोदयकाले कस्यापि स्नानस्याननुष्ठेयतया उदयात्पूर्वं माघस्नानमनुष्ठायानन्तरं प्रातःस्नानानुष्ठाने सन्ध्यावन्दन-कालातिक्रमेण प्रत्यवायस्य दुर्निवारतया माघस्नानस्य कस्समय इति चेत् ब्रूमः। मकरस्थे रवौ माघे गोविन्दाच्युत माधव। स्नानेनानेन मे देव यथोक्तफलदो भव'' इति मन्त्रमुच्चार्य उदयात्पूर्वं प्रातःस्नानानुष्ठाने तन्त्रेणोभयमपि सिध्यति। एतन्नित्यमित्येव बहूनामाशयः। काम्यमिति केचित्।

* * *

—समुद्रस्नानं—

समुद्र गङ्गागोदावरी भगवत्तीर्थादिस्नानं क्रियास्नानम्। तत्र समुद्रस्नानविधिरुच्यते। त्रिमुहूर्तचतुर्दश्यविद्धपर्वकाले सर्वत्र समुद्रे स्नायात्। तद्व्यतिरिक्तदिनेषु नवपाषाण दर्भशयनचापाग्रादिक्लृप्त-स्थलेष्वेव स्नायात् नान्यत्र। पाषाणदानं प्रथमं पुरस्तादावाहनं तत्र नमस्कृतिश्च। अर्घ्यं तथा प्रार्थन मभ्यनुज्ञा स्नानञ्च कुर्याद्दशतर्पणञ्च। समुद्रतीरं गत्वा प्रणम्य समुद्रं कुसुमाक्षतैरभ्यर्च्य ''नमस्ते सलिलेशाय नमो गम्भीरमूर्तये। नमो मेघनिनादाय नमस्ते परमात्मने। विविधाघौघनाशाय सुधागर्भाय ते नमः। महानद्यधिनाथाय महारत्नोद्भवाय ते। महातरङ्गनिर्घोष विलसद्विस्मयात्मने। महाप्राण्यधिनाथाय महावारिधये नमः। समुद्राय नमस्तेस्तु सागराय नमोस्तु ते। सरितां पतये तुभ्यं नमस्तुभ्यमुदन्वते। नमोस्तूदधये तुभ्यं नमस्तुभ्यं सरस्वते। नमोम्बुराशये तुभ्यं पारावाराय ते नमः'' इति

प्रणमेत्। आचम्य प्राणानायम्य समुद्रस्नानं करिष्य इति सङ्कल्प्य, इमं मे वरुणेत्यादिपञ्चर्चा वरुणं स्तुवन् । 'पिप्पलादसमुत्पन्ने कृत्ये लोकभयङ्करि । पाषाणन्ते मया दत्त माहारार्थं प्रकल्पितम्'' । इति मन्त्रेण पाषाणं दत्वा। ततः ''विश्वाची च घृताची च विश्वयोने विशाम् पते । सान्निध्यं कुरु मे देव सागरे लवणांभसि'' । इति मन्त्रैरावाह्य, ''नमस्ते विश्वगुप्ताय नमो विष्णवपां पते। नमो जलधिरूपाय नदीनां पतये नमः'' एतैर्मन्त्रैः समुद्राय वयुनाये''ति समुद्राय वयुनाय सिन्धूनां पतये नमः ! नदीनाꣳसर्वासां पित्रे जुहुता विश्वकर्मणे विश्वा हा मर्त्यꣳ हविः'' द्वाभ्याञ्च प्रणम्य ''सर्वरत्नमय श्रीमन् सर्वरत्नाकराकर । सर्वरत्नप्रधान त्वं गृहाणार्घ्यं महोदधे'' इति अर्घ्यं दत्वा; ''पृथिव्यां यानि तीर्थानि प्राविशंस्त्वां महोदधे। स्नातस्य मे फलं देहि सर्वस्मात् त्राहि मांहसः'' इति प्रार्थ्य, ''समस्तजगदाधार + निषेवणे'' इति भगवन्तमनुज्ञाप्य, ''वेदादयो वेदवसिष्ठयोनिः सरित्पतिस्सागररत्नयोनिः । अग्निश्च ते तेज इला च तेजो रेतोधा विष्णुरमृतस्य नाभिः'' इदन्ते अन्याभिरसमानमद्भिः याः काश्च सिन्धुं प्रविशन्त्यापः । सर्पो जीर्णामिव त्वचं जहामि पापꣳशरीरात् स शरीरस्कोभ्युपेत्य । ''द्वौ समुद्रौ'' रामेण या कृता रेखा धनुषा क्षारसागरे। मुक्तिस्तद्दर्शनादेव न जाने स्नानजं फलम्। रघुवीरपदन्यास पवित्रीकत्पांसवे । दशकण्ठशिरच्छेद हेतवे सेतवे नमः । केतवे रामचन्द्रस्य मोक्षमार्गैकहेतवे। सीताया मानसाम्भोजभानवे सेतवे नमः'' इत्यादिकं यथायोग्यं यथाशक्ति पठन् स्नात्वा वस्त्रपुण्ड्रधारणानन्तरं समुद्रस्नानाङ्गं पिप्पलादादितर्पणं करिष्य इति सङ्कल्प्य, ''पिप्पलादं कविं कण्वं कृतान्तं जीवितेश्वरम् । मन्युञ्च कालरात्रिञ्च विद्याञ्चाहर्गणेश्वरं'' इति नामभ्यो दशभ्यस्तर्पयित्वा

स्नानाङ्गदेवर्षितर्पणं कुर्यात्। अधिकस्नानोद्देशे सति, परिषदनुज्ञापूर्वकं कुर्यात् । तत्क्रमः, अशेषे—स्वीकृत्य मम जन्मप्रभृति, कृतभरन्यासश्चेत्, भरन्यासप्रभृति एतत्क्षण पर्यन्तं मनोवाक्कायैः ज्ञानतः अज्ञानता वा मदनुष्ठितानां अकृत्यकरण कृत्याकरणरूपाणां सर्वेषां पापानामपनोदनद्वारा भगवत्प्रीत्यर्थं अशीत्युत्तरसहस्रकृच्छ्रफलप्रदानि षट्त्रिंशत् सङ्ख्यातानि समुद्रस्नानानि यथार्हं चापाग्रादिस्थलेषु कर्तुं योग्यतासिद्धिमनुग्रहाणेति अनुज्ञाप्य, तथैव सङ्कल्प्य समुद्रतीरं गत्वा पूर्वोक्तक्रमेण प्रातस्स्नानप्रभृति सन्ध्यावन्दनान्तं कृत्वा सङ्कल्पितेषु समुद्रस्नानेषु प्रथमस्नानं करिष्य इति सङ्कल्प्य, पूर्वोक्तसमुद्रप्रणाम तत्स्तुति तदर्घ्यप्रदानमन्त्रपठनादिकं यथाशक्ति कुर्वन् स्नात्वाऽऽर्द्रवस्त्रं सप्तवातैश्शोषयित्वा धृत्वा ऊर्ध्वपुण्ड्रं धृत्वा पिप्पलादादितर्पणं देवर्षितर्पणञ्च कृत्वा आचम्य प्राणानायम्य सङ्कल्पितेषु द्वितीयस्नानं करिष्य इति सङ्कल्प्य स्नायात् । एवमेव तृतीयादि प्रतिस्नानं शोषितवस्त्रपुण्ड्रधारणं समुद्रस्नानाङ्गं पिप्पलादादितर्पणं स्नानाङ्गं देवर्षितर्पणञ्च कार्यम् । एवं यथा शक्त्यवकाशं पञ्चषादिदिनेषु यथाभिमतं चापाग्रादिष्वेकत्र वा अनेकत्र वा सङ्कल्पितानि षट्त्रिंत् स्नानाति कुर्यात्। न तु प्रतिस्थलं षट्त्रिंशत् स्नाननियमः । प्रतिदिनं प्रातस्नानन्तु पृथगेव। न तु सङ्ख्यान्तर्गतम्। पापविशेषादिनिमित्तसम्भवे परिषद्विधायकादि कल्पनपुरस्सरं विशेषतः सङ्कल्प्य स्नायात् । तत् क्रमस्त्वन्यत्र द्रष्टव्यः। इति समुद्रस्नानक्रमः।

एवं गङ्गादिपुण्यतीर्थेषु स्नायात्। अनेन निर्वर्त्यायाः कस्या अपि क्रियाया अभावात् स्नानस्यैव क्रियात्वात् एतत्क्रियास्नानमित्युच्यते । जपाङ्गतया होमाङ्गतया जगन्त्यादिविशेषाराधनाङ्गतया श्राद्धाङ्गतया वा

क्रियमाणं स्नानं क्रियाङ्गस्नानमुच्यते। ग्रहणसङ्क्रान्त्यादि पुण्यकाले यत् जीवपितृकादिभिरपि कर्तव्यं स्नानं तन्नित्यम् । अकरणे प्रत्यवायश्रवणात्। तत्तत् श्राद्धाङ्गं यत् क्रियते, तत्क्रियाङ्गम् । स्नानद्वयानुष्ठनाशक्तौ तन्त्रेण एकस्नानस्यैवोभयार्थत्वसिद्धिः । एवं प्रातस्स्नानेन माध्याह्निकस्नानेन वा स्नानान्तरप्रसक्तौ अशक्तानां तन्त्रेणेकेनैव स्नानेनार्थ द्वयसिद्धिः, तत्र - नित्यात् काम्यसिद्धिरिति केचित् । काम्यान्नित्यसंसिद्धिरित्यन्ये । यथोचितमत्र ग्राह्यं । एवन्नैमित्तिकेपि । सङ्क्रमणादितर्पणस्य प्रातःकालीनत्वे वस्त्रशोषणस्यावकाशे सति स्नात्वा तद्दिनशोषितवस्त्रं धृत्वा तर्पयेत् । पुण्यकालातिक्रमणादनवकाशे सति अद्रिसूर्येण वस्त्रेण कुर्यात् । गौणकाले मुख्याचारेणानुष्ठानापेक्षया मुख्यकाले यथाशक्त्याचारेणानुष्ठानस्यैव युक्तत्वात् । सङ्क्रमणस्यानागतत्वेपि तत्तत्पुण्यकालस्य पूर्वमागतत्वात् स्नानतर्पणादौ उद्देश्यमासादिकमेव सङ्कल्पे वाच्यमिति निबन्धनकृतामाशय इति प्रतिभाति। केचित्तात्कालिकमेव मासादिकं वाच्यमिति वदन्ति। यथाशिष्टानुष्ठानं ग्राह्यम्। एवं सर्वेषां स्नानानां क्रम उक्तः।

* * *

—क्षौरविधिः—

प्रसङ्गात् क्षौरविधिरुच्यते। क्षौरं मासि मासि गृहस्थैः कार्यम्। अभिगमनान्तं प्रातःकर्म कृत्वा सङ्गवकाले कारयेत् । सङ्गवात् परं पितृमास चतुष्टये निषिद्धदिने न कार्यम्। अज्ञानान्निषिद्धदिने क्षौरे कृते शुद्धदिने पुनः कारयेत्। क्षौरप्रशस्त नक्षत्रवारादियुक्ते स्वानुकूले दिने नापित हस्तपादादिकं प्रक्षालयित्वा क्षुरं गोमयजलैः प्रक्षाल्य शिरोङ्गञ्च

शुद्धजलेन स्वयमेव संमृज्य करवक्षोमुखशिरः पादगुह्यस्थानानि क्रमशो वापयेत् । मणिबन्धकूर्परमध्यदेशं आकट्यपराङ्गं न वापयेत् । भ्रूखण्डनन्नकारयेत् । एवं यथाविधि नखखण्डनान्तं कारयित्वा तस्मै वेतनं प्रदाय त्रयोदशमज्जनपूर्वकं स्नानद्वयात्मकपुनस्नानं कृत्वा नूतनयज्ञोपवीतं धरेत् । शिंखाणत्यागन्तु वामकरेण कृत्वा करं प्रक्षालयेत् । कर्णनासानेत्रमलस्पर्शे तद्विवरेऽङ्गुलिप्रवेशे च करं क्षालयेत् । कर्मकाले शिखावस्त्रदेहस्पर्शे हस्तं क्षालयेत् । गोमयंधयोः स्पर्शे च क्षालयेत् । एवं प्रासङ्गिकेन सह स्नानान्तविधिरुक्तः । एवं स्नात्वा कौपीनं धृत्वा द्वादशहस्तपरिमितं वस्त्रं सपञ्चकच्छमन्तरीयं षट्हस्तपरिमित-मुत्तरीयञ्च धृत्वा दृतोर्ध्वपुण्ड्रो मान्त्रमानसस्नाने कृत्वा स्नानाङ्गं देवर्षिपितृन् तर्पयेत् । सर्वत्र तर्पणे गोशृङ्गमात्रमुद्धृत्य जले तर्पयेत् । सन्ध्याकालातिक्रमे तुरीयमर्घ्यदानमुक्तम् । सङ्गवकालातिक्रमे प्राणायामत्रयेण सह तुरीयार्घ्यम् । मध्याह्नातिक्रमे प्राणायामषट्कम् । अपराह्नातिक्रमे द्वादशप्राणायामान् । रात्रौ प्रहरपर्यन्तातिक्रमे षट्त्रिंशत् प्राणायामपूर्वकं प्रातस्सन्ध्यां माध्याह्निसन्ध्यां सायंसन्ध्याञ्च क्रमेण कुर्यात् । न तु तयोः पृथक् प्रायश्चित्तम् । तत्कालस्याप्यतिक्रमे तु प्रातस्सन्ध्या माध्याह्निकसन्ध्ययोर्लोप एव । पञ्चमहायज्ञादिव्यतिरेकेण दिवाकर्तव्यकर्मणोपि रात्रिप्रहरपर्यन्तस्यैव कालत्वात् । माध्याह्निक-सन्ध्याया अपराह्नातिक्रमे प्राणायामत्रयम् । सायाह्नातिक्रमे तत् षट्कम् । रात्रिप्रहरपर्यन्तातिक्रमे द्वादशप्राणायामान् कुर्यात् । माध्याह्निक-सन्ध्यायाः कालातिक्रमे प्रायश्चित्तार्घ्यदानानुक्तेः प्राणायामा एव कार्याः । सायं सन्ध्यायाः कालातिक्रमे रात्रिप्रहरपर्यन्तं तुरीयार्घ्यदानमेव । ततोर्धरात्रपर्यन्तं प्राणायामत्रयम् । ततो यामत्रयावधि तत्षट्कं । ततः परमाप्रभातं द्वादशप्राणायामान् । परेद्युः

प्रहरपर्यन्तं चतुर्विंशतिप्राणायामान् कुर्यात् । ततः परं लोप एव । उक्तप्रायश्चित्तक्रमः प्रामादिकविषयः आपद्विषयश्च । बुद्धिपूर्वकत्वे अष्टोत्तरशताष्टोत्तर सहस्रगायत्री जपाहरुपवासरात्र्युपवास दिनोपवासप्राजापत्यादिक, यथायोग्यं प्रायश्चित्तं भवेत् । सन्ध्यावन्दनादि नित्यकर्मण एकदिनलोपे एकदिनमुपवासः। दिनद्वयलोपे त्रिरात्रमुपवासः । दिनत्रयलोपे अर्धकृच्छ्रम् । दशाहलोपे पूर्णकृच्छम् । ततः परं मासादधोलोपे चान्द्रायणम् । तदूर्ध्वं चान्द्रायणं पराककृच्छ्रश्च कुर्यात् । कृच्छ्रलक्षणं त्वन्यत्रावगन्तव्यम् । एवं सन्ध्यावन्दन जप मन्त्रजपाधारशक्ति देवर्षि काण्डर्षिपितृतर्पण वस्त्रनिष्पीडनपूर्वकं ब्रह्मयज्ञं कुर्यात् । तत्र विशेषः । ऋचः प्रीणं त्विति त्रिस्सलिलं पीत्वा, यजूंषि प्रीणंत्वित्योष्ठौ, परिमृज्य अप उपस्पृश्य । सामानि प्रीणन्त्विति शिरः स्पृष्ट्वा, अथर्वाणि प्रीणन्त्वित्यप उपस्पृश्य, ब्राह्मणानि प्रीणन्तिति लोचने, इतिहासपुराणानि प्रीणन्त्विति नासिके । कल्पा गाधाश्च प्रीणन्त्विति श्रोत्रे, प्रीणन्तु नारा शꣳसीरित्युरः स्पृष्ट्वोदकं स्पृशेत् । एवं रूपमन्त्राचमनमाह्निकोक्तं तूष्णीमाचमनं वा कृत्वा ब्रह्मयज्ञं कुर्यात् । नियतप्रश्नाध्यायिनां ब्रह्मयज्ञे अनध्याये प्राप्तप्रश्नाध्ययनस्य न दोषः, अनियताध्यायिनां त्वेकोनुवाकोनध्यायदिनेऽध्येतव्यः । अधीतशाखान्तरोपि ब्रह्मयज्ञे स्वशाखामेव पठेत् । प्रातश्चेत्, ब्रह्मयज्ञप्रश्नमुपांशु पठेत् । मध्यन्दिने तूच्चैः । ग्राममध्ये चेत्सर्वदोपांशूच्चारणमेव । अनधीतवेदानां ब्रह्मयज्ञे पुरुषसूक्तजपः । प्रथमोपाकर्मणः पूर्वं चतुर्वेदादिमुक्त्वा गायत्र्यैव ब्रह्मयज्ञः कार्यः । ब्रह्मयज्ञपारायण जपादौ संहितामेव पठेत् । न क्रमजटादिकम् । भगवदुत्सवपारायणे क्रमपठनस्य न दोषः ।

* * *

—अनध्यायदिनानि—

अथानध्यायदिनान्युच्यन्ते । अष्टमी चतुर्दशी पर्वद्वयप्रतिपत् शयनद्वादशी विष्वयनमन्वादियुगादयः आषाढशुद्धद्वादशी शयन-द्वादशी कटकमकरसङ्क्रमणं अयनं मेषतुलासङ्क्रमणं विषुसंज्ञम् । मन्वादयस्तु ज्येष्ठाषाढ भाद्रपद कार्तिक फाल्गुन चैत्रपूर्णिमाः चैत्रमासतृतीया आषाढशुद्ध दशमी श्रावण कृष्णाष्टमी आश्वयुक् शुक्लनवमी पुष्यशुक्लैकादशी फाल्गुनामावास्या माघशुक्लसप्तमी कार्तिकशुक्लद्वादशी इति चतुर्दशमन्वादयः । युगादयस्तु वैशाखशुक्लतृतीया कार्तिकशुक्लनवमी भाद्रपद कृष्णत्रयोदशी माघामावास्येति चत्वारो युगादयः । यस्मिन्दिने उदयात्परं त्रिमुहूर्तं अस्तमयात्पूर्वं त्रिमुहूर्तं वा अनध्यायतिथिसम्बन्धः तद्दिनमप्यनध्यायदिनम् । चतुर्दशीदिने अस्तमयात्पूर्वं पर्वागमश्चेत् तत्पूर्वत्रयोदशी दिनमनध्यायदिनम्। पूर्वोक्त ूलयोरनध्यायदिनयोर्मध्य-दिनमप्यनध्यायदिनम्। अनध्यायदिनत्व सन्देहेप्यध्ययनं वर्ज्यम्। एवं सन्ध्ययोः प्रदोषकालेषु रात्रिमध्यमयामद्वये च नाध्ययनं कुर्यात्।

अथ प्रदोषनिर्णयः

यस्मिन्दिने सूर्यास्तमयानन्तरं नवनाडिका पूर्वकाले चतुर्थी आयास्यति, यस्मिंन्दिने सूर्यास्तमयात्परं चतुर्थी द्विनाडिका वर्तते, यस्मिन् सूर्यास्तमयात्परं पञ्चदशघटिकाभिः पूर्वं सप्तम्यायास्यति यस्मिं दिने अस्तमयानन्तरं सप्तम्येकघटिका वर्तते, तेषु दिनेषु सायं प्रदोषः *महाप्रदोषकाल उच्यते* यस्मिन्दिने अस्तमयसमये त्रयोदशी वर्तते तद्दिने महाप्रदोषः। दिनद्वयेपि तथा चेत् परदिने। परदिने अस्तमयात्परं अर्धघटिकासत्व एव परदिने प्रदोषः । नो चेत् पूर्वदिने

दिनद्वयेप्यस्तमयकाले त्रयोदश्यभावे पूर्वेद्युरस्तमयादूर्ध्वं षट्घटिकापूर्वकाले त्रयोदशी चेत् पूर्वदिने। तदूर्ध्वमागता चेत् परदिने। प्रदोषदिने अस्तमयात् पूर्वम् मुहूर्तद्वयमारभ्य रात्रौ यामद्वयपर्यन्तं नाध्येतव्यम्। महाप्रदोषेतु नाध्यायनमात्रनिषेधः, किन्तु किमपि न पठनीयम्। तवत्कालं सर्वाश्रमिणां मौनमेव। अशक्तौ रात्रावेकयाममर्धयाममास्तमयं वा मौनमनुष्ठेयम्। गायत्र्यादिजपो मानसिकः। अनध्यायदिनेषु चतुर्थीप्रदोषे च सन्ध्यावन्दने चतुःपञ्चाशद्वारमेव गायत्रीजपः, नाधिकम्। सप्तमीप्रदोषे सप्तत्रिंशत्। पर्वद्वये प्रतिपदि च षट्त्रिंशद्वारम्। महाप्रदोषे अष्टौविंशतिवारम्। महाप्रदोषे अभ्यङ्गभोजनशयन स्त्रीसंगादिकं नृसिंह्ममूर्तिव्यतिरिक्त भगवद्दिव्यमूर्तिसेवाञ्च वर्जयेत्। स्वशाखामनधीत्यान्यशाखाध्ययनञ्च कर्तव्यम्। वेदमधीत्य तद्विस्मरणे भ्रूणहत्यादोषः। अन्यानुपूर्व्ध्ययने अपस्तवराध्यने च स एव दोषः। अध्ययनकाले कर्मकाले गमनकाले देवालये महत्सन्निधौ च शिखाप्रसारणशोषणादिकं निष्ठीवनादिकञ्च न कुर्यात्। रात्रौ ब्रह्मयज्ञं आरण्यकपठनञ्च न कुर्यात्। एवं ब्रह्मयज्ञं कृत्वा स्वसूत्रोक्तविधिना औपासनं कुर्यात्। स्वस्योपाधौ गुरुशिष्यपत्नी पुत्रऋत्विक् जामातृप्रभृतिभिः कारयेत्। विधुरब्रह्मचारि सन्यासिस्त्रीदुश्शीलबालादिभिर्न कारयेत्, स्वस्य औपासनं अकृत्वा परौपासनं न कुर्यात्। श्रौताग्निं हुत्वा ततः स्मार्ताग्निं जुहुयात्। श्राद्धभोजनं कृत्वा स्वीयमन्यदीयं वा श्रौतं स्मार्तं वा न जुहुयात्। ब्रह्मचारी तु समिदाधानं कुर्यात्। स्नातकस्तु विवाहपर्यन्तं लौकिकाग्नौ कालद्वयेपि व्यस्ताभिस्समस्ताभिर्व्याहृतीभिराज्येन जुहुयात्। एवं हुत्वा यथायोग्यमभिगमनाराधनं कृत्वा मङ्गलद्रव्यवीक्षणं महदभिवादनञ्च कुर्यात्। इत्यभिगमनम्।

—उपादानं—

अथोपादानं सङ्कल्प्य भगवदाराधनोपयुकत शाकफलादिकं यथाशास्त्रमाहरेत् । खिन्नवृत्तिरपि पतितपाषण्ड षण्डचण्डालाद्य सत्प्रतिग्रहं न कुर्यात्। सत्प्रतिग्रहे नार्तिज्यो न उञ्छवृत्यादिना वा यावत् कुटम्बभणमेवार्थं सम्पादयेत् । स्वाशक्य भगवद्भागवताराधन देवागारतटाकादि निर्माणाद्यर्थं दुष्प्रतिग्रहमतिप्रयत्नञ्च न कुर्यात् । यज्ञार्थं ऋणनिवृत्त्यर्थञ्च उचितराजधनादिप्रतिग्रहे कृतेपि न दोषः । शक्तेन प्रतिग्रहो न कार्यः । गत्यन्तराभावे विप्रस्य कृषिजीवन मनुमतमेव । उपादानकाले क्रियमाणं वेदान्तार्थविचारादिकं भगवदाराधनान्तरसामग्रीभूत ज्ञानसम्पादकतयोपादान एवान्तर्भूतम्। एवं समित् कुशपुष्पतुलस्यादिकं यथाशास्त्रमाहरेत् । यथा स्वयमशक्तश्चेत् शात्रीयप्रतिग्रहं करोति तथा स्वयं शक्तश्चेत् सभ्यो यथाशक्ति दद्यात् । शक्तौ सत्यामपि लोभादिना साधुविप्रलम्भन्न कुर्यात् । आहृतं शाकादिकं प्रक्षाल्य पाचयेत् । तण्डुलन्तु त्रिर्देवेभ्यः द्विर्मनुष्येभ्यस्सकृत् पितृभ्यः क्षालयेत् । तण्डुलक्षालनजलनालिकेर-फलजलादिकं भगवदारादधनात् पूर्वन्नोपयुञ्ज्यात् । तथोपयोगे कृते तदन्नादेः भगवदनिवेद्यतया गवादिभ्यस्तन्न दद्यात्। इत्युपादानम्।

* * *

—इज्या—

अथेज्यां सङ्कल्प्य माध्याह्निकस्नानार्थं मृत्तिकागोमयादिसंभारान् गृहीत्वा नद्यादिकमासाद्य पाणिपादौ प्रक्षाल्य द्विराचम्य त्रिः प्राणानायम्य सङ्कल्प्य त्रिर्निमज्य अश्वक्रान्तेति मन्त्रतो दूर्वां शिरसि कृत्वा स्नात्वा अश्वक्रान्त इति सप्तवाक्यान्युच्चार्य एकया मृदा शिरः,

तिसृभिरधोङ्गं एकैकस्य पादस्य त्रिस्र इति पदद्वयं षट्भिरुपलिप्य स्नात्वा, गन्धद्वारेति मन्त्रेण गोमयेन सर्वाङ्गमुपलिप्य स्नायात् । सर्वत्रामलकमात्रा मृत्तिका गोमयश्च । एवं स्नात्वा पीठपरिकल्पन-सूक्तपठनादिकं प्रातस्स्नानवत् कृत्वा उत्तीर्य वस्त्रधारणोर्ध्वपुण्ड्रतर्पणा-चरणपूर्वकं माध्याह्निकं । ततो वस्त्रनिष्पीडनञ्च कुर्यात्, ब्रह्मचारि गृहस्थयोः स्नानद्वयं, यतिवनिनोः स्नानत्रयं, एतादृशमृत्तिकास्नानरूपं वा साधारणं वा माध्याह्नक स्नानं कुर्यात्। अशक्तस्तु गौणस्नानं कुर्यात्। अथाह्निकोक्तप्रकारेण भगवदाराधनं कुर्यात् । पुष्पाणि प्रक्षाल्य समर्पयेत्। तुलस्याः प्रोक्षणतश्शुद्धिः। सा पुरातनापि ग्राह्या। पुष्पस्य दिनान्तरे अशुद्धिः। करवीरपुष्पैर्गृहार्चां नार्चयेत्। भगवद्दक्षिणपार्श्व एव वन्दनजपतीर्थ प्रसादस्वीकारादिकं कुर्यात् । प्रदक्षिण-प्रणामान्युग्मानेवाचरेत् । भगवद्दीपे एरण्डतैलन्न दद्यात् । भगवद्दीपन्नान्यत्र नयेत्। दीपं विना नाराधयेत्। दीपतैलन्न स्पृशेत्। स्पर्शेतु स्नायात्। पुमान् कुत्रापि दीपन्न निर्वापयेत्। स्त्री तु वस्त्राञ्चलेन। स्त्रीतु कूश्माण्डं न भिद्यात् । भगवद्दीपान्नान्यदीपं जनयेत् । भगवदनुपचारज्वलने तु न दोषः। स्वार्चामनाराध्यान्यार्चान्नाराधयेत्। स्वस्योपाधौ ऋत्विक् पुत्रगुरुशिष्यादिभिः कारयेत्। ते च औपासनवत् यजमानस्येज्याराधनं करिष्यामीति सङ्कल्प्य कुर्युः । भगवद्दिव्यविमानकवाटबन्धनोत्घाटने शनैर्निश्शब्दं कुर्यात् । हठात् अकाले वा न कुर्यात्। शक्तेन कालत्रयेप्याराधनं कार्यम्। अशक्तेन प्रातस्सायमभिगमनं सङ्ग्रहेण ध्यानरूपं कृत्वा मध्याह्ने इज्या यथोक्तविधिना कार्या । एकदिने श्रवणसङ्क्रान्तिजयन्तीमातृपितृश्राद्ध गुरुजन्मर्क्षाद्यनेक निमित्तप्रयुक्ताराधनप्रसक्तौ अभिगमनोपादान-

सङ्कोचेन तत्तदाराधनानि पृथक् पृथक् तत्तत्कालक्रमेण कुर्यात् । अनेकयौगपद्ये इच्छया पौर्वापर्यनियमः । अशक्तस्य तु यन्मुख्यं तत् कार्यम् । इतराणि ध्यानरूपाणि । नित्याराधनविशेषाराधनयोः कालयौगपद्ये शक्तावनवकाशे च नित्यं कृत्वा विशेषमपि कुर्यात् । अशक्तस्य तन्त्रेणोभयम् । श्रीरामनवमीनृसिंहजयन्ती श्रीजयन्त्याराधनं सर्वैरपि तत्तदवतारकाले कार्यम् । श्रीरामनवम्याराधनस्य मध्याह्नकालिकतया कटकलग्नस्य पूर्वमागमने पूर्वं कर्तव्यम् । आवर्तनात् परमागमने नित्याराधनानन्तरं कार्यम् । अशक्तस्य तु तन्त्रेणोभयम् । नृसिंहजयन्त्याराधनमपि अर्धमण्डलसमये सायंसन्ध्यां कृत्वा औपासनात् पूर्वमेव प्रकाशवत्यां सन्ध्यायां कर्तव्यम् । श्रीजयन्त्याराधनं तद्दिनरात्रौ चन्द्रोदयकाले कर्तव्यम् । ''श्रीजयन्तीविशेषाराधनं करिष्ये, श्रीरामनवमी-विशेषाराधनं करिष्ये'', इत्येवं सर्वत्र वैशेषिकाराधनसङ्कल्पः । एवं गुरुजन्मर्क्षमातृपितृश्राद्धादिदिनेषु क्रियमाण दिव्यप्रबन्धाध्ययनाङ्गतया प्रातर्वा मध्याह्ने वा सायं वा रात्रौ वा आराधनस्य कर्तव्यत्वे ''दिव्यप्रबन्धाध्ययनाङ्गं विशेषाराधनं करिष्य'' इति सङ्कल्प्य कुर्यात्। नियताभिगमनाराधनाधिकारी तु तत्तत्काले तन्त्रेण कुर्यात्। एकस्मिन् दिने एकदैव भूतशुद्धिः । भोजनाद्यन्तरितेतु पृथक् । तीर्थप्रसादस्वीकारस्तु प्रत्याराधनं कार्यः । भगवत्तीर्थं वैश्वदेवानन्तरं स्वीकर्तव्यम्। (केचित् पूर्वमेवेति वदन्ति। एवं मातृपितृमृताहेपि श्राद्धात् पूर्वमेव स्वीकुर्वन्ति ।) भगवद्वन्दनं भगवत्तीर्थप्राशनञ्च कृत्वा न पाणिप्रक्षालनं कुर्यात् । भगवदालयादागत्य न पादौ प्रक्षालयेत् । सूर्यचन्द्रोपरागपुण्यकालाराधनं तत्तत्काले कर्तव्यम्। उपरागदूषिते काले *न नित्याराधनम्। मोक्षानन्तरमेव। सन्ध्यावन्दनौपासनादेर्न हानिः ।

मोक्षानन्तरमेव रात्रौ वा भगवदाराधनभोजनादिकं कर्तव्यम् । पञ्चमहायज्ञानान्तु रात्रौ नानुष्ठानम् । सूर्यग्रस्तास्तमये तु रात्रौ मोचनानन्तरं स्नात्वा भगवदाराधनं कृत्वा स्वयन्न भुञ्जीत । आशौचकालेपि मृतपितृकः आर्द्रवाससा चन्द्रसूर्योपरागे तर्पणं कुर्यात्। चन्द्रग्रस्तास्ते मोचनानन्तरं स्नात्वा दिवा इज्याकाले भगवदाराधन वैश्वदेवादिकं कृत्वा स्वयमभुक्त्वा रात्रौ चन्द्रोदयानन्तरं स्नात्वा भुञ्जीत। कृत्तिकादीपोत्सवाराधनमपि सायं सन्ध्यामौपासनञ्च कृत्वा यथासम्भवमासनोपचारैरभ्यर्च्य धानादिनिवेदनानन्तरं "अग्निर्नः पातु कृत्तिकाः" इत्याद्यष्टवाक्यैः, अग्न्यात्मकभगवते, दीपविशेषनीराजनं समर्पयेत्। ततस्सायं वैश्वदेवं कुर्यात्।

* * *

—धनुर्मासाराधनविधिः—

धनुर्मासाराधनविधिरुच्यते। धनुर्मासि प्रतिदिनमुषसि स्नात्वा, भगवन्मन्दिरं गत्वा प्रणम्य "कौसल्या सुप्रजा रामे"त्यादि सुप्रभातवाक्यैः भक्ताङ्घ्रिरेणुकृतप्राबोधिकद्राविडदिव्यप्रबन्ध-गाथाभिश्च भगवन्तमुद्बोध्य, दिव्यकवाटमुद्घाट्य प्रणम्य, "धनुर्मासा-राधनं करिष्य" इति सङ्कल्प्य, यथाविधि मन्त्रपुष्पान्तमुपचारान् कृत्वा, गोदादिव्यगाथादिकमधीत्य, मुद्रान्नन्निवेद्य, अनन्तरमवसान-गाथापठनकाले प्रतिदिनमेकैकगाथाक्रमेण त्रिंशद्दिने गोदा-त्रिंशद्गाथाश्च पठेत् । तन्मासस्यैकोनत्रिंशद्दिनत्वे पूर्वमासान्त्यदिन-मुत्तरमासाद्यदिनं वा आराधनायाङ्गीकुर्यात्।

तत्र वृश्चिकमासान्त्यदिने अर्धरात्रादधस्तद्धनुस्संक्रमणे तद्दिनं ग्राह्यम्। परतश्चेत् मकरमासप्रथिमदिनम्। यद्युपाधिवशात् उदयात् पूर्वं न

क्रियते तद्दिने सन्ध्यावन्दनानन्तरं प्रातरेव कार्यम् । एवमाराध्य तीर्थतुलस्यादिकं स्वीकृत्य, निवेदितमुद्रान्न मामलकमात्रं स्वीकुर्यात् । एकादश्यादिषु न स्वीकुर्यात् । एवं भगवत्सन्निधौ एकादश्यादिव्रतदिनानि दर्शादिश्राद्धदिनानि च वर्जयित्वा इतरदिनेषु भगवन्निवेदितान्नप्राशने न दिवाद्विभोजनादिप्रत्यवायः । एकभक्तदिने गोष्ठ्यां प्रसादत्वेन दत्तस्यान्नस्य पुलाकमात्रं स्वीकार्यं नोपेक्ष्यम् । स्वस्योपाधौ धनुर्मासाराधनं अन्येनापि कारयेत् । आशौचकाले एकादश्यादिव्रताधिकारो नास्ति । व्रतानुष्ठानाभावेपि व्रतदिने अन्नस्य निषेधान्न भोक्तव्यम् । मातृपितृमृतिवत्सरे कृतसपिण्डीकरणस्याराधन-योग्यतायास्सत्वात् व्रतसङ्कल्पवर्जं तत्तदुत्सवकाले तत्तद्विशेषा-राधनं कुर्यात् । वत्सरान्तसपिण्डीकरणे तदपि न ।

एवं भगवन्तमाराध्य, भगवन्मात्रनिवेदितैरन्नादिभिस्तदभावे आमेन फलैर्वा यथोपदेशं वैश्वदेवं कुर्यात् ।

स्वयं श्राद्धनिमन्त्रितश्चेत् ? वैश्वदेवान्तं स्वीयनित्यकर्म कृत्वा, प्राप्तद्वितयवरणः, अभ्यङ्गं कृत्वा श्राद्धं भुञ्जीत । श्राद्धं भुक्त्वा होमस्वाध्याय भगवदाराधनादिकन्न कुर्यात् । जयन्त्यादिव्रतदिनेषु श्राद्धभोजनेपि व्रतहानिर्नास्ति । व्रतदिने प्रातर्व्रतं सङ्कल्प्य श्राद्धभोजनं कृत्वा परेद्युर्भगवदाराधनपारणानुष्ठानेन व्रतं समापयेत् ।

एकादशी जयन्त्यादिदिने मृताहसम्भवे प्रातर्व्रतं सङ्कल्प्य श्राद्धं कृत्वा पितृशेषमाघ्राय विशेषाराधनादिकं कृत्वा, परेद्युः श्राद्धाङ्गतर्पणं कृत्वा, भगवन्तमाराध्य पारणं कुर्यात् ।

व्रतदिने क्षौराभ्यङ्ग पुष्पताम्बूलादिकं वर्जयेत् । उत्सवान्तपारणपक्षे सङ्क्रमणादौ श्राद्धकर्तुः श्राद्धभोक्तुश्च

रात्रिभोजननिषेधात्, आराधनमात्रम् । पारणन्तु लुप्यते । तद्व्यतिरिक्तपर्वरात्रावपि पारणस्य न कापि क्षतिः । मृताहवदेव तत्पूर्वदिनमपि।

प्रातःपारणपक्षे परेद्युस्सङ्क्रमणादि सम्भवे प्रातःपारणं लुप्यते । सङ्क्रमणेन पारणस्याविरोधे सति कार्यमेव।

व्रतानन्तरदिने श्राद्धकर्तृत्वं श्राद्धभोक्तृत्वं वा स्वस्य सम्भावितश्चेत् प्रातर्भगवन्तमाराध्य, व्रतं समापयेदिति केचित्। अन्ये तु श्राद्धभोजनं श्राद्धीयपितृशेषभोजनं वा पारणात्वेन विभाव्यानन्तरं व्रतसमापनमित्याहुः । यदत्र युक्तं तद्ग्राह्यम्।

पिता पुत्रास्सर्वेपि विभक्ता अविभक्ता वा, सन्ध्याहोमव्रतादिकं पृथक्कुर्युः । इच्छायां सत्यां भगवदाराधनमपि। वैश्वदेवन्तु परमेकस्मिन् गृहे पिता, अभिन्नपाकेषु पुत्रेषु ज्येष्ठो वा कुर्यात् । भिन्नपाकाश्चेत् भिन्नपाकाभावेपि विभक्ताश्चेत् पृथक्कुर्युः । एवं वैश्वदेवं कृत्वा प्रातर्ब्रह्मयज्ञाकरणे तदपि कुर्यात्। औपासनाग्नौ वैश्वदेवे तच्छेषं दम्पती भुञ्जीयाताम्। पाकाग्नौ चेत् सर्वैरपि भोज्यम्।

अथ यतये ब्रह्मचारिणे च भिक्षान्दद्यात्। यतिहस्ते प्रथमं जलं दत्वा ततो भैक्षं दत्वा पुनश्च जलं दद्यात्। ग्रासपरिमिता भिक्षा। एवं भिक्षात्रयं दद्यात्। हस्तेन न भिक्षा देया। पात्रपत्राद्यन्तरितेन हस्तेन स्त्री वा पुमान्वा दद्यात्। वैश्वदेवात्पूर्वं भिक्षार्थं यत्यागमने वैश्वदेवार्थमुद्धृत्य पात्रे निधाय भैक्षन्दत्वा वैश्वदेवं कुर्यात्। ततः पादघटिकाकालमतिथिं प्रतीक्षेत । आगतमतिथिं यथाविधि सम्पूज्य भोजयेत्। अशक्तौ जलं विश्रमार्थं स्थलं वा दद्यात् । विनयेन वाक्येनोपचरन्नदातारं वा

निवेदयत्। अतिथिरयोग्यश्चेत् तं अज्ञातकुलगोत्रानन्याश्चान्नार्थिनो भगवदनिवेदितैरन्नाद्यैर्भोजयेत्।

अतिथीन्बालान्मोण: अशक्तान्वृद्धान् मातृपित्रादीन् गर्भिणीश्च भार्याश्च पूर्वं भोजयित्वा पुत्रबान्धवादिभिः स्वयं भुञ्ज्यात्। पाकभेदं घृतादौ परिवेषणादि वैषम्यं च न कारयेत्। तथा कृते महान् प्रत्यवायो लोकनिन्दा च स्यात्।

* * *

—अथ भोजनविधिः—

पाणी पादौ प्रक्षाल्य द्विराचम्य शक्तश्चेत्, स्वर्णवलयं वर्तुलदर्भपवित्रञ्च धृत्वा, अशक्तश्चेत् वर्तुलदर्भपवित्रं वा धृत्वा, भुक्तिपात्रस्यान्यूनाधिकं गोमयेन निच्छिद्रं चतुरश्रमण्डलं कृत्वा, तस्मिन् प्रक्षाल्य निक्षिप्ते जम्बूपनस काञ्चीनालिकेरपलाश-कदल्युहिनापिशाचोदुम्बरपद्मचूतानामन्यतमपत्रे अभिन्ने प्राङ्मुखो दक्षिणाभिमुखो वा भोजनं कुर्यात्। अश्वत्थवटतिन्दुकार्कोदुम्बरपत्रे करे अञ्जलौ पाषाणे पर्णपृष्ठे वस्त्रे कदल्यादिगर्भपत्रे च न भोजनम्। सौवर्णराजतत्कांस्यपात्रे वा भुञ्ज्यात्। वस्त्रप्रावृतदेहेन न भुक्तिः कार्या। स्वजनैरप्येकपङ्क्तिभोजनं न कुर्यात्। ब्रह्मविद्भिस्सहैक-पङ्क्तिभोजनन्तु पावनम्। अग्निजलभस्मद्वारादिभिः पङ्क्तिर्भिद्यते। तथा निम्नोन्नतप्रदेशेनापि पङ्क्तिभेदः। पानपात्रं दक्षिणपार्श्वे निक्षिप्य वामकरेण कांस्यादिचषकस्थं तीर्थं षडङ्गुलधारया पिबेत्। पानकाले भोजनपात्रं दक्षिणेन पाणिना स्पृष्टव्यम्। स्वहस्ते सत्यन्यहस्तेन न पिबेत्। मुखनिःसृतजलस्य पात्रपतने तदन्नन्त्यजेत्। स्वाङ्गपतने स्नायात्। स्त्रीतु पानपात्रं वामपार्श्वे निक्षिपेत्। स्त्री वा पुमान्वा

भगवत्पात्रेण चक्रादिलाञ्छितेन वा आयसेन वा पात्रेण न पिबेत् । पीतशेषन्न पिबेत् । किञ्चिन्निःस्राव्य वा पिबेत्, भोजनकाले दक्षिणेन इतरकाले वामेन करेण न पिबेत् । नद्यादौ दक्षिणेन पाणितलेनादाय पिबेत्। नाञ्जलिना पिबेत्। भोजनार्थमासीनः केनाप्यभिवादितः चेत्? पुनराचामेत् । पादाभ्यां पादेन वा भुवं स्पृष्टा भोक्तव्यम् । अशक्तौ प्राणाहुतिपर्यन्तं वा । तस्मिन्नपि समये चरणौ वस्त्रेणाच्छादयेत् । न साधुसन्निधौ स्वचरणौ प्रकाशयेत्। पात्रपरिविष्टमन्नं आपोशनात्पूर्वन्न स्पृशेत् । आह्निकोक्तरीत्या परिषेचनापोशने कुर्यात् । भगवदभिषेकाचमनीयपानीयांभः स्वपानाय कल्पयेत् । पाद्यतीर्थेनैवापोशनद्वयम् ।आसने समासीनोपि पादौ भूमावेव निक्षिपेत्। आसने पादौ निक्षिप्य न भुञ्ज्यात्। आपोशनार्थं गृहीतस्य तीर्थस्य न वृथास्रावं पुनःपूरणञ्च कुर्यात् । परिषेचनशेषजलेनापोशने पञ्चगव्यप्राशनं कार्यम्। प्राणाहुत्यनन्तरं वामकरं स्पृष्टभोजनपात्रं तत्रैव क्षालयेत्। नत्वन्नमुल्लङ्घ्यान्यत्र। सर्वेषामेतावन्तं कालं मौनम्। अनन्तरं साधुभिस्सद्वाक्यमुक्त्वा वा भुञ्ज्यात्। वर्णिनो यतेश्चाऽऽभोजनावसानं मौनमेव । अनिवेदितं भगवते न भुञ्ज्यात् । अन्यत्र भगवन्निवेदितं स्वाचार्ये निवेद्य ततोन्तर्यामिणे निवेद्य प्राणाहुतीः कृत्वा भोक्तव्यम् । भोजनमध्यप्राप्तं फलादिकं पुत्रादिना निवेदयित्वा भोक्तव्यम् । निवेदनानर्हं कोद्रवान्नादिकमापदि भोक्तव्यञ्चेत् भगवन्निवेदिततोयादिभिर्मिश्रीकृत्य भुञ्जीयात् । एवं भुक्त्वा, अक्षालितेनालीढेन पाणिनोत्तरापोशनं कृत्वा, वर्तुलपवित्रं विस्रस्य भूमौ विसृजेत् । पात्रे प्रक्षेपे प्रायश्चित्ती भवति । आपोशनानन्तरं पात्रस्पर्शे आपोशनमकृत्वोत्थाने च सचेलं स्नायात् । भुक्तिकाले

पादेनाङ्काक्रमणं, वामपाणिना भूतलस्पर्शं, पादस्पर्शं, पादप्रसारणं, उच्छिष्टपाणेर्मुखसमुद्धरणं दक्षिणपाणिना भुक्तिपात्रासंस्पर्शं, निष्ठीवनं, अतिवादं, लौकिकवादं, कलहं, परिहासं, बालतर्जनं, अन्नदोषकथनं, सह भुञ्जतां शीघ्रभोजननियोगं, भुक्तवत्सु तेषु स्वयं शनैर्भोजनमित्यादिकं वर्जयेत् । भुक्तिकाले श्वशूद्रपतिताद्यवलोकने तदन्नं परित्यजेत् । सूकरकुक्कुटाद्यवलोकने "मानस्तोक" इत्यृचं जपेत्' । तथा पतितशूद्रादिवाक्यश्रवणे चण्डालरजस्वलादिवाक्यश्रवणे तदन्नन्त्यजेत् । भुक्तिकाले क्रियाकाले च बिडालपुच्छस्पर्शे स्नायात् । पुच्छव्यतिरिक्ताङ्गस्पर्शे क्रियाकाले आचमनं, भुक्तिकाले स्पृष्टाङ्गस्य जलेन मार्जनञ्च कुर्यात् । मुखाधिककवलं मुखनिःसृतञ्च त्यजेत् । अपक्वं तैलपक्वं दर्व्या दत्तं तद्व्यतिरिक्तं हस्तदत्तमायसपात्रदत्तञ्च त्यजेत् । प्रत्यक्षलवणं क्षीरदध्याम्लयुक्तं पटोलं; तादृशं च निष्पावजातं साम्लमगस्त्यशाकं, दधिमिश्रं माषं, लवणेन वा तक्रेण वा मिश्रं क्षीरं, कथितं नालिकेरजलं दधि च, ताम्रस्थे क्षीरमधुनी, कांस्यपात्रस्थमैक्षवं नालिकेरजलञ्च त्यजेत् । खादितन्तु न खादयेत् । चूतफलादिकन्तु हस्तेनादाय पुनर्निक्षेपवर्जं भोक्तव्यम् । मध्ये मध्ये निक्षेपे पुनः खादनदोषः । नखविदलितन्त्यजेत् । उच्छिष्टपरिविष्ट-माज्यं पर्युषितं शूक्तञ्च परित्यजेत् । भक्ष्यशूक्तत्वपर्युषितत्वयोरुप-दंशवटकसंस्कृतान्न भक्ष्यशाकादिपाकविशेषौधादीनां पर्युषितत्वस्य च न दोषः, तथापि व्रतदिने श्राद्धदिने च तानि त्याज्यानि ॥ प्रथमं द्रववस्तु, मध्ये कठिनवस्तु, पुनश्च द्रववस्तु च भोक्तव्यम् । अन्नव्यञ्जनादौ रोमनखमक्षिकादिजन्तुदर्शनञ्चेत् पाककाल एव तत्सद्भावे निश्चिते सति तदन्नव्यञ्जनादिकं त्याज्यं । पाकात् परं तत्सद्भावे सति

रोमादिकमपनोद्य पाद्यजलं प्रक्षिप्य भोक्तव्यम् । न परित्याज्यम् । भोजनकाले वाय्वादिना तन्तुतृणरोमपांसुप्रमुखवस्तुपाते जलं मृदं वा अन्नादौ प्रक्षिप्य भोक्तव्यम् । मरीचिरसनालिकेरजलादिकं दक्षिणेन पाणिना अमत्रेणादाय पुनर्निक्षेपवर्जं पिबेत् । सशेषं निक्षिप्य पुनः पाने उच्छिष्टपानदोषः । भोजनकाले दीपनाशश्चेत् सूर्यं ध्यात्वा दीपागमनपर्यन्तं भुक्तिपात्रममुञ्चन् दीपागमने सति पात्रस्थमेवान्नादिकं भोक्तव्यम् ।न पुनः परिविष्टम् ।

* * *

—अभोज्यादिविषयः—

मुसलशब्दश्रवणे तैलेषु यन्त्रघरट्टशब्दश्रवणेपि न भुञ्ज्यात् । रात्रौ दधितैलतन्मिश्रपदार्थतिलामलकमुद्गसम्बन्धानि वस्तूनि, दिवा कपित्थधानाकेवलक्षराणि वर्जयेत् । भानुवारे सप्तम्याश्चामलकन्त्यजेत् । प्रथमायां कूश्माण्डं, द्वितीयायां बृहतीं, तृतीयायान्तरुणीं, षष्ठ्यां दाडिमं, अष्टम्यान्नालिकेरं, दशम्यां पटोलिकां, एकादश्यान्निष्पावं, त्रयोदश्यान्तिलं, चतुर्दश्यां पर्वकाले संक्रमणे चाम्लञ्च परित्यजेत् । मार्जारमूषिककुक्कुटकाकनरादि मुखस्पृष्टं मनुष्यपश्वाद्याघ्रातं च न भोक्तव्यम् । आशौचान्नं श्राद्धशिष्टं दम्पतिभुक्तशिष्टं शूद्रपतितरजस्वलादिभुक्तशिष्टञ्च न भोक्तव्यम् । पाकभाण्डस्थ-मन्नादिकं पात्रान्तरे निधाय तस्मादन्नादिकमादाय पात्रान्तरे निक्षिप्य शूद्ररजस्वलादिभ्यो देयम् । — तथा सति पाकभाण्डस्थान्नादेर्न दोषः । पत्रान्तरस्थान्नादेरेव शिष्टदोषः । उपरागकालपक्वं, अपक्वमतिपक्वं, पुनः पक्वं, भिस्सटां, सकेशविधि वा पक्वमक्षणतयोनिप क्वं, ऋतुस्नातापक्वं, पञ्चसंस्कारहीनपक्वं, बालपक्वं प्रत्यहं पुरुषपक्वं, आचारहीनपक्वं,

प्रागुदग्व्यतिरिक्तदिङ्मुखेन पक्वं, उभयोर्द्रव्यमेलनेन समुदायपक्वं, शूद्रगृहपक्वं, पथि समुदायशालादिषु पक्वं, सत्रान्नं, शीतिभूतं, अत्युष्णं, अत्याम्लं अतिकटु, अतितिक्तं, सतुषान्नं, आरनालं, अन्यगृहपकान्नं, अद्वारादागतान्नं, चुल्ह्या दक्षिणत उद्वासितं, पात्रव्यतिरेकेण हस्तदत्तं, मुखध्मातं, अन्यहस्तमर्दितं, वृधा पायसकृसरपाकं, उपनयनसीमन्तनामकरण प्रथमार्तवान्नं, संघान्नं, अक्रमान्नं, अनादरदत्तान्नं, क्रयक्रीतान्नं, शूद्रान्नं, आचारहीनान्नं, लुब्धान्नं, उन्मत्तभ्रान्ताद्यन्नं, वार्धुषिकाद्यन्नञ्च, वर्जयेत् । ब्राह्मणात् क्रीतं क्षीरदध्यादिकं त्यजेत् । शूद्रगृहे गव्यं न पिबेत् । शूद्रपात्रेण न पिबेत् । शूद्रभुक्त पात्रशिष्टं दध्यादिकं त्यजेत् । स्त्रिया सह न भुञ्ज्यात् ।

* * *

—उच्छिष्टविषयः—

उच्छिष्टविषयं किञ्चिदुच्यते । स्वोच्छिष्टकबलस्य भुक्तिकाले स्वदेहपतने अभुञ्जन्नुत्थाय स्नायात् । स्वोच्छिष्टलेपपतने तावन्मात्रदेशं प्रक्षाल्य भुक्त्वा यथाशक्ति गायत्रीं जपेत् । अन्योच्छिष्टलेपस्य स्वेदेहसम्बन्धे अभुञ्जन्नुत्थाय स्नायात् । मोहात् भोजने तु स्नात्वा त्रिशतगायत्रीजपं कुर्यात् । भुञ्जानानां मिथोऽङ्गस्पर्शे तदन्नं त्यक्त्वा स्नानं कार्यम् । मोहात् भोजने गायत्र्यष्टशतं जपेत् । पात्रस्थमन्नादिकं भुक्त्वा ततः स्नात्वा गायत्र्यष्टशतजपः कार्य इति केचित् । भोजनात्परं हस्तक्षालनात् पूर्वं स्पर्शेपि स्नानं कार्यम् । भुञ्जानस्य भुक्त्यनन्तरमकृतहस्तक्षालनस्य वा, अङ्गस्पर्शे स्नानं कार्यम् । तत्स्पृष्टद्वितीयस्याचमनतश्शुद्धिः । उच्छिष्टधारायाः स्वपादैकदेशाद्यवयवसम्बन्धे तावन्मात्रं प्रक्षाल्य भुक्त्वा तत्र त्रिस्रो मृत्तिका देयाः ।

तादृशधाराया: स्ववस्त्रसम्बन्धे अभुञ्जन्नुत्थाय सचेलं स्नायात्। मोहात् भोजने स्नात्वा गायत्र्यष्टशतं जपेत् । एकदिनमुपवासो वा । भोजनपात्रस्योच्छिष्टसम्बन्धे भोक्ता तत्पात्रमस्पृशन्नासीत । अन्य: कश्चन तत्पात्रमन्यत्र नीत्वा तत्स्थलं गोमयेनोपलिप्य पात्रान्तरे अन्नादिकन्निधाय सान्नादिकमेव तत्पात्रं तत्स्थले निक्षिपेत्। भोक्ता तु तत्परिषिच्य भुञ्ज्यात्। नापोशनप्राणाहुती उत्तरापोशनमात्रम्। भोक्त्रा स्पृष्टोच्छिष्टभोजनपात्रश्चेत् हस्तं प्रक्षाल्य पूर्वोक्तक्रमेण निहितमन्नादिकं भुञ्ज्यात्। एवं द्वयोत्रयाणां वा उच्छिष्टधाराया मिथो भोजनपात्रसंसर्गे पूर्वोक्तक्रम एव । केचित् धाराया मिथ: पात्रसंसर्गव्यतिरेकेण अन्यतरपात्रोच्छिष्टस्यान्यतरपात्रपतनेपि उभयोरन्नत्यागमिच्छन्ति । एवं भोक्तु: स्नाननिमित्त उच्छिष्टसम्बन्धव्यतिरेकेण पात्रमात्रोच्छिष्ट-सम्बन्धे सति पूर्वोक्तप्रकारेण कृत्वा भोजनेपि दिवा द्विभोजनसाम्यात् एकभक्तादिदिने तथा भोजननिषेधं वदन्ति । उभयोर्मूलं चिन्त्यम् । भुञ्जान: कश्चिदन्यस्य समीपे भुञ्जानस्य भोजनपात्रमनुच्छिष्टेनापि पाणिना स्पृशेच्चेत्; उभावप्यन्नं विसृजेताम् । तत् कथमिति चेत् भुञ्जानस्योच्चिष्टत्वात् तेन स्पृष्टान्यदीयपात्रस्य दुष्टत्वात्तत्र स्थमन्नादिकं तेन न भोक्तव्यम् । तत्पात्रस्योच्छिष्टत्वात् । तत् स्पृष्टवतोऽन्यस्याशुद्धत्वात् । उभावपि तत्तदन्नं विसृज्य पात्रान्तरनिक्षिप्तमन्नादिकमेव भुञ्जीयाताम् । स्पृशत: पुनर्भोजनं प्रामादिकस्पर्शविषयम् । बुद्धिपूर्वस्पर्शे तु अभुञ्जन्नुत्थाय स्नायात् । परिवेषणकाले दर्व्यादेरुच्छिष्टसम्बन्धे तद्दूरतो निधाय परिवेषक: हस्तं क्षालयेत् । इतरकरधृतं पात्रं भूमौ निधायाचम्य प्रोक्ष्य गृह्णीयात् । गृहीतधौतवस्त्रादे: पुरुषस्योच्छिष्टसम्बन्धे तदनिधायैवाचमनञ्चरेत् । गृहीतमृत्पाषाणभाण्डस्य पुरुषस्योच्छिष्टसम्बन्धे तद्भाण्डं

दूरतस्त्यक्त्वाचामेत् । भोक्तुरागमनात् पूर्वं भोजनपात्रदत्तस्यान्नादे रुच्छिष्टतुल्यत्वम् । प्राणाहुतेः पूर्वं पुनः परिविष्टमन्नं प्राणाहुत्यनन्तर माज्याभिघारितञ्च त्यजेत् । मोहात्तत् भोजने गायत्रीत्रिशतं जपेत् । एकपङ्क्तिप्रविष्टानां भुञ्जतां मध्ये यः कश्चन पूर्वं पूर्वापोशनं पिबेच्चेत् अन्यैस्तत् पङ्क्तिप्रविष्टैस्तदापोशनं विसृज्य पाणिं प्रक्षाल्य पुनरापोशनं कर्तव्यम् । तथा - उत्तरापोशनं पूर्वं कृतश्चेत् तत्पङ्क्तिस्थैरन्यै-र्भोजनपात्रस्थमन्नादिकन्त्याज्यम् । पङ्क्त्यन्तरप्रविष्टानान्न दोषः । यदि कश्चन भुञ्जानेष्वन्येषु बलात् कामाद्वा उत्तरापोशनं कृत्वा वा अकृत्वा वा भुक्तिपात्रन्त्यक्त्वोत्तितष्ठेत तदा तद्भोजनशालास्थैस्सर्वैरपि न भोक्तव्यम् । शालान्तरस्थानान्न दोषः । तस्य भोजनकण्टकस्य प्राजापत्यं प्रायश्चित्तम् । भोजनशालायामेकस्मिन्नप्युच्छिष्टपात्रे स्थिते च्छिलायान्न भोक्तव्यम् । किञ्च एकपङ्क्तौ भुञ्जानः कश्चित् भोजनमध्ये व्याध्यादिवशात् मूत्रपुरीषोत्सर्जनं वमनं वा यदि कुर्यात् तत्पङ्क्तिप्रविष्टैर्न भोक्तव्यम् । तथा पङ्क्तिमध्ये भोक्तृ-व्यतिरेकेणान्योपि बालादिः पुरीषं विसृजेच्चेत्तत् पङ्क्ते? र्दोषः । भोजनकाले अन्यकाले वा हठाज्जलमलस्रावे तद्वस्त्रं परिहृत्यान्यद्वस्त्रं परिधाय स्नात्वा घृतं प्राश्य नूतनयज्ञोपवीतं धरेत् । भोक्तुर्हस्तक्षालनात् पूर्वं वमने गण्डूषमात्रम् । अन्तरं वमने स्नानम् । श्राद्धभोक्तृणामुच्छिष्टवमनविषये कर्तव्यक्रमः श्राद्धप्रयोगे उक्तस्तत्र द्रष्टव्यः । इत्युच्छिष्टविषयः । एवं जात्याश्रयनिमित्तदुष्टमपि वर्जयेत् । किञ्च भक्ष्याभक्ष्यविवेकविस्तारः अनुष्ठानादन्यग्रन्थाच्चावधेयः ।

इत्थमुक्तनियमातिक्रमेण भोजने गायत्रीजपः उपवासः ब्रह्मकूर्चप्राशनञ्च यथानिमित्तं प्रायश्चित्तम् ।

* * *

—भोजननिषेधकालः—

अथ भोजननिषेधकालः । एकादश्यादिव्रतदिनेषु दिवा रात्रं उपरागकाले च प्राप्ताष्टमवर्षो न भुञ्ज्यात् । अर्कवारे पर्वद्वये च रात्रौ चतुर्दश्यष्टम्योर्दिवा न भुञ्ज्यात् । एतदज्जीवपितृकविषयमिति वदन्ति । तथा चतुर्दश्यष्टम्यभोजनवचनं कृष्णाष्टमीचतुर्दशीविषयमिति च ।

अत्र किञ्चिद्विचार्यते । पर्वादिषूक्तमेककालभोजनात्मकमेक-भक्तं किं स्वतन्त्रं - उतोपवासाशक्ताना मुपवासप्रतिनिधितया प्राप्तमिति ।स्वतन्त्रत्वे तासु तिथिषु एकभक्तस्यैव वैधत्वेन श्रवणपर्वकृष्णाष्टम्युपवासविधायक शाण्डिल्यवचनस्यासङ्गतत्वापत्तेः उपवासप्रतिनिधित्वमेव वक्तवम् । एवञ्च अहोरात्रभोजनवर्जनस्यैव उपवासशब्दार्थतया तत्राशक्तानां गौणतया एकभक्तानुष्ठाने उक्तेः अशक्तैरपि तादृशतिथिषु भोजनद्वयत्र कर्तव्यमिति पर्यवसितम् । तथा च अहोरात्रसङ्गतेषु तत्तिथिषु कदा वा अनुकल्पाधिकारिभिर्भोजनं कर्तव्यमिति शङ्कायां 'अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवे'' ति वचनमेव व्यवस्थापकं भवति । तथाचायन्निष्कृष्टार्थः । — पर्वविशिष्टरात्रौ चतुर्दश्यष्टमीविशिष्टेऽह्नि च भोजननिषेधात् तद्व्यतिरिक्तकाले भोजनमनुमतमेव । रात्रावपि भोजनकाले पर्वण्यनागते निवृत्ते वा भोजनस्य न कोपि बाधः । रात्रौ पर्वविशिष्टत्वास्थायां भोजनाभावात् पर्वणि भोजनद्वयाभावाच्च । दिनद्वयेपि रात्रौ भोजनकले पर्वणि विद्यमाने न भोक्तव्यम् । कथमिति चेत् एकादशीजयन्तीव्यतिरिक्तोपवासस्य तिथिसद्भावकाल-कर्तव्यतया उपवासप्रतिनिधिभूतस्य द्वितीयभोजनाभावस्यापि तत्कालकर्तव्यतया पर्वणि द्विभोजने अनुकल्पोपवासस्याप्यसिद्धेः ।

एवमेव दिवाभोजनकाले चतुर्दश्याष्टम्यनागमने तयोर्निवृत्तौ वा भोजनस्य न कापि क्षतिः। दिनद्वयेपि दिवाभोजनकाले तयोस्सत्वे सति न भोक्तव्यमेवेत्यवधेयम्। परन्तु इदानीं कैश्चिच्छिष्टैरनुष्ठीयमानस्य कृष्णाष्टमीचतुर्दश्यो रात्रावभोजनस्य दिवाभोजनस्य च किमपि नियामकन्न पश्यामः। अत्र केचित् - उपवासार्हतिथिषु अशक्तानां भोजनद्वयस्यैव निषिद्धत्वात् दिवारात्रिनियममनङ्गीकृत्य दिवाभोजनाभावे रात्रिभोजनं रात्रिभोजनाभावे दिवाभोजनं कुर्वते। तत्पूर्वोक्तवचन युक्त्यादिविरोधादुपेक्ष्यमित्यलं प्रसक्तानुप्रसक्त्या। एवमन्नश्राद्धदिनस्य पूर्वेद्युः प्रत्याब्दिकश्राद्धस्य परेद्युश्च तिलतर्पणादिरूप सर्वश्राद्धदिने पारणादिने स्थालीपाकस्य पूर्वदिने श्राद्धभोजनस्य परेद्युश्च रात्रौ न भोक्तव्यम्। यस्मिन् काले भोजनं निषिध्यते अन्नश्राद्धदिनभिन्ने तत्र तत्र काले अशक्ताः अव्रतघ्नफलाहारादिकं कुर्युः। तच्च भगवते निवेद्य प्रोक्ष्य भुञ्ज्युः। न परिषेचनापोशन प्राणाहुत्यादि। भोजननिषेधकाले अनिषिद्धेपि भोजनालाभकाले च प्राणाग्निहोत्रमन्त्रजपः कार्यः। कस्मिंश्चिच्छास्त्रीयभोजनकाले लवणादिसंस्कृतान्नमेव भोक्तव्यतया प्राप्तश्चेत् तदा प्राणाहुतिमात्रस्य शुद्धान्नं कल्पनीयम्। अलाभे सति ''शेषिलोपाद्वरं शेषलोप'' इति न्यायेन परिषेचनापोशनपूर्वकं तेनैव प्राणाहुतिः कार्या। यदि कश्चनाशक्तो दिवा द्विभोजनं करोति तदा परिषेचनापोशनादिक मावश्यकं वा न वेति चेत्? अङ्गीभूत तद्भोजनस्यैवाशास्त्रीयत्वात् तदङ्गविधिनिषेधविचारोऽप्रयोजकः। गृहस्थस्य दिवा सकृत् भोजनं रात्रौ च सकृदिति भोजनद्वयस्यैव विहितत्वात् मध्ये शष्कुल्यादि भक्ष्यभक्षणेपि दिवा द्विभोजनदोष इति

वदन्ति । अशक्तानां मध्ये पिष्ट भक्ष्यफलादिभक्षणे तु न दोषः । आद्यन्ताचमनन्तु सर्वत्र कार्यम् । वेत्रचर्मकृते तालपत्रकृते तृणविशेषादिनिर्मिते च पात्रे भक्ष्यादिकन्निधाय न भोक्तव्यम्।

अथोत्तरमाध्याह्निकं कृत्वा भगवन्निवेदित ताम्बूल चर्वणं कुर्यात्।

* * *

—ताम्बूलदानविधिः—

द्विजेभ्य स्ताम्बूलदाने, त्र्यादिकमेव पूगफलं दद्यात्। न पूगद्वयम्। अलाभे एकं वा दद्यात्। प्रातः काले पूगाधिक्यं मध्याह्ने चूर्णाधिक्यं रात्रौ पर्णाधिक्यमित्युक्तक्रमेण वा, यथारुचि वा, ताम्बूलचर्वणं कृत्वा * चामेत् । शङ्खशुक्त्यादिचूर्णमबन्धुगृहचूर्णं च नोपयुञ्ज्यात् । आसीन एव ताम्बूलचर्वणं कुर्यात्। तिष्ठन् शयानो वा न किमपि भक्षयेत्, न किमपि पिबेत् । मोहात्तथा करणे च गायत्र्यष्टशतं जपेत् । ताम्बूलचर्वणकाले भिन्नकाले वा दन्तलग्नवस्त्वपनोदनं कर्तव्यश्चेत् काष्ठतृणादिना शुद्धेन तदपनुद्य तत्तृणादिकं दूरतो विसृज्य मुखं करञ्च प्रक्षाल्याचामेत् । दन्तलग्नवस्तुनः जिह्वास्पर्शाभावे सति शुद्धिरेव । अतस्तत्पतने न दोषः । एवं श्मश्रौ दन्तादिसम्बन्धे पि नाशुद्धिः । परन्तु हस्तेन न स्पृशेत्। स्पर्शे च हस्तं प्रक्षाल्याचामेत्। स्वाध्यायादिसमये मुखकणिकापतने न दोषः । मुखबिन्दोर्देहपतने अम्भसा परिमृज्य करं प्रक्षाल्याचामेत्। अन्यमुखकणिकापतनेपि तथैव कुर्यात्। अन्य-मुखोच्छिष्ट बिन्दुपतने स्नायात्। स्वमुखबिन्धोः भूमौ पतने आचामेत् । श्राद्धदिनेषु व्रतदिनेषु बन्धुमृति शोकदिनेषु च

*एतदाचमनं - इज्यान्ताचमनं, न ताम्बूलचर्वणाङ्गं

गन्धताम्बूलादिकं वर्जयेत्। दर्शादिषु गन्धताम्बूलयोर्न दोष इति धर्मप्रवृत्त्यादिषूक्तम्। तथैव केचनानुतिष्ठन्ति च। यथानुष्ठानं व्यवस्था। इत्थं ताम्बूलचर्वणं कृत्वा इज्यां भगवति समर्पयेत्। केचिदिज्यां समर्प्य स्वाध्यायं सङ्कल्प्य नियमेन पठ्यमानं श्रीमद्रामायणादिकं पठित्वा ततस्ताम्बूलचर्वणं कुर्वन्ति। तथैवोक्तं सच्चरित्रसुधानिधौ। यथानुष्ठानं व्यवस्था। इत्थं तृतीयकाले इज्यां कृत्वा चतुर्थकाले स्वाध्यायं सङ्कल्पयेत्

—पारणाविधिः—

पारणदिनेषु प्रथम द्वितीय तृतीयकालकर्तव्या स्ताम्बूल-चर्वणावसानकेज्यान्तास्सर्वाः क्रियाः प्रातरेव कुर्यात्। पारणे तिलमुद्गक्षारलवणतिंत्रिणीवार्ताकादिकं वर्ज्यम्। प्रयत्नेन तिंत्रिणी वर्जनीया। आमलकागस्त्याच्युत तुलसीमिश्रितां पारणे प्रथमाहुतिं कुर्यात्। भानुवारेपि द्वादशीपारणे आमलकस्य न दोषः। द्वादश्यां प्रातर्हरिवासरे सति तावत्पर्यन्तमिज्या वैश्वदेवान्ताः क्रियाः यथासम्भवं यथाकालं कृत्वा हरिवासरापगोत्तरक्षणे पारणं कुर्यात्।

* * *

—हरिवासः—

हरिवासरस्तु द्वादश्या आद्यः पादः। तस्यैकादशीतुल्यत्वात् न तत्र पारणं कुर्यात्।

* * *

—पारणाकालः—

एवं जयन्त्यादिपारणदिनेष्वपि तिथिनक्षत्र अन्यतरानपगमे सति तदपगमपर्यन्त मुक्तक्रियाः कृत्वा तदपगमे सति पारणं तदैव कुर्यात्।

पारणदिने द्वादश्या आसायं स्थितौ वा, कलामात्रद्वादश्या अभावे वा पारणा प्रातरेव कर्तव्या।

* * *

—साध्यद्वादशीविधिः—

उदयानन्तरं द्वादशीकलामात्रसत्वे अरुणोदय एव होमादि वैश्वदेवान्ताः क्रियाः कृत्वा द्वादशी यावन्नपैति तावत् शीघ्रं पारणं कुर्यात्। तदा माध्याह्निके सूर्यावलोकनं दीपावलोकनमेव।

एवं खिन्नवृत्तितया पारतन्त्र्यात् अगत्यन्तरकार्यवशाद्वा - तृतीयकाले इज्याकरणासम्भवे उपादानकाले अभिगमनकाले वा उपादानात् पूर्वमेव भगवदाराधनान्तसर्वकर्माणि कृत्वा भुक्त्वा सङ्ग्रहेण स्वाध्यायमपि सङ्कल्पपूर्वकं कृत्वा स्वकार्यं कुर्वीत। एवं द्वादश्यादिदिनेषु प्रातर्भोजने कृते उपादानकाले द्रव्यार्जनं कर्तव्यं चेत् इज्यापूर्वकालीनत्वादुपादानस्य आराधनात् पूर्वमेवोपादानं सङ्कल्प्य तत्सङ्ग्रहतः कृत्वा आराधनभोजनानन्तरं आर्जितं वस्तु परेद्युरुपादानकाले सङ्कल्प्य गृह्णीयात्। एवमिज्यान्ते कर्मसु प्रातरेव कृतेषु सत्सु द्वितीयतृतीयादिकं कालं स्वाध्याययोगौ समास्कन्दतः। सर्वकर्मापेक्षया योगाख्यं कर्मैव मुख्यम्। अत एवेतरकालेष्वप्यवकाशे सति अच्छिद्रपञ्चकालपरायणानां योग एव विहितः। योगापेक्षयात्विज्यैव प्रधानतमा। तस्माद्योगादिकालेषु विशेषाराधननिमित्तसम्भवे योगादिसङ्कोचेन इज्यैव कर्तव्यतयोच्यत इत्यलं विस्तरेण।

* * *

—स्वाध्यायविधिः—

चतुर्थकाले स्वाध्यायं सङ्कल्प्य, यथाशक्त्यष्टाक्षर द्वादशाक्षरजपपूर्वकमितिहासपुराणपठनं वेदशास्त्राभ्यासं तदर्थप्रवचनं सत्काव्यपरिचयं पूर्वाचार्योक्त द्राविडगीर्वाणप्रबन्धाध्ययनाध्यापन तदर्थप्रवचनादिकं, सात्विकग्रन्थनिर्माणं, सद्ग्रन्थलेखनं च, यथाधिकारं कुर्यात् । स्वयं रहस्यार्थगृहीता चेत् ज्ञातॄन् प्रणम्य तदर्थं तदुक्तं भक्तिश्रद्धापूर्वकं गृह्णीयात्। तत्र किञ्चिन्मनसोऽसमाधाने कालान्तरे वा तदा वा शनैस्तदसमाधानहेतुं विज्ञाप्य, तदुक्तार्थवैशद्येन समाहितमना भूयात्। हठात् कमप्यर्थन्न पृच्छेत्। स्वयं यत्र विशेषार्थग्रहणं करोति तत्र सर्वत्र गुरुभावेनावर्तेत । तेषां नामकथनं, तत्समीपे आसनशयनपाद प्रसारणानि, तदागमने अनुत्थानं, तैस्सह समानदेशोपवेशनं, तन्निन्दाश्रवणं, तत्समीपे अन्यस्तुतिश्च वर्जयित्वा तेषु यावज्जीवं कृतज्ञो वर्तेत । गुरुव्यतिरिक्तब्रह्मविद्विषयेपि यथार्हमुक्तधर्मविशिष्टो वर्तेत । स्वयं उपदेष्टा चेत् शिष्यस्य गुणपूर्तिं ज्ञात्वा, स्वाचार्योपदेश तत्प्रभाव प्रकटनपूर्वकं तस्मा उपदिशेत् । उपदेशयोग्यपात्रलाभे सति नार्थं गोपयेत्। गूढार्थान् झटिति न प्रकाशयेत् । यदि कश्चन स्वाज्ञातोप्यर्थस्तेनोच्येत, तस्यौचित्ये सति सन्तुष्येत् । नासूयादिना अपलपेत् । शिष्यस्याप्यतीव त्वंकारहुंकारादिना न परिभवं कुर्यात् । ख्यातिलाभपूजाद्यर्थं कमप्यर्थं कस्मैचनापि न वदेत्।

* * *

—साधुसमागमविषयः—

जपस्वाध्यायादिसमये साधुसमागमे सति तान् प्रणम्य स्वागतादिना उपचरित्वा तदनुज्ञया जपादिशेषं कुर्यात्। गुरून् विना

किमपि निम्नोन्नतदेशगतन्न प्रणमेत्। गुरुन्तून्नतदेशगतं स्वयं निम्नस्थः प्रणमेत्। साधुसमागमने स्वयमासीनो न वर्तेत। उत्थाय तदासनाय देशं परिष्कृत्य तदुपवेशनं प्रार्थ्य तदुपवेशनानन्तरं स्वयमासीत। स्वाध्यायकाले साधुभिस्सह सल्लपेत्। तेष्वपार्थकथनं, अतिवादं, परिहासं, केवलतर्काटोपञ्च वर्जयेत्। आचार्यप्राचार्यसन्निपाते प्राचार्यं प्रथममुपचरित्वा तत आचार्यमुपचरेत्। आचार्यभागवतसन्निपाते पूर्वमाचार्यस्य ततो भागवतस्य। भागवतैस्सह सम्भाषमाणो न हठात् कार्यान्तराय गच्छेत्। भगवदुत्सवे अनुयात्रां कुर्वन् मध्ये सन्ध्याकालाद्यतिक्रमभयेन तदर्थन्न गच्छेत्। नित्यकर्म-विरोधेनान्यत्रोत्सवसेवार्थन्न गच्छेत्। भागवतैस्सम्भाषणस्य कर्मानुष्ठान कालातिक्रमेपि न दोषः। ब्रह्मविदपचारं सर्वथा परिहरेत्। मोहाज्ज्ञाते सद्य एव क्षापणादिना तं परिहरेत्।

* * *

—द्रव्यार्जनादिविधिः—

अपूर्णवृत्तिश्चेत् स्वाध्यायकाले यथासम्भवमुक्तशास्त्रभ्यासादिकं कृत्वा क्षेत्रसस्याद्यवलोकने वस्त्वर्जने च व्याप्रियेत्। शक्तौ सत्यां न वृथा स्वाध्यायसङ्कोचं कुर्यात्। अप्रयत्नागतेनाल्पेनापि सन्तुष्येत्। अत्याशया असाध्येष्वतिप्रयत्नं न कुर्यात्। ग्रामाधिपत्यालयाधिकार पौरोहित्यादौ न रुचिं कुर्यात्। व्यर्थकालयापनं, वृथा लौकिकसल्लापं, पैशुन्यं, कलहं, महद्भिर्विरोधं, अल्पप्रयोजनाधिकव्ययं, अल्पलाभकृते बन्धुविरोधं, येन केनापि विद्वेषं, स्त्रीजनसहवासं, तत्सल्लापं, तद्विरोधं, द्यूतादिकञ्च परित्यजेत्। बुद्धरुद्रादिस्थलं कटवीं राजधानीं च न गच्छेत्। वस्त्रेण कण्ठवेष्टनं बाहुबन्धं पश्चात्पाणियुगलबन्धादिकं

तृणच्छेदजलताडनाङ्गताडनाङ्गचेष्टादिकं च परित्यजेत् । शूद्रचण्डालसंभाषण तत्सहवासादिकं परित्यजेत्। शूद्रमपि भगवद्भक्तं यथायोग्यमुपचरेत्।

* * *

—योगविधिः—

अथाह्निकोक्तक्रमेण बहिर्जले सायं सन्ध्यां होमाराधन वैश्वदेवादिकं कुर्यात् । रात्रौ बलिहरणं पञ्चमहायज्ञाचरणञ्च नास्ति । केचित् बलिहरणं कुर्वन्ति। ततः पूर्वोक्त नियमविशिष्टो भोजनं कुर्यात्। सन्ध्याकाले भोजनं मैथुनं निद्राञ्च त्यजेत्। रात्रौ यामादूर्ध्वन्न भुञ्जीत। उपरागाद्युपाधिवशात्तत्काले भोजनासम्भवे अर्धरात्रादर्वाक् भुञ्जीत । तदूर्ध्वन्तु न भुञ्जीत । रात्रौ गोमयाम्बुभिर्गृहसेकं गोमयाहरणं दण्डं विना गृहात् बहिर्गमनं वनसञ्चारं असहायगमनं शून्यागारे वृक्षाधः प्रदेशे च शयनं देवागारशयनञ्च परित्यजेत्। एवं भुक्त्वा यथाशक्ति स्वाध्यायं चरित्वा स्वाध्यायकर्म भगवते समर्प्य योगं सङ्कल्प्याह्निकोक्तक्रमेण यथाशक्ति भगवन्तं ध्यात्वा निद्रागमे शयीत । जंत्वाद्यधिष्ठितं पर्यङ्कं शनैस्सन्ताड्य संशोध्य परिष्कृत्य खट्वायां भूमौ वा प्रसार्य स्वगृहे प्राक्शिराः पथि प्रत्यक्शिराः श्वशुरगृहे अन्यगृहे च दक्षिणशिराः सर्वत्रानुदक्शिरा वा शयीत, पत्नीव्यतिरिक्तस्त्रिया सहैकस्थले न शयीत।

* * *

—पत्नीसम्भोगविधिः—

सम्भोगेच्छा चेत्स्वस्थचित्तया अरोगया पत्न्या सह स्वयमपि

तादृशः संश्लिष्येत् । प्राप्ताष्टममासया गर्भिण्या संश्लेषो न युक्तः । रजः प्रादुर्भावप्रभृति षोडशरात्रयः ऋतुकालः । तत्राद्यं रात्रिचतुष्टं विहाय शिष्टासु रात्रिषु व्रतदिनं श्राद्धदिनञ्च विहाय सम्भोगं कुर्यात् । तथा षष्ठ्यष्टमीचतुर्दशीसङ्क्रान्तिव्यतीपातजन्मर्क्षबुधवारेषु न सम्भोगं कुर्यात्। प्रवासादागतस्य एतेषु न दोषः, अनिषिद्धे पञ्चमदिने ऋतुस्नातया पत्न्या अवश्यं सम्भोगः कार्यः, अन्यथा महान् दोषः, पुत्रे जाते त्वसम्भोगेपि न दोषः, पूर्वोक्तऋतुकालभिन्नदिनेषु अनिषिद्धेषु पत्न्या अपेक्षितश्चेत् गच्छेत् । ऋतुकाले उपवीत्यैव संभोगः । तद्भिन्नकाले पश्चात् भागगतेन निवीतेन सम्भोगः कार्यः । अर्धरात्रात् पूर्वमेव सम्भोगो युक्तः । एकस्यां रात्रौ सकृदेव संश्लिष्येत् । पत्नीद्वयवांश्चेत् अवैषम्येण तत्तदिच्छानुगुणमेकैकस्यां रात्रौ एकैकया संश्लिष्येत् । इत्थं सम्भोगे कृते पतिपत्न्योरुभयोरपि मूत्रद्विगुणं शौचः कार्यः । ततश्शौचं कृत्वा पृथक् शय्यायां शयानो निद्रामनुभवेत् । सुस्वप्ने दृष्टे मातृपितृभगिनी पत्नीव्यतिरिक्तजनेषु न कथयेत् । दुस्स्वप्ने दृष्टे उत्थाय पाणिपादौ प्रक्षाल्याचम्य तद्दोषपरिहारार्थं भगवन्नाम सङ्कीर्तन स्तोत्रजपादिकं कृत्वा प्रातःकाले जनेषु दुस्स्वप्नं कथयेत् । मध्ये निद्राविच्छेदे सति तदा तदा योगमेव यथाशक्ति कुर्यात् । पुनश्च निद्रागमे शयीत । ब्राह्मे मुहूर्ते अवश्यमुत्थाय यथापूर्वं कर्माणि कुर्यात् । इति पञ्चकालविधौ वक्तव्यशेषस्समाप्तः ।

इत्थं यथामत्यनेकग्रन्थान् संशोध्य स्वकपोलकल्पनवर्जमन्यूनातिरिक्तं मया रचितेऽत्र ग्रन्थे यदि बुद्धिमोहादिवशात् स्खालित्यं साधव एव तत्क्रोडीकुर्वन्त्विति प्रार्थये ।

स्त्रीधर्मविधवाधर्मादिकं त्वस्मदुक्तग्रन्थान्तरे अवधेयमित्यलं विस्तरेण।

इति रामभद्रविरचिते आह्निकशेषग्रन्थः

* * *

हरिः ओम्।

Printed at : VKN Enterprises, Ph: 2 495 0775, 98402 17036